SRI HARSHA'S

NAISHADHAM

WITH

The Commentary of Mallinatha



part I. (SARGAS I - VI).



नैषधकाव्यरत्नम्

पदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्याय

कोलचलमल्लिनाथसूरिविरचितजीवातुसमाख्यव्याख्यासहितम् ।



PUBLISHED BY

...MANYA VADHYAR,

Publisher, Ramanathapuram, Palghat



TRICHINOPOLY:

ST. JOSEPH'S INDUSTRIAL SCHOOL PRESS.

—

[illegible]-0]   1916.   [Postage: Extra.

श्रीगीर्वाणवाणीपुस्तकालये

विक्रेयसंस्कृतकाव्यपुस्तकानि

	अच्युतरायाभ्युदयकाव्यम्—सर्गषट्कम् ...	1	0	0
	अमरुशतकम्	0	10	0
	„ in Grandha	0	3	0
1.	ऋतुसंहारम्—मूलमात्रम्	0	3	0
2.	„ सटीका	0	4	0
3.	„ „ with Eng. Notes ...	0	6	0
4.	„ Eng. Translation ...	0	12	0
	कथासरित्सागरम्	5	0	0
	कादम्बरीकथासारम्	0	8	0
	किरातार्जुनीयम्—सटीकम्	1	8	0
	„ Eng. Translation 1-10 cantos.	2	0	0
1.	कुमारसम्भवम्—सटीकम्	1	0	[illegible]
2.	„ in Grandha (1-8 sargas) ...	0	6	0
3.	„ „ Glazed ...	0	7	0
4.	„ „ Superior glazed .	0	10	0
5.	„ in Telugu	0	12	0
6.	„ in Malayalam	1	0	0

R. Subrahmanya Vadhiar, Bookseller & Publisher,
Palghat, (Malabar).

SRI HARSHA'S



NAISHADHAM

WITH

The Commentary of Mallinatha

part - I.

(SARGAS I - VI).

नैषधकाव्यरत्नम्

पदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्याय

कोलचलमल्लिनाथसूरिविरचितजीवातुसमाख्यव्याख्यासहितम् ।

PUBLISHED BY

R. SUBRAMANYA VADHYAR,

Bookseller & Publisher Ramanathapuram, PALGHAT.

TRICHINOPOLY:

ST. JOSEPH'S INDUSTRIAL SCHOOL PRESS.

1916.

॥ श्रीरस्तु ॥

जीवातुसमाख्याव्याख्यासहितं

॥ नैषधकाव्यरत्नम् ॥

प्रथमः सर्गः ।

निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधास्सुधामपि ।
नलस्सितच्छत्रितकीर्तिमण्डलस्स राशिरासीन्महसां महोज्ज्वलः ॥

"इन्दीवरदलश्याममिन्दिरानन्दकन्दलम् । वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥ अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् । तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥" अथ तत्रभवान् श्रीहर्षकविः — 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥' इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयस्साधनतां काव्यालापांश्च वर्जयेदिति तन्निषेधस्यासत्काव्यविषयतां च पश्यन् नैषधाख्यं महाकाव्यं चिकीर्षुः चिकीर्षिताविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षण-फलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याशीराद्यन्य-तमस्य प्रबन्धमुखलक्षणत्वाच्च कथानायकस्य राज्ञो नलस्य भूतिलक्षणं परम-मङ्गल वस्तु निर्दिशति—**निपीयेति** ॥ क्षितिरक्षिणः क्ष्मापालस्य यस्य नलस्य कथा उपाख्यानानि, निपीय नितरामास्वाद्य । "पीङस्समासेक्तो ल्यप्" इति

रसैः कथा यस्य सुधावधीरिणी नलस्स भूजानिरभूद्गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः ॥ २ ॥

ल्यबादेशः । "न ल्यपि" इतीत्त्वप्रतिषेधान्नेत्त्वम् । "सुधास्तज्ज्ञास्सुराश्च" । 'ज्ञातृ चान्द्रि सुरा सुधा' इति क्षीरस्वामी । सुधामपि तथा यथैतत् कथा इत्यर्थः । नाद्रियन्ते न रोचन्त इत्यर्थः । अमृतादतिरिच्यन्ते रसैस्तत् कथा इति भावः। सितच्छत्रं कृतं सितच्छत्रितं श्वेतातपत्रीकृतमित्यर्थः । "तत्करोति" इति ण्यन्तात् कर्मणि क्तः । तत् कीर्तिमण्डलं यस्य सः महसां तेजसां राशिः रविरिव तेजस्वीत्यर्थः । महैरुत्सवैरुज्ज्वलः प्रकाशमानः, नित्यमहोत्सव शालीत्यर्थः । 'मह उद्धव उत्सवः' इत्यमरः । एतेन समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारो व्यज्यते । नलो नलाख्यः, स राजा आसीत् अस्ति स्म । अत्र सुधाया अनादरासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । महसां राशिरिति तेजस्तद्वतोरभेदोक्तेर्भेदेऽप्यभेदरूपातिशयोक्तिः । कीर्तिमण्डले सितच्छत्रत्वनिरूपणात् रूपकालङ्कार इति त्रयाणां संसृष्टिः । अस्मिन्सर्गे वंशस्थवृत्तम् । 'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात् ॥ १ ॥

अथ तस्य गुणवर्णनायोपोद्घातत्वेन सामान्यतः गुणाढ्यत्वं तावदाह— **रसैरिति** ॥ यस्य नलस्य, कथा, रसैः स्वादैः । 'रसो गन्धे रसे स्वादे' इति विश्वः । सुधामवधीरयति तिरस्करोतीति सुधावधीरिणी । अमृतादतिरिच्यमानत्वादित्यतिशयोक्तिः । "ताच्छील्ये णिनिः" । भूर्जाया यस्य सः भूजानिः, भूमेरेकाधिराडित्यर्थः । "जायाया निङ्" इति बहुव्रीहौ जायाशब्दस्य निङादेशः। स नलः गुणैः पुण्यश्लोकत्वादिभिरद्भुतोऽभूत् । अत्र नलस्य पूर्वश्लोकोक्तसत्तानुवादेन गुणाढ्यत्वविधेर्न पौनरुक्त्यम् । कथं भूतः सुवर्णदण्डश्च एकसितातपत्रञ्च ते कृते तथोक्ते । द्वन्द्वात् "तत्करोति" इति ण्यन्तात् कर्मणि क्तः । सुवर्णदण्डैकसितातपत्रिते, ज्वलत्प्रतापावलिः कीर्तिमण्डलञ्च ते येन स तथोक्तः अप्रतिहतकीर्तिप्रताप इत्यर्थः । अत्रावलिमण्डलशब्दौ प्रतापकीर्त्योर्दण्डत्वातपत्रत्वरूपण-

पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा ।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥ ३ ॥

अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्दशत्वं कृतवान् कुतस्स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥

योगार्थम् । इह कीर्तेरातपत्रत्वरूपणं पूर्वश्लोकोक्तमपि सुवर्णदण्डवैशिष्ट्यादस्या-द्वैपूर्वत्वाद्वैचित्र्यविशेषः । प्रतापकीर्त्योर्यथासङ्ख्यं सुवर्णदण्डत्वसितातपत्रत्व-रूपणाद्यथासङ्ख्यरूपकातिशयोक्तीनां संसृष्टिः ॥ २ ॥

कविः काव्यवर्णनायकस्योत्कर्षमावहन् सम्प्रति स्वविनयमाविष्करोति—**पवित्रमिति** ॥ अत्र युगे अस्मिन् कलियुगे, तस्य नलस्य कथा तत्कथा, स्मृता सती जगत् लोकम् । रसक्षालनयेव अम्बुक्षालनयेवेत्युत्प्रेक्षा । 'देहधात्वम्बुपारदाः' इति रसशब्दार्थोक्तौ विश्वः । पवित्रमातनुते शुभ्रं करोति । सा तत्कथा आविलां कलुषामपि । स्वसेविनीमिव स्वं सेवमानाम्, निरन्तर-कीर्तनपरामित्यर्थः । मद्गिरं कथं न पवित्रयिष्यति, पवित्रां करिष्यत्येवेत्यर्थः । "कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं कलि-नाशनम्" इति स्मरणादिति भावः । या स्मृतिमात्रेण शोधनी सा कीर्तनात् किमुतेति कैमुत्यन्यायेन शोधकत्वोक्तेरर्थापत्तिरलङ्कारः । 'एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथा भवेत् । कैमुत्यन्यायतस्सा स्यादर्थापत्तिरलङ्क्रिया ॥' इति लक्षणात् ॥ ३ ॥

अथास्य पूर्वोक्तगुणाद्भुतत्वं प्रपञ्चयति—**अधीति** ॥ अयं नलः चतुर्दशसु विद्यासु, वेदवेदाङ्गादिषु । 'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश' इति स्मरणादिति भावः । अधीति-रध्ययनम् । बोधोऽर्थावगतिः । आचरणं तदर्थानुष्ठानं प्रचारणमध्यापनं तैश्चतु-र्भिरुपाधिभिर्विशेषणैः । 'उपाधिर्धर्मचिन्तायां कैतवेऽपि विशेषणे' इति

अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम् ।
अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम् ॥ ५ ॥

विश्वः । चतस्रः दशाः अवस्थाः प्रणयन् प्रापयन् अर्थाद्विद्यानामेव कर्मत्वं आधारत्वन्तु वक्ष्यमाणचतुर्दशत्वधर्मापेक्षयेति विवेकः । चतस्रो दशा अवस्था यासां तासां भावश्चतुर्दशत्वम् । "त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः" इति स्त्रियाः पुंवद्भावः । संज्ञाजातिव्यतिरिक्ताश्च गुणवचना इति सम्प्रदायः । चतुर्दशसङ्ख्याकत्वं गम्यते । तदभेदाध्यवसायेन विरोधमाभासयति । कुतः कथं वा स्वयं कृतवान् न वेद्मि तत्करणं दुर्विज्ञेयमित्यर्थः । स्वतः सिद्धस्य स्वयं करणं कथं पिष्टपेषणादित्येको विरोधः । चतुर्दशानां चतुर्थावृत्तौ षट्पञ्चाशतः कथं चतुर्दशत्वमित्यपरः । चतुरवस्थापरत्वेन तत्परिहारात् विरोधाभासोऽलङ्कारः । 'आभासत्वे विरोधस्य विरोधाभास उच्यते' इति लक्षणात् । फलनदर्थविबोधपर्यन्तोऽस्य विद्यापरिश्रम इति भावः ॥ ४ ॥

अमुष्येति ॥ अमुष्य नलस्य रसनाग्रनर्तकी रसनाग्रसञ्चारिणीत्यर्थः । शिल्पिनि ष्वुन् "षिद्गौरादिभ्यश्च" इति ङीष् । सा विद्या सूर्दविद्येत्यर्थः । अस्याश्च रसनेन्द्रियग्राह्यार्थप्रतिपादकत्वाद्रसनाग्रनर्तकीति व्यपदेशः । त्रयीव त्रिवेद इव । 'इति वेदास्त्रयस्त्रयी' इत्यमरः । अङ्गानाम् अङ्गभूतानाम् रसानां षण्णां गुणेन । उल्बणानुल्बणसमासरूपेण त्रिविधेन धर्मेण, अन्यत्राङ्गानां षण्णां निरुक्तादीनां गुणेन आवृत्त्या विस्तरं प्रपञ्चं नीता सती, नवानां द्वयं लक्षणया नवकद्वयम्, अष्टादशेत्यर्थः । तस्य द्वीपानां याः । पृथग्भूता जयश्रियस्तासां जिगीषया जेतुमिच्छयेवेत्यर्थः । व्यञ्जकाप्रयोगाद्गम्योत्प्रेक्षा । अष्टादशताम् । अगाहत अभजत । विद्यापक्षे षण्णां रसानामुक्तरीत्या त्रैगुण्यात्, त्रयीपक्षे तु एकैकवेदस्यैकैकाङ्गवैशिष्ट्येन षाड्गुण्यादष्टादशत्वलाभः ' विद्या ह्यष्टादशस्मृता ' इति स्मरणात् । अङ्गविद्यागुणेन त्रय्या अष्टादशत्वमिति । उपाध्यायविश्वेश्वरभट्टारकव्याख्याने तु 'अङ्गानि वेदाश्चत्वारः' इत्यथर्वणस्य पृथग्वेदत्वे त्रयीत्वहानिः । त्रय्यन्तर्भावे तु 'नाष्टादशत्वसिद्धिः' इति चिन्त्यम् । उपमोत्प्रेक्षयोस्संसृष्टिः ॥ ५ ॥

दिगीशवृन्दांशविभूतिरीशिता दिशां सकामप्रसभावरोधिनीम् ।
बभार शास्त्राणि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्वबोधिकाम् ॥६

पदैश्चतुर्भिस्सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे ।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन् दधावधर्मोऽपि कृशस्तपस्विताम् ॥

दिगीशेति ॥ दिगीशवृन्दस्य इन्द्रादिदिक्पालकसङ्घस्य अंशा मात्रास्तेषां विभूतिर्महिमा । अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृप इति स्मरणादिति भावः । अत्र नलस्य विभूतिभेदेऽप्यभेदोक्तेरतिशयोक्तिः । दिशामीशिता दिशामिति बहुवचनात् इन्द्रादीनामेकैकदिगीशत्वम् । नलस्य सर्वदिगीशत्वमिति व्यतिरेको व्यज्यते । स नलः कामस्येच्छायाः प्रसभं बलात्कारमवरुणद्धीति तथोक्ताम् । स्वेच्छाप्रवृत्तिनिरोधिकामित्यर्थः । अन्यत्र कन्दर्पघ्नीमित्यर्थः । निजभालीय यत् त्रिनेत्रावतरत्वं दिगीशांशप्रभवत्वप्रयुक्तमीश्वरावतारत्वम् । तस्य बोधिकां ज्ञापिकाम् । तृतीयस्य ईश्वरलक्षणत्वादिति भावः । अत्र "कर्तरि च" इति कृद्योगलक्षणसमासस्यैव निषेधाच्छेषषष्ठीसमासः । "तत्प्रयुक्तम्" इति सूत्रकारादिप्रयोगदर्शनाद्वा । शास्त्राणि श्रुतिस्मृत्यादीनि, द्वयाधिकां तृतीयां दृशमिति रूपकं बभार । ईश्वरांशत्वं सिद्धमित्यर्थः । निशालाक्षोऽपि शास्त्रैरेव चक्षुष्मानासीदिति भावः । अवतर इत्यत्र "ऋदोः" इति अप्प्रत्ययस्तेन तरशब्देनावशब्दस्य "सुप् सुपा" इति समासः । न तूपसृष्टात्प्रत्ययोत्पत्तिः । "अवे तॄस्त्रोर्घञ्" इति घञ्प्रत्ययस्स्यात् । गाते तु तस्मिन्नवतार इति स्यात् । अत्रोक्तयोः रूपकातिशयोक्त्योस्संसृष्टिः ॥ ६ ॥

पदैरिति ॥ अमुना नलेन कृते कृतयुगे धर्मस्य वृषरूपत्वाच्चतुर्भिः पदैः चरणैस्तुर्यभागैश्च सुकृते स्थिरीकृते सति तपः के न प्रपेदिरे । सर्वेऽपि प्राप्ता एवेत्यर्थः । कुतः यत् यस्मात् अधर्मोऽपि कृशस्सन् एकांघ्रेः एकपादस्य कनिष्ठया अङ्गुल्या भुवं स्पृशन् । कृतेऽप्यधर्मस्य लेशतस्सम्भवादंशेन स्पृशतीत्यर्थः । तपस्वितां तापसत्वं दीनत्वं च दधौ । 'मुनि दीनौ तपस्विनौ' इति

यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम ।
तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ ॥८॥

स्फुरद्धनुर्निस्वनतद्घनाशुगप्रगल्भवृष्टिव्ययितस्य सङ्गरे ।
निजस्य तेजश्शिखिनः परश्शता वितेनुरिङ्गालमिवायशः परे ॥ ९

विधः । अस्य शासनादधर्मोऽपि धार्मिकोऽभूत् । किमुतान्य इति भावः । अत एवार्थापत्तिरलङ्कारः । तेन धर्मोऽपि धार्मिको भवतीति विरोधो व्यज्यते ॥ ७ ॥

यदिति ॥ यस्य नलस्य यात्रासु बलोद्धतं सैन्योत्थितं स्फुरतः प्रतापस्यैवानलस्य यो धूमस्तस्येव मञ्जिमा मञ्जुलत्वं यस्य तत्तथोक्तम् । सप्तम्युपमानेत्यादिना बहुव्रीहिः । मञ्जुशब्दादिमनिच् । यद्रजः तदेव गत्वा सुधाम्बुधौ पतितं सत् पङ्कीभवत् द्रवद्रव्यमेलनात् पङ्कीभूतम् । विधौ चन्द्रे अङ्कतां कलङ्कत्वं दधाति । पङ्कादुत्पन्नः पङ्किलो भवति पङ्किलत्वं चास्यान्यथा न सम्भवेदिति भावः । रूपकसंसृष्टा गम्योत्प्रेक्षा ॥ ८ ॥

स्फुरदिति ॥ सङ्गरे युद्धे शतात्परे परश्शता अपरिमिता इत्यर्थः । पञ्चमीति योगविभागात् समासः । राजदन्तादित्वादुपसर्जनस्य परनिपातः, पारस्करादित्वात्सुडागमः । परे शत्रवः स्फुरन्तौ धनुर्निस्वनौ निजचापतद्घोषावेव इन्द्रचापगर्जिते यस्य स तथोक्तः, स चासौ घनस्तद्घनः स नल एव घनस्तस्याशुगानां प्रगल्भवृष्टिर्महावृष्टिः । सैवाशुगेन वायुना प्रगल्भवृष्टिः । 'आशुगौ वायुविशिखौ' इत्यमरः । तया व्ययितस्य निर्वापितस्य विपूर्वादयः कर्मणि क्तः । निजस्य तेजश्शिखिनः प्रतापाग्नेरिङ्गालमङ्गारमिवेत्युत्प्रेक्षा । देश्यशब्दोऽयं अयशोपकीर्ति वितेनुः 'अयशः श्यामम्' इति कविप्रसिद्धिः । असपत्नोऽयमिति भावः । रूपकोत्प्रेक्षयोः सङ्करः ॥ ९ ॥

अनल्पदग्धारिपुरानलोज्ज्वलैर्निजप्रतापैर्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः ॥ १० ॥

निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः ।
न तत्यजुर्नूनमनन्यसंश्रयाः प्रतीपभूपालमृगीदृशां दृशः ॥ ११ ॥

सितांशुवर्णैर्वयति स्म तद्गुणैर्महासिवेम्नस्सहकृत्वरी बहुम् ।
दिगङ्गनाङ्गावरणं रणाङ्गणे यशःपटं तद्भटचातुरीतुरी ॥ १२ ॥

अनल्पेति ॥ राज्ञो हन्तीति राजघः, शत्रुघातीत्यर्थः । 'राजघ उपसंख्यानम्' इति निपातः । स नलः अनल्पदग्धान्यरिपुराणि यैस्ते अनल्पदग्धारिपुराः, अत एव अनलवदुज्ज्वला अनलायमानास्तैर्निजप्रतापैरेव जयाय सृष्टया नीराजनया आरार्तिकया ज्वलद्दीप्यमान भुवोवलयं प्रदक्षिणीकृत्य प्रदक्षिणं परिभ्रम्य रराज । अत्र ज्वलत्प्रतापानलो नलः दिग्जैत्रयात्रां प्राच्यादिप्रादक्षिण्येन भूमण्डलं परिभ्रमन् निजप्रतापनीराजनया भूदेवतां नीराजयन्निव रराजेत्युत्प्रेक्षा । सा च व्यञ्जकाप्रयोगाद्गम्या । किञ्च प्रतापानलैर्नीराजनयेति प्रतापानलस्य नीराजनत्वरूपणमर्थादरिपुराणां वर्तित्वरूपणगमकमित्येकदेशवर्ति तदुत्थापिता चेयमुत्प्रेक्षेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ १० ॥

निवारिता इति ॥ तेन नलेन । निरीतिभावम् ईतिबाधाराहित्यं गमिते अखिले महीतले । निवारिता निष्कासिता अपि शरणं गता, अतिवृष्टयः अनन्यसंश्रया आश्रयान्तरशून्याः सन्त्यः प्रतीपभूपालमृगीदृशाम् शत्रुवधूनां दृशः चक्षूंषि न तत्यजुः । यथा निष्कासिता अपि शरणङ्गतास्तत्रैव तदाश्रया कुत्रचित्तिष्ठन्ति तद्वदित्यर्थः । नूनमित्युत्प्रेक्षा । अरिवधात्तन्नार्यो निरन्तरं रुदन्तीति भावः । 'अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः' इति ॥ ११ ॥

सितांशुवर्णैरिति ॥ महासिरेव वेमा वायदण्डः । 'पुंसि वेमा वायदण्डः' इत्यमरः । तस्य सहकृत्वरी सहकारिणी । 'सहे च' इति करोतेः

प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता ।
अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तत ॥ १३॥

तदोजसस्तद्यशसस्स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥

क्वनिप् प्रत्ययः । "वनोरच" इति ङीप् रेफश्च । तस्य नलस्य भटानां चातुरी चातुर्यं सैव तुरी वयनसाधनविशेषस्सैव कर्त्री सितांशोः चन्द्रस्येव सवर्णो येषां तैः शुभ्रैरित्यर्थः । अन्यत्र सिताः शुक्ला अंशूनामवयवानां वर्णाः कारणत्वेन येषां तैः कारणगुणपूर्वकैरित्यर्थः । तद्गुणैः तस्य नलस्य गुणैः शौर्यधैर्यादिभिः तैरेव गुणैः तन्तुभिः श्लिष्टरूपकम् । दिशामेवाङ्गनानाम् अङ्गावरणं गात्रसंवरणं, बहु महान्तं यश एव पटं रणाङ्गणे, वयति स्म ततान । रूपकालङ्कारः ॥ १२ ॥

प्रतीपभूपैरिति ॥ प्रतीपभूपैः प्रतिपक्षराजैरिव, विरुद्धधर्मैः सहानवस्थायिधर्मैरपि, ततो नलाद्भिया भयेन भेत्तृता स्वाश्रयभेदकत्वमुज्झिता त्यक्ता। किं कुतो, यत् यस्मात्, स नलः, ओजसा तेजसा, मित्रजित् सूर्यजिदपि, अमित्रजिन्मित्रजिश्च भवतीति विरोधः, शत्रुजिदित्यविरोधः । 'चारदृक् राजानश्चारचक्षुषः' इति शास्त्रात् । गूढचारचक्षुरपि । विचारदृक् चारदृक् न भवतीति विरोधः, विचारेण पश्यतीत्यविरोधः । अवर्तत । अपिर्विरोधे । अत एवायं विरोधाभासोऽलङ्कारः । एतदुपजीवनेन विरुद्धधर्माणां स्वाश्रयभेदकत्वाभावोत्प्रेक्षा। सा च प्रतीपभूपैरिवेत्युपमानुप्राणितेति त्रयाणां सङ्करः ॥ १३ ॥

तदोजस इति ॥ तदोजसस्तत्प्रतापस्य तद्यशसः । स्थितौ सत्यां तयोः स्थितयोरित्यर्थः । इमौ वक्ष्यमाणौ भानुश्च विधुश्च वृथा व्यर्थाविति यदा यदा चित्ते कुरुते अनुसन्धत्ते । तदा तदा तदेत्यर्थः । परिवेषस्य कादाचित्कत्वादिति भावः । विधिर्विधाता भानोर्विधोरपि परिवेषस्य परिधेः कैतवान्मिषात् । 'परिवेषस्तु परिधिः' इत्यमरः । कुण्डलनां कुण्डलरेखां तनोति यथा लिखन्तोऽधिकाक्षरवर्जनायेति भावः । विजितचन्द्रार्कौ तस्य कीर्तिप्रतापा-

अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।
मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नलः ॥१५॥

विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराश्शिरस्स्थितम् ॥

वितिभावः । अत्र परिवेषमिषेण सूर्याचन्द्रमसोः कुण्डलितोत्प्रेक्षणात्सापह्नवोत्प्रेक्षा । सा च व्यञ्जकाप्रयोगाद्गम्या ॥ १४ ॥

अयमिति ॥ अल्पितकल्पपादपः त्यागशीलतया स्वल्पीकृतकल्पवृक्षो नलः। अर्थिजनस्य ललाटे जाग्रतीं प्रकाशमानाम् । अयं जनो दरिद्रो निःस्वो भविता भविष्यतीत्येवंरूपाम् । वैधसीं वैधात्रीं लिपिम् अक्षरविन्यासम् । दारिद्र्यदरिद्रतां दारिद्र्यरहितत्वम् । प्रणीय सम्पाद्य । मृषा मिथ्या न चक्रे । ब्रह्मशासनस्यान्यथाकर्तुमशक्यत्वात् कथञ्चिदस्याप्यर्थवत्तां सम्पादितवानित्यर्थः । ब्रह्मलिखितमप्यन्यथाकर्तुं क्षमोऽयमिति भावः । एवंकरणासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः ॥ १५ ॥

विभज्येति ॥ मेरुर्विभज्य अर्थिसादर्थ्यधीनः । "देये त्रा च" इति सातिप्रत्ययः । न कृतः । सिन्धुरुत्सर्गजलव्ययैर्दानाम्बुविनियोगैः मरुः निर्जलदेशो न कृत इति यत् । तेन नलेन तत्पूर्वोक्तम् अयशोयुगमपकीर्तिद्वयम् । द्वयोः फालयोः शिरोभागयोर्बद्धाः संयताः । फलतेर्विशरणार्थाद्धञ् प्रत्ययः । प्रायेणोदीच्यानां पुंसामपि सीमन्तितशिरोरुहत्वात् द्विफालबद्धा इत्युक्तम् । एवं द्विधा विभक्ताः चिकुराः शिरोरुहाः तत् शिरः स्थितममानि । द्विधाकृतकेशरूपेण अयशोयुगलमेव स्वशिरसि तिष्ठतीत्यमन्यतेत्यर्थः । 'मन्यतेः कर्मणि लङ्' । केशेषु कार्ष्ण्यसाम्येनायशोरूपणाद्रूपकालङ्कारः ॥ १६ ॥

अजस्रमभ्याशमुपेयुषा समं मुदैव देवः कविना बुधेन च ।
दधौ पटीयान् समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥ १७॥

अधोविधानात् कमलप्रवालयोश्शिरस्सुधानादखिलक्ष्माभुजाम् ।
पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया ॥ १८ ॥

जगज्जयं तेन च कोशमक्षयं प्रणीतवान् शैशवशेषवानयम् ।
सखा रतीशस्य ऋतुर्यथा वनं वपुस्तदालिङ्गदथास्य यौवनम् ॥१९

अजस्रमिति ॥ दिनेश्वरस्य श्रीरिव श्रीः यस्य स इति निदर्शनालङ्कारः। पटीयानयं देवो राजा । सूर्यपक्षे सुरश्च । 'देवस्सुरे घने राज्ञि' इति विश्वः । अजस्रं मुदा सम्मानकृतसन्तोषेणैव । न तु निर्बन्धेनेति भावः। अभ्याशं समीपमुपेयुषा । "उपेयिवाननाश्वाननूचानश्च" इति निपातः। कविना कविभिर्बुधेन बुधैश्च समम् । न तु दुष्टैरिति भावः । उभयत्र जात्येकवचनम् । अन्यत्र बुधशुक्राभ्यां सहेत्यर्थः । तत्साहचर्यं सूर्यस्य ज्योतिश्शास्त्रादवगन्तव्यम् । समयं कालं नयन् । दिने दिने प्रत्यहमुदयमाविर्भावं दधौ । अत्र निदर्शनश्लेषयोस्सङ्करः ॥ १७ ॥

अध इति ॥ कमलप्रवालयोः पद्मपल्लवयोः कर्मणोः । अधोविधानात् अधःकरणात्तिरस्करणाच्चेति सौन्दर्यातिशयोक्तिः । अखिलक्ष्माभुजां सर्वराज्ञां शिरस्सुधानादिति शौर्यातिशयोक्तिः । इदमस्य नलस्य पदं चरणमूर्ध्वमुत्कृष्टमुपरिस्थञ्च । पुरा भवति भविष्यति । "यावत् पुरा निपातयोर्लट्" इति भविष्यदर्थे लट् । इतीत्थम् । मत्वेति शेषः । गम्यमानार्थत्वादप्रयोगः । वेधसा कर्त्रा । ऊर्ध्वरेखयाङ्कितम् । सौन्दर्यशौर्याभ्यां सर्वोत्तरं भवतीति ज्ञापनार्थं चिह्नितं किमित्युत्प्रेक्षा । ऊर्ध्वरेखाङ्कितपादस्सर्वोत्तरो भवतीति सामुद्रिकाः ॥ १८ ॥

एवमस्य गुणाद्भुतत्वमभिधायाधुना वक्ष्यमाणकथोपयोगितयास्य यौवनप्राप्तिमाह—**जगदिति** ॥ अयं नलः शैशवशेषवान् अल्पावशिष्टशैशवावस्थ

अधारि पद्मेषु तदङ्घ्रिणा घृणा क तच्छयच्छायलवोऽपि पल्लवे ।
तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः ॥

किमस्य रोम्णां कपटेन कोटिभिर्विधिर्न रेखाभिरजीगणद्गुणान् ।
न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः ॥ २१

एव । जगज्जयं प्रणीतवान् । तेन जगज्जयेन अक्षयं कोशमर्थजातं च । प्रणीतवान् सम्पादितवान् । अथ रतीशस्य सखा मदनमित्रम् । ऋतुर्वसन्तो वनं यथा । तथा यौवनमस्य वपुरालिङ्गत् आश्लिष्यन् । रतीशस्य इत्यत्र "ऋत्यकः" इति सूत्रेण पाक्षिकः प्रकृतिभावः । उपमालङ्कारः ॥ १९ ॥

अथ यौवनं वर्णयति—**अधारीति** ॥ तदङ्घ्रिणा तच्चरणेन पद्मेषु विषये । घृणा जुगुप्सा । अवज्ञेति यावत् । 'घृणा जुगुप्सा कृपयोः' इति विश्वः । अधारि धृता । तेषामतिनीचत्वादिति भावः । पल्लवे । तच्छयस्य तत्पाणेश्छाया । तच्छयच्छायम् । 'पञ्चशाखश्शयः पाणिः' इत्यमरः । 'विभाषा सेना' इत्यादिना समासे छायाशब्दस्य नपुंसकत्वम् । तस्य लवो लेशोऽपि क कुतः । शरदि भवः शारदः । "सन्धिवेलाद्यृतुनक्षत्रेभ्यः" इत्यण् । पर्वणि भवः पार्विकः । "कालाट्ठञ् नस्तद्धिते" इति टिलोपः । स चासौ शर्वरीश्वरः । तदास्यदास्ये नलमुखकैङ्कर्येऽप्यधिकारितां योग्यतां न गतः अतोऽस्य पादपाणिमुखमप्रतिममिति भावः। अत्राङ्घ्र्यादीनां पद्मादिषु घृणासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः॥

किमिति ॥ विधिर्वेधा अस्य नलस्य गुणान् रोम्णां कपटेन मिषेण कोटिभिः रेखाभिः नाजीगणन् न गणितवान् किम् । "ई च गणः" इति गणेरभ्यासस्येकारः गणेर्णौ चङ् । जगत्कृता विधात्रा रोमकूपानामोघस्य मिषात् दूषणानां दोषाणां शून्यस्यात्यन्ताभावस्य बिन्दवो ज्ञापकवर्तुलरेखाः न कृताः किम् । अस्मिन् गुणा एव, दोषा न सन्तीति भावः । अत्र रोम्णां रोमकूपानां च । कपटमिषशब्दाभ्यां सादृश्यापह्नवेन गुणगणनारेखात्वदूषणशून्यबिन्दुत्वयोरुत्प्रेक्षणात् सापह्नवोत्प्रेक्षयोः संसृष्टिः ॥ २१ ॥

अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गळदीर्घपीनता ।
उरश्श्रिया तत्र च गोपुरस्फुरत्कवाटदुर्धर्षतिरःप्रसारिता ॥ २२ ॥

स्वकेलिलेशस्मितनिर्जितेन्दुनो निजांशदृक्तर्जितपद्मसम्पदः ।
अतद्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे ॥२३॥

सरोरुहं तस्य दृशैव निर्जितं जिताः स्मितेनैव विधोरपि श्रियः ।
कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता ॥२४॥

अमुष्येति ॥ अमुष्य नलस्य दोर्भ्यामरिदुर्गाणां लुण्ठने भञ्जने अर्गलानां कवाटविष्कम्भदारूणाम् । 'तद्विष्कम्भेऽर्गळं न ना' इत्यमरः । दीर्घाणि च पीनानि च तेषां भावो दीर्घपीनता आयतपीवरत्वं गृहीता ध्रुवम्, किञ्चामुष्योरश्रिया वक्षोलक्ष्म्या कर्त्र्या च । तत्र अरिदुर्गलुण्ठने गोपुरेषु पुरद्वारेषु स्फुरतां कवाटानां दुर्धर्षाणि च तिरःप्रसारीणि च तेषां भावस्तत्ता अप्रधृष्यत्वं विशालत्वञ्चेत्यर्थः । सा गृहीता ध्रुवम् अर्गलदीर्घबाहुरयं कवाटवक्षाश्चेति भावः । अत्राप्युत्प्रेक्षयोः संसृष्टिः ॥ २२ ॥

स्वकेळीति ॥ स्वकेलिलेशस्मितेन स्वविलासलेशस्मितेन निर्जितेन्दुनो निराकृतचन्द्रस्य निजांशेन स्वावयवेन दृशा दृष्ट्या तर्जितपद्मसम्पदः भर्त्सितकमलसौन्दर्यस्य तन्मुखस्य तयोः चन्द्रारविन्दयोः द्वयी युग तस्याः जित्वरं जिष्णुतरं सुन्दरान्तरं यत्र नास्ति तस्मिन् चराचरे जगति । "चराचरं स्याज्जगति" इति विश्वः । प्रतिमा उपमा नास्तीत्यर्थः । अस्तिर्भवतिपरश्चाप्रयुज्यमानोऽपि अस्तीति वचनात् । अत्र चन्द्रारविन्दविजयस्य विशेषणगत्या नलमुखे अप्रतिमानहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २३ ॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह—सरोरुहमिति ॥ तस्य दृशैव सरोरुहं निर्जितं स्मितेन मन्दहासेनैव विधोरिन्दोः श्रियः कान्तयोऽपि जिताः परं

स्वबालभारस्य तदुत्तमाङ्गजैस्स्वयञ्चमर्येव तुलाभिलाषिणः ।
अनागसे शंसति बालचापलं पुनःपुनः पुच्छविलोलनच्छलात् ॥
महीभृतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया ।
द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥२६

आभ्यामन्यद्द्रव्यं रम्य वस्तु कुतः न कुत्रापीत्यर्थः । तदाननस्योपमितौ उपमाने महीयसी गरीयसी दरिद्रता नास्तिता अहो । अत्रापि चन्द्रारविन्दविजयस्य वाक्यार्थस्य मुखोपमानदारिद्र्यहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ २४ ॥

स्वबालेति ॥ चमरी मृगविशेषः । स्वयमेव तदुत्तमाङ्गजैर्नलमूर्धजैः तुलाभिलाषिणः साम्याभिलाषलक्षणापराधेन इत्यर्थः । जघनस्य उत्तमजन्मभिः सह साम्याभिमानोऽपि महानपराध इति भावः । स्वबालभारस्य निजरोमनिश्चयस्य अनागसे अनपराधाय क्वचित्तदभावेऽपि नञ्समास इष्यते । पुनःपुनः पुच्छस्य विलोलनच्छलाद्विलोलनव्याजात् बालचापलं रोमचाञ्चल्यम् । वबयोरभेदाद्बालचापलं शंसति कथयति । बालचापलं सोढव्यमिति समाधत्त इत्यर्थः । अत्र पुच्छविलोलनं छलशब्देनापह्नुत्य वबयोरभेदाध्यवसायेन बालचापलत्वारोपादपह्नवभेदः ॥ २५ ॥

अथास्य यौवनप्रवेशफलं प्रस्तौति---**महीभृत इति** ॥ तस्य महीभृतो नलस्य मन्मथस्येव श्रिया सौन्दर्येण निजस्यात्मीयस्य चित्तस्य तं नलं प्रतीच्छया रागेण च तत्र तस्मिन् नृपे विषये जगत्त्रयीभुवां लोकत्रयवर्तिनीनां नतभ्रुवाम् । द्विधा द्वेधा मन्मथविभ्रमोऽभवत् । तत्सौन्दर्यान्मन्मथभ्रान्तिः सानुरागान्मन्मथविकारश्च अभूदित्यर्थः । विश्वातिशायि सौन्दर्यमस्येति भावः । अत्र नलश्रीविश्ववनितेच्छयोः श्लिष्टपदोपात्तयोः विभ्रमद्वयेन यथासङ्ख्यं सम्बन्धात् श्लेषसङ्कीर्णो यथासङ्ख्यालङ्कारः ॥ २६ ॥

निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरार्जितः ।
अमूस्तमभ्यासभरं विवृण्वते निमेषनिःस्वैरधुनापि लोचनैः ॥२७॥

अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम् ।
इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः॥

विलोकयन्तीभिरजस्रभावनाबलादमुं नेत्रनिमीलनेष्वपि ।
अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्मितः ॥

निमीलनेति ॥ त्रिदशीभिः निमीलनभ्रंशजुषा निमेषनिवृत्तिभाजा । निर्निमेषयेत्यर्थः । दृशा दृष्ट्या । तं नलं निपीय गाढं दृष्ट्वेत्यर्थः । योऽभ्यासभरः । आर्जितः कृतः । अमूः त्रिदश्यः । तं अभ्यासभरं आवृत्त्यतिशयं निमेषनिःस्वै- र्निमेषरहितैर्लोचनैः । अधुनापि विवृण्वते प्रकटयन्तीत्यर्थः । तासां स्वाभावि- कस्यानिमेषस्य तादृङ्नलनिरीक्षणाभ्यासवासनया तद्धेतुकत्वमुत्प्रेक्षते । सा च इवाद्यप्रयोगाद्गम्या ॥ २७ ॥

अद इति ॥ चक्षुःश्रवसां प्रियाः नागकान्ताः । अदः इदं नोऽस्माकं दृशोर्द्वयं चक्षुषोर्युगम् । तं नलमाकर्णयतीति तदाकर्णि सत् । तासां चक्षुः- श्रवस्त्वादिति भावः । फलाढ्यजीवितम् । न वीक्षत इत्यवीक्षि । अत्रापि ताच्छील्ये णिनिः । तस्यावीक्षि तदवीक्षिसदपश्यत्सत्, अफलमित्येवम् । नले विषये तदा नलकाले आत्मनः स्वान् हृदा चित्तेन स्तुवन्ति निन्दन्ति स्म । उभयकारणसम्भवादुभयकार्योदय इति भावः । ईदृङ्निन्दास्तुत्यसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ २८ ॥

विलोकयन्तीभिरिति ॥ अजस्रभावनाबलान्निरन्तरध्यानप्रभावात् । अमुं नलं नेत्रनिमीलनेषु निमेषावस्थास्वपि । विलोकयन्तीभिरुन्मेषावस्थास्विव साक्षात् कुर्वन्तीभिः मर्त्याभिर्मानुषीभिः अमुष्य नलस्य । दर्शने निमेषनिर्मितो निमीलनकृतो विघ्नलेशोऽपि नालम्भि नालाभि । "विभाषा चिणणमुलोः" इति

न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम् ।
तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम् ॥

श्रियास्य योग्याहमिति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः ।
विहाय भैमीमपदर्पया कया न दर्पणश्श्वासमलीमसः कृतः ॥ ३१

यथोह्यमानः खलु भोगभोजिना प्रसह्य वैरोचनिजस्य पट्टणम् ।
विदर्भजाया मदनस्तथा मनोऽनलावरुद्धं वयसैव वेशितः ॥ ३२ ॥

विकल्पान्तुमागमः । अत्र मर्त्यानां सर्वावस्थालोकनासम्बन्धेऽपि तत्कथनादति-शयोक्तिः ॥ २९ ॥

नेति ॥ का स्त्री निशि स्वप्नगतं स्वप्नलब्धमित्यर्थः । तं नलं न ददर्श । गोत्रस्खलिते नामविपर्यासे च । तं का न जगाद नाजुहावेत्यर्थः । रते च का वा तदात्मतया नलात्मकत्वेन ध्यातधवा भावितनिजप्रिया सती । स्वस्य मनोभवोद्भवं मन्मथोद्रेकं न चकार । सर्वापि सर्वं चकारेत्यर्थः । कामान्धाः किं न कुर्वन्तीति भावः । अत्रापि दर्शनाद्यसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥

श्रियेति ॥ तं नलमालोक्य श्रिया रामणीयकेन । अहमस्य योग्या अनुरूपेति स्वमात्मानम् ईक्षितुं परीक्षितुं करे धृतो दर्पणः, सुरूपया रम्ययैव नाहमस्य योग्येति बुद्ध्यमानया च । 'प्राप्तरूपो बुधे रम्येऽप्यभिरूपस्सुरूपवत्' इति विश्वः । अत एवापदर्पया विगताहङ्कारया कया स्त्रिया । भैमीं विहाय दमयन्तीं वर्जयित्वा श्वासैर्मुखनिश्वासैः मलीमसो मलिनः । "ज्योत्स्ना तमिस्रा" इत्यादिना निपातः । न कृतः सर्वयापि कृत एवेत्यर्थः । दर्पणे निजवैरूप्यदर्शनात् अतिसुन्दर्योऽपि तदभिलाषचापलाल्लज्जिता इति भावः । अत्रापि सर्वासामेवं-विधव्यापारासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ३१ ॥

एवं नलस्य लोकोत्तरसौन्दर्यद्योतनाय स्त्रीमात्रस्य तं प्रत्यनुरागमुक्त्वा सम्प्रति दमयन्त्यास्तमाह—**यथेति** ॥ मदनः प्राक् प्रद्युम्नावतार इति भावः ।

नृपेऽनुरूपे निजरूपसम्पदां दिदेश तस्मिन् बहुशः श्रुतिं गते ।
विशिष्य सा भीमनरेन्द्रनन्दिनी मनोभवाज्ञैकवशंवदं मनः ॥ ३३

भोगभोजिना सर्पकायखादिना । वयसा खगेन गरुडेन ऊह्यमान ऊढस्सन् । "वहेः कर्मणि यकि सम्प्रसारणे पूर्वरूपम्" । अनलावरुद्धमग्निपरिवेष्टितम् । विरोचनस्यापत्यं पुमान् वैरोचनिः बलिः तज्जस्य बाणासुरस्य पट्टणं प्रसह्य यथा वेशितः प्रवेशितः खलु । "ततो गरुडमारुह्य स्मृतमात्रो गतो हरिः । बलप्रद्युम्नसहितो बाणस्य प्रययौ पुरीम्" इत्युषाहरणे विष्णुपुराणात् । तथा नलावरुद्धं नलाक्रान्तम् । विदर्भजायाः दमयन्त्याः मनः भोगभोजिना सुखभोजकेन । 'भोगस्सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरः । "भुजेर्ण्यन्ताण्णिनिः" । वयसा यौवनेनैव कर्त्रा । खगेनेवेति गम्यते । 'खगबाल्यादिनोर्वयः' इत्यमरः । ऊह्यमानः परैस्तर्क्यमाणः । न तूक्त्या गृह्यमाणः । "ऊहेर्वितर्कार्थात्कर्मणि यक्" । वेशितः प्रवेशितः । रागिणां चेतसि यौवनमेव मदनदोहनमिति भावः । अत्र यथोह्यमानः, मनो नलेति च शब्दश्लेषः । अन्यत्र अर्थश्लेषः । श्लिष्टविशेषणा चेयमुपमा । सा च वयसैति वयसोरभेदाध्यवसायमूलातिशयोक्त्यनुप्राणितेति सङ्करः ॥ ३२ ॥

इह विरहिणां चक्षुः प्रीत्यादयो दशावस्थास्सन्ति । तत्र चक्षुः प्रीतिः श्रवणानुरागस्योपलक्षणम् अतस्तत्पूर्विकां मनस्सङ्गाख्यां द्वितीयावस्थामाह—

नृप इति ॥ सा भीमनरेन्द्रनन्दिनी दमयन्ती । 'नन्द्यादित्वाल्ल्युट् प्रत्ययः' । निजरूपसम्पदां स्वलावण्यसम्पत्तीनां अनुरूपे । बहुशो बहुभ्य इत्यर्थः । "बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्" इत्यपादानार्थे शस् प्रत्ययः । श्रुतिं श्रवण गते । एतेन श्रवणानुराग उक्तः । तस्मिन्नृपे नले मनोभवाज्ञाया एकवशंवदं एकस्यैव विधेयं, शिवभागवतवत्समासः । "प्रियवशे वदः खच्" । "अरुर्द्विषत्" इत्यजन्तस्य मुम् । मनो विशिष्य दिदेश । 'अस्येदम्' इति निश्चित्य अतिससर्जेत्यर्थः । तद्गुणश्रवणात्तदासक्तचित्ताभूदित्यर्थः ॥ ३३ ॥

उपासनामेत्य पितुस्स्म रज्यते दिने दिने सावसरेषु बन्दिनाम् ।
पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलम् ॥
कथानुषङ्गेषु मिथस्सखीमुखात्तृणेऽपि तन्व्या नलनामनि श्रुते ।
द्रुतं विधूयान्यदभूयतानया मुदा तदाकर्णनसज्जकर्णया ॥ ३५ ॥
स्मरात्परासोरनिमेषलोचनाद्बिभेमि तद्भिन्नमुदाहरेति सा ।
जनेन यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत् ॥ ३६ ॥

अथास्याः श्रवणानुरागमेव चतुर्भिर्वर्णयति—**उपासनामिति** ॥ सा भैमी दिने दिने प्रतिदिनम् । "नित्यवीप्सयोः" इति वीप्सायां द्विर्भावः । बन्दिनां स्तुतिपाठकानामवसरेषु पितुरुपासनां सेवाम्, एत्य प्राप्य, तेषु बन्दिषु भूपतीन् प्रतिभूपतीनुद्दिश्य पठत्सु स्तुतिविशेषैर्नलं शृण्वती अलं रज्यते स्म, अनुरक्ताऽभूदित्यर्थः । अत एव विनिद्ररोमा हृष्टरोमा अजनीति सात्त्विकोक्तिः । "जनेः कर्तरि लुङ्" । "दीपजन" इत्यादिना च्लेश्चिणादेशः । नलगुणश्रवणजन्यो रागस्तस्या रोमाञ्चेन व्यक्तोऽभूदित्यर्थः ॥ ३४ ॥

कथानुषङ्गेष्विति ॥ मिथोऽन्योन्यम्, रहसि वा । कथानुषङ्गेषु विस्रम्भगोष्ठीप्रसङ्गेषु सखीमुखान्नलनामनि नलाख्ये तृणेऽपि । 'नलः पोटगले राज्ञि' इति विश्वः । श्रुते अनया तन्व्या दमयन्त्या द्रुतमन्यत्कार्यान्तरं विधूय निराकृत्य मुदा हर्षेण तदाकर्णने नलशब्दाकर्णने । सज्जकर्णया दत्तकर्णया अभूयत अभावि । "भुवो भावे लङ्" । अर्थान्तरे प्रयुक्तोऽपि नलशब्दो नृपस्मारकतया तदाकर्षकोऽभूदिति रागातिशयोक्तिः ॥ ३५ ॥

स्मरादिति ॥ परासोर्मृतात् । अत एव अनिमेषलोचनात् निश्चलाक्षाद्देवादिति च गम्यते । उभयथापि भयहेतूक्तिः । स्मराद्बिभेमि । तद्भिन्नं ततोऽन्यमुदाहर तत्सदृशं निदर्शय, इत्येवं सा दमयन्ती, यूनः स्तुवता जनेन प्रयोज्यकर्त्री तदास्पदे तत्स्थाने निदर्शनं दृष्टान्तं नैषधं निषधानां राजानं नलम् ।

नलस्य पृष्टा निषधागता गुणान् मिषेण दूतद्विजबन्दिचारणाः ।
निपीय तत्कीर्तिकथामथानया चिराय तस्थेऽभिमनायमानया ॥

प्रियं प्रियां च त्रिजगज्जयिश्रियौ लिखाधिलीलागृहभित्ति कावपि ।
इति स्म सा कारुवरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते ॥

"जनपदशब्दात् क्षत्रियादञ्" । अभ्यषेचयत् । परासोः स्थाने तत्सदृश एवाभिषेक्तव्यः स च नलादन्यो नास्तीति तस्मिन्नेवोदाहृते सहर्षं शृणोतीति रागातिशयोक्तिः । "उपसर्गात् सुनोति" इत्यादिना अड्व्यवायेऽपि षत्वम् ॥

नलस्येति ॥ निषधेभ्य आगताः दूताः सन्देशहराः, द्विजाः ब्राह्मणाः, बन्दिनः स्तावकाश्चारणा देशभ्रमणजीविनः । ते सर्वे मिषेण केनचिद्व्याजेन नलस्य गुणान् पृष्टाः । "पृच्छतेर्दुह्यादित्वादप्रधाने कर्मणि क्तः" । अथ प्रश्नानन्तरम् । अनया भैम्या, तत्कीर्तिकथां नलयशःकथामृतं, निपीय, चिराय अभिमना हृष्टा भवतीत्यभिमनायमाना तया । "भृशादित्वात् क्यङ् सलोपश्च" । "अकृत्सार्वधातुकयोः" इति दीर्घः । ततो लटश्शानजादेशः । तस्थे स्थितम् । भावे लिट् । अयञ्च दूतादिव्यवधानेन गुणकीर्तनलक्षणः प्रलापाख्योरत्यनुभावः ॥ ३७ ॥

प्रतिकृतिस्वप्रदर्शनादयो विरहिणां विनोदोपायाः अतस्तत्कथनमुखेन दर्शनानुरागं चास्या दर्शयन् प्रतिकृतिदर्शनं तावदाह—**प्रियमिति** ॥ सा भैमी, त्रीणि जगन्ति समाहृतानि त्रिजगत् । समाहारे द्विगुरेकवचनम् । तस्य जयिनी । "जिदृक्षि" इत्यादिना इनिः । सा श्रीर्ययोस्तौ तथोक्तौ । का च कश्च कावपि । "पुमान् स्त्रिया" इत्येकशेषः । प्रियं प्रियाञ्च, कामिनाविल्यर्थः । लीलागृहभित्तावधि अधिलीलागृहभित्ति क्रीडागृहमध्य इत्यर्थः । विभक्त्यर्थेऽव्ययीभावः । लिखेति नियुज्येति शेषः । गम्यमानार्थत्वादप्रयोगः प्रयोगे पौनरुक्त्यदोष इत्यालङ्कारिकाः । कारुवरेण शिल्पिविशेषेण प्रयोज्येन लेखितं नलस्य च स्वस्य च द्वयोरेव तथात्वादिति भावः । सख्यमीक्षते । लिखितादिव्यवधानेन गुणकीर्तनलक्षणः प्रलापाख्योरत्यनुभावः ॥ ३८ ॥

मनोरथेन स्वपतीकृतं नलं निशि क सा स स्वपती न पश्यति ।
अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम् ॥ ३९ ॥

निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् ।
अदर्शि सङ्गोप्य कदाप्यवीक्षितो रहस्यमस्यास्स महन्महीपतिः ॥

द्विविधं दर्शनम् । साक्षाच्चित्रादौ च । तत्र साक्षादलाभाच्चित्रदर्शनमुक्तम् । अथ द्वाभ्यां स्वप्नदर्शनञ्चाह—**मनोरथेनेति** ॥ सा भैमी मनोरथेन सङ्कल्पेन स्वपतीकृतं स्वभर्तृकृतम् । "अभूततद्भावे च्विः" । "च्वौ" इति दीर्घः । नलं क कस्यां निशि । स्वपती निद्रावती सती न पश्यति । सर्वत्रापि निशि अपश्यदेवेत्यर्थः । तत्र सन्तं तं कथमद्राक्षीदित्याशङ्क्य समर्थयति—**अदृष्टमपीति** ॥ सुप्तिः स्वप्नः अदृष्टमत्यन्ताननुभूतमित्यर्थः । किमुत श्रुतमिति भावः । अदृष्टवैभवाद्धर्माधर्मसामर्थ्यात् । जनदर्शनातिथिं लोकदृष्टिविषयं करोति। तद्वदत्रापि तन्निमित्तादृष्टात्तादृक्स्वप्नज्ञानमुत्पन्नमित्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३९ ॥

निमीलितादिति ॥ निद्रया प्रयोजकया । निमीलितात् मुकुलितात्, उपरतव्यापारादित्यर्थः । अक्षियुगाच्च तथा बाह्येन्द्रियाणां चक्षुरादीनां मौनेन व्यापारोपरमेण मुद्रितात् प्रतिबद्धान्मनसो बहिरस्वातन्त्र्यात् । हृदो हृदयादपि सङ्गोप्यापवार्य वञ्चयित्वेत्यर्थः । अन्तर्धौ येनादर्शनमिच्छतीत्यक्षियुगमनसोरपादानत्वम् । अदर्शनञ्चात्र मनसो बाह्येन्द्रियमौनमुद्रितादिति विशेषणसामर्थ्यादिन्द्रियार्थसंप्रयोगजन्यज्ञानविरह एवेति ज्ञायते । स्वप्नज्ञानं तु मनोजन्यमेव । अतः तज्जन्यस्य ज्ञानस्यैवाभावादिति कदाप्यवीक्षितः अत्यन्तादृष्टचरं इत्यर्थः । महद्रहस्यमतिगोप्यं वस्तु । स महीपतिः नलः । अस्याः भैम्याः, अदर्शि दर्शयाञ्चक्रे । "दृशेर्ण्यन्तात् कर्मणि लुङ्" । यथा काचिच्चेटी कस्यैचित्कामिन्यै कञ्चन कान्तं दर्शयति तद्वदिति भावः ॥ ४० ॥

अहो अहोभिर्महिमा हिमागमेऽप्यभिप्रपेदे प्रति तां स्मरार्दिताम् ।
तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे ॥ ४१ ॥

स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम् ।
कदाचिदस्या युवधैर्यलोपिनं नलोऽपि लोकादशृणोद्गुणोत्करम् ॥

समेव लब्ध्वावसरं ततः स्मरश्शरीरशोभाजयजातमत्सरः ।
अमोघशक्त्या निजयेव मूर्तया तया विनिर्जेतुमियेष नैषधम् ॥

अथास्याः चिन्ताजागरावाह—**अहो इति** ॥ हिमागमे हेमन्तेऽपि स्मरार्दितां स्मरपीडितां तां दमयन्तीं प्रति अहोभिर्दिवसैरतिमहिमा अतिवृद्धिः प्रपेदे । तथा तपर्तुपूर्तौ ग्रीष्मान्ते । विभावरीभिः निशाभिर्मेदसाम्भराः । मांसलातिशय इति यावत् । बिभरांबभूविरे बिभ्रिरे । भृञः कर्मणि लिट् । "भीह्रीभृहुवां श्लुवच्च" इति विकल्पादाम् प्रत्ययः । अहो आश्चर्यम् । शास्त्रविरोधादनुभवविरोधाच्चेति भावः । विरहिणां तथा प्रतीयत इत्यविरोधः । एतेनास्याः निरन्तरचिन्ताजागरश्च गम्यते । अहोशब्दस्य । "ओत्" इति प्रगृह्यत्वात्प्रकृतिभावः ॥ ४१ ॥

अथ नलस्यापि श्रवणानुरागमाह—**स्वकान्तीति** ॥ अथ नलोऽपि स्वस्य कान्त्या सौन्दर्येण याः कीर्तयः तासां व्रजः पुञ्ज एव मौक्तिकस्रक् मुक्ताहारः तस्य अन्तरभ्यन्तरे घटनागुणश्रियं गुम्भनसूत्रलक्ष्मीं श्रयन्तं भजन्तं युवधैर्यलोपिनं तरुणचित्तस्थैर्यहारिणं अस्याः दमयन्त्याः गुणोत्करं सौन्दर्यादिगुणसन्दोहं कदाचिल्लोकादागन्तुकजनादशृणोत् श्रुतवान् । अत्र कीर्तिव्रजगुणोत्करयोर्मुक्ताहारगुम्भनसूत्रत्वरूपणाद्रूपकालङ्कारः ॥ ४२ ॥

अथास्य तस्यां रागोदयं वर्णयति—**समिति** ॥ ततः गुणश्रवणानन्तरं शरीरशोभायाः देहसौन्दर्यस्य जयेन जातमत्सरः उत्पन्नवैरः, स्मरस्तमेवावसरमवकाशं लब्ध्वा । मूर्तया मूर्तिमत्या निजया आत्मीयया, अमोघशक्त्येव

अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजाश्रयः ।
तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥ ४४ ॥

अमुष्य धीरस्य जयाय साहसी शरासनज्यां विशिखैस्सनाथयन् ।
निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि ॥

अकुण्ठसामर्थ्यमेवेत्युत्प्रेक्षा । तया दमयन्त्या नैषधं नलं विनिर्जेतुमियेष इच्छति स्म । रन्ध्रान्वेषिणो हि विद्वेषिण इति भावः । एतेन रागोद्गम उक्तः ॥ ४३ ॥

अकारीति ॥ तेन क्षमाभुजा नलेन भीमनृपात्मजाश्रयो दमयन्त्याश्रयः । तदीय इत्यर्थः । गुणः सौन्दर्यादि श्रवणातिथिः श्रोत्रविषयोऽकारि कृतः । श्रुत इत्यर्थः । "करोतेः कर्मणि लुङ्" । तस्य नलस्य उच्चधैर्यव्ययायोद्धतधैर्यनाशाय । संहितेषुणा स्मरेण च स्वात्मनः स्वस्य शरासनाश्रयः चापनिष्ठो गुणो मौर्वी श्रवणातिथिरकारि । आकर्णं कृष्ट इत्यर्थः । दमयन्तीगुणश्रवणान्नलमनसि महान्मदनविकारः प्रादुर्भूत इत्यर्थः । अत्रोत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुकत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४४ ॥

अमुष्येति ॥ स्मरः साहसी सन् । 'न साहसमनारुह्य नरो भद्राणि पश्यति' इति न्यायावलम्बी सन्नित्यर्थः । धीरस्य दुर्जयस्यामुष्य नलस्य, जयाय शरासनज्यां निजधनुर्मौर्वी विशिखैः बाणैः सनाथयन् सनाथं कुर्वन्, संयोजयन्नित्यर्थः । तदा तस्मिन् समये त्रयाणां लोकानां समाहारस्त्रिलोकी । "तद्धितार्थ" इत्यादिना समासः । "अकारान्तरोत्तरपदो द्विगुः स्त्रियां भाष्यः" इति स्त्रीलिङ्गत्वात् द्विगोरिति ङीप् । तस्याः विजयेन आर्जितानि सम्पादितान्यपि यशांसि संशये निमज्जयामास खलु । किं पुनः सम्प्रति सम्पाद्यमित्यपिशब्दार्थः । वृध्यपेक्षया अनुचितकर्मारम्भे मूलमपि नश्येदिति संदिदेहेत्यर्थः । अत्र स्मरस्योक्तसंशयासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ४५ ॥

अनेन भैमीं घटयिष्यतस्तथा विधेरवन्ध्येच्छतया व्यलासि तत् ।
अभेदि तत्तादृगनङ्गमार्गणैर्यदस्य पौष्पैरपि धैर्यकञ्चुकम् ॥४६॥

किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रयत्यहो ।
स्मरं तनुच्छायतया तमात्मनः शशाक शङ्के स न लङ्घितुं नलः ॥

अथ दैवसहायात् पुष्पेषोरेव पुरुषकारः फलित इत्याह—**अनेनेति** ॥ अनेन नलेन सह भैमीं घटयिष्यतो विधेर्विधातुः । अवन्ध्येच्छतया अमोघसङ्कल्पत्वेन । तत् तस्मात् । तथा तेन प्रकारेण । योऽग्रे वक्ष्यत इति भावः । व्यलासि विलसितम् । "लसतेर्भावे लुङ् ।" विधिसङ्कल्पः तथा विललासेत्यर्थः । यत् यस्मात् तत्प्रसिद्धम्, तादृक् तथा अभेद्यमित्यर्थः । अस्य नलस्य धैर्यमेव कञ्चुकं पौष्पैः पुष्पमयैरपि । तत्राप्यनङ्गस्याशरीरस्य मार्गणैरभेदि भिन्नम् । "भिदेः कर्मणि लुङ्" । दमयन्तीनलयोर्दाम्पत्यघटनायानङ्गबाणैर्नलधैर्यकञ्चुकभेदनाद्विधेरप्यवन्ध्येच्छत्वं विज्ञायत इत्यर्थः । दैवानुकूल्ये किं केन दुष्करमिति भावः । अत्रानङ्गेन पुष्पैः कञ्चुकं भिन्नमिति विरोधः । तस्य विधिविलासेनाभासीकरणाद्विरोधाभासोऽलङ्कारः । स च धैर्यकञ्चुकमिति रूपकोत्थापित इति तयोरङ्गाङ्गिभावेन सङ्करः ॥ ४६ ॥

अथ विधिमपि जिग्युषः किं विध्यपेक्षयेत्याशयेनाह—**किमिति** ॥ किमन्यत् अन्यत्किमुच्यते । पितामहो विधिर्यस्य स्मरस्यास्त्रैस्तापितः । अद्यापि वारिजमाश्रयति । तस्य पद्मासनत्वादिति तत्त्वम् । शिशिरोपचारश्च गम्यते । अहो विधेरपि स्मरविधेयत्वमित्याश्चर्यम् । तं पितामहतापिनं स्मरम् । नलः आत्मनः तनोः छायेव छाया कान्तिर्यस्य तस्य भावस्तत्ता तया तनुच्छायतया । तनोः छाया अनातपः तनुच्छायम् । तत्तयेति च गम्यते । 'छाया त्वनातपे कान्तौ' इति वैजयन्ती । लङ्घितुं न शशाकेति शङ्के । न हि स्वच्छाया लङ्घितुं शक्येति भावः । अत्र स्मरलङ्घने पितामहोऽप्यशक्तः । किमुत नल इत्यर्थापत्तिस्तावदेकोऽलङ्कारः । तनोः छायेव छायेत्युपमा । छाययोरभेदाध्यवसायादति-

उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयःकृतेन किम् ।
त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं विवेश यत् ॥४८॥

अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा ।
अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला ॥४९॥

शयोक्तिः । एतत् नितयोपजीवनेनालङ्घ्यत्वे तनुच्छायतया हेतुत्वोत्प्रेक्षणात् हेतूत्प्रेक्षा तत्सङ्कीर्णा । सा न शङ्क इति व्यञ्जकप्रयोगाद्वाच्येति ॥ ४७ ॥

उरोभुवेति ॥ सा तन्वी भैमी । त्रपैव सरिद्दुर्गं नलसम्बन्धि तदपि प्रतीर्य नलस्य हृदयं विवेशेति यत् । तत्प्रवेशन, यत्तदोर्नित्यसम्बन्धात् । वयःकृतेन नवोपहारेण नूतननिर्माणेन । उरोभुवा तज्जन्येन तत्स्थानकेन च । कुम्भयुगेन कुचयुगलाख्येनेति भावः । अत एव विषयनिगरणेन अभेदाध्यवसायादतिशयोक्तिः । 'न लोक' इत्यादिना कृद्योगे षष्ठीप्रतिषेधात् कर्तरि तृतीया । 'नपुंसके भावेऽप्युपसङ्ख्यानम्' इति षष्ठी तु शेषविवक्षायाम् । जृम्भितं जृम्भणं किमित्युत्प्रेक्षा । सा चोक्तातिशयमूलेति सङ्करः । दमयन्तीकुचकुम्भविभ्रमश्रवणान्नलस्त्रपां विहाय तस्यामासक्तचित्तोऽभूदित्यर्थः । एतेन मनस्सङ्ग उक्तः ॥ ४८ ॥

अथास्य जागरावस्थामाह—**अपह्नुवानस्येति** ॥ निजामधीरतां चपलत्वं जनायापह्नुवानस्य अपलपतः । "श्लाघह्नुङ्स्था" इत्यादिना सम्प्रदानत्वात् चतुर्थी । अस्य नलस्य मनोभुवा कामेन । यज्जागरप्रलापादिकं कृतं तत्सर्वं जागरदुःखस्य । साक्षिणी साक्षाद्द्रष्ट्री । "साक्षाद्द्रष्टरि संज्ञायाम्" इति साक्षाच्छब्दादिनिप्रत्यये ङीप् । शशाङ्केन कोमला रम्या निशा चाबोधि बुद्धम् । "दीपजन" इत्यादिना च्लेश्चिणादेशः । तथा शशाङ्कवत्कोमला मृदुला शय्या चाबोधि । निशायां शय्यायां जागरणात्तयोस्तत्साक्षित्वमिति भावः ॥ ४९ ॥

स्मरेषुतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत ।
त्यजन्त्यसूञ्शर्म च मानिनोवरं त्यजन्ति न त्वेकमयाचितव्रतम् ॥
मृषाविषादाभिनयादयं कचिज्जुगोप निःश्वासततिं वियोगजाम् ।
विलेपनस्याधिकचन्द्रभागताविभावनाच्चापललाप पाण्डुताम् ॥
शशाक निह्नोतुमये न तत्प्रियामयं बभाषे यदलीकवीक्षिताम् ।
समाज एवालपितासु वैणिकैर्मुमूर्छे यत्पञ्चममूर्छनास्वपि ॥ ५२ ॥

ननु किमनेन निर्बन्धेन याच्यतां भीमभूपतिर्दमयन्तीमित्याशङ्क्याह—

स्मरेष्विति ॥ प्रभुः समर्थः स नलो भृशमत्यन्तं स्मरेषुतप्तोऽपि विदर्भराजं भीमभूपतिं तनयां नायाचत । "दुह्याच्" इत्यादिना द्विकर्मकत्वम् । तथा हि मानिनोऽभिमानवन्तः असून् प्राणान् शर्म सुखं च त्यजन्ति । वरं मनाक् प्रियं एकमद्वितीयं अयाचितव्रतं तु न त्यजन्ति । मानिनां प्राणत्यागदुःखाद्दुस्सहं याच्ञादुःखमिति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५० ॥

मृषेति ॥ अयं नलः, कचित् कदाचित्, वियोगजां दमयन्तीविरहजां निःश्वासततिं निःश्वासपरम्परां, वस्त्वन्तरे मृषाविषादाभिनयान्मिथ्याभूतदुःखप्रकटनाज्जुगोप प्रियाविरहसन्तापसम्भूतं दीर्घनिःश्वासम् आरोपितमनःपीडाव्यक्तीकरणादाच्छादयामासेत्यर्थः । किञ्च पाण्डुतां सन्ततकान्ताचिन्तासमुत्पन्नं वर्ष्मश्वैत्यं च, विलेपनस्य चन्दनस्य, अधिकचन्द्रभागताविभावनादधिको बहुलश्चन्द्रभागः कर्पूरांशो यस्मिन् सोऽधिकचन्द्रभागस्तस्य भावस्तत्ता । 'अथ कर्पूरमस्त्रियाम्' । 'घनसारश्चन्द्रसंज्ञः' इत्यमरः । तस्याः विभावनादारोपणात् अपललाप शरीरवैवर्ण्यदर्शनपि चन्दने घनसाराधिक्यव्याजेन प्रतारयामासेत्यर्थः । कर्पूरस्यातिशैत्यात्तदाधिक्ये शरीररक्तं शुष्कीभवतीति प्रसिद्धिः । अत्र प्रत्यक्षसिद्धयोर्निःश्वासपाण्डुतयोरपह्नोतुमशक्यत्वात् उभयस्यापि विरहजन्यत्वमपलप्य तयोर्दुःखकर्पूरात्रिकत्वारोपादपह्नवप्रभेदः ॥ ५१ ॥

शशाकेति ॥ अयं नलः अलीकवीक्षितां भ्रान्तिदृष्टां प्रियां भैमीं

अवाप सापत्रपतां महीपतिर्जितेन्द्रियाणां धुरि कीर्तितस्थितिः ।
असंवरे शम्बरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि ॥ ५३ ॥

अलं नलं रोद्धुमिदं किलाभवन् गुणा विवेकप्रमुखा न चापलम् ।
स्मरः स्म रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृशः ॥ ५४ ॥

बभाषे भाषितवानिति यत् । तथा समाजे सभायामेव, वीणा शिल्पमेषां तैः वैणिकैः । "शिल्पम्" इति ठक् । आलपितासु उच्चरितासु, व्यक्तिं गतास्वित्यर्थः । रागव्यञ्जनमालप्तिरिति लक्षणम् । पञ्चमाख्यस्वरस्य । मूर्छनासु आरोहणावरोहणेषु । "क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम् । मूर्छनेत्युच्यते" इति लक्षणात् । पञ्चमग्रहणं तस्य कोकिलालापकोमलत्वेनोद्दीपकत्वातिशयविवक्षयेत्यनुसन्धेयम् । मुमूर्छेत्यपि यत् । तदुभयम् । निह्नोतुम् आच्छादयितुं न शशाक । अये इति विषादे इत्यर्थः । 'अये क्रोधे विषादे च' इति विश्वः । एतेन हीत्यागोन्मादमूर्छावस्थाः सूचिताः ॥ ५२ ॥

अवापेति ॥ जितेन्द्रियाणां धुर्यग्रे कीर्तितस्थितिः ख्यातप्रतिष्ठः महीपतिर्नलः, असंवरे संवरणरहिते, संवरीतुमशक्य इत्यर्थः । "गृहवृदृनिश्चिगमश्च" इत्यप्प्रत्ययः । शम्बरवैरिविक्रमे मन्मथविकारे तत्र समाजे क्रमेण स्फुटतामुपेयुषि प्रकाशतां गते सति, सापत्रपतां सत्रपत्वम् अवाप । धैर्यशालिनां तद्भङ्गस्त्रपाकर इति भावः ॥ ५३ ॥

ननु विवेकिनः कुत इदं चापलमित्यत आह—**अलमिति** ॥ युक्तायुक्तविचारो विवेकः । तत्प्रमुखाः गुणाः धैर्यादयः नलम् । इदं स्त्रीलौल्यरूपम् । चापलं रोद्धुम् । "दुह्याच्" इत्यादिना रुधेर्द्विकर्मकत्वम् । अलं समर्थाः नाभवन् किल खलु । तथा हि—स्मरः कामः, जनमिति शेषः । रत्यां रागे, अनिरुद्धम्, सृजति अनीश्वरमवशं करोति । रत्यां रतिदेव्याम् । अनिरुद्धाख्यं कुमारं सृजतीति ध्वनिः । इति यत् । अयं सर्गनिसर्गः सृष्टिप्रभावः ईदृशः स्म ।

अनङ्गचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि ।
क्षणादारामविहारकैतवान्निषेवितुं देशमियेष नैषधः ॥ ५५ ॥

अथ श्रिया भर्त्सितमत्स्यकेतनस्समं वयस्यैस्स्वरहस्यवेदिभिः ।
पुरोपकण्ठोपवनं किलेक्षिता दिदेश यानाय निदेशकारिणः ॥ ५६ ॥

अमी ततस्तस्य विभूषितं सितं जवेऽपि मानेऽपि च पौरुषाधिकम् ।
उपाहरन्नश्वमजस्रचञ्चलैः खुराञ्चलैः क्षोदितमन्दुरोदरम् ॥ ५७ ॥

'रतिः स्मरप्रियायाञ्च रागेऽपि सुरतेऽपि च । अनिरुद्ध उषानाथे चारेचानीश्वरेऽपि च' इति विश्वः । अत्र स्मररागदुर्वारतायाः सर्वसृष्टिसाधारण्येन नलचापलदुर्वारतासमर्थनात्सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५४ ॥

अथास्य मनोरथसिद्ध्यौपयिकं दिव्यहंससंवादनिदानभूतं वनविहारं प्रस्तौति—अनङ्गेति ॥ नैषधो नलः, यत्नवानपि । अनङ्गचिह्नं मूर्छाप्रलापादिस्मरविकारं विना । संसदि क्षणमप्यासितुं यदा नो शशाक । तदा आरामविहारकैतवात् उपवनविहरणव्याजात् । देशं निषेवितुमियेष देशाद्देशान्तरं गन्तुमैच्छदित्यर्थः । एतेन चापलाख्यसञ्चारी भ्रमलक्षण उक्तः ॥ ५५ ॥

अथेति ॥ अथेच्छानन्तरं श्रिया सौन्दर्येण, भर्त्सितमत्स्यकेतनः तिरस्कृतस्मरो नलः, स्वरहस्यवेदिभिः । निजभैमीरागमर्मज्ञैः । वयसा तुल्याः वयस्याः स्निग्धाः । 'स्निग्धो वयस्यस्सवयाः' इत्यमरः । तैः समं सह । पुरोपकण्ठोपवनं पुरसमीपारामम् । ईक्षिता द्रष्टा, तृन्नन्तमेतत् । अत एव 'न लोक' इत्यादिना षष्ठीप्रतिषेधः । किलेत्यलीके । निदेशकारिणः आज्ञाकरान् । यानाय वाहनाय । यानमानेतुमित्यर्थः । "क्रियार्थ" इत्यादिना चतुर्थी । दिदेश आज्ञापयामास ॥ ५६ ॥

अमीति ॥ ततः आज्ञापनानन्तरम् । अमी निदेशकारिणः । तस्य नलस्य । विभूषितम् अलङ्कृतम् । जवे वेगेऽपि । माने प्रमाणेऽपि च ।

यान्तरेणावटुगामिनाध्वना निशीथिनीनाथमहस्सहोदरैः ।
गालगाद्देवमणेरिवोत्थितैर्विराजितं केसरकेशरश्मिभिः ॥ ५८ ॥
जस्रभूमीतटकुट्टनोद्गतैरुपास्यमानं चरणेषु रेणुभिः ।
प्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥ ५९ ॥
चलाचलप्रोथतया महीभृते स्ववेगदर्पानिव वक्तुमुत्सुकम् ।
लं गिरा वेद किलायमाशयं स्वयं हयस्येव च मौनमास्थितम् ॥

षात् पुरुषगतिवेगात्, पुरुषप्रमाणाच्च अधिकम् । 'ऊर्ध्वविस्तृतदोःपाणि-
ाने पौरुषं त्रिषु' इत्यमरः । "पुरुषहस्तिभ्यामण् च" इत्यण् । अश्वास
लैः चटुलस्वभावैः । खुराञ्चलैः शफाग्रैः । क्षोदितमन्दुरोदरं चूर्णितशाला-
न्तरम् । 'वाजिशाला तु मन्दुरा' इत्यमरः । एतच्चोत्तमाश्वलक्षणं सितं
म् अश्वम्, उपाहरन् आनिन्युरित्यर्थः ॥ ५७ ॥

अथ सप्तभिः कुलकमाह—**अथेति** ॥ अथानयनानन्तरं स नलः हय-
रोहेत्युत्तरेणान्वयः । कथंभूतम् । अन्तरेणाभ्यन्तरेण । अवटुगामिना
ाटिकाख्यमस्तकपृष्ठभाजा । 'अवटुर्घाटा कृकाटिका' इत्यमरः । अध्वना
र्ण, निगालगात् गलोद्देशगतात् । 'निगालस्तु गलोद्देशः' इत्यमरः । देवमणि-
र्तविशेषः । "निगालजो देवमणिः" इति लक्षणात् । दिव्यमाणिक्यस्य
ात । तस्मादुत्थितैरिवेत्युत्प्रेक्षा । निशीथिनीनाथमहस्सहोदरैः चन्द्रांशुसदृशी-
पमा । केसरकेशा एव रश्मय इति रूपकम् । तैर्विराजितम् ॥ ५८ ॥

अजस्रेति ॥ अजस्रेण भूमीतटकुट्टनेन, उद्गतैरुत्थितैः रेणुभिः ।
कर्षस्य वेगातिशयस्य । अध्ययनार्थमभ्यासाय । आगतैः । अणिमाङ्कितै-
परिमाणविशिष्टै, जनस्य लोकस्य चेतोभिरिवेत्युत्प्रेक्षा । चरणेषु पादेषु ।
स्यमानम् । अणुपरिमाणं मन इति तार्किकाः ॥ ५९ ॥

चलाचलेति ॥ पुनः चलाचलप्रोथतया स्वभावतः स्फुरमाणघोणतया ।
लिपदानामुपसङ्ख्यानाच्चलेर्द्विवचनम्, दीर्घश्च । 'घोणा तु प्रोथ-

महारथस्याध्वनि चक्रवर्तिनः परानपेक्षोद्वहनाद्यशस्सितम् ।
रदावदातांशुमिषादनीदृशां हसन्तमन्तर्बलमर्वतां रवेः ॥ ६१ ॥
सितत्विषश्चञ्चलतामुपेयुषो मिषेण पुच्छस्य च केसरस्य च ।
स्फुटाञ्चलच्चामरयुग्मचिह्नकैरनिह्नुवानं निजवाजिराजताम् ॥ ६२ ॥

मश्रियाम्' इत्यमरः । महीभृते नलाय । स्ववेगदर्पान् । वेगातिरेकान् वक्तुम् उत्सुकमुत्सुकमिवेत्युत्प्रेक्षा । अथाप्यवचने हेतुमुत्प्रेक्षते—अलमिति ॥ गिरा उक्त्या अलम् । कुतः । अयं नलः । स्वयम् । हयस्याश्वस्य । आशयमभिप्रायम् । वेद वेत्ति किल । "विदो लटो वा" इति णलादेशः । इति हेतोरित्यनुषङ्गः मौनं तूष्णींभावं च आस्थितं प्राप्तम् । अश्वहृदयवेदी नल इति प्रसिद्धिः ॥ ६० ॥

महारथस्येति ॥ महान् रथो यस्य तस्य महारथस्य । "आत्मानं सारथिं चाश्वान् रक्षन्युध्येत यो नरः । स महारथसंज्ञस्स्यादित्याहुर्नीतिकोविदाः" इत्युक्तलक्षणस्य रथिकविशेषस्येत्यर्थः, अन्यत्र महतो रथस्य । चक्रं राष्ट्रं वर्तयतीति चक्रवर्ती । सार्वभौमः तस्य नलस्य । "हरिश्चन्द्रो नलो राजा" इत्युक्तलक्षणात् । अन्यत्र चक्रेणैकेन वर्तनशीलस्येत्यर्थः । अध्वनि मार्गे । नापेक्षत इत्यनपेक्षम् । "पचाद्यच्" । परेषामनपेक्षम् । तस्मादुद्वहनादसहायोद्वहनाद्धेतोः । यशस्सितं कीर्तिविशदम् । अत एव अनीदृशाम् ईदृग्यशोरहितानाम् । "सप्त युञ्जन्ति रथमेकचक्रम्" इति सप्तानां सम्भूयोद्वहनश्रवणादिति भावः । रवेः अर्वतामश्वानाम् अन्तर्बलम् अन्तस्सारम् । रदानां दन्तानां ये अवदाताः सिताः अंशवः तेषां मिषात् हसन्तमिव स्थितमित्यर्थः । अत्र मिषशब्देन अंशूनामसत्यत्वमापाद्य हासत्वोत्प्रेक्षणात्सापह्नवोत्प्रेक्षा । इयं गम्या च व्यञ्जकाप्रयोगात् । 'रदना दशना दन्ता रदाः' इत्यमरः ॥ ६१ ॥

सितत्विष इति ॥ पुनः सितत्विषः विशदप्रभस्य चञ्चलतामुपेयुषः, चञ्चलस्येत्यर्थः । पुच्छस्य च केसरस्य सटायाश्च मूलस्य च मिषेण चलच्चामर-

अपि द्विजिह्वाभ्यवहारपौरुषे मुखानुषक्तायतवल्गुवल्गया ।
उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः ॥ ६३ ॥
स सिन्धुजं शीतमहस्सहोदरं हरन्तमुच्चैःश्रवसः श्रियं हयम् ।
जिताखिलक्ष्माभृदनल्पलोचनस्तमारुरोह क्षितिपाकशासनः ॥ ६४ ॥
निजा मयूखा इव तिग्मदीधितिं स्फुटारविन्दाङ्कितपाणिपङ्कजम् ।
तमश्ववारा जवनाश्वयायिनं प्रकाशरूपा मनुजेशमन्वयुः ॥ ६५ ॥

युग्मस्य । चिह्नकैर्लक्षणैः स्फुटां प्रसिद्धां निजां वाजिराजताम् । अश्वेश्वरत्वम् अनिह्नुवानम्, प्रकाशयन्तमिवेत्यर्थः । अराज्ञः कथं चामरयुग्ममिति भावः । पूर्ववदलङ्कारः ॥ ६२ ॥

अपीति ॥ पुनः रयस्मये वेगप्रयुक्ताहङ्कारे प्रसभं प्रसह्य जितस्य प्रागेव निर्जितस्य गरुत्मतः । मुखानुषक्ता वक्त्रलग्ना आयता दीर्घा वल्गू रम्या च या वल्गा मुखे रज्जुः । तया तन्मिषेणेत्यर्थः । द्विजिह्वाभ्यवहारपौरुषे सर्पभक्षण-पुरुषकारेऽपि, प्रतिमल्लतां प्रतिभटत्वम् । उपेयिवांसं प्राप्तमिवेत्यर्थः । तथा च गम्योत्प्रेक्षेयम् । "उपेयिवाननाश्वाननूचानश्च" इति क्वसुप्रत्ययान्तो निपातः ॥

स इति ॥ जिताः अखिलाः, क्ष्माभृतो भूपाः, भूधराश्च येन सः । अनल्पलोचनो विशालाक्षः । अन्यत्र बहुनेत्रस्सहस्राक्ष इति यावत् । सः क्षिति-पाकशासनः क्षितीन्द्रो नलः । देवेन्द्रश्च । सिन्धुजं सिन्धुदेशोद्भवं, समुद्रोद्भवञ्च । 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्' इत्यमरः । शीतमहस्सहोदरम् । चन्द्रसवर्णमित्यर्थः । अन्यत्र चन्द्रभ्रातरम् । एकयोनित्वादिति भावः । उच्चैः-श्रवसः इन्द्राश्वस्य श्रियं हरन्तम् । तत् सरूपमित्यर्थः । तं हयम् आरुरोह । अत्रोच्चैःश्रवसः श्रियं हरन्तमित्युपमा । सा च श्लिष्टविशेषणात् श्लेषसङ्कीर्णा । क्षितिपाकशासन इत्यतिशयोक्तिः ॥ ६४ ॥

निजा इति ॥ निजा आत्मीयाः, प्रकाशरूपा उज्ज्वलाकाराः, भास्वररूपाश्च । अश्वान् वारयन्तीत्यश्ववाराः अश्वारोहाः । स्फुटारविन्दाङ्कितपाणि-

चलन्नलंकृत्य महारयं हयं स वाहवाहोचितवेषपेशलः ।
प्रमोदनिष्पन्दतराक्षिपक्ष्मभिर्व्यलोकि लोकैर्नगरालयैर्नलः ॥ ६६ ॥

क्षणादथैष क्षणदापतिप्रभः प्रभञ्जनाध्येयजवेन वाजिना ।
सहैव ताभिर्जनदृष्टिवृष्टिभिर्बहिः पुरोऽभूत् पुरुहूतपौरुषः ॥ ६७ ॥

ततः प्रतीच्छ प्रहरेति भाषिणी परस्परोल्लासितशल्यपल्लवे ।
मृषा मृधं सादिबले कुतूहलान्नलस्य नासीरगते वितेनतुः ॥ ६८ ॥

पङ्कजम् पद्मरेखाङ्कितहस्तम् । अन्यत्र पद्महस्तम् । जवनो जवशीलः । "यु चङ्क्रम" इत्यादिना युच् । तेनाश्वेन । अन्यत्र तैरश्वैर्यातीति तथोक्तम् । मनुजाः मनोर्जाता नरा राजानश्च । तेषामीशं तं नलं तिग्मदीधितिं सूर्यम् । मयूखा इव अन्वयुः अन्वगच्छन् । यातेर्लिट् । झेर्जुसादेशः ॥ ६५ ॥

चलन्निति ॥ वाहवाहोचितवेषपेशलः अश्ववाहोचितनैपथ्यचारुः । 'चारौ दक्षे च पेशलः' इत्यमरः । स नलः महारयं जवनं हयम् । अलङ्कृत्य चलन् । स्वयं हयस्य भूषणीभूय गच्छन्नित्यर्थः । प्रमोदेन निष्पन्दतराणि अत्यन्तनिश्चलानि अक्षिपक्ष्माणि, येषां तैरनिमेषदृष्टिभिरित्यर्थः । नगरालयै-र्नगरनिवासिभिः, लोकैर्जनैर्व्यलोकि, विस्मयहर्षाभ्यां विलोकित इत्यर्थः । वृत्त्यनु-प्रासोऽलङ्कारः ॥ ६६ ॥

क्षणादिति ॥ अथ क्षणदापतिप्रभः चन्द्रद्युतिः, पुरुहूतपौरुषः इन्द्र-पराक्रमः, एष नलः । प्रभञ्जनाध्येयजवेन वायुनाभ्यसनीयवेगेन, ततोऽप्यधिक-वेगेनेत्यर्थः । वाजिना अश्वेन, क्षणात्ताभिः जनदृष्टिवृष्टिभिः दृष्टिपातैः सह । जनैर्दृश्यमान एवेत्यर्थः । बहिः पुरः पुराद्बहिः, बहिः स्थितोऽभूत् । पूर्वं पुरे दृष्टः क्षणान्तर एव पुराद्बहिर्दृष्ट इति वेगातिशयोक्तिः ॥ ६७ ॥

तत इति ॥ ततः पुराद्बहिर्गमनानन्तरं प्रतीच्छ गृहाण प्रहर जहीति भाषिणी भाषमाणे इत्यर्थः । परस्परमन्योन्योपरि, उल्लासितानि प्रसारितानि,

प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममुत्थितं रजः ॥ ६९ ॥

हरेर्यदक्रामि पदैककेन खं पदैश्चतुर्भिः क्रमणेऽपि तस्य नः ।
त्रपा हरीणामिति नम्रिताननैर्न्यवर्ति तैरर्धनभःकृतक्रमैः ॥ ७० ॥

शल्यपल्लवानि तोमराग्राणि याभ्यां ते तथोक्ते । 'शल्यं तु तोमरः' इत्यमरः । नलस्य नासीरगते सेनाप्रवर्तिनी । 'सेनामुखं तु नासीरम्' इत्यमरः । सादिबले तौरङ्गिकसैन्ये । कुतूहलान्मृषामृधं मिथ्यायुद्धम्, युद्धनाटकमित्यर्थः । वितेनतुः चक्रतुः ॥ ६८ ॥

प्रयातुमिति ॥ इयं धरा भूः समुद्रातिरिक्तेति भावः । अस्माकं प्रयातुं प्रस्थातुम् । कियत्पदं गन्तव्यस्थानम्, न किञ्चित्पर्याप्तमित्यर्थः । तत् तस्मात् अम्भोधिरपि । स्थलायतां स्थलवदाचरतु भूरेव भवत्वित्यर्थः । "कर्तुः क्यङ् सलोपश्च" इति क्यङ् प्रत्ययः । इतीव इति मत्वेव । इतिनैव गम्यमानार्थत्वादप्रयोगः । अन्यथा पौनरुक्त्यात् । क्रियानिमित्तोत्प्रेक्षा । निजवेगेन दर्पितैः सञ्जातदर्पैः, वाहैर्नलाश्वैः । पयोधिरोधक्षमं समुद्रच्छादनपर्याप्तम् । रज उत्थितं उत्थापितं, तथा सान्द्रमिति भावः ॥ ६९ ॥

हरेरिति ॥ यत् खम् आकाशम् । हरेरेककेन एकाकिना । "एकादाकिनिच्चासहाये" इति चकारात् कन्प्रत्ययः । पदा पादेन । 'पादः पदङ्घ्रिश्चरणोऽस्त्रियाम्' इत्यमरः । "पद्दन्" इत्यादिना पदादेशः । अक्रामि अलङ्घि । तस्य खस्य । चतुर्भिः पादैः क्रमणे लङ्घने, कृते सत्यपीति शेषः । हरीणां वाजिनां, विष्णूनां चेति गम्यते । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः । नोऽस्माकं त्रपा इतीवेत्यर्थः । गम्यार्थत्वादिवशब्दस्याप्रयोगः । अत एव गम्योत्प्रेक्षा । नम्रितानि नम्रीकृतानि आननानि यैस्तैः हरिभिः । अर्धे नभसि कृतक्रमैः कृतलङ्घनैः सद्भिः । न्यवर्ति

चमूचरास्तस्य नृपस्य सादिनो जिनोक्तिषु श्राद्धतयेव सैन्धवाः ।
विहारदेशं तमवाप्य मण्डलीमकारयन् भूरि तुरङ्गमानपि ॥७१॥

द्विषद्भिरेवास्य विलङ्घिता दिशो यशोभिरेवाब्धिरकारि गोष्पदम् ।
इतीव धारामवधीर्य मण्डलीक्रियाश्रियामण्डि तुरङ्गमैः स्थली ॥

निर्वर्तितम् । यदन्येन पुंसा लघूपायेन साधितं तस्य गुरूपायेन करणं समानस्य लाघवाय भवेदिति भावः । एतेन प्लुतगतिरुक्ता तत्र गगनलङ्घनस्य सम्भवा-दिति ॥ ७० ॥

चमूचरा इति ॥ तस्य नृपस्य, चमूचराः सेनाचराः । "चरेष्टः" । सिन्धुदेशभवाः सैन्धवाः, अश्वाः । 'हयसैन्धवसप्तयः' इत्यमरः । "तत्रभवः" इत्यण् । तत्सम्बन्धिनोऽपि सैन्धवाः । "तस्येदम्" इत्यण् । ते सादिनोऽश्व-सादिन इत्यर्थः । जिनोक्तिषु श्राद्धतयेव । जैनदर्शनश्रद्धालुतयेवेत्युत्प्रेक्षा । "श्रद्धार्चावृत्तिभ्योऽण्" इति मत्वर्थीयोऽण्प्रत्ययः । तं विहारदेशं सञ्चारभूमिं, सुगतालयञ्च । 'विहारो भ्रमणे स्कन्धे लीलायां सुगतालये' इति विश्वः । अवाप्य तुरङ्गमान् भूरि बहुलं मण्डलीमपि, मण्डलाकारञ्च । अकारयन् । अपिशब्दोवात्तिसमुच्चयार्थः । अन्यत्र मण्डलीं मण्डलासनमित्यर्थः । बौद्धाः स्वकर्मानुष्ठाने प्रायेण मण्डलासनं कुर्वन्तीति प्रसिद्धिः ॥ ७१ ॥

द्विषद्भिरिति ॥ अस्य नलस्य द्विषद्भिरेव, पलायमानैरिति भावः । दिशो लङ्घिताः अस्य यशोभिरेवाब्धिः । गोः पदं गोष्पदमकारि गोष्पदमात्रः कृतः । "गोष्पदं सेवितासेवितप्रमाणेषु" इति सुडागमषत्वयोर्निपातः । इतीव इति मत्वेवेत्युत्प्रेक्षा । अन्यसाधारणं कर्म नोत्कर्षाय भवेदिति भावः । तुरङ्गमैर्धारां गतिम् । जातावेकवचनम् । पञ्चापि धारा इत्यर्थः । 'आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् । गतयोमूः पञ्चधाराः' इत्यमरः । अवधीर्यानादृत्य । मण्डलीक्रियाश्रिया अर्धप्लुतायितमण्डलीकरणलक्ष्म्या, मण्डलगत्यैवेत्यर्थः ।

अचीकरच्चारु हयेन या भ्रमीर्निजातपत्रस्य तलस्थले नलः ।
मरुत् किमद्यापि न तासु शिक्षते वितत्य वात्यामयचक्रचङ्क्रमान् ॥
विवेश गत्वा स विलासकाननं ततः क्षणात् क्षोणिपतिर्धृतीच्छया ।
प्रवालरागच्छुरितं सुषुप्सया हरिर्घनच्छायमिवाम्भसां निधिम् ॥
वनान्तपर्यन्तमुपेत्य सस्पृहं क्रमेण तस्मिन्नवतीर्णदृक्पथे ।
न्यवर्ति दृष्टिप्रकरैः पुरौकसामनुव्रजद्बन्धुसमाजबन्धुभिः ॥ ७५ ॥

स्थली कृत्रिमभूमिः । 'जानपद' इत्यादिना कृत्रिमार्थे ङीप् । अमण्डि अभूषि । 'मडि भूषणे' इति धातोर्ण्यन्तात्कर्मणि लुङ् । इदित्वान्नुमागमः ॥ ७२ ॥

अचीकरदिति ॥ नलः चारु यथा तथा । हयेन प्रयोज्यकर्त्रा निजातपत्रस्य तलस्थले अधःप्रदेशे । 'अधः स्वरूपयोरस्त्री तलम्' इत्यमरः । याः भ्रमीः मण्डलगतीः । अचीकरत् कारितवान् । "करोतेर्णौ चङ्" । तासु भ्रमिषु विषये मरुदद्यापि वातानां समूहाः वात्याः । "पाशादिभ्यो यः" । अत्र तन्मयो लक्ष्यन्ते—तन्मयान् तद्रूपान् । चक्रचङ्क्रमान् मण्डलगतीः । वितत्य विस्तीर्य । न शिक्षते किं नाभ्यस्यते किमित्युत्प्रेक्षा । शिक्षितश्चेत् तथा सोऽपि गतिं कुर्यादिति भावः । वायोरप्यसम्भाविता गतीरचीकरदिति भावः ॥ ७३ ॥

विवेशेति ॥ ततः सः क्षोणिपतिः क्षणात् गत्वा धृतीच्छया सन्तोषकाङ्क्षया । प्रवालाः पल्लवाः, अन्यत्र विद्रुमाः । 'प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लव' इत्यमरः । तेषां रागेणारुण्येन । छुरितं रूषितम् । घनच्छायं सान्द्रानातपम्, अन्यत्र मेघकान्तिम् । 'छाया त्वनातपे कान्तौ' इति विश्वः । विलासकाननं क्रीडावनम् । अन्यत्र बवयोरभेदात् । बिलासकानां बिलेशयानां सर्पाणाम् । अननं प्राणनम् । सुषुप्सया स्वप्तुमिच्छया, हरिर्विष्णुः । अम्भसां निधिमब्धिमिव विवेश ॥ ७४ ॥

वनान्तेति ॥ अनुव्रजद्बन्धुसमाजबन्धुभिः स्नेहादनुगच्छद्बन्धुसङ्घसदृशैरित्यर्थः । अत एवोपमालङ्कारः । पुरौकसां दृष्टिप्रकरैः दृष्टिसमूहैः कर्तृभिः ।

ततः प्रसूने च फले च मञ्जुले स सम्मुखीनाङ्गुलिना जनाधिपः ।
निवेद्यमानं वनपालपाणिना व्यलोकयत्काननरामणीयकम् ॥ ७६ ॥
फलानि पुष्पाणि च पल्लवे करे वयोतिपातोद्गतवातवेपिते ।
स्थितैः समाधाय महर्षिवार्धकाद्वने तदातिथ्यमशिक्षि शाखिभिः ॥

वनान्तपर्यन्तं काननोपान्तसीमाम् । उदकप्रान्तपर्यन्तञ्चेति गम्यते । 'वने सलिलकानने' इत्यमरः । सस्पृहं साभिलाषं यथा तथा उपेत्य गत्वा । क्रमेण तस्मिन् नले अवतीर्णदृक्पथे अतिक्रान्तदृष्टिविषये सति । न्यवर्ति निवृत्तम् । भावे लुङ् । यथा बन्धुभिरोदकात् प्रियं पान्थमनुव्रजेदित्यागमात् प्रवसन्तमनुव्रज्य निवर्त्यते तद्वदित्यर्थः ॥ ७५ ॥

तत इति ॥ ततो वनप्रवेशानन्तरं स जनाधिपो नलः । मञ्जुले मनोज्ञे, प्रसूने पुष्पे, फले च । सम्मुखीना सन्दर्शिनी, सम्मुखावस्थितवस्तुप्रकाशिकेति यावत् । "यथामुखसम्मुखस्य दर्शन" इति खप्रत्ययः । सा अङ्गुलिर्यस्य तेन । वनपालपाणिना निवेद्यमानम् इदमिदमित्यङ्गुल्या पुष्पफलादिनिर्देशेन प्रदर्श्यमानमित्यर्थः । काननरामणीयकम् । "योपधाद्गुरूपोत्तमाद्वुञ्" इति वुञ्प्रत्ययः । व्यलोकयदपश्यदिति स्वभावोक्तिः ॥ ७६ ॥

फलानीति ॥ वयोतिपातेन पक्षिपातेन, बाल्याद्यपगमेन च । उद्गतेन उत्थितेन, वातेन वायुना, वातदोषेण च, वेपिते कम्पिते । 'खगबाल्यादिनोर्वयः' इत्यमरः । पल्लव एव कर इति व्यस्तरूपकम् । फलानि पुष्पाणि च, समाधाय निधाय, स्थितैः तिष्ठद्भिः, वने शाखिभिर्वृक्षैः, वेदशाखाध्यायिभिश्च । 'शाखा वेदप्रभेदे च' इति वैजयन्ती । तदातिथ्यं तस्य नलस्य आतिथ्यम्, अतिथ्यर्थं कर्म । "अतिथेर्ञ्यः" इति ञ्यप्रत्ययः । महर्षीणां वार्धकात् वृद्धसमूहात्, तत्र वृद्धमहर्षिसङ्घादित्यर्थः । शिवभागवतवत्समासः । 'वृद्धसङ्घे तु वार्धकम्' इत्यमरः । "वृद्धाच्चेति वक्तव्यम्" इति समूहार्थे वुञ्प्रत्ययः । अशिक्षि शिक्षितम् अभ्यस्तम् । अन्यथा कथमिदमाचरितमिति भावः ।

विनिद्रपत्त्रालिगतालिकैतवान्मृगाङ्कचूडामणिवर्जनार्जितम् ।
दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम् ॥ ७८ ॥

वियोगभाजां हृदि कण्टकैः कटुर्निधीयसे कर्णिशरः स्मरेण यत् ।
ततो दुराकर्षतया तदन्तकृद्विगीयसे मन्मथदेहदाहिना ॥ ७९ ॥

कर्मणि लुङ् । उत्प्रेक्षेयम् । सा च व्यञ्जकाप्रयोगाद्गम्या । पूर्वोक्तरूपकश्लेषाभ्यामुत्थापिता चेति सङ्करः ॥ ७७ ॥

विनिद्रेति ॥ विनिद्रपत्त्रालिगतालिकैतवात् विकचदलावलिस्थितभृङ्गव्याजात्, मृगाङ्कचूडामणेरीश्वरस्य कर्तुः, वर्जनेन परिहारेण, आर्जितं सम्पादितम्। "न केतक्या सदाशिवम्" इति निषेधादिति भावः । आशासु, चरिष्णु सञ्चरणशीलम् । "अलंकृञ्" इत्यादिना चरतेरिष्णुच्प्रत्ययः । दुर्यशः अपकीर्तिम् । दधानं केतकं केतकीकुसुमम् । तत्र वने, स नलः कौतुकी सन् ददर्श, अर्हस्य महापुरुषबहिष्कारो दुष्कीर्तिकर इति भावः । अत्र अलिकैतवादित्यलित्वापह्नवेन तेषु दुर्यशस्त्वारोपादपह्नवालङ्कारः । "निषिध्य विषयं साम्यादन्यारोपे त्वपह्नवः" इति लक्षणात् ॥ ७८ ॥

अथ त्रिभिः कैतकोपालम्भमाह—**वियोगेति** ॥ हे कैतक, यद्यस्मात् त्वं स्मरेण वियोगभाजां हृदि, कण्टकैः निजतीक्ष्णावयवैः, कटुः तीक्ष्णः कैतकविशेषणस्यापि कर्णिशरत्वविशेषणविवक्षया पुल्लिङ्गनिर्देशः । किंतूद्देश्यविशेषणस्य विधेयविशेषणत्वं क्लिष्टम् । कर्णवत् कर्णि । प्रतिलोमशल्यं, तद्वान् शरः कर्णिशरस्सन् निधीयसे । कण्टककठोरकैतकस्य कर्णिशरत्वरूपणाद्रूपकालङ्कारः । ततः कर्णिशरत्वादेव दुराकर्षतया तदन्तकृत्तेषां वियोगिनां मारकं सत् । मन्मथदेहदाहिना स्मरहरेण, विगीयसे विगर्ह्यसे । द्वेष्यवद्द्वेष्योपकरणमपि असह्यमेव । तदपि हिंसश्चेत्किमु वक्तव्यमिति भावः। अत्रेश्वरकर्तृकस्य केतकीविगानस्य तद्गतवियोगिहिंसताहेतुकत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा । व्यञ्जकाप्रयोगाद्गम्या । सा चोक्तरूपकोत्थापितेति सङ्करः ॥ ७९ ॥

त्वदग्रसूचीसचिवस्स कामिनोर्मनोभवस्सीव्यति दुर्यशःपटौ ।
स्फुटश्च पत्रैः करपत्रमूर्तिभिर्वियोगिहृद्दारुणि दारणायते ॥ ८० ॥

धनुर्मधुस्विन्नकरोऽतिभीमजापरं परागैस्तव धूलिहस्तयन् ।
प्रसूनधन्वा शरसात्करोति मामिति क्रुधाक्रुश्यत तेन कैतकम् ॥

विदर्भसुभ्रूस्तनतुङ्गताप्तये घटानिवापश्यदलं तपस्यतः ।
फलानि धूमस्य धयानधोमुखान् स दाडिमे दोहदधूपिनि द्रुमे ॥

त्वदग्रसूचीति ॥ तव अग्राण्येव । सूच्यः सचिवाः सहकारिणो यस्य स तथोक्तः, सः प्रसिद्धः मनोभवः । कामिनी च कामी च कामिनौ तयोः । "पुमान् स्त्रिया" इत्येकशेषः । दुर्यशसी । अधीराविन्यपकीर्ती एव पटाविति रूपकम् । सीव्यति कण्टकस्यूतं करोतीत्यर्थः । किं चेति चार्थः । करपत्रमूर्तिभिः ककचाकारैः । 'क्रकचोऽस्त्री करपत्रम्' इत्यमरः । पत्रैः । वियोगिनां, हृदेव दारुणि । दारयतीति दारणः विदारकः छेत्ता । स इवाचरतीति दारणायते । "कर्तुः क्यङ् सलोपश्च" इति क्यङन्ताल्लट् । दारणायत इत्युपमा । सा च हृद्दारुणीति रूपकानुप्राणितेति सङ्करः ॥ ८० ॥

धनुरिति ॥ हे कैतक, प्रसूनं धनुर्यस्येति प्रसूनधन्वा पुष्पचापः । "वा संज्ञायाम्" इत्यनङादेशः । अत एव धनुषः मधुना मकरन्देन, स्विन्नकरः आर्द्रपाणिस्सन् । तव परागैः रजोभिः, धूलिहस्तयन् पुनःपुनः धूल्युद्धापित-हस्तमात्मानं कुर्वन् । अन्यथा धनुःस्रंसनादिति भावः । "तत्करोति" इति ण्यन्ताल्लटश्शत्रादेशः । अतिभीमजापरं अत्यन्तदमयन्त्यासक्तं, माम्, शरसा-च्छराधीनं करोति । "तदधीनवचन" इति सातिप्रत्ययः । अन्यथा स्रस्त-चापस्सन् मां किं कुर्यादिति भावः । इतीत्थं श्लोकत्रयोक्तरीत्या तेन राज्ञा क्रुधा कैतकम्, आक्रुश्यत अपराधोद्घाटनेन अघोष्यतेत्यर्थः ॥ ८१ ॥

विदर्भेति ॥ स नलः । 'तरुगुल्मलतादीनामकाले कुशलैः कृतम् ।

वियोगिनीमैक्षत दाडिमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम्।
फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम्॥ ८३

पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रिया' इति शब्दार्णवे। दोहदं चासौ धूपश्च। तदुक्तम् "मेषामिषाम्बुसंसेकस्तत्केशामिषधूपनम्। स्थैर्यानयं प्रयोगो हि दाडिमीफलवृद्धये॥ मत्स्याज्यत्रिफलालेपैर्मांसैराजाविकोद्भवैः। लेपिता धूपिता सूते फलं ताळीव दाडिमी॥ आविकाधेन संसिक्ता धूपिता तस्य लोमभिः। फलानि दाडिमी सूते सुबहूनि पृथूनि च॥" इति। तद्वति दाडिमद्रुमे फलानि विदर्भसुभ्रुवो दमयन्त्याः स्तनयोर्या तुल्यता। तदाप्तये तत्प्राप्तये। तादृग्गौरवफललाभायेत्यर्थः। अलमत्यन्तं तपस्यतः तपश्चरतः। "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" इति क्यङ्प्रत्यये, "तपसः परस्मैपदञ्च" इति परस्मैपदम्। धूमस्य दोहदधूमस्य धयन्तीति धयान् पातॄन्। अत्र "आतश्चोपसर्गे" इति उपसर्गग्रहणाननुवृत्तिवत् "पाघ्रा" इत्यादिना अनुपसृष्टाया अपि धेटश्शप्रत्यय इति गतिः। अत एव काशिकायां 'केचिदुपसर्ग इति नानुवर्तयन्ति' इति। अधोमुखान् घटानिव। अपश्यदित्युत्प्रेक्षा। फलार्थिन उग्रं तपस्यन्तीति भावः॥ ८२॥

वियोगिनीमिति॥ असौ नलः, प्रियस्मृतेः दयितस्मरणात्, स्पष्टं व्यक्तम् उदीतेति। "इण् गतौ" इति कर्तरि क्तः। उदीताः उद्गताः, कण्टकाः सावयवसूचय एव। कण्टका रोमाञ्चा यस्यास्तामिति श्लिष्टरूपकम्। 'वेणौ द्रुमाङ्गे रोमाञ्चे क्षुद्रशत्रौ च कण्टकः' इति वैजयन्ती। फलान्येव स्तनौ, तावेव स्थानम्। तत्र विदीर्णः रागोऽस्यास्तीति रागि, रक्तवर्णमनुरक्तञ्च। यत्तस्मिन् हृदि, विशद्बीजभक्षणायान्तः प्रविशत्। शुकास्यं शुकतुण्डमेव। स्मरस्य, किंशुकं पलाशकुड्मलमेव आशुगो बाणो यस्यास्ताम् दाडिमीमेव, वियोगिनीं विरहिणीं, ऐक्षत अपश्यत्। रूपकालङ्कारः। विः पक्षी, तद्योगिनीमिति च गम्यते॥ ८३॥

स्मरार्धचन्द्रेषुनिभे कृशीयसां स्फुटं पलाशेऽध्वजुषां पलाशनात् ।
स वृन्तमालोकत खण्डमन्वितं वियोगिहृत्खण्डिनि कालखण्डजम् ॥

नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे ॥

स्मरेति ॥ स नलः स्मरस्य योऽर्धचन्द्रः अर्धचन्द्राकारः, इषुः तन्निभे तत्सदृशे । नित्यसमासत्वादस्वपदविग्रहः । अत एवाह अमरः—"स्युरुत्तरपदे त्वमी ।" 'निभसङ्काशनीकाशप्रतीकाशोपमादयः' इति । वियोगिनां हृत्खण्डिनि हृदयभेदिनि । कृशीयसां कृशतराणाम् । अध्वजुषामध्वगामिनाम् । पलाशनान्मांसभक्षणाद्धेतोः पलाशे पलमश्नातीति व्युत्पत्त्या पलाशसंज्ञाभाजि किंशुककलिकायामित्यर्थः । अन्वितं सन्दष्टं स्फुटम् । वृन्तं प्रसवबन्धनम् । तदेव कालखण्डजं खण्डं यकृत्खण्डमिति व्यस्तरूपकम् । आलोकत आलोकितवान् । 'कालखण्डयकृती तु समे' इत्यमरः । तच्च दक्षिणपार्श्वस्थकृष्णवर्णमांसविशेषः ॥ ८४ ॥

नवेति ॥ गन्धवहेन वायुना, चुम्बिता स्पृष्टा । अन्यत्र अनुलिप्तेन पुंसा वीक्षिता । मकरन्दशीकरैः पुष्परसकणैः, करम्बिताङ्गी व्यामिश्रितरूपा । अन्यत्र स्विन्नाङ्गीति च गम्यते । स्मितशोभिनः विकासरम्याः, कुड्मला मुकुलाः यस्यास्सा मन्दहासमनोहरदन्तमुकुला च गम्यते । दरकम्पिनी वायुस्पर्शादीषत्कम्पा सात्त्विकवेपथुमती च । नवा लता वल्ली, तत्सदृशी कान्ता च गम्यते । नृपेण कर्त्रा । दृशा । करणेन । दरादराभ्यां भयतृष्णाभ्याम् उपलक्षितेन सता । पपे पीता, गाढं दृष्टेत्यर्थः । उद्दीपकत्वाद्दरः, प्रियासादृश्याददरश्च । 'दरोऽस्त्री शङ्खभीगर्तेष्वल्पार्थे त्वव्ययम्' इति वैजयन्ती । अत्र प्रस्तुतविशेषणसाम्यादप्रस्तुतनायिकाप्रतीतेः समासोक्तिरलङ्कारः । "विशेषणानां तौल्येन यत्र प्रस्तुतवर्णनात् । अप्रस्तुतस्य गम्यत्वे सा समासोक्तिरिष्यते इति लक्षणात् ॥ ८५

विचिन्वतीः पान्थपतङ्गहिंसनैरपुण्यकर्माण्यलिकज्जलच्छलात् ।
व्यलोकयच्चम्पककोरकावलीः स शम्बरारेर्बलिदीपिका इव ॥ ८६॥
अमन्यतासौ कुसुमेषुगर्भजं परागमन्धङ्करणं वियोगिनाम् ।
स्मरेण मुक्तेषु पुरा पुरारये तदङ्गभस्मेव शरेषु सङ्गतम् ॥ ८७ ॥
पिकाद्वने शृण्वति भृङ्गहुङ्कृतैर्दशामुदञ्चत्करुणं वियोगिनाम् ।
अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः ॥८८॥

विचिन्वतीरिति ॥ पन्थानं गच्छन्ति नित्यमिति पान्थाः, नित्य-पथिकाः। "पन्थो णः नित्यम्" इति णप्रत्ययः। पन्था देशश्च। त एव पतङ्गाः पक्षिणः। 'पतङ्गः पक्षिसूर्ययोः' इत्यमरः। तेषाम्, हिंसनैर्वधैः, अपुण्यकर्माणि। अलयः कज्जलानीवेत्युपमितसमासः। तेषां छलादित्यपह्नवालङ्कारः। विचिन्वतीः सञ्चिन्वतीः हिंसापापकारिणीरित्यर्थः। चम्पककोरकावलीः। शम्बरारेः स्मरस्य। बलिदीपिकाः पूजादीपिका इवेत्युत्प्रेक्षा। स नलो व्यलोकयत् ॥ ८६ ॥

अमन्यतेति ॥ असौ नलः कुसुमान्येव इषवः कामबाणाः, तेषां गर्भजं गर्भजातम्। वियोगिनामिति कर्मणि षष्ठी। अनन्धा अन्धाः क्रियन्ते अनेनेत्यन्धङ्करणम्। "आढ्यसुभग" इत्यादिना च्व्यर्थे ख्युन्प्रत्ययः। "अरु-र्द्विषत्' इत्यादिना मुमागमः। तं परागम्, पुरा पूर्वं, पुरारये पुरहराय। स्मरेण मुक्तेषु शरेषु। सङ्गतं संसक्तं तस्य पुरारेरङ्गे यद्भस्म तदिवामन्यते-त्युत्प्रेक्षितवानित्यर्थः। पुरा पुरारये ये मुक्तास्त एवैते पुरोवर्तिनः, कुसुमेषव इत्यभिमानः। अन्यथा एषां तदङ्गभस्मसङ्गोत्प्रेक्षानुत्थानादिति ॥ ८७ ॥

पिकादिति ॥ वने श्रोतरि, पिकाद्वक्तुः सकाशात्, भृङ्गहुङ्कृतैः। वियोगिनां दशां अलिहुङ्कारकृतां दुरवस्थामित्यर्थः। उदञ्चत्करुणं विकसद्वृक्ष-विशेषम्। उद्यत्कृपञ्च यथा तथा शृण्वति सति। 'करुणस्तु रसे वृक्षे कृपायां करुणा मता' इति विश्वः। अनास्थया श्रोतुमनिच्छया सूनं प्रसूनमेव करं

रसालसालस्समदृश्यतामुना स्फुरद्विरेफारवरोषहुङ्कृतिः ।
समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्जनाभयम् ॥८९॥

दिने दिने त्वं तनुरेधि रेऽधिकं पुनःपुनर्मूर्छ च मृत्युमृच्छ च ।
इतीव पान्थं शपतः पिकान् द्विजान् सखेदमैक्षिष्ट स लोहितेक्षणान् ॥

प्रसारयतीति तथोक्ताम् । अनिष्टकथां करेण वारयन्तीमिव स्थितामित्यर्थः । सूनकरेति रूपकानुप्राणिता गम्योत्प्रेक्षेयम् । स्थलपद्मिनीम् । नलः, दूनः परितप्तस्सन् । "दूङ्गतेः कर्तरि क्तः" । "लादिभ्य" इति निष्ठानत्वम् । ददर्श ॥ ८८ ॥

रसालेति ॥ अमुना नलेन स्फुरद्विरेफारवः भ्रमरझङ्कार एव रोषेण या हुङ्कृतिर्हुङ्कारः सा यस्य सः। समीरलोलैर्वायुचलैः मुकुलैरङ्गुलिभिरेवेति भावः। वियोगिने जनाय । तर्जनाभयम् । दित्सन् दातुमिच्छन्निव स्थितः । "ददातेः सन्प्रत्ययः" । "सनि मीमा" इत्यादिना इसादेशः । "अत्र लोपोऽभ्यासस्य" इत्यभ्यासलोपः । "सस्यार्धधातुक" इति सकारस्य तकारः । रसालसालः चूत-वृक्षः, समदृश्यत सम्यग्दृष्टः । द्विरेफेत्यादि रूपकोत्थापितेयं तर्जनाभयजननो-त्प्रेक्षेति सङ्करः ॥ ८९ ॥

दिने दिन इति ॥ रे इति हीनसम्बोधने । रे, त्वं दिने दिने । अधिकं तनुरेधि कृशो भव । "अस्तेर्लोटि सिप्" । "हुझल्भ्यो हेर्धिः" इति धित्वम्, "घ्वसोरेद्धावभ्यासलोपश्च" इत्येत्वम्, "श्नसोरल्लोपः" इत्यकारलोपः । पुनःपुनर्मूर्छ च । मृत्युं मरणम् । ऋच्छ चेति । पान्थं नित्यपथिकम्, शपतः शपमानानिव स्थितानित्युत्प्रेक्षा । लोहितेक्षणान् रक्तदृष्टीन् । एकत्र स्वभावतः, अन्यत्र रोषाच्चेति द्रष्टव्यम् । पिकान् द्विजान्, कोकिलान् पक्षिणो ब्राह्मणांश्च, स नलः, सखेदम् ऐक्षिष्ट । तस्याप्युपघातशङ्कयेति भावः ॥ ९० ॥

अलिस्रजा कुड्मलमुच्चशेखरं निपीय चाम्पेयमधीरया दृशा ।
स धूमकेतुं विपदे वियोगिनामुदीतमाशङ्कितवानशङ्कत ॥ ९१ ॥

गलत्परागं भ्रमिभङ्गिभिः पतत्प्रसक्तभृङ्गावलि नागकेसरम् ।
स मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥

तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद्गुणस्पृशः ।
स्वचापदुर्निर्गतमार्गणभ्रमात् स्मरः स्वनन्तीरवलोक्य लज्जितः ॥

अलिस्रजेति ॥ अलिस्रजा भ्रमरपङ्क्त्या, उच्चशेखरं उन्नतशिरोभूषणं, अलिमलिनाग्रमित्यर्थः । 'शिखास्वापीडशेखरौ' इत्यमरः । चाम्पेयं चम्पकविकारं कुड्मलम् । 'अथ चाम्पेयश्चम्पको हेमपुष्पकः' इत्यमरः । नन्वयुक्तमिदम् । "न षट्पदो गन्धफलीमजिघ्रत्" इत्यादौ अळीनां चम्पकस्पर्शाभावप्रसिद्धेरिति चेन्न, स्पृशन्त्येव । किं तु स्पृष्ट्वा म्रियन्ते तावतैव स्पर्शाभावप्रसिद्धिरिति कश्चित्कीर्तितः परिहारः । अथवा चाम्पेयं नागकेसरम् । 'चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः' इत्यमरः । अधीरया दृशा निपीय, विक्लवदृष्ट्या गाढं दृष्ट्वा आशङ्कितवान् किञ्चिदनिष्टमुत्प्रेक्षितवान् स नळः । "अनिष्टाभ्यागमोत्प्रेक्षां शङ्कामाचक्षते बुधाः" इति लक्षणात् । वियोगिनां विपदे । उदीतम् उत्थितं धूमकेतुम्, अशङ्कत । अतर्कयदित्युत्प्रेक्षालङ्कारः ॥ ९१ ॥

गळदिति ॥ स नलः, गळत्परागं निर्यद्रजसं, भ्रमिभङ्गिभिः भ्रमणप्रकारैः, उपलक्षितं, पतत् भ्रश्यत् । प्रसक्तभृङ्गावलि संसक्तालिकुलं, नागकेसरं कुसुमविशेषं, मारनाराचनिघर्षणैः, स्खलन्तः लुठन्तः, ज्वलन्तश्च कणाः स्फुलिङ्गाः, यस्य तम् निकषोपलमिवेत्युत्प्रेक्षा । व्यलोकयत् । 'शाणस्तु निकषः कषः' इत्यमरः ॥ ९२ ॥

तदङ्गमिति ॥ सुगन्धि शोभनगन्धम् । "गन्धस्य" इत्यादिना समासान्त इकारः । तदङ्गं तस्य नलस्य अङ्गमुद्दिश्य लक्षीकृत्य, गुणो गन्धादिः

मरुल्लसत्पल्लवकण्टकैः क्षतं समुच्चरच्चन्दनसारसौरभम् ।
स वारनारीकुचसञ्चितोपमं ददर्श मालूरफलं पचेलिमम् ॥ ९४॥
युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम् ।
स्मरेषुधीकृत्य धिया भयान्धया स पाटलायाः स्तवकं प्रकम्पितः॥

मौर्वी च । 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति वैजयन्ती । तत्स्पृशः तद्युक्तात् । "स्पृशोऽनुदके" इति क्विन्प्रत्ययः । कुसुमादपादानात् पातुकाः धावन्तीः । "लषपत" इत्यादिना उकञ्प्रत्ययः । खनन्तीः, शिलीमुखालीरलिपङ्क्तीः, बाणपङ्क्तीश्च, अवलोक्य । स्मरः स्वचापात् पौष्पात्, दुर्निर्गता विषमनिर्गताः, ये मार्गणा बाणाः, तद्भ्रमाद्धेतोः, लज्जितोऽभवत् । नूनमिति शेषः । दुर्निर्गतेषवो ह्यधिकं खनन्तीति प्रसिद्धम् । अत्र खनच्छिलीमुखेषु दुर्निर्गतमार्गणभ्रमात् भ्रान्तिमदलङ्कारः । स च शिलीमुखेति श्लेषानुप्राणितः । तदुत्थापिता चेयं स्मरस्य लज्जितत्वोत्प्रेक्षेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ९३ ॥

मरुदिति ॥ मरुता, लसत्पल्लवानां चलत्किसलयानां, कण्टकैः तीक्ष्णाग्रैरवयवैः, क्षतम् । अन्यत्र, लसद्विटनखैः क्षतमिति गम्यते । समुच्चरत् परितः प्रसर्पत्, चन्दनसारस्येव सौरभं यस्य तत् । अत एव वारनारीकुचेन वेश्यास्तनेन, सञ्चितोपमं सम्पादितसादृश्यमित्युपमालङ्कारः । 'वारस्त्री गणिका वेश्या' इत्यमरः । कुलाङ्गनासु नखक्षताद्यनौचित्याद्वारविशेषणम् । पचेलिमं स्वतः पक्वम् । "कर्म कर्तरि केलिम उपसङ्ख्यानम्" इति पचेः केलिमच्प्रत्ययः । मालूरफलं बिल्वफलम् । 'बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि' इत्यमरः । स नलो ददर्श ॥ ९४ ॥

युवद्वयीति ॥ युवा च युवतिश्च तयोर्यूनोः, द्वयी मिथुनम् । तस्याः चित्तयोः कर्मणोः । मज्जने । ण्यन्ताल्ल्युट् । उचितैः क्षमैः, प्रसूनैः पुष्पबाणैः, शून्येतरदशून्यं. पूर्णं गर्भगह्वरं यस्य तम । पाटलायाः पाटलवृक्षस्य. स्तवकं

मुनिद्रुमः कोरकितश्शितिद्युतिर्वनेऽमुनाऽमन्यत सिंहिकासुतः ।
तमिस्रपक्षत्रुटिकूटभक्षितं कलाकलापं किल वैधवं वमन् ॥ ९६ ॥

पुरो हठाक्षिप्ततुषारपाण्डरच्छदावृतेर्वीरुधि बद्धविभ्रमाः ।
मिलन्निमीलं विदधुर्विलोकिता नभस्वतस्तं कुसुमेषु केलयः ॥ ९७

कुसुमगुच्छम्, भयान्धया भयमूढया, धिया भयजन्यभ्रान्त्येत्यर्थः । स्मरेषुधीकृत्य कामतूणीकृत्य, तथा विभ्रम्येत्यर्थः। अत एव भयात् प्रकम्पितः चकम्पे । अत्र पाटलस्तबके मदनतूणीरभ्रमात् भ्रान्तिमदलङ्कारः । "कविसम्मतसादृश्याद्विषयेऽपिहितात्मनि । आरोप्यमाणानुभवोयत्र स भ्रान्तिमान्मतः ॥" इति लक्षणात् ॥ ९५ ॥

मुनिद्रुम इति ॥ अमुना नलेन, वने, कोरकितः सञ्जातकोरकः, शितिद्युतिः पत्रेषु कृष्णच्छविः, मुनिद्रुमः अगस्त्यवृक्षः, तमिस्रपक्षे, त्रुटिकूटेन क्षयव्याजेन, भक्षितम् । अभक्षितत्वे कुतः क्षय इति भावः । अत्र कूटशब्देन क्षयापह्नवेन भक्षणारोपादपह्नवभेदः । वैधवं चान्द्रमसम् । 'विधुः सुधांशुः शुभ्रांशुः' इत्यमरः । कलाकलापं कलासमूहं, वमन् उद्गिरन्, सिंहिकायाः सुतो राहुः, अमन्यत किल । अत्र कोरकितशितिद्युतित्वाभ्यां मुनिद्रुमस्येन्दुकलाकलापवमनविशिष्टराहुत्वोत्प्रेक्षा । सा चोक्तापह्नवोत्थापितेति सङ्करः ॥ ९६ ॥

पुर इति ॥ पुरोऽग्रे, हठाज्झटित्याक्षिप्ता कृष्टा, तुषारेण हिमेन, पाण्डराणां छदानां पत्राणां, तुषारवत्पाण्डरस्य, छदस्याच्छादकस्य, वस्त्रस्य च, आवृतिः आवरणम् येन तस्य नभस्वतः वायोः, वीरुधि लतायाम् । बद्धा अनुबद्धाः, विभ्रमा भ्रमणानि लीलाश्च यासु ताः । कुसुमेषु विषये, केलयः क्रीडाः । कुसुमेषुकेलयः कामक्रीडाश्च । विलोकिताः सत्यः तं नलम् । मिलन्ती सज्जन्ती निमीला मीलनञ्च यस्य तम् । विदधुः निमीलिताक्षं चक्रुरित्यर्थः ।

गता यदुत्सङ्गतले विशालतां द्रुमाश्शिरोभिः फलगौरवेण ताम् ।
कथं स धात्रीमतिमात्रनामितैर्न वन्दमानानभिनन्दति स्म तान् ॥

नृपाय तस्मै हिमितं वनानिलैस्सुधीकृतं पुष्परसैरहर्महः ।
विनिर्मितं कैतकरेणुभिस्सितं वियोगिनेऽदत्त न कौमुदी मुदः ॥

विरहिणामुद्दीपकदर्शनस्य दुस्सहदुःखहेतुत्वादन्यत्र "नेक्षेतार्कं न नग्नां स्त्रीं न च संसक्तमैथुनम्" इति निषेधादिति भावः । अत्र प्रस्तुतनभस्वद्विशेषण-सामर्थ्यादप्रस्तुतकामुकविरहप्रतीतेः समासोक्तिरलङ्कारः ॥ ९७ ॥

गता इति ॥ द्रुमाः, यस्या धात्र्याः उत्सङ्गतले उपरिदेशे, अङ्कदेशे च । विशालतां वृद्धिं गताः । तां धात्रीं भुवं, मातरञ्च, उपमातरं वा । 'धात्री जनन्यामलकीवसुमत्युपमातृषु' इत्यमरः । "कर्मणि ष्ट्रन्' इति दिवो दधातेर्वा ष्ट्रन्प्रत्ययः । फलगौरवेण सुकृतातिशयेन, फलभरेण च हेतुना । अतिमात्रं नामितैः प्रह्वीकृतैः । नमेर्मित्त्वविकल्पाद्ध्रस्वाभावः । शिरोभिरग्रै-रुत्तमाङ्गैश्च । वन्दमानान् स्पृशतोऽभिवादयमानांश्च, तान् प्रकृतान् । अत एव यच्छब्दानपेक्षा । स नलः, कथं नाभिनन्दति स्म अभिननन्दैवेत्यर्थः । वृक्षाणां क्षेत्रानुरूपफलसम्पत्तिम्, अपत्यानां मातृभक्तिं च को नाम नाभि-नन्दतीति भावः। अत्रापि विशेषणसामर्थ्यात् पुत्रत्वप्रतीतेः समासोक्तिरलङ्कारः ॥

अत्रातपस्य चन्द्रिकात्वरूपणाय तद्धर्मान् सम्पादयति—**नृपायेति** ॥ वनानिलैः उद्यानवनवातैः, हिमं शीतलं कृतं हिमितम् । "तत्करोति" इति ण्यन्तात्कर्मणि क्तः । पुष्परसैः वनवातानीतैः मकरन्दैः, सुधीकृतं अमृतीकृतं, तथा कैतकरेणुभिः, सितम्, विनिर्मितं शुभ्रीकृतम् । अह्नो महः तेजः अहर्महः आतपः । "रोः सुपि" इति रेफादेशः । तदेव कौमुदीति व्यस्तरूपकम् । वियोगिने तस्मै नृपाय । मुदः प्रमोदान्, नादत्त न दत्तवती । प्रत्युतोद्दीपकै-वाभूदिति भावः ॥ ९९ ॥

वियोगभाजोऽपि नृपस्य पश्यता तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः कुहूरुताहूयत चन्द्रवैरिणी ॥ १००॥

अशोकमर्थान्वितनामताशयागतान् शरण्यं गृहशोचिनोऽध्वगान् ।
अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम् ॥ १०१॥

वियोगभाज इति ॥ वियोगभाजोऽपि वियोगिनोऽपि, नृपस्य । तदाननमेव, साक्षादमृतांशुं प्रत्यक्षचन्द्रम्, पश्यता । अत एव रोषादद्यापि चन्द्रतां न जहातीति क्रोधादिव अरुणचक्षुषा पिकेन । चन्द्रवैरिणी कुहूः निजालाप एव कुहूर्नष्टचन्द्रामावास्येति श्लिष्टरूपकम् । 'कुहूस्स्यात्कोकिलालापनष्टेन्दुकलयोरपि' इति विश्वः । मुहुराहूयतोऽत आहूता किमित्युत्प्रेक्षा पूर्वोक्तरूपकसापेक्षेति सङ्करः । आननचन्द्रस्येयमेव कुहूराह्वयनीया । अस्या एव तत्कान्तिहारित्वसम्भवादिति भावः ॥ १०० ॥

अशोकमिति ॥ एष नलः, पल्लवैः, प्रतीष्टानि प्रतिगृहीतानि संछन्नानि, कामज्वलदस्त्राणि तद्रूपाणि, जालकानि क्षारकाः बालमुकुलगुच्छा येन तम् । पल्लवसंछन्नजालकरूपकामास्त्रमित्यर्थः । अन्यथा तद्दर्शनादेव ते म्रियेरन्निति भावः । अशोकम् । अत एवार्थान्वितनामता नास्ति शोको यस्मिन्नित्यन्वर्थसंज्ञता तत्कृतया आशया । अस्मानप्यशोकान् करिष्यतीत्यभिलाषेण । शरणे रक्षणे साधु समर्थं शरण्यम् । मत्वेति शेषः । 'शरणं रक्षणे गृहे' इति विश्वः । आगतान् शरणागतानित्यर्थः । गृहान् दारान् शोचन्तीति गृहशोचिनः गृहाननुद्दिश्य शोचन्त इत्यर्थः । 'गृहाः पत्न्यां गृहे स्मृताः' इति विश्वः । अध्वगान् प्रोषितान् अवन्तमिव शरणागतरक्षणे महाफलस्मरणात् । अन्यथा महादोषस्मरणाच्च रक्षन्तमिवेत्यर्थः । अमन्यत ज्ञातवान् । अस्त्रभीरूणां तद्गोपनमेव रक्षोपाय इति भावः ॥ १०१ ॥

विलासवापीतटवीचिवादनात्पिकालिगीतेः शिखिलास्यलाघवात् ।
वनेऽपि तौर्यत्रिकमारराध तं क्व भोगमाप्नोति न भाग्यभाग्जनः ॥

तदर्थमध्याप्य जनेन तद्वने शुका विसृष्टाः पटवस्तमस्तुवन् ।
स्वरामृतेनोपजगुश्च शारिकास्तथैव तत्पौरुषगायनीकृताः ॥ १०३

इतीष्टगन्धाढ्यमटन्नसौ वनं पिकोपगीतोऽपि शुकस्तुतोऽपि च ।
अविन्दतामोदभरं बहिः परं विदर्भसुभ्रूविरहेण नान्तरम् ॥ १०४

विलासेति ॥ विलासवापी विहारदीर्घिका तस्यास्तटे वीचीनां वादनात्पिकानामलीनाञ्च गीतेर्गानात्, शिखिनां मयूराणाम्, लास्यलाघवात् नृत्तनैपुण्याच्च । वनेऽपि । तं नलम्, तौर्यत्रिकं नृत्तगीतवाद्यत्रयं, कर्तृ, आरराध आराधयामास । तथा हि भाग्यभाक् भाग्यवान् जनः क्व । भुज्यत इति भोगः सुखम् । तं नाप्नोति सर्वत्रैवाप्नोतीत्यर्थः । सामान्येन विशेषसमर्थन-रूपोऽर्थान्तरन्यासः ॥ १०२ ॥

तदर्थमिति ॥ जनेन सेवकजनेन, तदर्थं नलप्रीत्यर्थम् । अध्याप्य स्तुतिं पाठयित्वा तस्मिन् वने, विसृष्टाः मुक्ताः । पटवः स्फुटगिरः । शुकास्त नलम् अस्तुवन् । तथैव शुकवदेव । तदर्थमध्याप्य मुक्ताः । तत्पौरुषस्य नलपराक्रमस्य, गायिन्यो गायकाः कृताः गायनीकृताः, शारिकाः स्वरामृतेन मधुरस्वरेणेत्यर्थः । उपजगुश्च ॥ १०३ ॥

इतीति ॥ इति इष्टगन्धाढ्यम् इष्टसौगन्ध्यसम्पन्नं, वनमटन् । 'देश-कालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति वनस्य देशत्वात्कर्मत्वम् । असौ नलः, पिकैः कोकिलैः, उपगीतोऽपि शुकैः स्तुतोऽपि च । परं केवलम् । 'परं स्यादुत्तमानाप्तवैरिदूरेषु केवले' इति विश्वः । बहिः, आमोदभरं सौरभ्यातिरेक-मेव, अविन्दत । विदर्भसुभ्रूविरहेण हेतुना । आन्तरं आमोदभरं आनन्दाति-रेकं, नाविन्दत न लब्धवान् । प्रत्युतदुःखमेवानुबभूवेत्यर्थः । 'आमोदो गन्ध-हर्षयोः' इति विश्वः ॥ १०४ ॥

करेण मीनं निजकेतनं दधद्द्रुमालवालाम्बुनिवेशशङ्कया ।
व्यतर्कि सर्वर्तुघने वने मधुं स मित्रमत्रानुसरन्निव स्मरः ॥ १०५

लताबलालास्यकलागुरुस्तरुप्रसूनगन्धोत्करपश्यतोहरः ।
असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः ॥ १०६

अथ स्वमादाय भयेन मन्थनाच्चिरन्तरत्नाधिकमुषितं चिरात् ।
निलीय तस्मिन्निवसन्नपांनिधिर्वने तटाको ददृशेऽवनीभुजा ॥१०७

करेणेति ॥ स नलः, निजकेतन निजलाञ्छनं, मीनं द्रुमालवालाम्बुषु, निवेशशङ्कया प्रवेशभिया करेण, दधत् तादृक्छुभरेखाव्याजेन दधान इत्यर्थः । सर्वर्तुघने सर्वर्तुसङ्कुले । अत्र अस्मिन् वने, मित्रं सखायं, मधुं वसन्तम्, अनुसरन् अन्विष्यन्, स्मर इव व्यतर्कि तर्कित इत्युत्प्रेक्षा ॥ १०५ ॥

लतेति ॥ लता एवाबलाः, तासां लास्यकलासु मधुरनृत्यविद्यासु, गुरुरुपदेष्टेति मान्योक्तिः । तरुप्रसूनगन्धोत्कराणां वृक्षकुसुमसौरभसम्पदां, पश्यतोहरः पश्यन्तमनादृत्य हरः, प्रसह्यापहर्तेत्यर्थः । 'पश्यतो यो हरत्यर्थं स चोरः पश्यतोहरः' इति हलायुधः । "पचाद्यच्" । "षष्ठी चानादरे" इति षष्ठी । "वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु" इत्यलुक् । एतेन सौरभ्यमुक्तम् । मधु मकरन्द एव, गन्धवारि गन्धोदकं, तत्र प्रणीतलीलाप्लवनः कृतलीलावगाह इति शैत्योक्तिः । ईदृग्वनानिलः । अमुं नलम्, असेवत । गुणवानेव सेवकः सेव्यप्रियो भवतीति भावः ॥ १०६ ॥

अथेति ॥ अथ वनालोकनानन्तरं मन्थनाद्भयेन । धनार्थं पुनर्मथिष्यन्तीति भयादिति भावः । चिरात्, उषितं सञ्चितं, चिरत्नं चिरन्तनम् । "चिरपरुत्परारिप्रगेभ्यः त्नो वक्तव्यः" इति त्नप्रत्ययः । तच्च तद्रत्नाधिकम् । 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः । स्वं धनम्, आदाय तस्मिन् वने । निलीयान्तर्धाय निवसन् वर्तमानः अपांनिधिरिवेत्युत्प्रेक्षा । तटाकः सरोविशेषः, अवनीभुजा राज्ञा, ददृशे दृष्टः ॥ १०७ ॥

पयोनिलीनाभ्रमुकामुकावलीरदाननन्तोरगपुच्छसच्छवीन् ।
जलार्धरुद्धस्य तटान्तभूमिदो मृणालजालस्य निभाद्बभार यः ॥

तटान्तविश्रान्ततुरङ्गमच्छटास्फुटानुबिम्बोदयचुम्बनेन यः ।
बभौ चलद्वीचिकशान्तशातनैस्सहस्रमुच्चैःश्रवसामिव श्रयन् ॥१०९

सिताम्बुजानां निवहस्य यश्छलाद्बभावलिश्यामलितोदरश्रियाम् ।
तमस्समच्छायकलङ्कसङ्कुलं कुलं सुधांशोर्बहुलं वहन् बहु ॥ ११०

यदुक्तं धनमादायेति तदेवात्र सम्पादयति । पय इत्यादि नवभिः श्लोकैः—**पय इति** ॥ यस्तटाकः, जलेनार्धरुद्धस्य अर्धच्छन्नस्य, तटान्तभूमिदस्तटप्रान्तदेशनिर्गतस्येत्यर्थः । मृणालजालस्य बिसवृन्दस्य, निभाद्व्याजादित्यपह्नवालङ्कारः । 'निभो व्याजसदृक्षयोः' इति विश्वः । अनन्तोरगस्य शेषाहेः, पुच्छेन सच्छवीन् सवर्णान्, तद्वदुज्ज्वलानित्यर्थः । पयोनिलीनानां, अभ्रमुकामुकावलीनां ऐरावणश्रेणीनां, रदान् दन्तान्, बभार । तत्र एक एवैरावणः अत्र त्वसङ्ख्या इति व्यतिरेकः । अभ्रमुकामुक इति द्वितीयासमासो मधुपिपासुरितिवत् । "न लोक" इत्यादिना षष्ठीप्रतिषेधात् । "लषपत" इत्यादिना कमेरुकञ्प्रत्ययः ॥ १०८ ॥

तटान्तविश्रान्तेति ॥ यस्तटाकः, तटान्ते तटप्रान्ते, विश्रान्ता या तुरङ्गमच्छटा नलानीताश्वश्रेणी तस्याः स्फुटं यथा तथा अनुबिम्बोदयचुम्बनेन प्रतिबिम्बाविर्भावव्याप्त्या निमित्तेन, वीचय एव कशास्तासाम् अन्तशातनैः अप्रताडनैः । "अश्वादेस्ताडनी कशा" इत्यमरः । चलदुच्चलत् । उच्चैःश्रवसां सहस्रं श्रयन् प्राप्नुवन्निव । बभावित्युत्प्रेक्षा । व्यतिरेकश्च पूर्ववत् । एतेन नलाश्वानां उच्चैःश्रवःसाम्यं गम्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ १०९ ॥

सिताम्बुजानामिति ॥ यस्तटाकः, अलिभिः, श्यामलितोदरश्रियां श्यामीकृतमध्यशोभानां, सिताम्बुजानां पुण्डरीकाणां, निवहस्य, छलात् ।

रथाङ्गभाजा कमलानुषाङ्गिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा ।
सरोजिनीस्तम्बकदम्बकैतवात् मृणालशेषाहिभुवान्वयायि यः ॥

तरङ्गिणीरङ्कजुषस्स वल्लभास्तरङ्गरेखा विभरांबभूव यः ।
दरोद्गतैः कोकनदौघकोरकैर्धृतप्रवालाङ्कुरसञ्चयश्च यः ॥ ११२ ॥

तमस्समच्छायैः तिमिरसवर्णैः, कलङ्कैः सङ्कुलं बहुलं सम्पूर्णं, बहुनेकं सुधांशोः चन्द्रस्य, कुलं वंशं, वहन् बभौ । अत्र छलशब्देन पुण्डरीकेषु विषयापह्नवेन चन्द्रत्वारोपादपह्नवभेदः । व्यतिरेकस्तु पूर्ववत् ॥ ११० ॥

रथाङ्गेति ॥ यस्तटाकः, रथाङ्गं चक्रवाकं, चक्रायुधं च । यद्यपि चक्रवाके रथाङ्गनामेति प्रयोगो रूढः, तथापि प्रायेणास्य चक्रशब्दपर्यायत्वेन प्रयोगदर्शनात्तद्वदस्यापि उभयत्र प्रयोगं मन्यते कविः । तद्भाजा । भजो ण्विः । कमलैः कमलया च, अनुषङ्गिणा संसर्गवता, शिलीमुखस्तोमसखेन अळिकुलसहचरेण । अन्यत्र सखिशब्दः सादृश्यवचनः, तत्सवर्णेनेत्यर्थः । मृणालं शेषाहिरिवेत्युपमितसमासः । तद्भुवा तदाकारेण । अन्यत्र मृणालमिव शेषाहिः तद्भुवा तदाधारकेण, शार्ङ्गिणा विष्णुना, सरोजिनीनां स्तम्बाः गुल्माः । 'अप्रकाण्डे स्तम्बगुल्मौ' इत्यमरः । तेषां कदम्बस्य कैतवान्मिषात्, अन्वयायि अनुयातोऽधिष्ठित इति यावत् । अत्रापि कैतवशब्देन स्तम्बत्वमपह्नुत्य तत्र शार्ङ्गित्वारोपादपह्नवभेदः ॥ १११ ॥

तरङ्गिणीरिति ॥ किञ्च, यस्तटाकः, अङ्कजुषः अन्तिकभाजः, उत्सङ्गसङ्गिनीश्च । तरङ्गरेखास्तरङ्गराजिरेव स्ववल्लभास्तरङ्गिणीरिति व्यस्तरूपकम् । विभरांबभूव बभार । "भीह्रीभृहुवां श्लुवच्च" इति विकल्पादाम्प्रत्ययः । किञ्च यस्तटाकः, दरोद्गतैः ईषदुद्बुद्धैः, कोकनदौघकोरकैः रक्तोत्पलषण्डकलिकाभिः, धृतप्रवालाङ्कुरसञ्चयः धृतविद्रुमाङ्कुरनिकरश्चेति । अत्रापि कोकनदौघकोरकाणां विद्रुमत्वेन रूपणाद्रूपकमेव ॥ ११२ ॥

महीयसः पङ्कजमण्डलस्य यश्छलेन गौरस्य च मेचकस्य च ।
नलेन मेने सलिले निलीनयोस्त्विषं विमुञ्चन्विधुकालकूटयोः ॥

चलीकृता यत्र तरङ्गरिङ्गणैरबालशैवाललतापरम्पराः ।
ध्रुवं दधुर्बाडवहव्यवाडधःस्थितिप्ररोहत्तमभूमधूमताम् ॥ ११४ ॥

प्रकाममामोदभरं विवृण्वती करम्बितादित्यमवाप्य कण्टकैः ।
धृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाप्सरायिता ॥ ११५ ॥

महीयस इति ॥ यस्तटाकः, महीयसः महत्तरस्य, गौरस्य च, मेचकस्य च, पङ्कजमण्डलस्य सितासितसरोजषण्डयोः, छलेन सलिले निलीनयोः विधुकालकूटयोः, सितासितयोरिति भावः । त्विषं विमुञ्चन् विसृजन्निव नलेन मेने । अत्र छलेन विमुञ्चन्निवेति सापह्नवोत्प्रेक्षा ॥ ११३ ॥

चलीकृता इति ॥ यत्र यस्मिन् तटाके, तरङ्गरिङ्गणैः तरङ्गकम्पनैः, चलीकृताः चञ्चलीकृताः, अबालानां कठोराणां, शैवाललतानाम्, परम्पराः पङ्क्तयः, हव्यं वहतीति हव्यवाडग्निः । "वाहश्च" इत्यण्प्रत्ययस्य छन्दोमात्रविषयत्वादनादरेण भाषायां प्रयोगः । बाडवहव्यवाहो बडवाग्नेः, अधःस्थित्या अन्तरवस्थानेन, प्ररोहत्तमो बहिःप्रादुर्भवत्तमो भमा येषां ते च ते धूमाश्च तेषां भावस्तत्ता तां दधुः, बहिरुत्थितधूमपटलवद्बभुरित्यर्थः । ध्रुवमित्युत्प्रेक्षायाम् ॥ ११४ ॥

प्रकाममिति ॥ आदित्यं सूर्यम्, अवाप्य । प्रकामं कण्टकैः नाळगतैस्तीक्ष्णाग्रैरवयवैः, करम्बिता दन्तुरिता । अन्यत्र आदित्यम् अदितिपुत्रमिन्द्रम्, अवाप्य कण्टकैः पुलकैः करम्बिता । अत एव आमोदभरं परिमळसम्पदं, आनन्दसम्पदञ्च । विवृण्वती प्रकटयन्ती । दिवा दिवसेन, धृतानि स्फुटश्रीगृहाणि पद्मानि यस्य सः विग्रहः स्वरूपं यस्यास्सा । अन्यत्र दिवा स्वर्गेण स्फुटश्रीगृहम् उज्ज्वलशोभास्पदं, विग्रहो देहो यस्यास्सा, स्वर्लोकवासिनीत्यर्थः ।

यदम्बुपूरप्रतिबिम्बितायतिर्मरुत्तरङ्गैस्तरलस्तटद्रुमः ।
निमज्य मैनाकमहीभृतस्सतस्ततान पक्षान् धुवतस्सपक्षताम् ॥

पयोधिलक्ष्मीमुषि केळिपल्वले रिरंसुहंसीकलनादसादरम् ।
स तत्र चित्रं विहरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः ॥

प्रियासु बालासु रतिक्षमासु च द्विपत्रितं पल्लवितञ्च बिभ्रतम् ।
स्मरार्जितं रागमहीरुहाङ्कुरं मिषेण चञ्च्वोश्चरणद्वयस्य च ॥

यत्तटाकः, प्रभवः कारणं यस्यास्सा । यज्जन्या सरोजिनी । अप्सरायिता अप्सरा इवाचरिता । उपमानात् "कर्तुः क्यङ् सलोपश्च" इति । ततः कर्तरि क्तः । "ओजसोऽप्सरसो नित्यम्" इति सकारलोपः । श्लिष्टविशेषणेयमुपमा ॥ ११५

यदिति ॥ यस्य तटाकस्याम्बुपूरे, प्रतिबिम्बितायतिः प्रतिफलितायामः, मरुत्तरङ्गैः वातवीजनैः, तरलश्चलः तटद्रुमः, निमज्य सतः वर्तमानस्य, पक्षान् पत्राणि धुवतः कम्पयतः । मैनाकमहीभृतः मैनाकाद्रेः, सपक्षतां सदृशतां इन्द्राद्रक्षितत्वात्पक्षवत्तां ततान ॥ ११६ ॥

पयोधीति ॥ अथ नैषधो निषधानां राजा नलः । "जनपदशब्दात् क्षत्रियादञ्" । पयोधिलक्ष्मीमुषि तत्कल्प इत्यर्थः । तत्र केलिपल्वले क्रीडासरसि, रिरंसूनां रन्तुमिच्छूनां, हंसानां कलनादेषु मधुरस्वरेषु, सादरं सस्पृहम् । अत एवान्तिके समीपे विहरन्तं चरन्तम् । चित्रमद्भुतं, हिरण्मयं सुवर्णमयम् । दाण्डिनायनादिना निपातनात्साधुः । हंसम् अबोधि ददर्शेत्यर्थः ॥

पुनस्तमेव विशिनष्टि—प्रियास्विति ॥ बालासु अरतिक्षमासु, किञ्चिदासन्नयौवनास्वित्यर्थः । अन्यथा रागाङ्कुरासम्भवात् । रतिक्षमासु युवतिषु चेति द्विविधासु प्रियासु विषये क्रमात् । चञ्च्वोः त्रोट्योः । 'चञ्चुस्त्रोटिरुभे स्त्रियाम्' इत्यमरः । चरणद्वयस्य च मिषेण, द्विपत्रितं सञ्जातद्विपत्रं, पल्लवितं

महीमहेन्द्रस्तमवेक्ष्य स क्षणं शकुन्तमेकान्तमनोविनोदिनम् ।
प्रियावियोगाद्विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनागभूत् ॥

सञ्जातपल्लवञ्च, चञ्च्वोर्द्वयोः संपुटितत्वसाम्याद्द्विपत्रितत्वम् । चरणयोस्तु विसृमराङ्गुलित्वेन पल्लवसाम्यात् पल्लवितत्वं राजहंसानाम् । लोहितचञ्चुचरणत्वात् तन्मिषेणेत्युक्तम् । स्मरार्जितं स्मरेणैव वृक्षारोपकेणोत्पादितमित्यर्थः । राग एव महीरुहः, तस्याङ्कुर रागयुक्तमहीरुहाङ्कुरं, बिभ्रतम् । चञ्चुपुटमिषेण द्विपत्रितं बालिकागोचररागम् । चरणमिषेण पल्लवितं युवतिविषयरागञ्च बिभ्रतमित्यर्थः । सः हंसम् अबोधीति पूर्वेणान्वयः । "नाभ्यस्ताच्छतुः" इति नुमप्रतिषेधः । वृक्षाङ्कुरः प्रथम द्विपत्रितो भवति । पश्चात् पल्लवित इति प्रसिद्धम् । अत्र रागं बिभ्रतमिति हंसविशेषणाद्रागस्य हंसाधिकरणत्वोक्तेः प्रियास्वधिकरणभूतास्विति उपाध्यायविश्वेश्वरभट्टारकव्याख्यानं प्रत्याख्येयम् । अन्यनिष्ठस्य रागस्य अन्याधिकरणत्वायोगात् न चायमेक एव उभयनिष्ठ इति भ्रमितव्यम् । तस्येच्छापरपर्यायस्य तथात्वायोगात् । अन्यथा बुद्ध्यादीनामपि तथात्वापत्तौ सर्वसिद्धान्तविरोधाद्विषयानुरागाभावप्रसङ्गाच्च । उभयोरपि रागित्वसाम्यादुभयनिष्ठत्वभ्रमः कस्याश्चित् । तस्मात्कामिनोरन्योन्याधिकरणरागयोरन्योन्यविषयत्वमेव नाधिकरणत्वमिति सिद्धम् । प्रियास्विति विषयसप्तमीति सर्वं रमणीयम् । अत्र रागमहीरुहाङ्कुरमिति रूपकम् चञ्चुचरणमिषेणेत्यपह्नवानुप्राणितमिति सङ्करः । तेन च बाह्याभ्यन्तररागयोर्भेदेऽपि तदभेदरूपातिशयोक्त्युत्थापिता चञ्चुचरणव्याजेनान्तरितस्यैव रागस्य बहिरङ्कुरितत्वोत्प्रेक्षा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ११८ ॥

महीमहेन्द्र इति ॥ महीमहेन्द्रः भूदेवेन्द्रः, स नलः, एकान्तं नितान्तं मनोविनोदयतीति तथोक्तम् । तं शकुन्तं पक्षिणं, क्षणम् अवेक्ष्य । प्रियावियोगान्निर्भरमतिमात्रं विधुरो दुःस्थोऽपि मनागीषत्कुतूहलाक्रान्तमनाः कौतुकाविष्टः, अभूत् तं गृहीतुकामोऽभूदित्यर्थः ॥ ११९ ॥

अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तयानुगम्यते जनस्य चित्तेन भृशावशात्मना ॥
अथावलम्ब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः ।
स तिर्यगावर्जितकन्धरश्शिरः पिधाय पक्षेण रतिक्रमालसः ॥
सनालमात्माननिर्जितप्रभं ह्रिया नतं काञ्चनमम्बुजन्म किम् ।
अबुद्ध तं विद्रुमदण्डमण्डितं स पीतमम्भःप्रभुचामरञ्च किम् ॥

ननु कथमीदृशी चपलवृत्तिरस्य धीरोदात्तस्येत्याशङ्क्य नात्र जन्तोः स्वातन्त्र्यं किं तु भाव्यर्थानुसारिणी विधातुरिच्छैव तथा प्रेरयतीत्याह—**अवश्येति** ॥ अवश्यभव्येषु अवश्यंभाव्यर्थेषु विषये । "भव्यगेय" इत्यादिना कर्तरि यप्रत्ययान्तो निपातः । "लुम्पेदवश्यमः कृत्ये" इत्यवश्यमो मकारलोपः । अनवग्रहग्रहा अप्रतिबन्धनिर्बन्धा, निरङ्कुशाभिनिवेशेति यावत् । 'ग्रहोऽग्रहनिर्बन्धग्रहणेषु रणोद्यमः' इति विश्वः । वेधसः स्पृहा विधातुरिच्छा, यया दिशा धावति येन अध्वना प्रवर्तते । तयैव दिशा । भृशावशात्मना अत्यन्तपरतन्त्रस्वभावेन, जनस्य चित्तेन तृणेन वात्या वातसमूह इव । "पाशादिभ्यो यः" अनुगम्यते । वेधसः स्पृहा कर्म ॥ १२० ॥

चिकीर्षितार्थे दैवानुकूल्यं कार्यतो दर्शयति—**अथेति** ॥ अथ नलदृष्टिपथप्राप्त्यनन्तरं, रतिक्रमालसः स खगो हंसः, तदा नलकुतूहलकाल एव क्षणं, एकः पादो यस्यां क्रियायामित्येकपादिकाम् । एकपादेनावस्थानम् । मत्वर्थीयः ठन्प्रत्ययः । "तद्धितार्थे" इत्यादिना सङ्ख्यासमासः । "यस्येति च" इत्यकारलोपस्य स्थानिवद्भावेन तादृप्याभावान्न पादः पदादेशः । तामेकपादिकां, अवलम्ब्य । तिर्यगावर्जितकन्धरः आवर्तितग्रीवस्सन्, पक्षेण शिरः, पिधाय, उपपल्वलं पल्वलसमीपे, निदद्रौ सुष्वाप । स्वभावोक्तिरलङ्कारः । "स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्" इति लक्षणात् ॥ १२१ ॥

सनालमिति ॥ स नलः, तं निद्राणं हंसम्, आत्माननिर्जितप्रभं

कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती ।
तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्धवर्मणी ॥

विधाय मूर्ति कपटेन वामनीं स्वयं बलिध्वंसिविडम्बिनीमयम् ।
उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं समधत्त पाणिना ॥ १२४

निजमुखनिराकृतशोभम् । अत एव ह्रिया नतं सनालं नालसहितं, काञ्चनं सौवर्णं, अम्बुजन्म अम्बुजं किम् । तथा विद्रुमदण्डेन प्रवालमयदण्डेन मण्डितं भूषितं, पीतं पीतवर्णं, अम्भःप्रभोः अपांपत्युर्वरुणस्य, चामरं किम् । इति-शब्दोऽत्राध्याहार्यः । इति चाबुद्ध बुद्धवान्, उत्प्रेक्षितवानित्यर्थः । बुध्यतेर्लुङि तङ् । "झषस्तथोर्धोऽधः" इति तकारस्य धकारः ॥ १२२ ॥

कृतेति ॥ ततस्तन्निदानन्तरं, भयात्, कृतावरोहस्य कृतावतारस्य, अस्य नलस्य, उपानहौ चार्मणी पादत्राणे । 'पादत्राणे उपानहौ' इत्यमरः । बिभ्रती बिभ्राणे । पदे चरणे, तयोः प्रकृतयोः, वनयोः सलिलकाननयोः । 'वने सलिलकानने' इत्यमरः । प्रवालैः पल्लवैः, तथा अम्बुजैश्च सहेत्यर्थः । सहार्थे तृतीया । नियोद्धुं कामो ययोस्ते नियोद्धुकामे युद्धकामे इत्यर्थः । "तुं काममनसोरपि" इति मकारलोपः । अतो बद्धवर्मणी किमु बद्धकवचे इव रेजतुरित्युत्प्रेक्षा ॥ १२३ ॥

विधायेति ॥ अयं नलः, स्वयमेव कपटेन छद्मना । वामनीं ह्रस्वां गौरादित्वात् ङीप् । बलिध्वंसिविडम्बिनीं कपटवामनविष्णुमूर्त्यनुसारिणीमित्यर्थः मूर्तिं विधाय कायं सङ्कोच्येत्यर्थः । मौनिना निश्शब्देन । चरणेन । उपेतपार्श्वः प्राप्तहंसान्तिकः पाणिना । पतङ्गं पक्षिणं समधत्त सङ्कुचितवान् जग्राहेत्यर्थः स्वभावोक्तिरलङ्कारः ॥ १२४ ॥

तदात्तमात्मानमवेत्य संभ्रमात्पुनःपुनः प्रायसदुत्प्लवाय सः ।
गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलम् ॥
ससम्भ्रमोत्पातिपतत्कुलाकुलं सरः प्रपद्योत्कतयाऽनुकम्पताम् ।
तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव ॥
पतत्रिणा तद्रुचिरेण वञ्चितं श्रियः प्रयान्त्याः प्रविहाय पल्वलम् ।
चलत्पदाम्भोरुहनूपुरोपमा चुकूज कूले कलहंसमण्डली ॥ १२७॥

तदात्तमिति ॥ स हंसः, आत्मानं, तदात्तं तेन नलेन, आत्तं गृहीतं, अवेत्य ज्ञात्वा, सम्भ्रमात्, उत्प्लवाय उत्पतनाय, पुनःपुनः प्रायसत् आयस्तवान्। यसुप्रयत्ने इति धातोर्लुङि पुषादित्वात् च्लेरङादेशः । उड्डयने उत्पतने निराशतां गतः, विरुत्योत्क्रुश्य, निरोद्धुः गृहीतुः, करौ केवलं करावेव, दशति स्म दष्टवान् । अत्रापि स्वभावोक्तिभेदः ॥ १२५ ॥

ससम्भ्रमेति ॥ ससम्भ्रमं सत्वरं, उत्पातिनोड्डीयमानेन, पतत्कुलेन पक्षिसङ्घेन, आकुलं सरः कर्तृ । उत्कतया उन्मनस्कतया । "उत्क उन्मनाः" इति निपातनादभिधानाच्च साधुः । अनुकम्पतां दयालुतां, प्रपद्य प्राप्य, तं नृपं, ऊर्मिभिः लोलैः चलैः वारिरुहैः करैरिति व्यस्तरूपकम् । पतगग्रहात् पक्षिग्रहणात्, न्यवारयदिवेत्युत्प्रेक्षा । वास्तवनिवारणासम्भवादुत्प्रेक्षा । निवारणस्य करसाध्यत्वात्तत्र रूपकाश्रयणम् । अत एव इवस्योपमानाभावेन अर्थानुसाराद्यवहितान्वयेनाप्युत्प्रेक्षाव्यञ्जकत्वमिति रूपकोत्प्रेक्षयोरङ्गाङ्गिभावेन सङ्करः ॥१२६

पतत्रिणेति ॥ रुचिरेण पतत्रिणा हंसेन, वञ्चितम् । तत्पल्वलं सरः प्रविहाय । प्रयान्त्याः गच्छन्त्याः श्रियो लक्ष्म्याः, चलद्भ्यां पदाम्भोरुहनूपुराभ्यां, उपमा साम्यं यस्याःसा कलहंसमण्डली कूले चुकूज । स्वयूथ्यभ्रंशे तेषां कूजनं स्वभावः । अत्र हंसेनैव सह गच्छन्त्याः सरःशोभायाः, श्रीदेव्या सहाभेदाध्यवसायेन कूजत्कलहंसमण्डल्यां तन्नूपुरत्वमुत्प्रेक्ष्यते । उपमाशब्दोऽप्युपमार्थानुपपत्तेः सम्भावनालक्षक इत्यवधेयम् ॥ १२७ ॥

न वासयोग्या वसुधेयमीदृशस्त्वदङ्ग यस्याः पतिरुज्झितस्थितिः ।
इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु ॥

न जातरूपच्छदजातरूपता द्विजस्य दृष्टेयमिति स्तुवन् मुहुः ।
अवादि तेनाथ स मानसौकसा जनाधिनाथः करपञ्जरस्पृशा ॥

धिगस्तु तृष्णातरलं भवन्मनस्समीक्ष्य पक्षान्मम हेमजन्मनः ।
तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान् ॥१३०

न वासयोग्येति ॥ इयमीदृग्वसुधा वासयोग्या निवासार्हा न । कुतः । अङ्ग भो यस्याः वसुधायाः, उज्झितस्थितिः त्यक्तमर्यादः, ईदृशः घातुकः, त्वं पतिरितीत्थं खगाः क्षितिं प्रहाय नभःश्रिताः त नलं आरवैः उच्चध्वनिभिः, आचुक्रुशुः खलु । उक्तरीत्या सनिन्दोपालम्भं चक्रुरिवेत्युत्प्रेक्षा गम्या ॥ १२८ ॥

न जातरूपेति ॥ इयं ईदृक्, जातरूपच्छदैः सुवर्णपक्षैः, जातरूपता उत्पन्नसौन्दर्यं, द्विजस्य पक्षिणः, न दृष्टा अदृष्टचरी । हिरण्मयपत्री कुत्रापि न दृष्ट इत्यर्थः । इति मुहुः स्तुवन् । स जनाधिनाथः, अथास्मिन्नन्तरे करपञ्जरस्पृशा करतलगतेन, मानसं मानससरः, ओकः स्थानं यस्य तेन मानसौकसा तेन हंसेन । 'हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकस' इत्यमरः । अवादि उक्तः । वदेः कर्मणि लुङ् ॥ १२९ ॥

तदेव चतुर्भिराह—**धिगस्त्विति** ॥ हेम्नो जन्म येषां तान् हेमजन्मनः हैमान्, मम पक्षान् पत्राणि, समीक्ष्य तृष्णातरलं आशावशगं, भवन्मनः धिगस्त्विति निन्दा । 'धिङ्निर्भर्त्सननिन्दयोः' इत्यमरः । धिगुपर्यादिषु त्रिष्विति धिग्योगान्मन इति द्वितीया । तुषारशीकरैर्हिमकणैः, अर्णवस्येव तव अमीभिः पक्षैः कियान् । कमलायाः लक्ष्म्याः कमलस्य जलस्य च, उदयो वृद्धिः, भवेत् । न कियानपीत्यर्थः ॥ १३० ॥

न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः ।
विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि ॥१३१

पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपतेः कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥

फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः ।
त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी घृणीयते ॥

न केवलमिति ॥ हे नृप, त्वदीक्षणात् त्वन्मूर्तिदर्शनात, विश्वसितान्तरात्मनो विस्रब्धचित्तस्य विश्वस्तस्येत्यर्थः । मम वधः केवलं प्राणिवधः प्राणिमात्रवधः, न भवति । किंतु, विश्वासघातपातकमित्यर्थः । ततः किमत आह—विश्वासजुषां विस्रम्भभाजां द्विषामपि, निबर्हणं हिंसनं, धर्मधनैर्धर्मपरैर्मन्वादिभिः विशिष्यातिरिच्य, विगर्हितं अतिगर्हितमित्यर्थः ॥ १३१ ॥

पदे पद इति ॥ रणोद्भटाः रणेषु प्रचण्डाः, भटा योधाः, पदे पदे सन्ति सर्वत्र सन्तीत्यर्थः । वीप्सायां द्विर्भावः । एषः हिंसारसः हिंसारागः, तेषु भटेषु न पूर्यते । अत्र काकुः—न पूर्यते किमित्यर्थः । नृपतेर्महाराजस्य ते तव, ईदृशमवध्यवधरूपं, कुविक्रमं कुत्सितपराक्रमं, धिक् । यः कुविक्रमः, कृपाश्रये कृपाविषये, अनुकम्पनीये कृपणे दीने पतत्रिणि क्रमत इति शेषः ॥

फलेनेति ॥ यस्य मम मुनेरिव वारिभूरुहां जलाशयरुहाणां पद्मिनीनाम् । अन्यत्र वारिरुहां भूरुहाञ्च, फलेन मूलेन च, इत्थमनेन दृश्यमानप्रकारेण, वृत्तयो जीविकाः । तस्मिन्नप्यनपराधेऽपीति भावः । दण्डधारिणा दण्डप्रयोक्त्रा, अदण्ड्यदण्डिनेत्यर्थः । पत्या त्वया हेतुना । अद्य धरणी कथं न घृणीयते न जुगुप्सते, जुगुप्सत एवेत्यर्थः । 'घृणा जुगुप्सा कृपयोः' इति विश्वः । घृणतेः "कण्ड्वादिभ्यो यक्" इति यगन्ताल्लट् । तत्र पाठे "घृ णिङ्" इति ङित्करणादात्मनेपदम् । अकार्यकारिणं भर्तारमपि गर्हन्ते गृहिण्य इति भावः ॥

इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः ।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि नो ॥

मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः सुतशोकसागरः ॥ १३६

इतीति ॥ इतीत्थं, स खगो हंसः, तं नृपं, ईदृशैः सनिन्दोपलम्भैरित्यर्थः । वाङ्मयैर्वाग्विकारैः । "एकाचो नित्यं मयटमिच्छन्ति" इति मयट्प्रत्ययः । तिरश्चोऽभिवादनादाश्चर्यं चित्रं परे स्वकार्यविघाते त्रपा वैलक्ष्यं, परार्तिदर्शनेन तन्निवर्तनेच्छा कृपा, ताभिः सह वर्तत इति सचित्रवैलक्ष्यकृपं, विरचय्य विधाय । "ल्यपि लघुपूर्वात्" इत्ययादेशः । दयासमुद्रे तदाशये तन्मनसि गिर एव कारुण्यरसापगाः करुणारसनदीः, अतिथीचकार प्रवेशयामासेत्यर्थः । समुद्रे नदीप्रवेशो युक्त इति भावः । रूपकालङ्कारः ॥ १३४ ॥

ता एव गिरः प्रपञ्चयति—**मदेकपुत्रेति** ॥ तत्र तावद्दैवमुपालभते । हे विधे, जननी माता, अहमेवैकः पुत्रो यस्याः सा मदेकपुत्रा, स्वनाशे तस्या अपत्यान्तरं नास्तीत्यर्थः । जरातुरा स्वयमप्यशक्ता, वरटा स्वभार्या । 'हंसस्य योषिद्वरटा' इत्यमरः । नवप्रसूतिरचिरप्रसवा, तपस्विनी अनाथा शोच्या । 'तपस्वी तापसे शोच्ये' इति वैजयन्ती । एष जनः स्वयमित्यर्थः । तयोर्जायाजनन्योः, गतिः शरणम् । तं जनं, अर्दयन् विधे अहो विधातः । "विशिष्टमामन्त्रितं सम्बोधनं च" इति सम्बोधनार्थे लटः शत्रादेशः । त्वां करुणा नो रुणद्धि, त्वामेतस्मान्न निवारयतीति काकुः । न रुणद्धि किमित्युत्प्रेक्षा ॥ १३५ ॥

अथ मातरं शोचति—**मुहूर्तेति** ॥ हे मातः, मम सखायः सुहृदः दयासखाः सदयाः । अत एव स्रवदश्रवः सन्तः । अश्रु नेत्राम्बु । 'रोदनं चास्र-

मदर्थसन्देशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते ।
विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये स कीदृग्भविता तव क्षणः॥

कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटंतपनिष्ठुराक्षरा ॥ १३८

मश्रु च' इत्यमरः । मुहूर्तमात्रम् । भवनिन्दया संसारगर्हणेन निवृत्तिं शोकोपरतिं एष्यन्ति । किंतु, त्वयैव सुतशोक एव सागरः । परमत्यन्तं, दुःखेनोत्तीर्यत इति दुरुत्तरो दुस्तरः । तरतेः कृच्छ्रार्थेषु लट् प्रत्ययः ॥ १३६ ॥

अथ भार्यां शोचति—**मदर्थेति** ॥ हे प्रिये, मत्प्रमिमे मदर्थे । "अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या" । तयोः सन्देशमृणालयोर्वाचिकबिसयोः मन्थरः तत्प्रेषणे विलम्बितप्रवृत्तिः, प्रियः । कियद्दूरे कियति दूरे देशे, वर्तत इति, त्वया उदिते उक्ते पृष्टे सतीत्यर्थः । अथ प्रश्नानन्तरं रुदतः अनिष्टो-च्चारणाशक्त्या अश्रूणि विमुञ्चतः । पक्षिणः इतो गच्छतो गतान् खगान्, विलोकयन्त्याः तव । सः क्षणः कालः, कीदृग्भविता भविष्यति, वज्रघातप्राय इति भावः । भवतेः कर्तरि लुट् ॥ १३७ ॥

कथमिति ॥ हे विधातः, प्रियायाः वरटायाः, शैत्यमृदुत्वशिल्पिनः तादृक्तदङ्गशैत्यमार्दवनिर्माणकुशलात्, तव पाणिपङ्कजात्पङ्कजमृदुशिशिरात्-पाणेरित्यर्थः । मयि विषये 'वल्लभया वियोक्ष्यसे' इत्येवरूपा, अत एव ललाटं तपन्ति दहन्तीति ललाटंतपानि । "असूर्यललाटयोर्दृशितपोः" इति खश्प्रत्ययः "अरुर्द्विषत्" इत्यादिना मुमागमः । तानि निष्ठुराक्षराणि कर्णकठोराणि चाक्ष-राणि यस्याः सा, लिपिरक्षरविन्यासः, कथं निर्गता निसृता । अत्र कारण-विरुद्धकार्योत्पत्तिकथनाद्विषमालङ्कारः । "विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् । विरूपघटना वा स्याद्विषमालङ्कृतिस्त्रिधा ॥" इति लक्षणात् ॥ १३८ ॥

अपि स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं बतोदिता ।
मुखानि लोलाक्षि दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि ॥

ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि विपद्यते यदि ।
तदस्मि दैवेन हतोऽपि हा हतस्स्फुटं यतस्ते शिशवः परासवः ॥

तवापि हा हा विरहात्क्षुधाकुलाः कुलायकूलेषु विलुठ्य तेषु ते ।
चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनास्फुटितेक्षणा मम ॥१४१

अपीति ॥ अपि चेत्यपेरर्थः, अद्यास्मिन् दिने । "सद्यः परुत्" इत्यादिना निपातः । स्वस्य यूथ्यैर्यूथभवैः, सहचरैर्हंसैः कर्तृभिः अशनिक्षतोपमं वज्रप्रहारप्रायम्, मम इमं वृत्तान्तं अनर्थवार्ताम्, उदिता उक्ता सती । वदेर्ब्रूञर्थस्य दुह्यादित्वादप्रधाने कर्मणि क्तः । "वचिस्वपि" इत्यादिना सम्प्रसारणम् । हे लोलाक्षि चञ्चलाक्षि, दशापि दिशां मुखानि शून्यानि अलक्ष्यलक्षकानि, विलोकयिष्यसि, असंशयं संशयो नास्तीत्यर्थः । अर्थाभावेऽव्ययीभावः । बतेति खेदे ॥

ममैवेति ॥ हे विचित्राङ्गि लोहितचञ्चुचरणत्वाद्विचित्रगात्रि, मम शोकेनैव मद्विपत्तिदुःखेनैव, विदीर्णवक्षसा विदारितहृदयया त्वया विपद्यते म्रियते यदि, तर्हि दैवेन हतोऽपि, स्फुटं व्यक्तम्, पुनः हतोऽस्मि । हेति विषादे । 'हा विस्मयविषादयोः' इति विश्वः । कुतः? यतः ते शिशवः, परासवः, मातुरप्यभावे पोषकाभावान्मृताः । अतः शिशुमरणभावनया च द्विगुणितं मे मरणदुःखं प्राप्तमित्यर्थः ॥ १४० ॥

ननु मन्मृतौ तेषां कथं मरणमत आह—तवेति ॥ हे प्रिये, बहुभिः मनोरथैः चिरेण लब्धाः कृच्छ्रलब्धा इत्यर्थः । अस्फुटितेक्षणाः अद्याप्यनुन्मीलिताक्षाः, मम ते शिशवः । तवापि, न केवलं ममैवेति भावः । विरहाद्विपत्तेः क्षुधाकुलाः क्षुत्पीडिताः, तेषु स्वसम्पादितेष्वित्यर्थः । कुलायकूलेषु नीडान्तिकेषु । 'कुलायो नीडमस्त्रियाम्' इत्यमरः । विलुठ्य परिभ्रम्य क्षणेन गताः । हा हेति खेदे ॥ १४१ ॥

सुताः कमाहूय चिराय चुङ्कृतैर्विधाय कम्प्राणि मुखानि कं प्रति ।
कथासु शिष्यध्वमिति प्रमील्य स सुतस्य सेकाद्बुबुधे नृपाश्रुणः ॥

इत्थम[illegible] विलपन्तममुञ्चद्दीनदयालुतयावनिपालः ।
रूपमदर्शि धृतो[illegible] यदर्थं गच्छ यथेच्छमथेत्यभिधाय ॥ १४३॥

आनन्दजाश्रुभिरनुस्रियमाणमार्गा-
न्प्राक्छोकनिर्गमितनेत्रपयःप्रवाहान् ।
चक्रे स चक्रनिभचङ्क्रमणच्छलेन
नीराजनां जनयतां निजबान्धवानाम् ॥ १४४ ॥

सुता इति ॥ हे सुताः, चुङ्कृतैः चुङ्कारैः, चिराय चिरं कम् आहूय कमप्याहूय कं प्रति कमपि प्रति मुखानि कम्प्राणि विधाय कथासु शिष्यध्वं कथामात्रशेषा भवत । कुत्रापि पित्रोरदर्शनान्म्रियध्वम् । प्राप्तकाले लोट् । मरणकालः प्राप्त इत्यर्थः । इति इत्युक्त्वेत्यर्थः । गम्यमानार्थत्वादप्रयोगः । प्रमील्य मूर्छित्वा । स हंसः सुतस्य दयार्द्रभावात् प्रवहतः । नृपस्य अश्रुणो [illegible] सेकाद्बुबुधे संज्ञां लेभे । प्रायेणात्र स्वभावोक्तिरुक्ता ॥ १४२ ॥

अथ सर्वत्र भिन्नसर्गान्तैरिति काव्यलक्षणाद्वृत्तान्तरेण श्लोकद्वयमाह—

इत्थमिति ॥ इत्थं विलपन्तं परिदेवमानं अमुं हंसं, अवनिपालो नलः, दीनेष्वार्तेषु, दया[illegible], रूपमाकृतिः, अदर्शि अपूर्वत्वादवलोकितम् । यस्मै यदर्थं [illegible]दर्शनाभि[illegible], [illegible]गृहीतः, असि । अथ यथेच्छं गच्छ इत्यभिधाय अमुञ्चत् । [illegible] "[illegible]कवृत्तमिदं भभभा गौ" इति लक्षणात् ॥

आनन्देति ॥ [illegible], चक्रनिभचङ्क्रमणस्य मण्डलाकारभ्रमणस्य, छलेन नीराजनां जनयतां [illegible] निजबान्धवानां बन्धमुक्तं बान्धवा नीराजयन्तीति समाचारः । [illegible]लोचनात् पूर्वं, शोकेन निर्गमिता निस्सारिताः । ये नेत्रपयःप्रवाहा [illegible]पूराः, तानानन्दजाश्रुभिरानन्दबाष्पैः, अनुस्रियमाणमार्गान् अनुगम्यमानमार्गान्, चक्रे कृतवान् । अत्र पक्षिणां स्वभावसिद्धं बन्धमुक्ते स्वयूथ्यभ्रमणं, छलशब्देनापह्नुत्य तत्र [illegible]राजनत्वारोपादपह्नवभेदः ।

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरस्सुतं
श्रीहीरस्सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः॥ १४५

अत्र चमत्कारकारित्वान्मङ्गळाचरणरूपत्वाच्च सर्वेषु सर्गान्तश्लोकेषु आनन्द-शब्दप्रयोगः। यथाह भगवान् महाभाष्यकारः। "मङ्गळादीनि मङ्गळमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत् पुरुषाणि च भवन्ति। अध्येतारः प्रवक्तारो भवन्ति" इति। वसन्ततिलका वृत्तम्। "उक्ता वसन्ततिलका तभजा जगौ गः" इति लक्षणात्। सर्गान्तत्वाद्वृत्तभेदः। यथाह दण्डी—"सर्गै-रनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः। सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जनम्॥" इति॥ १४४॥

अथ कविः काव्यवर्णनामाख्यानपूर्वकं सर्गसमाप्तिं श्लोकनिबन्धनेनाह—श्रीहर्षमिति॥ कविराजराजिमुकुटानां विद्वच्छ्रेष्ठश्रेणिमौलीनां, अलङ्कारः अलङ्कारभूतः, हीरः वज्रमणिः, श्रीहीरो नाम विद्वान् जितः इन्द्रियचयो येन तं श्रीहर्षं श्रीहर्षनामकं यं सुतं सुषुवे जनयामास। मामल्लदेवी नाम स्वमाता सा च यं, सुषुवे। तस्य श्रीहर्षस्य, यच्चिन्तामणिमन्त्रस्य चिन्तनं उपासना। तस्य फले फलभूते शृङ्गारभङ्ग्या शृङ्गाररसवृत्त्या, चारुणि। निषधानां जन-पदानां राजा नैषधः नलः, तदीयचरिते नलचरितनामके, महाकाव्ये, अयं आदिः प्रथमः सर्गः, गतः समाप्त इत्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्। शार्दूल-विक्रीडितमेतत्। "सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात्॥ १४५॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्यायकोलचल-
मल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने
प्रथमः सर्गः समाप्तः।

द्वितीयः सर्गः

अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः ।
वचसामपि गोचरो न यस्स तमानन्दमविन्दत द्विजः ॥ १ ॥

अधुनीत खगस्स नैकधा तनुमुत्फुल्लतनूरुहीकृताम् ।
करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती ॥ २ ॥

अधिगत्येति ॥ अथ मोचनानन्तरं, स द्विजः पक्षी विप्रश्च । 'दन्तविप्राण्डजा द्विजाः' इत्यमरः । जगत्यधीश्वरात् क्ष्मापतेः भुवनपतेश्च । 'जगती भुवने क्ष्मायाम्' इति विश्वः । पुरुषोत्तमात् पुरुषश्रेष्ठात्, विष्णोश्च । ततः तस्मात् प्रकृतान्नलात् । अन्यत्र प्रसिद्धाच्च । मुक्तिं मोचनं, निर्वाणञ्च । अधिगत्य प्राप्य । य आनन्दो वचसामपि न गोचरः वक्तुमशक्यः । "यतो वाचो निवर्तन्त" इत्यादेर्वाङ्मनसगोचरश्च । तमानन्दं परमानन्दञ्च, अविन्दत अलभत । विदेर्लाभार्थात् "कर्त्रभिप्राये क्रियाफले" इत्यात्मनेपदम् । शेमुचादीनामिति नुमागमः । अत्राभिधायाः प्रकृतार्थमात्रनियन्त्रणादुभयश्लेषानुपपत्तेर्भेदान्तरानवकाशाल्लक्षणायाश्च मुख्यार्थबाधमन्तरेणासम्भवाद्ध्वनिरेवायम् । ब्राह्मणस्य विष्णोर्मोक्षानन्दप्राप्तिलक्षणार्थान्तरप्रतीतेर्न श्लेषः । प्रकृताप्रकृतोभयगतः । अस्मिन् सर्गे एकशतश्लोकपर्यन्तं वियोगिनीवृत्तम् । "विषमे ससजा गुरुस्समे सभरा लोऽथ गुरुर्वियोगिनी" इति लक्षणादिति संक्षेपः ॥ १ ॥

अधुनीतेति ॥ स खगो हंसः, उत्फुल्लतनूरुहीकृतां नृपकरपीडनादुद्बुद्धपतत्रीकृताम् । 'पतत्रञ्च तनूरुहम्' इत्यमरः । तनुं शरीरम् । नैकधा अनेकधा, नञर्थस्य नशब्दस्य "सुप्सुपा" इति समासः । नञ्समासे नलोपप्रसङ्गः । अधुनीत धुतवान् । धूञः क्र्यादेर्लङि तङ् । प्वादीनां ह्रस्व

अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा ।
स्खलनक्षण एव शिश्रिये द्रुतकण्डूयितमौलिरालयम् ॥ ३ ॥

स गरुद्वनदुर्गदुर्ग्रहान् कटु कीटान् दशतस्सतः क्वचित् ।
नुनुदे तनुकण्डु पण्डितः पटुचञ्चूपुटकोटिकुट्टनैः ॥ ४ ॥

अयमेत्य तटाकनीडजैर्लघु पर्यव्रियताथ शङ्कितैः ।
उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः ॥ ५ ॥

इति ह्रस्वः । किञ्च करयन्त्रणेन नृपकरपीडनेन दन्तुरे निम्नोन्नतमध्यप्रदेशे, पक्षतौ पक्षमूले । 'स्त्री पक्षतिः पक्षमूलम्' इत्यमरः । चञ्चुपुटेन त्रोटिसम्पुटेन व्यलिखत्, विलेखनेन ऋजूचकारेत्यर्थः । एतदादिश्लोकचतुष्टये स्वभावोक्ति-रलङ्कारः ॥ २ ॥

अयमिति ॥ अयं हंसः, स्खलनक्षण एव मोचनानन्तरमेवेत्यर्थः । एकतमेनाङ्घ्रिणा पक्षतेः पक्षमूलस्याधिमध्यं मध्ये ऊर्ध्वगा ऊर्ध्वगामिनी जङ्घा यस्मिन् कण्डूयने तत्तथा, द्रुतकण्डूयितमौलिः, सत्वरकर्षितचूडस्सन् । आलयं निजावासं, शिश्रिये श्रितवान् ॥ ३ ॥

स इति ॥ पण्डितः निपुणः, स हंसः, गरुतः पक्षा एव वनदुर्गम्, तत्र दुर्ग्रहान् ग्रहीतुमशक्यान्, कटु तीक्ष्णं, दशतः दन्तैस्तुदतः, क्वचित् कुत्रचिदेव सतः वर्तमानान् कीटान् क्षुद्रजन्तून् पटुचञ्चूपुटस्य समर्थत्रोटेः कोट्या अग्रेण कुट्टनैः घट्टनैस्तनुरल्पा कण्डूर्यस्मिन् तनुकण्डु यथा तथा । "गोस्त्रियोरुपसर्जनस्य" इति ह्रस्वः । नुनुदे निवारितवान् । "स्वरितञितः" इत्यात्मनेपदम् ॥ ४ ॥

अयमिति ॥ अयं हंसः, तटाकनीडजैः सरःपक्षिभिस्तत्रत्यहंसैः । 'नीडोद्भवा गरुत्मन्तः' इत्यमरः । लघु क्षिप्रमेत्यागत्य, पर्यव्रियत परिवृतः ।

दधतो बहुशैवलक्ष्मतां धृतरुद्राक्षमधुव्रतं खगः।
स नलस्य ययौ करं पुनस्सरसः कोकनदभ्रमादिव ॥ ६ ॥

पतगश्चिरकाललालनादतिविस्रम्भमवापितो नु किम्।
अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः ॥ ७ ॥

वृणोतेः कर्मणि लङ्। अथ परिवेष्टनानन्तरं, अस्य हंसस्य, करग्रहजामलकरपीडनजन्याद्विकृतादेव वैकृताद्विलुलितपक्षरूपाद्विकारदर्शनादित्यर्थः। स्वार्थेऽण्प्रत्ययः। शङ्कितैश्चकितैः। अत एव विकस्वरस्वरैरुच्चैर्घोषैस्तैरुदडीयतोड्डीनम्। डीङो भावे लङ्॥ ५॥

दधत इति ॥ अथ स खगो हंसः, बहुशैवला भूरिशैवला क्ष्मा भूर्यस्य तद्बहुशैवलक्ष्मं, तस्य भावः तत्ता तां दधतो दधानात् सरसः पल्वलात्। बहूनि शैवलक्ष्माणि शिवभक्तचिह्नानि यस्य स बहुशैवलक्ष्मा तस्य भावः, तत्ता तां दधतो दधानस्य नलस्य रुद्राक्षाणि मधुव्रता इवेत्युपमितसमासः। ते धृता येन तं करं कोकनदभ्रमाद्रक्तोत्पलभ्रान्तेरिव पुनर्ययौ। कोकनदं तु रुद्राक्षसदृक्षमधुव्रतं खलु। अत्र बहुशैवलेत्यादौ शब्दश्लेषस्तदनुप्राणिता, रुद्राक्षमधुव्रतमित्युपमा तत्सापेक्षा चेयं कोकनदभ्रमादिवेत्युत्प्रेक्षेति सङ्करः॥ ६॥

अथास्य स्वयमागमनादुत्प्रेक्षते—**पतग इति** ॥ पतगो हंसश्चिरकाललालनादुपलालनादतिविस्रम्भमतिविश्वासम्। 'समौ विस्रम्भविश्वासौ' इत्यमरः। अवापितः प्रापितो नु किमित्युत्प्रेक्षा। अन्यथा कथं पुनः स्वयमागच्छेदिति भावः। किञ्च, एतस्य महीभुजो भुजं भजन् स्वयमाप्नुवन्, अतुलं कुतूहलं, विदधे कौतुकञ्चकारेत्यर्थः। अत्रोत्प्रेक्षा वृत्त्यनुप्रासयोः शब्दार्थालङ्कारयोः तिलतण्डुलवत्संसृष्टिः। "एकद्वित्र्यादिवर्णानां पुनरुक्तिर्भवेद्यदि। सङ्ख्या नियमशून्या वृत्त्यनुप्रास ईरितः॥" इति॥ ७॥

नृपमानसमिष्टमानसस्स निमज्जत्कुतुकामृतोर्मिषु ।
अवलम्बितकर्णशष्कुलीकलशीकं रचयन्नवोचत ॥ ८ ॥
मृगया न विगीयते नृपैरपि धर्मागमर्ममपारगैः ।
स्मरसुन्दर मां यदत्यजस्तव धर्मस्सदयोदयोज्ज्वलः ॥ ९ ॥
अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान् ।
अनवद्यतृणादिनो मृगान मृगयाघाय न भूभृतां घ्नताम् ॥

नृपमानसमिति ॥ इष्टमानसः प्रियमानसः, राजहंसः, कुतुकं हर्षस्तदेव अमृतं सुधा तस्योर्मिषु निमज्जदन्तर्गतं नृपमानसं नलमनः, कर्णौ शष्कुल्याविव कर्णशष्कुल्यौ ते एव कलश्यौ ते अवलम्बिते अवहिते कृते धृते च येन तत्तथोक्तम् । "नद्यृतश्च" इति कप् । रचयन् कुर्वन्, अवोचत उक्तवान् । जले मज्जन्नपि तरणार्थं कलशमवलम्बते, तद्वत् । कर्णशष्कुलीकलश्यावित्युपमारूपकयोः संसृष्टिः ॥ ८ ॥

मृगयेति ॥ धर्मागमर्मपारगैर्धर्मशास्त्रतत्त्वपारदर्शिभिरपि, अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु ड इति गमेर्डप्रत्ययः । नृपैर्मृगया आखेटो न विगीयते न गर्ह्यते । तथापि हे स्मरसुन्दर मामत्यज इति यत्, स त्यागस्तव दयोदयेनोज्ज्वलो विमलो निरुपाधिक इति यावत् । धर्मः सुकृतं न केवलमाकारादेव सुन्दरोऽसि किंतु धर्मतोऽपीति भावः ॥ ९ ॥

ननु प्राणिहिंसा कथं न विगीयतेऽत आह—**अबलेति** ॥ अबलस्वकुलाशिनो झषान् । दुर्बलस्वकुलघातिनो मत्स्या इति प्रसिद्धिः । निजनीडद्रुमपीडिनो विण्मोक्षफलभक्षणादिना स्वाश्रयवृक्षपीडाकरान् खगान्, अनवद्यतृणादिनः अनपराधितृणहिंसकान्मृगान् । "अन्तः संज्ञा भवन्त्येते सुखदुःखसमन्विता" इति मनुस्मृत्या तरुतृणादीनामपि प्राणित्वात्तद्धिंसायामपि दोष इति भावः । सर्वत्रापि ताच्छील्ये णिनिप्रत्ययः । घ्नतां हिंसतां भूभृतां मृगया अघाय पापाय न भवति । तद्वधस्य दण्डरूपत्वात्, प्रत्युताकरणे दोष इति भावः ॥

यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् ।
कृतमातपसंज्वरं तरोरभिवर्ष्यामृतमंशुमानिव ॥ ११ ॥

उपनम्रमयाचितं हितं परिहर्तुं न तवापि साम्प्रतम् ।
करकल्पजनान्तराद्विधेश्शुचितः प्रापि स हि प्रतिग्रहः ॥१२॥

पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते ।
इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमार्तयः ॥१३॥

तथापि किमर्थं पुनरागतं त्वयेत्यत आह—**यदिति** ॥ तव यदप्रियमवादिषमवोचं, प्रियमाधाय प्रियं कृत्वा तदप्रियं, तरोः कृतं स्वकृतमातपसंज्वरमातपसन्तापं अमृतमुदकमभिवर्ष्य । 'पयः कीलालममृतम्' इत्यमरः । अंशुमानिव नुनुत्सुर्नोत्तुं प्रमार्ष्टुमिच्छुः, अस्मि । नुदप्रेरण इत्यस्माद्धातोः सन्नन्तादुप्रत्ययः ॥ ११ ॥

तर्हि भवन्मोचनसुकृतमेव मम पर्याप्तं किं दृष्टोपकारेणेति न वाच्यमित्याह—**उपनम्रमिति** ॥ अयाचितमप्रार्थितमपि नम्रमुपनतं हितं इह चामुत्र चोपकारकं वस्तु, तवापि परिहर्तुं न साम्प्रतं न युक्तम् । "अयाचितं हितं ग्राह्यमपि दुष्कृतकर्मण" इति स्मरणादिति भावः । तदपि माद्दशात्कथं पृथग्जनात् ग्राह्यमत आह—**करेति** ॥ हि यस्मात् कारणात्, स प्रतिग्रहः, करकल्पं करस्थानीयमित्यर्थः । ईषदसमाप्तौ कल्पप्प्रत्ययः । यज्जनान्तरं स्वयं यस्य तस्माच्छुचितः शुद्धाद्विधेः ब्रह्मणः, प्रापि प्राप्तः । न तु मत्त इति भावः । आप्नोतेः कर्मणि लुङ् । विधिरेव ते दाता अहं तस्योपकरणमात्रम् । अतो न अधमयाच्ञालाघवं तवेति भावः ॥ १२ ॥

ननु सार्वभौमस्य मे तिरश्चा त्वया किमुपकरिष्यते तत्राह—**पतगेनेति** ॥ पतगेन पक्षिमात्रेण, मया जगत्पतेस्सार्वभौमस्य तवोपकृत्यै उपकाराय प्रभूयते क्षम्यते किं । न भूयत एवेत्यर्थः । भावे लट् । इति वेद्मि अक्षमत्वं जानामि । तदपि तथाप्यार्तयः, यास्तु त्वया विनिवर्तिता इति भावः । मां प्रत्युपकर्तुं न

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम् ।
पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिहाग्रहः ॥ १४ ॥
भविता न विचारचारु चेत्तदपि श्राव्यमिदं मदीरितम् ।
खगवागियमित्यतोऽपि किं न मुदं दास्यति कीरगीरिव ॥
स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः ।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥ १६

स्वजन्ति प्रत्युपकारकरणाय प्रेरयन्तीत्यर्थः । अत्र पतगोऽप्यहं महोपकारिणस्ते महोपकारं करवाणीति भावः ॥ १३ ॥

अथवा यथाशक्तिपक्षोऽस्त्वित्याह—अचिरादिति ॥ अथवा उपकर्तुरचिरादविलम्बादुपाय एवौपयिकः, विनयादित्वात्स्वार्थे ठक् । 'उपधाया ह्रस्वत्वं च' इति ह्रस्वः । तत आगता औपयिकी तामात्मौपयिकीं स्वोपायसाध्यामित्यर्थः । तत आगत इत्यण्प्रत्यये, "टिड्ढाणञ्" इत्यादिना ङीप् । उपक्रियामाचरेत् प्रत्युपकारं कुर्यात् । चरधातोर्विधिलिङ् । इत्थमेवं सति सोपक्रिया पृथुरधिकास्तु । अथ अथवा अणुरल्पास्तु, विदुषां विवेकिनामिहास्मिन् विषये विशेषे आग्रह आग्रहो न । गुणग्राहिणो विवेकिनः कृतज्ञतामेव अस्य पश्यन्ति न दोषमन्विष्यन्तीत्यर्थः ॥ १४ ॥

अथ स्ववाक्ये आदरं याचते—भवितेति ॥ हे नृप, इदं वक्ष्यमाणं मदीरितं मद्वचनं, विचारे विमर्शे चारु युक्तं न भविता न भविष्यति चेत्तदपि अविचारितरमणीयं श्राव्यं श्रोतव्यं, इयं खगवागित्यतोऽपि हेतोः कीरगीः शुकवागिव मुदं न दास्यति किं दास्यत्येव, प्रयोजनान्तराभावेऽपि कौतुकादपि श्रोतव्यमित्यर्थः । ददातेः लृट् ॥ १५ ॥

अथ यद्वक्तव्यं तदाह—स इति ॥ अर्थेन अभिधेयेन सह वर्तत इति सार्थकम् । "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः । "वोपसर्जनस्य" इति

दमनादमनाक्प्रसेदुषस्तनयां तथ्यगिरस्तपोधनात् ।
वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयाम् ॥ १७ ॥

भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम् ।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधे ॥ १८ ॥

ऽहृशब्दस्य विकल्पात् सभावः । "शेषाद्विभाषा" इति कप्समासान्तः । ततः श्वरभूततद्भावे, अरिसार्थेषु शत्रुसङ्घेषु, सार्थकीकृतनामा भीम इत्याख्या येन तु तैथोक्तः, स प्रसिद्धः । बिभ्यत्यस्मादिति भीमः । 'भियो म' इत्यपादानार्थे निपातनान्मप्रत्यय औणादिकः । भीम इति भूपतिः नृपः, जयति किल सर्वोत्कर्षेण वर्तते खलु । विदर्भभूर्विदर्भदेशः, यं भूपतिं प्रभुं भर्तारमवाप्य शक्रो भर्ता यस्यास्तां शक्रभर्तृकाम् । "नद्यृतश्च" इति कप् । द्यां दिवमपि हसति । किमुतान्यभर्तृकदेशानित्यर्थः । स्त्रियो हि भर्तुरुत्कर्षादुत्रासं कुर्वन्तीति भावः । अत्र विदर्भभुवोऽपि युहासासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ १६ ॥

दमनादिति ॥ स भीमभूपतिरमनागनल्पं प्रसेदुषो निजोपासनया प्रसन्नात् । "भाषायां सदवसश्रुवः" इति सदेर्लिटः क्वसादेशः । दमनात् दमनाख्यात् तथ्यगिरः अमोघवचनात् तपोधनादृषे, दिष्टानां कालानां विष्टपानां लोकानां च त्रितययोरनन्यसदृग्गुणोदयां कालत्रये लोकत्रये चानन्यसाधारणगुणप्रकर्षां तनयां दुहितरं वरमाप । वरत्वेन लब्धवानित्यर्थः । 'देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक् प्रिय' इत्यमरः ॥ १७ ॥

अथास्या नामधेयं व्युत्पादयन्नेवाह—**भुवनत्रयेति** ॥ असौ वरप्रसादलब्धा तनया कर्त्री यतस्तनुश्रिया निजशरीरसौन्दर्येण करणेन । भुवनत्रयसुभ्रुवां त्रैलोक्यसुन्दरीणां कमनीयतामदं सौन्दर्यगर्वं दमयन्ती अस्तं गमयन्ती । दमेर्ण्यन्तात् "न पादमि" इत्यादिना कर्त्रभिप्राय आत्मनेपदापवादात् परस्मैपदप्रतिषेधेऽप्यकर्त्रभिप्रायविवक्षायां परस्मैपदेर्लटः शत्रादेशः । उदियाय उदिता, इणो लिट । ततस्तस्मादेव निमित्ताद्दमयन्तीत्यभिधामाख्यां दधे । दधातेर्लिट् ॥

श्रियमेव परं धराधिपाद्गुणसिन्धोरुदितामवेहि ताम् ।
व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः ॥

चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि सा बिभर्ति यान् ।
पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ॥ २० ॥

अथैकविंशतिश्लोकैश्चिकुरादिपादपर्यन्तं दमयन्तीं वर्णयति—**श्रियमिति** ॥ हे नृप, तां दमयन्तीं, गुणसिन्धोः गुणसागराद्धराधिपाद्भीमनरेन्द्रादुदितामुत्पन्नां श्रियं साक्षाल्लक्ष्मीमेव परं ध्रुवमवेहि जानीहि । अवपूर्वादिणो लोटि सेर्हिरिति ह्यादेशे ङित्त्वान्न सार्वधातुकगुणः संहितायामाद्गुणः । अत्र केवलावपूर्वस्य इणो ज्ञानार्थत्वादाङ्प्रश्लेषे तदलाभात् । प्रश्लेषेऽपि "ओमाङोश्च" इति पररूपमिति केषाञ्चित्प्रक्रियोपन्यासो वृथा प्रक्षाळ्य त्यागः । अवैहीति वृद्धिरवद्येति वामनसूत्रमप्यवाङ्प्रश्लेष एव भ्रान्तिप्राप्तवृद्धिप्रतिषेधपरम् । गुण एव युक्त इति व्याख्यानात् अन्यथा "ओमाङोश्च" इति पररूपमेव युक्तमित्युच्येत इति । न च देशव्यवधानान्न श्रीरेषेति वाच्यमित्याह—व्यवधौ व्यवधाने सत्यपि । "उपसर्गे घोः किः" इति किप्रत्ययः । मृडचूडानिलयां हरशिखाश्रयां, कलां विधोः इन्दोरेव कलां को वा न वेद । सर्वोऽपि वेदैवेत्यर्थः । "विदो लटो वा" इति वैकल्पिको णलादेशः । यथा हरशिरोगतापि कला चन्द्रकलैव । तथा भीमभवनोदिताप्येषा श्रीरेवेति सौन्दर्यातिशयोक्तिः । अत्र श्रीकलयोः नृपमृडौ वाक्यद्वये बिम्बप्रतिबिम्बभावेन सामान्यधर्मवत्तया निर्दिष्टाविति दृष्टान्तालङ्कारः । "यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते । सामान्यधर्मः काव्यज्ञैः स दृष्टान्तो निगद्यत ॥" इति लक्षणात् ॥ १९ ॥

चिकुरप्रकरा इति ॥ ते चिकुरप्रकराः केशसमूहाः, जयन्ति सर्वोत्कर्षेण वर्तन्ते । यान् वेत्तीति विदुषी विशेषज्ञा । विदेः शतुर्वसुः । "उगितश्च" इति ङीप् । वसेः सम्प्रसारणम् । सा दमयन्ती, मूर्धनि बिभर्ति । विद्वद्ग्रह एव सर्वस्याप्युत्कर्षहेतुरिति भावः । अत एव पशुना तिरश्चा चमरीमृगेणाप्यपुरस्कृते-

स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः ।
जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात् ॥ २१ ॥

अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि ।
श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते ॥ २२ ॥

नानाहृतेन चामरेण चमरीपुच्छेन सह तत्तुलनां तेषां चिकुराणां तुलनां समीकरणं क इच्छतु न कोऽपीत्यर्थः । सम्भावनायां लोट् । अत्र तुलनानिषेधस्यापुरस्कृतपदार्थहेतुकत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति लक्षणात् ॥ २० ॥

स्वदृशोरिति ॥ मृगाः हरिणाः, तस्या दमयन्त्याः, अखर्वयोरायतयोरीक्षणयोः शोभया कर्त्र्या जितयोरत एव भयादुदयत् प्रमीलयोरुत्पद्यमाननिमीलनयोः स्वदृशोर्निजनयनयोः, खुरैः शफैः । 'शफं क्लीबे खुरः पुमान्' इत्यमरः । कण्डूयनस्य कर्षणस्य कैतवाच्छलात् सान्त्वनां जनयन्ति । लालनां कुर्वन्ति । यथा लोकेऽपरपराजिता निर्मीलिताक्षाः स्वजनैर्भयनिवृत्तये करतलास्फालनादिना परिसान्त्व्यन्ते तद्वदिति भावः । अत्र कैतवशब्देन कण्डूयनमपह्नुत्य सान्त्वनारोपादपह्नवभेदः ॥ २१ ॥

अपीति ॥ हे धरापते, दमो नाम भीमस्यैवात्मजस्तस्य स्वसुर्दमयन्त्याः, लोकयुगं मातापितृकुलयुगं, श्रुतिगामितया वेदप्रसिद्धतया, सुतरां व्यतिभाते परस्परोत्कर्षेण भाति । तथा दृशौ नेत्रे अपि श्रुतिगामितया कर्णान्तविश्रान्ततया व्यतिभाते परस्परोत्कर्षेण भातः । तथा श्रुताः श्रुतिप्रसिद्धाः, ते च ते दृष्टाः लोकप्रसिद्धाश्च विशेषणयोरपि विशेषणविशेष्यभावविवक्षायां विशेषणसमासः । ते रमणीगुणाः स्त्रीधर्मा अपि श्रुतिगामितया जनैः श्रूयमाणतया । 'श्रुतिः श्रोत्रे तथाम्नाये वार्तायां श्रोत्रकर्मणि' इति विश्वः । सुतरां व्यतिभाते व्यतिहारेण भान्ति । "आत्मनेपदेष्वनतः" इति अत्त्वादादेशः । सर्वत्र कर्तरि

नळिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे ।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ॥ २३ ॥
अधरं किल बिम्बनामकं फलमस्मादिति भव्यमन्वयम् ।
लभतेऽधरबिम्बमित्यदःपदमस्या रदनच्छदं वदत् ॥ २४ ॥

कर्मव्यतिहार इत्यात्मनेपदम् । अदादित्वाच्छपो लुक्, सर्वत्र टेरेत्वम् । अत्र लोकयुगादीनां त्रयाणामपि प्रकृतत्वात्केवलप्रकृतविषयतुल्ययोगिताभेदः ॥ "प्रस्तुताप्रस्तुतानाञ्च केवलं तुल्यधर्मतः । औपम्यं गम्यते यत्र सा मता तुल्ययोगिता".इति लक्षणात् ॥ २२ ॥

नळिनमिति ॥ नळिनं पद्मं, मलिनमचारु, विवृण्वती कुर्वाणे पृषतीं मृगीमस्पृशती । असमानत्वाद्दूरादेव परिहरत इत्यर्थः । तदीक्षणे तल्लोचने अञ्जनाञ्चिते कज्जलपरिष्कृते सती, खञ्जनं खञ्जरीटाख्यं, खञ्जननामकः पक्षिविशेषः । 'खञ्जरीटस्तु खञ्जनः' इत्यमरः । तमपि रुचिगर्वदुर्विधं चारुत्वगर्वनिःस्वं विदधाते कुर्वाते । सर्वथाप्यनुपमेये इत्यर्थः । 'निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः' इत्यमरः । ईक्षणयोर्नळिनादिमालिनीकरणाद्यसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः । तया चोपमा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥

अधरमिति ॥ अधरबिम्बमित्यदःपदं अधरं बिम्बमिवेत्युपमितसमासाश्रयणेन स्त्रीणामधरेषु यत्पदं प्रयुज्यते तदित्यर्थः । अस्याः दमयन्त्याः, रदनच्छदं ओष्ठं, वदद्भिदधत्, तदभिधानाय प्रयुक्तं सदित्यर्थः । बिम्बनामकं फलं बिम्बमस्माद्दमयन्तीरदनच्छदादधरं किल अपकृष्टं खल्विति अधरशब्दस्य अपकृष्टार्थत्वे अधरं बिम्बं यस्मात्सादिति बहुव्रीहिसमासे च सति, भव्यमबाधितमन्वयं वृत्तिपदार्थसंसर्गलक्षणं लभते । अन्यथा, समर्थसमासाश्रयणे "समर्थः पदविधिः" इति समर्थपरिभाषा भज्येत । तर्हि नोपमा स्यादिति भावः । अत्र दमयन्तीदन्तच्छदस्य बिम्बाधरीकरणासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः, पूर्ववद्ध्वनिश्च ॥ २४ ॥

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥ २५ ॥

धृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डरं विधिः ।
भ्रमयत्युचितं विदर्भजाननतनीराजनवर्धमानकम् ॥ २६ ॥

सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात् ।
अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम् ॥ २७

हृतसारमिति ॥ इन्दुमण्डलं दमयन्तीवदनाय तन्निर्माणायेत्यर्थः । क्रियार्थोपपदस्य" इति चतुर्थी । वेधसा हृतसारमुद्धृतमध्यांशमिव । कृतः ? तमध्यबिल विहितमध्यरन्ध्रमत एव धृतो गम्भीरखनीखस्य निम्नमध्यरन्ध्रा- ाशस्य, नीलिमा नैल्यं येन तत्तथा विलोक्यते । 'खनिः स्त्रियामाकरस्स्यात्' त्यमरः । "कृदिकारादक्तिनो वा ङीष्वक्तव्यः" इति ङीष् । अत्र कलङ्कापह्नवेन नीलिमारोपादपह्नवभेदः । स च कृतमध्यबिलमित्येतत्पदार्थहेतुककाव्य- लेङ्गानुप्राणितः । तदपेक्षा चेयं हृतसारमित्युत्प्रेक्षेति सङ्करः । तया चोपमा यज्यत इति पूर्ववद्ध्वनिः ॥ २५ ॥

धृतेति ॥ विधिर्ब्रह्मा, धृतं लाञ्छनमङ्क एव गोमयाञ्चनं मध्यस्थित- गोमयसंश्लेषणं येन तम्, आलेपनपाण्डरं निजकान्तिसुधाद्रव्यधवलितमित्यर्थः । विधुं चन्द्रमेव विदर्भजाननस्य वैदर्भीमुखस्य नीराजनवर्धमानकं नीराजनशरा- वम् । 'शरावो वर्धमानकः' इत्यमरः । किरणदीपकलिकायुक्तमिति भावः । भ्रमयति । उचितम् । लोकोत्तरत्वादिति भावः । एवं नीराजयन्तीति देशाचारः । अत्र विधुतल्लाञ्छनादेर्नीराजनशरावगोमयादित्वेन रूपणात् सावयवरूपकम् ॥२६

सुषमेति ॥ सुषमा परमा शोभा, सैव विषयः, तस्मिन् परीक्षणे

धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ ।
नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः ॥ २८

सदृशी तव शूर सा परं जलदुर्गस्थमृणालजिद्भुजा ।
अपि मित्रजुषां सरोरुहां गृहयालुः करलीलया श्रियः ॥ २९

---

*जलदिव्यशोधने कृते निखिलं पद्मं पद्मजातं, तन्मुखादपादानात्, भङ्गात्वाधित्वा-स्वभाजि अभाजि, स्वयमेव भग्नमभूदित्यर्थः । स्फुटम् । कर्तरि लुङ् । "भञ्जेश्च चिणि" इति वैभाषिको नकारलोपः । अत एवाधुनापि, भङ्गलक्षण पराजयाभङ्ग सलिलादुन्मज्जनं क्षणमपि नोज्झति न जहाति । जलदिव्योन्मज्जनस्य पराजय-लिङ्गत्वस्मरणादिति भावः । उन्मज्जनक्रियानिमित्तेयं भङ्गोत्प्रेक्षा ॥ २७ ॥

धनुषीति ॥ तद्भ्रुवौ विश्वजयायोदिते उत्पन्ने रतिपञ्चबाणयोर्धनुषी, नूनमित्यादिव्यञ्जकाप्रयोगाद्गम्योत्प्रेक्षा । किञ्च, तस्याः दमयन्त्याः, उच्चनासिके उन्नतनासापुटे, त्वयि नालीकानां द्रोणीचापशराणां, विमुक्तिं कामयेते इति तथोक्तयोस्तयोः, शिलिकामिभिक्षाचरेभ्यो ण इति णप्रत्ययः । 'नालीकं पद्मषण्डे स्त्री नालीकः शरशल्ययोः' इति विश्वः । नलिके न द्रोणीचापे न किमिति काकुः । पूर्ववदुत्प्रेक्षा ॥ २८ ॥

सदृशीति ॥ हे शूर, जलदुर्गस्थानि मृणालानि जयत इति तज्जितौ

---

* जलदिव्यशोधन नाम, वादिप्रतिवादिनोर्विवादनिर्णयोपायव्यकतममेतत् । तद्यथा—वादी प्रतिवादी वा यः स्वव्यवहारं सत्यापयितुमिच्छति, तेन तावत्पर्यन्तं जलान्तर्मग्नेन भवितव्यं, यावत् बलवता दूरे विक्षिप्तं दण्डमादाय कश्चित्सत्वरं समागच्छति तं देशं, यतः स दण्डो विक्षिप्तः । यदि निमग्नः पुरुषः श्वासं रोद्धुमशक्नुवन् दण्डानयनात् प्राक् सलिलादुन्मज्जति, स पराजितो मन्यते इति प्राचां सङ्केतः । प्रकृते च पद्मानां सलिलोन्मज्जनं, भैमीवदन-मुखमप्राप्तपराजयहेतुकमिति व्याख्यातुराशयः ।

वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी ।
विधिनापि न रोमरेखया कृतसीम्नी प्रविभज्य रज्यतः ॥ ३०

अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम् ।
स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ॥ ३१

भुजौ यस्यास्सा, मित्रजुषामर्कसेविनां, सुहृत्सेविनाञ्च, सहायसम्पन्नानामपीत्यर्थः । 'मित्रं सुहृदि मित्रेऽर्के' इति विश्वः । सरोरुहां श्रियः शोभाः, सम्पदश्च । "न लोक" इत्यादिना षष्ठीप्रतिषेधः । करलीलया भुजविलासेन भुजव्यापारेण बलिग्रहणेन च । 'बलिहस्तांशवः कराः, लीलाविलासक्रिययोः' इति चामरः । गृहयालुः ग्रहीता । "ग्रह ग्रहणे" इति धातोश्चौरादिकात् "स्पृहिगृहि" इत्यादिना आलुच्प्रत्ययः । "अयामन्त" इत्यादिना णेरयादेशः । सा दमयन्ती, तव परमत्यन्त सदृशी अनुरूपेत्युपमालङ्कारः । शूरस्य शूरैव भार्या भवितुमर्हतीति भावः ॥ २९ ॥

वयसी इति ॥ सुदृशि दमयन्त्यां, स्वाभिविधिं स्वव्याप्तिं, विधित्सुनी विधातुमिच्छती । अहमहमिकया स्वयमेवाक्रमितुमिच्छतीत्यर्थः । शिशुतातदुत्तरे बाल्ययौवने वयसी विधिना सीमाभिज्ञेन रोमरेखया सीमाचिह्नेन प्रविभज्य, रोमराजेः प्रागेवात्र शैशवेन स्थातव्यम् । ततःपरं यौवनेनेति कालतो विभागं कृत्वा कृतसीम्नी कृतमर्यादे अपि । "विभाषा ङिश्योः" इत्यल्लोपः । न रज्यतः न सन्तुष्यतः, रम्यं वस्तु दुरत्यजमिति भावः । एतेन वयःसन्धिरुक्ता । अत्र प्रस्तुतवयोविशेषणसाम्यादप्रस्तुतविवादप्रतीतेः समासोक्तिरलङ्कारः ॥ ३० ॥

सम्प्रति यौवनमेवाश्रित्य आह - **अपीति** ॥ कान्तिझरैर्लावण्यप्रवाहैः, अगाधतां दुरवगाहतां गमिते तद्वपुषि दमयन्तीशरीरे, प्रसर्पतोस्तरतोः, स्मरयौवनयोर्द्वयोरपि, उभौ कुचौ प्लवस्योन्मज्जनस्य कुम्भौ प्लवनार्थौ कुम्भावित्यर्थः । प्रकृतिविकारभावाभावादश्वघासादिवत्तादर्थ्ये षष्ठीसमासः । लोके तरद्भिः, अन-

कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः ।
स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यत् ॥ ३२ ॥
भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः ।
अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥ ३३ ॥

मज्जनाय कुम्भादिकमवष्टभ्यत इति प्रसिद्धम् । भवतः खलु । अत्र कुचयोः स्मरयौवनप्लवनकुम्भत्वोत्प्रेक्षया तयोरौत्कट्यं कुचयोश्चातिवृद्धिर्व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ३१ ॥

कलश इति ॥ निजहेतुदण्डजः स्वनिमित्तकारणजन्यः, चक्रभ्रमकारिता कुलालभाण्डभ्रमणजनकता, सैव गुणो धर्मो रूपादिश्च । 'गुणः प्रधाने रूपादौ' इत्यमरः । सः कलशे किमु दण्डकार्ये कलशे सङ्क्रान्तः किमु इत्यर्थः । कुतः यस्मात् स कलशः तस्या दमयन्त्याः उच्चकुचौ भवन् तत्कुचात्मना परिणतः सन् प्रभाझरे लावण्यप्रवाहे, चक्रभ्रमं चक्रवाकभ्रान्तिं, कुलालदण्डभ्रमणञ्चातनोति 'चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः ।' 'ग्रामजाले कुलालस्य भाण्डे राष्ट्रास्त्रयोरपि ।' इत्युभयत्रापि विश्वः । अत्र समवायिकारणगुणा रूपादयः कार्ये सङ्क्रामन्ति न निमित्तगुणा इति तार्किकाणां समये स्थिते, गुण इति चक्रभ्रम इति चोभयत्रापि वाच्यप्रतीयमानयोः, अभेदाध्यवसायेन 'स तदुच्चकुचौ भवन्निति' कुचकलशयोरभेदातिशयोक्त्युत्थापिता झरचक्रभ्रमात्मकक्रियानिमित्ता कुचात्मनि कलशे कार्ये चक्रभ्रमकारितालक्षणनिमित्तकारणगुणसङ्क्रमणोत्प्रेक्षेति सङ्क्षेपः । तार्किकसमये विरोधात् विरोधाभासोऽलङ्कार इति कैश्चिदुक्तम् । तदेतदत्यन्ताश्रुतचरमलङ्कारपारदृश्वानः शृण्वन्तु ॥ ३२ ॥

भजत इति ॥ दमस्वसुर्दमयन्त्याः, चिकुरैर्निर्मितबर्हगर्हणः कृतपिञ्छनिन्दः, जितबर्ह इत्यर्थः । शिखी मयूरः षण्मुखं विशाखं भजते सेवते खलु । तथा कुचशोभया जितकुम्भ इभराडैरावतोऽपि जम्भरिपुमिन्द्रं भजते । परपरि-

उदरं नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन मुष्टिना ।
चतुरङ्गुलिमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ॥ ३४ ॥

उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु ।
धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ॥ ३५ ॥

भूताः प्राणत्राणाय प्रबलमन्यमाश्रयन्त इति प्रसिद्धम् । अत्र विन्ध्यैरावणयोः षण्मुखजम्भारिभजनस्य जितबर्हत्वजितकुम्भत्वपदार्थहेतुकत्वात्तद्धेतुके काव्यलिङ्गे तदसम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिश्च ॥ ३३ ॥

उदरमिति ॥ दमस्वसुरुदरं, नतमध्यं निम्नमध्यप्रदेशं पृष्ठं यस्योदरस्य तस्य भावस्तत्ता तया स्फुरत् दृढग्रहणात् पृष्ठफलके स्फुटीभवदङ्गुष्ठपदमङ्गुष्ठन्यासस्थानं यस्य तेन मुष्टिना करणेन, चतसृणामङ्गुलीनां समाहारश्चतुरङ्गुलि, "तद्धितार्थ" इत्यादिना समाहारद्विगुरेकवचननपुंसकत्वे । तस्य मध्येभ्योऽन्तरालेभ्यो निर्गतं यत् त्रिवलि, पूर्ववत्समासादिकार्यं, यत्तूक्तं वामनेन त्रिवलिशब्दः "संज्ञा चेत्" इति सूत्रेण सप्तर्षय इत्यादिवत्, "दिक्सङ्ख्ये संज्ञायाम्" इति संज्ञायां द्विगुरिति । तदपि चेत्करणसामर्थ्यात् त्रिवल्य इति बहुवचनप्रयोगदर्शने स्थितं गतिमात्रं न सार्वत्रिकमिति प्रतीमः । तेन भ्राजत इति तद्भ्राजि, वलित्रयशोभि कृतमित्युत्प्रेक्षा । कौतुकिनेति शेषः । मुष्टिग्राह्यमध्येयमित्यर्थः । मुष्टिग्रहणादङ्गुष्ठनोदनात् पृष्ठमध्ये निम्नता उदरे च चतुरङ्गुलिनोदनाद्वलित्रयाविर्भावश्चेत्युत्प्रेक्षते ॥ ३४ ॥

उदरमिति ॥ कोऽपि कुतुकी दमस्वसुरुदरं मुष्टिना परिमाति किमु परिच्छिनत्ति किमित्युत्प्रेक्षा । कुतः ? यद्यस्मात् सहेमकाञ्चिभिर्वलिभिर्हेमकाञ्च्या सह चतसृभिस्त्रिवलिभिरित्यर्थः । एतस्याः कनकसावर्ण्यं सूचितम् । धृतं तस्य मातुश्चतुरङ्गुल्यङ्गुलिचतुष्टयं येन तदिव भातीत्युत्प्रेक्षा । अत्रोत्प्रेक्षयोर्हेतुहेतुमद्भूतयोरङ्गाङ्गिभावेन सजातीयसङ्करः । पूर्वश्लोके वलीनां तिसृणां चतुरङ्गुलि-

पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया ।
विधिरेककचक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ॥ ३६॥

तरुमूरुयुगेन सुन्दरी किमु रम्भां परिणाहिना परम् ।
तरुणीमपि जिष्णुरेव तां धनदापत्यतपःफलस्तनीम् ॥ ३७ ॥

जलजे रविसेवयेव ये पदमेतत्पदतामवापतुः ।
ध्रुवमेत्य रुतस्सहंसकीकुरुतस्ते विधिपत्रदम्पती ॥ ३८ ॥

मध्यनिर्गतत्वमुत्प्रेक्षितम् । इह तु तासामेव काञ्चीसहितानाञ्चतुरङ्गुलित्वमुत्प्रेक्षत इति भेदः । प्रेक्षितुरिति भावः ॥ ३५ ॥

पृथ्विति ॥ पृथु वर्तुलञ्च तस्याः नितम्बं करोतीति नितम्बकृन्नितम्बं कृतवान्, विधिः ब्रह्मा, मिहिरस्यन्दनशिल्पशिक्षया रविरथनिर्माणाभ्यासपाटवेन, एकक एकाकि, "एकादाकिनिच्चासहाय" इति चकारात् कप्रत्ययः । तेन चक्रेण चरतीति तच्चारिणं मान्मथं रथं निर्मित्सति किमु, सूर्यस्येव मन्मथस्यापि एकचक्रं रथं निर्मातुमिच्छति किमित्युत्प्रेक्षा । अन्यथा, किमर्थमिदं नितम्बनिर्माणमिति भावः । मातेः सन्नन्ताल्लट् । "सनि मीमा" इत्यादिना इसादेशः । "स स्यार्धधातुक" इति सकारस्य तकारः । "अत्र लोपोऽभ्यासस्य" इत्यभ्यासलोपः ॥ ३६ ॥

तरुमिति ॥ सुन्दरी दमस्वसा, परिणाहिना विपुलेन, ऊरुयुगेन रम्भां रम्भां नाम तरुं परं, तरुमेव । "न लोक" इत्यादिना षष्ठीप्रतिषेधः । जिष्णुः किमु । किन्तु, धनदापत्यस्य नलकूबरस्य, तपसः फलस्तनीं फलभूतकुचां, तां रम्भां नाम तरुणीमपि जिष्णुरेव । 'रम्भा कदल्यप्सरसोः' इति विश्वः । रम्भे इव रम्भाया इव चोरू यस्याः सा इत्युभयथा रम्भोरूरित्यर्थः ॥ ३७ ॥

जलजे इति ॥ ये जलजे द्विपद्मे, रविसेवया सूर्योपासनयेव, एतस्याः पदतां चरणत्वमेव पदं प्रतिष्ठामवापतुः । ते जलजे कर्मभूते, विधिपत्रदम्पती

श्रितपुण्यसरस्सरित्कथं न समाधिक्षपिताखिलक्षपम् ।
जलजं गतिमेतु मञ्जुळां दमयन्तीपदनाम्नि जन्मनि ॥ ३९॥

सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता ।
अतिथित्वमनायि सा दृशोस्सदसत्संशयगोचरोदरी ॥ ४० ॥

द्वन्द्वचारिणौ ब्रह्मवाहनहंसौ, एत्यागत्य, रुतः रवात् कूजनादित्यर्थः । रौतेः सम्पदादित्वात् क्विपि तुगागमः । सहंसकौ सकटकौ सहंसकौ च कुरुतः । अभूततद्भावे च्विः । 'हंसकः पादकटकः' इत्यमरः । हंसपक्षे वैभाविकः का... । ध्रुवमित्युत्प्रेक्षायाम् । पद्महंसयोरविनाभावारकयोर्बिम्बप्रतिबिम्बपद्मयो- स्तत्पदत्वमुत्प्रेक्ष्य दिव्यहंसयोरेव हंसकत्वं चोत्प्रेक्षते ॥ ३८ ॥

श्रितेति ॥ श्रिताः सेविताः, पुण्याः सरःसरितः मानसादीनि सरांसि गङ्गाद्याः सरितश्च येन तत् समाधिना ध्यानेन निमीलनेन क्षपिताखिलक्षपं यापित- सर्वरात्रं जलजं दमयन्तीपदमिति नाम यस्मिन् तस्मिन् जन्मनि, मञ्जुलां गतिं रम्यगतिं उत्तमदशां च । 'गतिर्मार्गे दशायां च' इति विश्वः । कथं नैतु एत्वेवेत्यर्थः । पदस्य गतिसाधनत्वात्तत्रापि दमयन्तीसम्बन्धाच्चोभयगतिलाभः । तथापि जन्मान्तरेऽपि सर्वथा तपः फलितमिति भावः । सम्भावनायां लोट् ॥ ३९ ॥

अथ कथं त्वमेनां वेत्सीत्यत आह — **सरसीरिति** ॥ सरसीः सरांसि परिशीलितुं परिचेतुं, तत्र विहर्तुमित्यर्थः । चुरादिणेरनित्यत्वादण्यन्तप्रयोगः । गमिर्गमनं शब्दपरशब्देनार्थो गम्यते । तस्य कर्मीकृताः कर्मकारकीकृताः, नैके अनेके, नञर्थस्य नशब्दस्य, 'सुप्सुपा' इति समासः । नितरां वर्तन्ते जना एष्विति नीवृतः, जनपदाः येन तेन कान्तानेकदेशेनेत्यर्थः । "नहिवृति" इत्यादिना दीर्घः । मया मदसद्वेति संशयगोचरः सन्देहास्पदं उदरं यस्याः सा कृशोदरीत्यर्थः । नासिकोदरेत्यादिना ङीप् । सा दमयन्ती दृशोरातिथित्वमनायि स्वविषयतां नीता दृष्टेत्यर्थः । नयतेः कर्मणि लुङ् ॥ ४० ॥

अवधृत्य दिवोऽपि यौवतैर्नसहाधीतवतीमिमामहम् ।
कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिन्तयम् ॥ ४१ ॥

अनुरूपममुं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम् ।
युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ॥ ४२ ॥

अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे ।
चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ॥ ४३

अवधृत्येति ॥ अहमिमां दमयन्तीं, दिवः स्वर्गस्य सम्बन्धिभिर्यौवतैः युवतिसमूहैरपि । 'गार्भिणं यौवतं गण' इत्यमरः । भिक्षादित्वात् समूहार्थेऽण्प्रत्ययः । तत्राप्यस्य युवतीति स्त्रीप्रत्ययान्तस्यैव प्रकृतित्वेन तद्ग्रहणात्तत्सामर्थ्यादेव "भस्याढे तद्धिते" इति पुंवद्भाव इति वृत्तिकारः । न सहाधीतवतीमसदृशीं, ततोऽप्यधिकसुन्दरीमित्यर्थः । नञर्थस्य नशब्दस्य सुप्सुपेति समास इति वामनः । अवधृत्य निश्चित्य विधातुः ब्रह्मणः, आशये हृदि अस्याः पतिः कतमस्तु कतमो वा वसतीत्यचिन्तयं तदेवेति शेषः ॥ ४१ ॥

अनुरूपमिति ॥ अथेदानीमनुरूपं योग्यममुं त्वां निरूपयन्नस्याः पतित्वेनालोचयन्, सर्वेष्वपि युवसु पूर्वपक्षतां दूष्यकोटित्वं व्यपनेतुमक्षमस्सन् त्वयि सिद्धान्तधियं न्यवेशयम् । त्वमेवास्याः पतिरिति निरचैषमित्यर्थः । अयमेव विधातुरप्याशय इति भावः ॥ ४२ ॥

अथ त्वद्रूपदर्शनमेव सम्प्रति तत्स्मारकमित्याह—अनयेति ॥ चिरमवलोकितापि सा शुचिस्मिता सुन्दरी अद्याधुना हस्तेन निर्दिशन्नाह—अनया तव रूपसीमया सौन्दर्यकाष्ठया कृतसंस्कारविबोधनस्य उद्बुद्धसंस्कारस्य मे स्मृतिमारूढवती स्मृतिपथं गता । सदृशदर्शनं स्मारकमित्यर्थः ॥ ४३ ॥

त्वयि वीर विराजते परं दमयन्तीकिलिकिञ्चितं किल ।
तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ॥ ४४ ॥

तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः ।
इयमृद्धधना वृथावनिः स्ववनी सम्प्रवदत्पिकापि का ॥ ४५ ॥

अनयामरकाम्यमानया सह योगस्सुलभस्तु न त्वया ।
घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा ॥ ४६ ॥

ततः किमत आह—**त्वयीत्यादि** ॥ हे वीर, दमयन्त्याः किलिकिञ्चितम् । "क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलिकिञ्चितम्" इत्युक्तलक्षणलक्षितशृङ्गारचेष्टितं त्वयि परं, त्वय्येव विराजते किल शोभते खलु । तथाहि, मणिहारावलेर्मुक्ताहारपङ्क्तेः, रामणीयकं रमणीयत्वं, योपधाद्गुरूपोत्तमाद्वुञ् । तरुणीस्तन एव दीप्यते नान्यत्रेत्यर्थः । स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेणेति प्रायग्रहणादेकवचनप्रयोगः । अत्र हारकिलिकिञ्चितयोरुपमानोपमेययोर्वाक्यद्वये बिम्बप्रतिबिम्बतया स्तननृपयोः समानधर्मत्वोक्तेर्दृष्टान्तालङ्कारः । लक्षणन्तूक्तम् ॥ ४४ ॥

तवेति ॥ हे वीर, तवेदं रूपं सौन्दर्यं तया दमयन्त्या विना, अवकेशिनो वन्ध्यवृक्षस्य । 'वन्ध्योऽफलोऽवकेशी च' इत्यमरः । पुष्पमिव विफलं निरर्थकम् । ऋद्धधना सम्पूर्णवित्ता इयमवनिर्वृथा निरर्थका । सम्प्रवदत्पिका कूजत्कोकिला स्ववनी निजोद्यानमपि ङीप् । का तुच्छा निरर्थकेत्यर्थः । तद्योगे तु सर्वं सफलमिति भावः । 'किं वितर्के परिप्रश्ने क्षेपे निन्दापराधयोः' इति विश्वः । अत्र नलरूपावनिवनीनां दमयन्त्या विना रम्यतानिषेधाद्विनोक्तिरलङ्कारः । "विना सम्बन्धि यत्किञ्चिदत्रान्यत्र परा भवेत् । रम्यतारम्यता वा स्यात् सा विनोक्तिरनुस्मृता ॥" इति लक्षणात् । तस्याश्च पुष्पमिवेत्युपमया संसृष्टिः ॥ ४५ ॥

अत्र स्वापेक्षां दर्शयितुं तस्याः दौर्लभ्यमाह—**अनयेति** ॥ अमरैः

तदहं विदधे तथा तथा दमयन्त्यास्सविधे तव स्तवम् ।
हृदये निहितस्तया भवानपि नेन्द्रेण यथापनीयते ॥ ४७ ॥

तव सम्मतिमत्र केवलामधिगन्तुं धिगिदं निवेदितम् ।
ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ॥

तदिदं विशदं वचोमृतं परिपीयाभ्युदितं द्विजाधिपात् ।
अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम् ॥ ४९ ॥

इन्द्रादिभिः, काम्यमानयाभिलष्यमाणया दमयन्त्या सह योगः अम्बुदागमे घनसंवृतया मेघावृतया, निशाकरत्विषा सह योगः कुमुदेनेव त्वया न सुलभो दुर्लभ इत्यर्थः । अत्र तत्संयोगदौर्लभ्यस्य अमरकामनपदार्थहेतुकत्वात्काव्यलिङ्गभेदः । तत्सापेक्षा चेयमुपमेति सङ्करः ॥ ४६ ॥

अत्र का गतिरत आह—तदिति ॥ तत् तस्मात्, कार्यस्य सप्रतिबन्धत्वादहं दमयन्त्याः सविधे समीपे तथा तथा तव स्तवं स्तोत्रं विदधे विधास्य इत्यर्थः । सामीप्ये वर्तमानप्रत्ययः । यथा तया हृदये निहितो भवानिन्द्रेणापि नापनीयते नेतुमशक्य इत्यर्थः । यथेन्द्रादिप्रलोभितापि त्वय्येव गाढानुरागा स्यान्नथा करिष्यामीत्यर्थः ॥ ४७ ॥

तर्हि तथैव क्रियतां किं निवेदनेनेत्यत आह—तवेति ॥ अत्रास्मिन् कार्ये केवलामेकां तव सम्मतिमङ्गीकारमधिगन्तुमिदं निवेदितं निवेदनं धिक् । तथा हि—साधवो निजोपयोगितां स्वोपकारित्वं फलेन कार्येण ब्रुवते बोधयन्ति । किन्तु कण्ठेन वाग्वृत्त्या न ब्रुवते । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

तदिति ॥ स नलो द्विजाधिपाद्धंसाच्चन्द्राच्चाभ्युदितमाविर्भूतं विशदं प्रसन्नमवदातश्च तत्पूर्वोक्तमिदमनुभूयमानं वच एवामृतमिति रूपकम् । तत्परिपीय । अत एवातितृप्ततयातिसौहित्येन तस्य वचोऽमृतस्य उद्गारमिव सितं स्मितं

परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः ।
मृदु तस्य मुदेऽकिरद्गिरः प्रियवादामृतकूपकण्ठजाः ॥

न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता ।
त्वदुदाहरणाऽऽकृतौ गुणा इति सामुद्रिकसारमुद्रणा ॥ ५१ ॥

न सुवर्णमयी तनुःपरं ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिताऽनवलम्बे किमु मादृशेऽपि सा ॥५२॥

विनिर्ममे निर्मितवान् । माङः कर्तरि लिट् । अतितृप्तस्य किञ्चिन्निस्सार उद्गारः। सितत्वसाम्यात्, स्मितस्य वागमृतोद्गारत्वोत्प्रेक्षा ॥ ४९ ॥

परिमृज्येति ॥ निषधानां राजा नैषधः नलः । जनपदशब्दात् क्षत्रियादञ् । भुजाग्रजन्मना कोकनदेन पाणिशोणपङ्कजेनेत्यर्थः । पतगं हंसं परिमृज्य तस्य हंसस्य, मुदे हर्षाय प्रियवादानामेवामृतानां कूपो निधिः कण्ठो वागिन्द्रियं तज्जाः तज्जन्याः, गिरो मृदु यथा तथा । अकिरत् प्रियवाक्यामृतैरसिञ्चदित्यर्थः । अत्र भुजाग्रजन्मना कोकनदेनेति विषयस्य पाणेर्निगरणेन विषयिणः कोकनदस्यैव उपनिबन्धनादतिशयोक्तिः । "विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात् कविप्रौढोक्तिसम्मता" इति लक्षणात्। सा च पाणिकोकनदयोरभेदोक्तेरभेदरूपा । तस्याः प्रियवादामृतकूपकण्ठेति रूपकसंसृष्टिः ॥ ५० ॥

नेति ॥ हे हंस, तवाकृतिराकारस्तुलाविषये सादृश्यभूमौ न न वर्तते असदृशीत्यर्थः । ते तव, सुशीलता सौशील्यं वचोवर्त्मनि न न वर्तते वक्तुमशक्येत्यर्थः । अत एवाकृतौ गुणाः 'यत्राकृतिस्तत्र गुणाः' इति सामुद्रिकाणां या सारमुद्रणा सिद्धान्तप्रतिपादनं सा त्वमेवोदाहरणं यस्याः सा तथोक्ता। आकृतिसौशील्ययोस्त्वय्येव सामानाधिकरण्यदर्शनादिति भावः। अत एवोत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुकत्वात् काव्यलिङ्गमलङ्कारः ॥ ५१ ॥

नेति ॥ ननु हंस, तवेयं तावकी । "युष्मदस्मदोरन्यतरस्यां खञ् च"

भृशतापभृता मया भवान्मरुदासादि तुषारसारवान् ।
धनिनामितरस्सतां पुनर्गुणवत्सन्निधिरेव सन्निधिः ॥ ५३ ॥
शतशश्श्रुतिमागतैव सा त्रिजगन्मोहमहौषधिर्मम ।
अमुना तव शंसितेन तु स्वदृशैवाभिहितामवैमि ताम् ॥ ५४ ॥
अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम् ।
सविधेऽपि नसूक्ष्मसाक्षिणी वदनालङ्कृतिमात्रमक्षिणी ॥ ५५ ॥

इति चकारादण्प्रत्यये ङीप् । "तवकममकावेकवचन" इति तवकादेशः । तनुः परं मूर्तिरेव सुवर्णमयी हिरण्मयी न । किन्तु, वागपि तथा सुवर्णमयी शोभनाक्षरमयीत्यर्थः । अनवलम्बे निरवलम्बे पथि परम् आकाश एव पक्षपातिता पक्षपातित्वं न । किमु किं त्वित्यर्थः । निपातानामनेकार्थत्वात् । अनवलम्बे निराधारे मादृशेऽपि सा पक्षपातिता स्नेहवत्तेत्यर्थः । अत्र तनुवाचोः प्रकृताप्रकृतयोः सुवर्णमयीति शब्दश्लेषः । एवं पथि मादृशेऽपि पक्षपातितेति सजातीयसंसृष्टिः । तया चोपमा व्यज्यते ॥ ५२ ॥

भृशेति ॥ भृशतापभृता अतिसन्तापभाजा मया भवान् तुषारैः शीकरैः सारवानुत्कृष्टो मरुन्मारुतः, (सन्) आसादि प्राप्तः सन्तापहारित्वादिति भावः । तथा हि धनिनां धनिकानां कुबेरादीनामितरः पद्मशङ्खादिस्संधासौ निधिश्चेति सन्निधिः सतां विदुषां पुनर्गुणवतां गुणिनां सन्निधिस्सान्निध्यमेव सन्निधिर्महानिधिः सन्तापहारित्वात्, त्वमेव शिशिरमारुतः अन्यस्तु दहन एवेति भावः । दृष्टान्तालङ्कारः ॥ ५३ ॥

शतश इति ॥ त्रिजगतस्त्रैलोक्यस्य मोहे मोहने महौषधिः महौषधमिति रूपकम् । सा दमयन्ती शतशो मम श्रुतिं श्रोत्रमागतैव । अमुना तव शंसितेन कथनेन तु स्वदृशा स्वदृष्ट्यैव अभिहितां बोधितां तामवैमि साक्षाद्दृष्टां मन्ये । आप्तोक्तिप्रामाण्यादिति भावः ॥ ५४ ॥

अथ स्वदृष्टेरप्याप्तदृष्टिरेव गरीयसीत्याह—**अखिलमिति** ॥ सुहृदा

अमितं मधु तत्कथा मम श्रवणप्राहुणिकीकृता जनैः ।
मदनानलबोधने भवेत्खग धाय्या धिगधैर्यधारिणः ॥ ५६ ॥

विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोहितः ।
बत कालकलत्रदिग्भवः पवनस्तद्विरहानलैधसा ॥ ५७ ॥

आत्ममुखेन च स्वहृदा स्वान्तःकरणेन च स्वहृद्ग्रहणं तद्वत्सुहृदः श्रद्धेयत्वज्ञापनार्थं अखिलं कृत्स्नमर्थमनाविलमसन्दिग्धमविपर्यस्तं यथा तथा पश्यतामवधारयतां विदुषां विवेकिनां सविधे पुरोऽपि नसूक्ष्मसाक्षिणी असूक्ष्मार्थदर्शिनी । 'सुप्सुपा' इति समासः । अक्षिणी वदनालङ्कृतिमात्रम्, न तु दूरसूक्ष्मार्थदर्शनोपयोगिनी इत्यर्थः ॥ ५५ ॥

अमितमिति ॥ हे खग, जनैर्विदर्भागतजनैर्मम श्रवणप्राहुणिकीकृता कर्णातिथीकृता, तद्विषयीकृतेत्यर्थः । 'आवेशिकः प्राहुणिक आगन्तुरतिथिस्तथा' इति हलायुधः । अमितमपरिमितं मधु क्षौद्रं तद्वदतिमधुरेत्यर्थः । तत्कथा तद्गुणवर्णना अधैर्यधारिणोऽत्यन्ताधीरस्य मम मदनानलबोधने कामाग्निप्रज्वलने धाय्या सामिधेनी भवेत् । 'ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धनी' इत्यमरः । "पाय्यसान्नाय्य" इत्यादिना निपातः । धिक् वाक्यार्थो निन्द्यः । अत्र तत्कथायाः धाय्यात्मना प्रकृतमदनाग्नीन्धनोपयोगात् परिणामालङ्कारः । आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इत्यलङ्कारसर्वस्वकारः ॥ ५६ ॥

विषम इति ॥ विषमः प्रतिकूलः कालकलत्रदिग्भवोऽन्तकदिग्भवः, प्राणहर इति भावः । पवनो दक्षिणमारुतः, तद्विरहानलैधसा दमयन्तीविरहाग्निसमिधा तद्दाहकेनेत्यर्थः । मया मलये मलयाचले, या अहिमण्डली सर्पसङ्घः तस्याः विषफूत्कारमयः, ऊहितः तद्रूप इति तर्कित इत्यर्थः । लोके च अग्निरेधांसि निधाय फूत्कारवातैर्ध्मायत इति भावः । बतेति खेदे । विरहानलैधसेति रूपकोत्थापितेयं दक्षिणपवनस्य मलयाहिमण्डलीफूत्कारत्वोत्प्रेक्षेति सङ्करः ॥५७॥

प्रतिमासमसौ निशाकरः खग सङ्गच्छति वासिनाधिपम् ।
किमु तीव्रतरैस्ततः करैर्मम दाहाय स धैर्यतस्करैः ॥ ५८ ॥

कुसुमानि यदि स्मरेषवो न तु वज्रं विषवल्लिजानि तत् ।
हृदयं यदमूमुहन्नमूर्मम यच्चातितरामतीतपन् ॥ ५९ ॥

तदिहानवधौ निमज्जतो मम कन्दर्पशराधिनीरधौ ।
भव पोत इवावलम्बनं विधिनाकस्मिकसृष्टसन्निधिः ॥ ६० ॥

प्रतिमासमिति ॥ हे खग, असौ निशाकरः मासि मासि प्रतिमासम्, प्रतिदर्शमित्यर्थः । वीप्सायामव्ययीभावः । दिनाधिपं सूर्यं सङ्गच्छति प्राप्नोतीति यत् । ततः प्राप्तेः स निशाकरस्तीव्रतरैरत एव धैर्यतस्करैर्मद्धैर्यहारिभिः करैः सौरैः तत आनीतैर्मम दाहाय सङ्गच्छतीत्यनुषङ्गः । किमुशब्द उत्प्रेक्षायाम् । अत्र सङ्गमनस्य दाहार्थत्वोत्प्रेक्षणात् फलोत्प्रेक्षा ॥ ५८ ॥

कुसुमानीति ॥ स्मरेषवः यदि कुसुमान्येव, वज्रमशनिस्तु न, सद्यो मरणाभावादिति भावः । तर्हि विषवल्लिजानि विषलतोद्भवानि । यद्यस्मादमूः स्मरेषवः । 'पत्री रोप इषुर्द्वयोः" इति स्त्रीलिङ्गता, मम हृदयममूमुहन्नमूर्छयन् । मुह्यतेर्णौ चङ् । यद्यस्मादतितरामतिमात्रम् । अव्ययादाम्प्रत्ययः । अतीतपन् तापयन्ति स्म च । तपतेर्णौ चङ् । मोहतापलक्षणविषकार्यदर्शनाद्विषवल्लिजत्वोत्प्रेक्षा ॥ ५९ ॥

तदिति ॥ तत्तस्मादिहास्मिन्ननवधौ अपारे कन्दर्पशरैर्य आधिर्मनोव्यथा । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । तस्मिन्नेव नीरधौ समुद्रे निमज्जतोऽन्तर्गतस्य मम विधिना दैवेन अकस्मादकाण्डे भवमाकस्मिकम् । अध्यात्मादित्वात् ठञ् । अव्ययानां भमात्रे टिलोपः । तथया तथा सृष्टसन्निधिः कृतसन्निधानं भाग्यादागत इत्यर्थः । त्वं पोतो यानपात्रमिव । 'यानपात्रं तु पोतः' इत्यमरः । अवलम्बनं भव ॥ ६० ॥

अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः ।
स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता ॥६१॥
तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः ।
अधिसाधय साधयेप्सितं स्मरणीयास्समये वयं वयः ॥ ६२ ॥
इति तं स विसृज्य धैर्यवान् नृपतिस्सूनृतवाग्बृहस्पतिः ।
अविशद्वनवेश्म विस्मितश्श्रुतिलग्नैः कलहंसशंसितैः ॥ ६३ ॥
अथ भीमसुतावलोकनैस्सफलं कर्तुमहस्तदेव सः ।
क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ ॥ ६४ ॥

अथ वेति ॥ अथवा इयं नोऽस्माक सम्बन्धिनी । उभयप्राप्तौ कर्मणि इति नियमात् कर्तरि कृद्योगे षष्ठीनिषेधेऽपि शेषषष्ठीपर्यवसानात् कर्त्रर्थलाभः भवतः । उभयप्राप्तौ कर्मणीति षष्ठी । प्रवर्तना प्रेरणा व्यासबन्धो युष्य् । कथं पिष्टं न पिनष्टि, सतः प्रवृत्तविषयत्वात् पिष्टपेषणकल्पेत्यर्थः । हि यस्मात् ग्रहणानां याथार्थ्यं यथा प्रामाण्यमिव, स्वतः सर्वप्रमाणानां प्रामाण्यमिति, 'गृह्यतां जाता मनीषा स्वत एव मानम्' इति मीमांसकाः । सतां परार्थता परार्थप्रवृत्तिः स्वत एव न तु परतः । उपमासमृष्टोऽर्थान्तरन्यासः ॥ ६१ ॥

तवेति ॥ हे वयः खग तव वर्त्मनि शिवं मङ्गलं वर्ततां त्वरितं क्षिप्रमेव पुनः समागमोऽस्तु अधिसाधय गच्छ ईप्सितमिष्टं साधय सम्पादय समये कार्यकाले वयं स्मरणीयाः अनन्यगामि कार्यं कुर्यादित्यर्थः ॥ ६२ ॥

इतीति ॥ धैर्यवानुपायलाभात् सधैर्यः सूनृतवाक्षु सत्यप्रियवाक्षु बृहस्पतिः तथा प्रगल्भ इत्यर्थः । 'सूनृतं प्रियसत्यवाक्' इत्यमरः । स नृपति-रितीत्थं तं हंसं विसृज्य श्रुतिलग्नैः श्रोत्रप्रविष्टैः कलहंसस्य शंसितैर्विस्मितः सन् वनवेश्म वनस्थविहारगृहमविशत् ॥ ६३ ॥

अथेति ॥ अथ सोऽण्डजो हंसस्तदहरेव भीमसुतायाः भैम्याः अव-लोकनैः सफलं कर्तुं तस्मिन्नेवाहनि तां द्रष्टुमित्यर्थः । क्षितिमण्डलमण्डनायितं भूमण्डलस्यालङ्कारभूतं कुण्डिनं कुण्डिनाख्यं नगरं ययौ ॥ ६४ ॥

प्रथमं पथि लोचनातिथिं पथिकप्रार्थितसिद्धिशंसिनम् ।
कलशं जलसंभृतं पुरः कलहंसः कलयांबभूव सः ॥ ६५ ॥

अवलम्ब्य दिदृक्षयांबरे क्षणमाश्चर्यरसालसं गतम् ।
स विलासवनेऽवनीभुजः फलमैक्षिष्ट रसालसङ्गतम् ॥ ६६ ॥

नभसः कलभैरुपाश्रितं जलदैर्भूरितरक्षुपन्नगम् ।
स ददर्श पतङ्गपुङ्गवो विटपच्छन्नतरक्षुपं नगम् ॥ ६७ ॥

अथ श्लोकत्रयेण शुभनिमित्तान्याह—**प्रथममित्यादिना** ॥ स कलहंसः प्रथममादौ पथि लोचनातिथिं दृष्टिप्रियं पथिकानां प्रस्थातॄणां प्रार्थितस्य इष्टार्थस्य, सिद्धिशंसिनं सिद्धिसूचकं जलसंभृतं जलपूर्णं कलशम्, पूर्णकुम्भं पुरोऽग्रे कलयांबभूव ददर्श ॥ ६५ ॥

अवलम्ब्येति ॥ स हंसो दिदृक्षया स्वगन्तव्यमार्गालोकनेच्छया अम्बरे क्षणमाश्चर्यरसेन तद्वस्तुदर्शननिमित्तेनाद्भुतरसेनालसं मन्दं गतं गतिमवलम्ब्यावनीभुजो नलस्य विलासवने विहारवने रसालेन चूतवृक्षेण सङ्गतं सम्बद्धम् । 'आम्रश्चूतो रसालोऽसौ' इत्यमरः । फलमैक्षिष्ट ईक्षितवान् ॥ ६६

नभस इति ॥ पुमान् गौः वृषभः, विशेषणसमासः । "गोरतद्धितलुकि' इति समासान्तष्टच् । स इव पतङ्गः पतङ्गपुङ्गवः पक्षिश्रेष्ठः उपमितसमासः । नभसः कलभैः खेचरकरिकल्पैरित्यर्थः । जलदैरुपाश्रितं व्याप्तम् । भूरयः बहवः तरक्षवो मृगादनाः पन्नगा यस्य तम् । विटपैः शाखाविस्तारेण । 'विस्तारो विटपो स्त्रियाम्' इत्यमरः । छन्नतराः अतिशयेन छादिताः क्षुपाः ह्रस्वशाखा यस्य तम् । 'ह्रस्वशाखा शिफः क्षुपः' इत्यमरः । तं नगं पर्वतं ददर्श पूर्णकलशादिदर्शनं पान्थक्षेमकरमिति निमित्तज्ञाः ॥ ६७ ॥

स यया धुतपक्षतिः क्षणं क्षणमूर्ध्वायनदुर्विभावनः ।
विततीकृतनिश्चलच्छदः क्षणमालोककदत्तकौतुकः ॥ ६८ ॥

तनुदीधितिधारया रयाद्गतया लोकविलोकनामसौ ।
छदहेम कषन्निवालसत्कषपाषाणनिभे नभःस्थले ॥ ६९ ॥

विनमद्भिरधःस्थितैः खगैर्झटिति श्येननिपातशङ्किभिः ।
स निरैक्षि दृशैकयोपरि स्यदझाङ्कारिपतत्रिपद्धतिः ॥ ७० ॥

ददृशे न जनेन यन्नसौ भुवि तच्छायमवेक्ष्य तत्क्षणात् ।
दिवि दिक्षु वितीर्णचक्षुषा पृथुवेगद्रुतमुक्तकपथः ॥ ७१ ॥

स इति ॥ स हंसः क्षणं धुतपक्षतिः कम्पितपक्षमूल, क्षणमूर्ध्वायनेन ऊर्ध्वगमनेन दुर्विभावनः दुष्करावधारणो दुर्लक्ष्य इत्यर्थः । विततीकृतौ विसारितौ निश्चलौ छदौ पक्षौ यस्य स. । तथाऽऽलोककानां दृष्टॄणां दत्तकौतुकः सन् ययौ । स्वभावोक्तिः ॥ ६८ ॥

तन्विति ॥ असौ हंसो रयाद्वेगादुत्पन्नयेति शेष. । लोकस्यालोकिजनस्य परीक्षकजनस्य विलोकनां दर्शनं गतया कौतुकाद्वर्णपरीक्षार्थम् विलोक्यमानयेत्यर्थः । तनोः शरीरस्य तन्वा सूक्ष्मया च दीधितिधारया रश्मिरेखया निमित्तेन । कषपाषाणनिभे निकषोपलनिभे नभःस्थले छदहेम निजपक्षसुवर्णं कषन् घर्षन्निवालसत् अशोभतेत्युत्प्रेक्षा ॥ ६९ ॥

विनमद्भिरिति ॥ स्यदेन वेगेन झाङ्कारिणा आमिति शब्दं कुर्वाणा पतत्रिपद्धतिः पक्षिसरणिः यस्य स हंसः । श्येननिपातं शङ्कन्त इति तच्छङ्किभिरत एव विनमद्भिर्विलीयमानैरधःस्थितैः खगैर्झटिति द्राक् एकया दृशा उपरि उपरिष्टात् निरैक्षि निरीक्षितः । कर्मणि लुङ् । स्वभावोक्तिः ॥ ७० ॥

ददृश इति ॥ यन् गच्छन् । इणो लटः शत्रादेशः । असौ हंसः । भुवि तच्छायं तस्य छायाम् । "विभाषा सेना" इत्यादिना नपुंसकत्वम् ।

न वनं पथि शिश्रियेऽमुना क्वचिदप्युन्नतरद्रुचारुतम् ।
न सगोत्रजमन्ववादि वा गतिवेगप्रसरद्रुचा रुतम् ॥ ७२ ॥
अथ भीमभुजेन पालिता नगरी मञ्जुरसौ धराजिता ।
पतगस्य जगाम दृक्पथं हिमशैलोपमसौधराजिता ॥ ७३ ॥
दयितं प्रति यत्र सन्तता रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाश्शशभृद्भित्तनिरङ्कभित्तयः ॥ ७४ ॥

अवेक्ष्य तत्क्षणाद्दिवि दिक्षु च वितीर्णचक्षुषा दत्तदृष्टिना जनेन पृथुवेगेन द्रुतं शीघ्रं मुक्तदृक्पथस्सन् न ददृशे न दृष्टः, क्षणमात्रं दृष्टिपथमतिक्रान्त इत्यर्थः ॥

नेति ॥ गतिवेगेन प्रसरद्रुचा प्रसर्पत्तेजसा अमुना हंसेन क्वचिदपि उन्नतरात्युन्नता, द्रूणां द्रुमाणां, चारुता रम्यता यस्मिन् तत् । 'पलाशी-द्रुद्रुमागमा' इत्यमरः । वनं न शिश्रिये । सगोत्रजं बन्धुजन्यं रुतं कूजितं वा नान्ववादि नानूदितं मध्येमार्गमध्वश्रमापनोदनबन्धुसम्भाषणादिकमपि न कृत-मिति सुहृत्कार्यानुसन्धानपरत्वोक्तिः ॥ ७२ ॥

अथेति ॥ धराजिता भूमिजयिना । "सत्सूद्विष" इत्यादिना क्विपि तुक् । भीमस्य भीमभूपस्य भुजेन पालिता हिमशैलोपमैः सौधैः राजसदनैः राजिता मञ्जुः मञ्जुळा मनोज्ञा असौ पूर्वोक्तनगरी कुण्डिनपुरी पतगस्य हंसस्य दृक्पथं जगाम स तां ददर्शेत्यर्थः । अत्र यमकाख्यानुप्रासस्य हिमशैलो-पमेति उपमायाश्च संसृष्टिः ॥ ७३ ॥

अथ नगरीं वर्णयति—**दयितमिति** ॥ यत्र नगर्यां, स्फटिकोपल-विग्रहाः स्फटिकमयशरीरा इत्यर्थः । अत एव शशभृद्भित्तनिरङ्कभित्तयः शशाङ्क-शकलनिष्कलङ्कानि कुड्यानि येषां ते । 'भित्तं शकलखण्डे वा' इत्यमरः । भिदेः क्तिन्प्रत्ययः । "भित्तं शकलम्" इत्यादिनिपातनात् "रदाभ्याम्" इत्यादिना निष्ठानत्वाभावः । गृहाः दयितं भीमं प्रियं प्रति सन्तता भुवो भूमेर्नायिकया रतिहासा इव केळिहासानीव रेजिरे इत्युत्प्रेक्षा ॥ ७४ ॥

नृपनीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः ।
शरणागमुवास वासरेऽप्यसदावृत्त्युदयक्षमं तमः ॥ ७५ ॥

सितदीप्रमणिप्रकल्पिते यदगारे हसदङ्करोदसि ।
निखिलान्निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः ॥

सुदतीजनमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया ।
न निशाखिलयापि वापिका प्रससाद ग्रहिलेव मानिनी ॥ ७७

नृपेति ॥ यत्र नगर्यां तमोऽन्धकारः, भास्वतो भास्करात् भयेन नृपस्य ये नीलमणीना गृहाः तेषां त्विषस्तासामुपधेश्छलादित्यपह्नवभेदः । 'रत्नं मणिर्द्वयोः' इत्यमरः । कृदिकारादक्तिनो वा ङीष्वक्तव्यः । शरणागं शरणं गृहं रक्षितारश्चागतम् । 'शरणं गृहरक्षित्रोः' इत्यमरः । वासरे दिवसेऽप्यसदा-वृत्त्यपुनरावृत्ति किञ्चोदयक्षमं सदुवास ॥ ७५ ॥

सितेति ॥ सितैर्दीप्रैश्च मणिभिः प्रकल्पिते उज्ज्वलस्फटिकनिर्मिते हसदङ्करोदसि विलसदङ्करोदस्के द्यावापृथिवीव्यापिनीत्यर्थः । यदगारे यस्याः नगर्याः गृहेष्वित्यर्थः । जातावेकवचनम् । निशि निखिलान् तिथीनेकाकिनी एकैवेत्यर्थः । "एकादाकिनिच्चासहाये" इति चकारात् कन्प्रत्ययः । "प्रत्ययस्थात् कात्पूर्वस्य" इतीकारः । पूर्णिमातिथिः राकातिथिः । 'तदाद्यास्तिथयो द्वयोः' इत्यमरः । अतिथिरुपतस्थे अतिथीभूय सङ्गतेत्यर्थः । "उपाद्देवपूजा" इत्यादिना सङ्गतिकरणे आत्मनेपदम् । स्फटिकभवनकान्तिनित्यकौमुदीयोगात् सर्वा अपि रात्रयो राकारात्रय एवासन्नित्यभेदोक्तेरतिशयोक्तिभेदः ॥ ७६ ॥

सुदतीति ॥ यत्र नगर्यां शोभना दन्ता यासां ताः सुदत्यः स्त्रियः अत्र विधानाभावाद्दत्रादेशश्चिन्त्य इति केचित् । "अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च" इति चकारात् सिद्धिरिति केचित् । सुदत्यादयः स्त्रीषु योगरूढा स्त्रियां संज्ञायाम् इति दत्रादेशात्साधव इत्यपरे । तथैतत्सर्वमभिसन्धाय आह वामनः ।

क्षणनीरवया यया निशि श्रितवप्रावलियोगपट्टया ।
मणिवेश्ममयं सुनिर्मलं किमपि ज्योतिरबाह्यमिज्यते ॥ ७८ ॥
विललास जलाशयोदरे क्वचन द्यौरनुबिम्बितेव या ।
परिघांकपटस्फुटस्फुरत्प्रतिबिम्बानवलंबिताम्बुनि ॥ ७९ ॥
व्रजते दिवि यद्गृहावलीचलचेलाञ्चलदण्डताडनाः ।
व्यतरन्नरुणाय विश्रमं सृजते हेळिहयालिकालनाम् ॥ ८० ॥

'मुदत्यादयः प्रतिविधेया' इति । ता एव जनाः लोकाः तेषां मज्जनादवगाहनादर्पितैः सङ्क्रमितैरपि घुसृणैः कुङ्कुमैः कषायिताशयां सुरभिताभ्यन्तरा भोगचिह्नैः कलुषितहृदया च । वाप्येव वापिका दीर्घिका ग्राहिला ग्रह आग्रहः तद्वती दीर्घरोषा । पिच्छादित्वादिलच् । मानिनी । "स्त्रीणामीर्ष्या कृतः कोपो मानो व्यासङ्गिनि प्रियः" इत्युक्तलक्षणो मानः । तद्वती नायिकेव अखिलया निशा निशया सर्वरात्रिप्रसादनेनेत्यर्थः । न प्रससाद प्रसन्नाशया नाभूत् तादृक्क्षोभादिति भावः ॥

क्षणेति ॥ निशि निशीथे क्षणं नीरवया एकत्र सुप्तजनत्वादपरत्र ध्यानस्तिमितत्वान्निःशङ्कया, श्रितः प्राप्तो वप्रावलिर्योगपट्ट इव, अन्यत्र वप्रावलिरिव योगपट्टो यया सा तथोक्ता, यया नगर्या मणिवेश्ममयं तद्रूपं निर्मलं अबाह्यमन्तर्वर्ति किमप्यवाङ्मनसगोचरं ज्योतिः प्रभा आत्मज्योतिश्च इज्यते सन्यते स्म । अत्र नगरीविशेषणसाम्यादप्रस्तुतयोगिनीप्रतीतेः समासोक्तिः ॥ ७८ ॥

विललासेति ॥ या नगरी परिघायाः कपटेन व्याजेन स्फुटं परितो व्यक्तं यथा तथा स्फुरता प्रतिबिम्बेनानवलम्बितं, मध्ये अगृह्यमाणं च अम्बु यस्मिन् तस्मिन् । प्रतिबिम्बाक्रान्तमम्बु परितः स्फुरति, प्रतिबिम्बदेशे तु न स्फुरति तेनैव प्रतिबिम्बादिति भावः । क्वचन कुत्रचिज्जलाशयोदरे ह्रदमध्ये कस्यचिज्ह्रदस्य मध्य इत्यर्थः । अनुबिम्बिता द्यौरमरावतीव विललासेत्युत्प्रेक्षा ॥ ७९ ॥

व्रजत इति ॥ यस्यां नगर्यां गृहावलीषु चलाश्चलन्तः चेलाञ्चलाः पताकाग्राणि त एव दण्डास्तैस्ताडनाः कशाघाता इत्यर्थः । ताः कर्त्र्यः दिवि

क्षितिगर्भधराम्बरालयैस्तलमध्योपरिपूरिणां पृथक् ।
जगतां खलु याखिलाद्भुताजनि सारैर्निजचिह्नधारिभिः ॥ ८१

दधदम्बुदनीलकण्ठतां वहदत्यच्छसुधोज्ज्वलं वपुः ।
कथमृच्छतु यत्र नाम न क्षितिभृन्मन्दिरमिन्दुमौलिताम् ॥

भजते खे गच्छते । हेलिहयालेः सूर्याश्वपङ्क्तेः । 'हेलिरालिङ्गने रवौ' इति वैजयन्ती । कालानाश्चोदनां सृजते कुर्वते । अरुणाय सूर्यसारथये विश्रमं स्वयं तत्कार्मकारणाद्विश्रान्तिम् । "नोदात्तोपदेश" इत्यादिना वृद्धिप्रतिषेधः । व्यतरन् ददुः । अत्र हेलिहयालेश्चेलाञ्चलदण्डताडनासम्बन्धेऽपि तत्सम्बन्धोक्तेः रतिशयोक्तिभेदः । तेन च गृहाणामर्कमण्डलपर्यन्तमौन्नत्यं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ८० ॥

क्षितीति ॥ तलमध्योरि अधोमध्योर्ध्वदेशान् पूरयन्तीति तत्पूरिणां जगतां पातालभूमिस्वर्गाणां पृथगसङ्कीर्णं यानि निजानि प्रतिनियतानि चिह्नानि निध्यन्नपानस्रक्चन्दनादिलिङ्गानि धारयन्तीति तद्धारिभिस्तथोक्तैः सारैरुत्कृष्टैः क्षितिगर्भे पाताले धरायां भूपृष्ठे अम्बरे आकाशे च ये आलया गृहास्तैः भूम्यन्तर्बहिःशिरोगृहैरित्यर्थः । या नगरी अखिला कृत्स्ना अद्भुता चित्रा अजनि जाता । "दीपजन" इत्यादिना जनेः कर्तरि लुङ् । चलेश्चिणादेशः । अत्र क्षितिगर्भादीनां तलमध्योपरिजगतां चिह्नानाञ्च यथासङ्ख्यसम्बन्धाद्यथासङ्ख्यालङ्कारः । तेन त्रैलोक्यवैभवं गम्यते ॥ ८१ ॥

दधदिति ॥ यत्र नगर्यामम्बुदैरम्बुदवन्नीलकण्ठः शिखरोपकण्ठः गलश्च यस्य तस्य भावस्तत्ताम् । 'कण्ठो गले सन्निधाने' इति विश्वः । दधत् अत्यच्छया सुधया लेपनद्रव्येण च सुधावदमृतवच्चोज्ज्वलं वपुः वहत् । 'सुधालेपोऽमृतं सुधा' इत्यमरः । क्षितिभृन्मन्दिरं राजभवनं इन्दुमौलितामिन्दुमण्डलपर्यन्तशिखरत्वम् । कथं नाम न ऋच्छतु गच्छत्वेवेत्यर्थः । राजभवनस्य तादृगौन्नत्यं

बहुरूपकसालभञ्जिकामुखचन्द्रेषु कलङ्करङ्कवः ।
यदनेकसौधकन्धराहरिभिः कुक्षिगतीकृता इव ॥ ८३ ॥

बलिसद्मदिवं स तथ्यवागुपरि स्माह दिवोऽपि नारदः ।
अधराथ कृता ययेव सा विपरीताजनि भूमिभूषया ॥ ८४ ॥

प्रतिहट्टपथे घरट्टजात्पथिकाह्वानदसक्तुसौरभे ।
कलहान्न घनाद्यदुत्थितादधुनाप्युज्झति घर्घरस्वनः ॥ ८५ ॥

युक्तमिति भावः । अन्यत्र इन्दुमौलित्वमीश्वरत्वञ्च तच्च नीलकण्ठस्य युक्तमिति भावः । अत्र विशेषणविशेष्याणां श्लिष्टानामभिधायाः प्रकृतार्थमात्रनियन्त्रणादप्रकृतेश्वरप्रतीतिर्ध्वनिरेव ॥ ८२ ॥

बह्विति ॥ बहुरूपका भूयिष्ठसौन्दर्याः शैषिकः कप्रत्ययः । तेषु सालभञ्जिकानां कृत्रिमपुत्रिकाणां मुखचन्द्रेषु कलङ्करङ्कवः चन्द्रत्वात् सम्भाविताः कलङ्कमृगास्ते यस्यां नगर्यां, अनेकेषां बहूनां सौधानां कन्धरासु कण्ठप्रदेशेषु ये हरयः सिंहास्तैः कुक्षिगतीकृता इव ग्रस्ताः किमित्युत्प्रेक्षा मुखचन्द्राणां निष्कलङ्कत्वनिमित्ता । अन्यथा कथं चन्द्रे निष्कलङ्कतेति भावः ॥ ८३ ॥

बलीति ॥ स प्रसिद्धस्तथ्यवाक् सत्यवचनो नारदः बलिसद्मदिवं पाताळस्वर्गं दिवो मेरुस्वर्गादप्युपर्युपरि स्थितामुत्कृष्टाञ्च स्माह उक्तवान् । अथेदानीं भूमिभूषया यया नगर्या । अधरा न्यूना अधस्ताच्च कृतेवेत्युत्प्रेक्षा । सा बलिसद्मद्यौः नारदोक्तिविपरीताजनि । सर्वोपरिस्थितायाः पुनरधस्थितिः वैपरीत्यम् ॥ ८४ ॥

प्रतीति ॥ पन्थानं गच्छन्तीति पथिकाः तेषामाह्वानं ददातीति तथोक्तं आह्वायकं अध्वानं गच्छतामाकर्षकमित्यर्थः । तत्सक्तूनां सौरभं सुगन्धो यस्मिन् प्रतिहट्टपथे प्रत्यापणपथम् । "अव्ययं विभक्ति" इत्यादिना वीप्सायामव्ययीभावः । "तृतीयासप्तम्योर्बहुलम्" इति सप्तम्या नं अम्भावः घरट्टः

वरणः कनकस्य मानिनीं दिवमङ्गादमराद्रिरागताम् ।
घनरत्नकवाटपक्षतिः परिरभ्यानुरसन्नुवास याम् ॥ ८६ ॥

अनलैः परिवेषमेत्य या ज्वलदर्कोपलवप्रजन्मभिः ।
उदयं लयमन्तरा रवेरवहद्बाणपुरीपरार्ध्यताम् ॥ ८७ ॥

गोधूमचूर्णप्रावाण तज्जात् यस्यां नगर्यां उत्थितात् कलहात् घर्घरस्वनो निःस्वनध्वनिः कण्ठध्वनिः घनान्मेघादधुनापि नोज्झति न त्यजति । सर्वदा सर्वगृहेषु घरट्ट मेघध्वान ध्वनन्तीति भावः। अत्र घनानां घरट्टकलहासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । तथा च तद्घर्घरस्वनस्य तद्धेतुकत्वोत्प्रेक्षा व्यञ्जका-प्रयोगाद्गम्या चेति सङ्करः ॥ ८५ ॥

वरण इति ॥ कनकस्य सम्बन्धी वरणः प्राकारः । 'प्राकारो वरण-स्सालः' इत्यमरः । तद्विकारः स एवामराद्रिः मेरुः, यां नगरीमेव मानिनीं कोपसम्पन्नामत एव अङ्कात्तिरोऽस्यङ्कादागतां भूलोकं प्राप्तां दिवममरावतीं घने निबिडे रत्नानां कवाटे रत्नमयकवाटे एव पक्षती पक्षमूले यस्य स सन् परि-रभ्योपगूह्य मेरोः पक्षवत्त्वात् पक्षान्तिरूपत्वमनुसरन् अनुवर्तमान उवास । कामिनः प्रणयकुपितां प्रेयसीं आप्रसादमनुगच्छन्तीति भावः । रूपकालङ्कारः स्फुटमेव । तेन चेयं नगरी कुतश्चित्कारणादागता द्यौरेव वरणः स्वर्णाद्रिरेवेत्यु-त्प्रेक्षा व्यज्यते ॥ ८६ ॥

अनलैरिति ॥ या नगरी रवेरुदयं लयमस्तमयश्चान्तरा, तयोर्मध्यकाल इत्यर्थः । "अन्तरान्तरेण युक्ते" इति द्वितीया । ज्वलतां अर्कांशुसम्पर्कात् प्रज्वलतामर्कोपलानां वप्रात् जन्म येषां तैः सूर्यकान्तैः प्राकारजन्यैरनलैः परिवेषमेत्य परिवेष्टनं प्राप्य बाणपुर्याः बाणासुरनगर्याः शोणितपुरस्य परार्ध्यतां श्रेष्ठतामवहत् । अत्रान्यधर्मस्यान्येन सम्बन्धासम्भावात् तादृशीं परार्ध्यतामिति सादृश्याक्षेपान्निदर्शनालङ्कारः ॥ ८७ ॥

बहुकम्बुमणिर्वराटिकागणनाटत्करकर्कटोत्करः ।
हिमवालुकयाच्छवालुकः पटु दध्वान यदापणार्णवः ॥ ८८ ॥

यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापथा ।
मुमुचे न पतिव्रतौचिती प्रतिचन्द्रोदयमभ्रगङ्गया ॥ ८९ ॥

बह्विति ॥ बहवः कम्बवः शङ्खाः मणयश्च यस्मिन् सः, वराटिकागणनाय कपर्दिकासङ्ख्यानाय अटन्तस्तिर्यक् प्रचरन्तः कराः पाणय एव कर्कटोत्कराः कुलीरसङ्घाः यस्मिन् सः हिमवालुकया कर्पूरेणाच्छवालुकः स्वच्छसिकतः यस्याः पुरः आपणो विपणिरेव अर्णवः पटु धीरं दध्वान ननाद । 'कपर्दो वराटिका' इति हलायुधः । 'शङ्खस्स्यात्कम्बुरस्त्रियाम्' इत्यमरः । 'सिताभ्रो हिमवालुका । स्यात् कुलीरः कर्कटः' इति चामरः ॥ ८८ ॥

यदिति ॥ यस्याः नगर्या अगारघटासु गृहसमूहेषु अट्टानां अट्टालकानां कुट्टिमेषु बद्धभूमिषु । 'कुट्टिमोऽस्त्री बद्धभूमिः' इति यादवः । स्रवद्भिः इन्दुसम्पर्कस्यन्दमानैरिन्दूपलैश्चन्द्रकान्तैर्हेतुभिः, तुन्दिलाः प्रवृद्धाः आपो यस्यास्तया 'तुन्दादिभ्य इलच्' । "ऋक्पूः" इत्यादिना समासान्तः । अभ्रगङ्गया मन्दाकिन्या । 'मन्दाकिनी वियद्गङ्गा' इत्यमरः । चन्द्रोदये चन्द्रोदये प्रतिचन्द्रोदयम् । वीप्सायामव्ययीभावः । पतिव्रतानामौचिती औचित्यम् । ब्राह्मणादित्वात् गुणवचनेत्यादिना ष्यञ्प्रत्ययः । "षिद्गौरादिभ्यश्च" इति ङीष् । स च "मातरिषच्च" इति षित्वादेव सिद्धे मातामहशब्दस्य गौरादिपाठेनानित्यत्वज्ञापनात् वैकल्पिकः । अत एव वामनः—"ष्यञः षित्कार्यं बहुलम्" इति स्त्रीनपुंसकयोर्भावक्रिययोष्ष्यञ् क्वचिच्च वुञ् । 'औचित्यमौचिती मैत्र्यं मैत्री वुञ् प्रागुदाहृतम्' इत्यमरश्च । न मुमुचे न तत्यजे । भर्तुः समुद्रस्य चन्द्रोदये वृद्धिदर्शनात्स्वस्यापि तथा वृद्धिरुचिता । "आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा । मृते म्रियेत या नारी सा स्त्री ज्ञेया पतिव्रता ॥" इति स्मरणादिति भावः । अभ्रगङ्गाया यदगारेत्यादिविशेषणार्थासम्बन्धेऽपि सम्बन्धोक्ते-

रुचयोऽस्तमितस्य भास्वतः स्खलिता यत्र निरालयाः खलु ।
अनुसायमभुर्विलेपनापणकाश्मीरजपण्यवीथयः ॥ ९० ॥

विततं वणिजापणेऽखिलं पणितुं यत्र जनेन वीक्ष्यते ।
मुनिनेव मृकण्डुसूनुना जगती वस्तु पुरोदरे हरेः ॥ ९१ ॥

सममेणमदैर्यदापणे तुलयन् सौरभलोभनिश्चलम् ।
पणिता न जनारवैरवैदपि कूजन्तमलिं मलीमसम् ॥ ९२ ॥

रतिशयोक्तिः । तथा च यदगाराणां अतीन्दुमण्डलमौन्नत्यं व्यज्यते । तदुत्थापिता चेयं अस्याः पातिव्रत्यधर्मापरित्यागोत्प्रेक्षेति सङ्करः । सा व्यञ्जकाप्रयोगाद्गम्या ॥ ८९ ॥

रुचय इति ॥ यत्र नगर्यां अनुसायम् । वीप्सायामव्ययीभावः । विलेपनापणेषु सुगन्धद्रव्यनिषद्यासु काश्मीरजानि कुङ्कुमान्येव पण्यानि द्रव्याणि तेषां वीथयः श्रेण्यः अस्तमितस्य अस्तङ्गतस्य भास्वतः सम्बन्धिन्यः स्खलिता अस्तमयक्षोभात् च्युताः अत एव निरालया निराश्रया रुचयः प्रभा अभुः खलु । कथञ्चित् प्रच्युताः सायन्तनार्कत्विष इव भान्ति स्मेत्यर्थः । कुङ्कुमराशीनां तदा तत्सावर्ण्यादियमुत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या । भातेर्लङ् । झेर्जुसादेशः ॥

विततमिति ॥ यत्र नगर्यां, वणिजा वणिग्जनेन पणितुं व्यवहर्तुं आपणे पण्यवीथ्यां, विततं प्रसारितं, अखिलं जगत्यां लोके स्थितं वस्तु पदार्थजातं, पुरा पूर्वं हरेः विष्णोरुदरे मृकण्डुसूनुना मुनिना मार्कण्डेयेनेव जनेन लोकेन वीक्ष्यते विष्णूदरमिव समस्तवस्त्वाकरोऽयमाभासत इत्यर्थः । पुरा किल मार्कण्डेयो हरेरुदरं प्रविश्य विश्वं तत्राद्राक्षीदिति कथयन्ति ॥ ९१ ॥

सममिति ॥ यस्या नगर्या, आपणे सौरभलोभनिश्चलं गन्धग्रहणनिष्पन्दं, ततः क्रियया दुर्बोधमित्यर्थः । मलीमसं मलिनं सर्वाङ्गनीलमित्यर्थः । अन्यथा पीतमध्यत्वाळेः पीतिम्नैव व्यवच्छेदादतोगुणतोऽपि दुर्ग्रहमित्यर्थः ।

रविकान्तमयेन सेतुना सकलाहज्वलनाहितोष्मणा ।
शिशिरे निशि गच्छतां पुरा चरणौ यत्र धुनोति नो हिमम् ॥

विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतलम् ।
शशिकान्तमयं तपागमे कलितीव्रस्तपति स्म नातपः ॥ ९४ ॥

"ज्योत्स्ना तमिस्रा" इत्यादिना निपातः । अलिं भृङ्गमेणमदैः समं कस्तूरीभिः सह तुलयन् पणिता कृता, कूजन्तमपि जनारवैः कलकलैः नावैत्ततोऽपि नाजानादित्यर्थः । इह निश्चलस्यालेः गुञ्जनं कविना प्रौढवादेनोक्तमित्यनुसन्धेयम् । अत्रालेः नैत्यादेणमदोक्तेः सामान्यालङ्कारः । "समान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता" इति लक्षणात् । तेन भ्रान्तिमदलङ्कारो व्यज्यते ॥ ९२ ॥

रवीति ॥ यत्र नगर्यां, सकलं कृत्स्नमहः । "राजाहस्सखिभ्यष्टच्" । "रात्राह्नाहाः पुंसि" इति पुंलिङ्गता अत्यन्तसंयोगे द्वितीया । योगविभागात्समासः । ज्वलनेन तपनकराभिघातात् प्रज्वलनेनाहितोष्मणा जनितौष्ण्येन रविकान्तमयेन सेतुना सेतुसदृशेन सूर्यकान्तकुट्टिमाध्वनेत्यर्थः । गच्छतां सञ्चरमाणानां चरणौ चरणानीत्यर्थः । स्तनादीनां द्वित्वविशिष्टाजातिः । प्राणिणीति जातौ द्विवचनम् । शिशिरे शिशिरर्तौ । तत्रापि निशि हिमं पुरा नो धुनोति नापीडयत् । यावत्पुरा निपातयोर्लट् । अत्र सेतोरुष्णासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । तत्रोत्तरस्याः पूर्वापेक्षत्वात्सङ्करः ॥ ९३ ॥

विध्विति ॥ विधुदीधितिजेन इन्दुसम्पर्कजन्येन, पयसा सलिलेन नैषधस्य नलस्य, शीलं वृत्तं स्वभावो वा तद्वच्छीतं शशिकान्तमयं यत्पथं यस्याः नगर्याः पन्थानं, तपागमे ग्रीष्मप्रवेशे, कलितीव्रः कलिकालवत् प्रचण्ड आतपो न तपति स्म । नलकथायाः कलिनाशकत्वमिति भावः । अत्र नगरपथस्येन्दुमलपयस्सम्बन्धोक्तेरतिशयोक्तिः । तत्सापेक्षत्वादुपमयोस्सङ्करः ॥ ९४ ॥

परिघावलयच्छलेन या न परेषां ग्रहणस्य गोचरा।
फणिभाषितभाष्यफक्किका विषमा कुण्डलनामवापिता ॥९५॥
मुखपाणिपदाक्ष्णि पङ्कजैरचिताङ्गेष्वपरेषु चम्पकैः।
स्वयमादित यत्र भीमजा स्मरपूजाकुसुमस्रजः श्रियम् ॥ ९६ ॥
जघनस्तनभारगौरवाद्वियदालम्ब्य विहर्तुमक्षमाः।
ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः ॥ ९७ ॥

परिघेति ॥ परिघावलयच्छलेन परिघावेष्टनव्याजेन, कुण्डलनां मण्डलाकाररेखामवापिता परेषां शत्रूणां ग्रहणस्याक्रमणस्य, अन्यत्रान्येषां ग्रहणस्य ज्ञानस्य न गोचरा अविषया या नगरी विषमा दुर्बोधा फणिभाषितभाष्यफक्किका पतञ्जलिप्रणीतमहाभाष्यस्थकुण्डलिग्रन्थः, नूनमिति शेषः। अत्र नगर्याः कुण्डलिग्रन्थत्वेनोत्प्रेक्षा। सा च परिघावलयच्छलेनेत्यपह्नवोत्थापितत्वात्सापह्नवा व्यञ्जकाप्रयोगाद्गम्या ॥ ९५ ॥

मुखेति ॥ यत्र नगर्यां, मुखञ्च, पाणी च, पदे च, अक्षिणी च तस्मिन्। प्राण्यङ्गत्वादेकवद्भावः। पङ्कजैः रचिता सृष्टा अपरेषु मुखादिव्यतिरिक्तेषु अङ्गेषु चम्पकैश्चम्पकपुष्पैः, रचिता सर्वत्र सादृश्याद्व्यपदेशः, भीमजा भैमी, स्वयं स्मरपूजा कुसुमस्रजः श्रियं शोभामादित प्राप्तवती। ददातेर्लुङ्। "स्थाघ्वोरिच्च" इतीत्वम्, "ह्रस्वादङ्गात्" इति सलोपः। अत्रान्यश्रियोऽन्यत्रासम्भवात् श्रियमिव श्रियमिति सादृश्यापेक्षान्निदर्शनाभेदः। तथा तदङ्गानां पङ्कजाद्यभेदोक्तेरतिशयोक्तिः। तदुत्थापिता निदर्शनेति सङ्करः ॥ ९६ ॥

जघनेति ॥ जघनानि स्तनाश्च जघनस्तनम्। प्राण्यङ्गत्वादेकवद्भावः। तदेव भारः तस्य गौरवाद्गुरुत्वात् वियदालम्ब्य विहर्तुमक्षमाः शतं शतसङ्ख्यकाः 'विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः' इत्यमरः। अप्सरसोऽवतीर्य स्वर्गादागत्य तत्सखीजनः सख्यः। जातावेकवचनम्। यां नगरीं, अध्यासत।

स्थितिशालिसमस्तवर्णतां न कथं चित्रमयी बिभर्तु या ।
स्वरभेदमुपैतु या कथं कलितानल्पमुखारवा न वा ॥ ९८ ॥

स्वरुचारुणया पताकया दिनमर्केण समीयुषोत्तृषः ।
लिलिहुर्बहुधा सुधाकरं निशि माणिक्यमया यदालयाः ॥ ९९ ॥

"अधिशीङ्स्थासां कर्म" इति कर्मत्वम् । ध्रुवमित्युत्प्रेक्षा । अप्सरसः अप्सरः-कल्पाः शतं सख्य एनामुपासत इत्यर्थः ॥ ९७ ॥

स्थितीति ॥ चित्रमयी आश्चर्यप्रचुरा, आलेख्यमयी च । 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः । या स्थित्या मर्यादया स्थायित्वेन च शालन्ते ये ते समस्तावर्णाः ब्राह्मणादयः शुक्लादयश्च यस्यास्तस्याः भावः तत्ताम् । 'वर्णो द्विजादौ शुक्लादौ' इत्यमरः । कथं न बिभर्तु बिभर्त्येवेत्यर्थः । कलितः प्राप्तः अनल्पानां बहूनां मुखानां आरवो बहुमुखानां षण्मुखादीनाञ्च आरवः शब्दो यस्याः या पुरी, स्वरस्य ध्वनेर्भेदं नानात्वम् । स्वः स्वर्गादभेदञ्च कथं नोपैतु उपैत्येवेत्यर्थः । उभयत्रापि सति कारणे कार्यं भवेदिति भावः । अत्र केवल-प्रकृतश्लेषालङ्कारः । उभयोरप्यर्थयोः प्रकृतत्वात्, किं त्वेकनाले फलद्वयव-देकस्मिन्नेव शब्देऽर्थद्वयप्रतीतेरर्थश्लेषः प्रथमार्थे, द्वितीये तु, जतुकाष्ठवदेकवद्भूत-शब्दद्वयार्थद्वयप्रतीतेः शब्दश्लेषः ॥ ९८ ॥

स्वरुचेति ॥ माणिक्यमयाः पद्मरागमयाः, यदालयाः यस्याः नगर्याः गृहाः दिनं दिने । अत्यन्तसंयोगे द्वितीया । समीयुषा सङ्गतेन अर्केण हेतुना उत्तृषः अर्कसम्पर्कादुत्पन्नपिपासाः सन्तः । स्वरुचा स्वप्रभया, अरुणया आरुण्यं प्राप्तयेति तद्गुणालङ्कारः । "तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः" इति लक्षणात् । पताकया रसनायमानयेति भावः । सुधाकरं, बहुधा लिलिहुः आस्वादयामासुरित्यर्थः । अह्नि सन्तप्ता निशि शीतोपचारं कुर्वन्तीति भावः । अत्र गृहाणां सन्तापनिमित्तः सुधाकरलेहनात्मा शीतोपचारः उत्प्रेक्ष्यते । सा चोक्ततद्गुणोत्थेति सङ्करः । व्यञ्जकाप्रयोगाद्गम्या ॥ ९९ ॥

लिलिहे स्वरुचा पताकया निशि जिह्वानिभया निशाकरम् ।
श्रितमर्ककरैः पिपासु यन्नृपसद्मामलपद्मरागजम् ॥ १०० ॥

अमृतद्युतिलक्ष्म पीतया मिलितं यद्वलभीपताकया ।
वलयायितशेषशायिनस्सखितामादित पीतवाससः ॥ १०१ ॥

अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा-
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना ।
पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥ १०२ ॥

अथानयैव भङ्गया राजभवनं वर्णयति—**लिलिहे इति** ॥ अमलपद्मरागजं, यस्यां नगर्यां, नृपसद्म राजभवनं, अर्ककरैः श्रितं अतिसामीप्यादभिव्याप्तम् । श्रयतेः कर्मणि क्तः । 'श्रिणातेः पक्वार्थात्' इति केचित् । तदा ह्रस्वः चिन्त्यः, प्रकृत्यन्तरं मृग्यमित्यास्तां तत् । अत एव पिपासु तृषितं सत् । पिबतेः सन्नन्तादुप्रत्ययः । स्वकीया रुग्यस्यां तया स्वरुचा तद्रूपितयेत्यर्थः । अत एव जिह्वानिभया पताकया सुधाकरं लिलिहे आस्वादयामास । लिहेः कर्तरि लिट् । स्वरितत्वादात्मनेपदं, अलङ्कारश्च पूर्ववत् । जिह्वानिभयेत्युपमासङ्करश्च विशेषः ॥ १०० ॥

अमृतेति ॥ पीतया पीतवर्णया, यस्या नगर्याः, वलभ्याम् । 'कूटागारन्तु वलभिः' इत्यमरः । पताकया मिलितं सामीप्यात् सङ्गतं अमृतद्युतिलक्ष्म चन्द्रलाञ्छनं वलयायिते वलयीभूते शेषे शेत इति तच्छायिनः पीतवाससः पीताम्बरस्य विष्णोः, सखितां सदृशतामादित अग्रहीदित्युपमालङ्कारः ॥ १०१ ॥

अश्रान्तेति ॥ यस्या नगर्याः, प्रासादे दुकूलं वल्लिरिव दुकूलवल्लिः दुकूलमयी पताकेत्यर्थः । अश्रान्तेन श्रुतिपाठेन नित्यवेदपाठेन, पूताभ्यः पवित्राभ्यः, रसनाभ्यो जिह्वाभ्यः, आविर्भूतेषु भूरिस्तवेषु अनेकस्तोत्रेषु अजिह्मेन

यदतिविमलनीलवेश्मरश्मिभ्रमरितभा[illegible] ।
अलभत शमनस्वसुः शिशुत्वं दिवसकराङ्कतले चला लुठन्ती ॥

स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं
पाथोदं निजकेळिसौधशिखरादारुह्य यत्कामिनी ।

अकुण्ठेन ब्रह्मणो मुखानामोघेन हेतुना । विघ्निता सञ्जातविघ्ना नवस्वर्गक्रिया नूतनस्वर्गसृष्टिरेव केलिर्लीला यस्य तेन गाधिसुतेन विश्वामित्रेण, पूर्वं ब्रह्मप्रार्थनात् पूर्वं सामिघटिता अर्धसृष्टा । 'सामि त्वर्धे जुगुप्सन' इत्यमरः । मुक्ता पश्चात्त्यक्ता मन्दाकिनी नु आकाशगङ्गा किम्, अनिलस्य कर्तुरान्दोलनैः खेलनैर्दिवि आकाशे अखेलत् विजहारेत्युत्प्रेक्षा । एषा कथा त्रिशङ्कूपाख्याने द्रष्टव्या । शार्दूलविक्रीडितवृत्तम् । "सूर्याश्वैर्मसजास्ततास्सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात् ॥ १०२ ॥

यदिति ॥ यस्या नगर्याः, अतिविमलैर्नीलवेश्मनः इन्द्रनीलनिकेतनस्य रश्मिभिः भ्रमरिता भ्रमरीकृता भ्रमरशब्दात्तत्करोतीति ण्यन्तात्कर्मणि क्तः । वल्यां च भ्रमरैर्भाव्यमिति भावः । तथाभूता भाश्छाया यस्यास्सा श्यामीकृतप्रभेत्यर्थः । अत एव तद्गुणालङ्कारः । शुचिः स्वभावतः शुभ्रा सौधस्य वस्त्रमेव वल्लिः वस्त्रवल्लिः, पताकेत्यर्थः । रूपकसमासः । भ्रमरितभा इति रूपकादेव साधर्म्यात् दिवसकरस्य सूर्यस्य अङ्कतले समीपदेशे उत्सङ्गदेशे च चला चपला लुठन्ती परिवर्तमाना सती शमनस्वसुर्यमुनायाः शिशुत्वं शैशवमलभत । बालयमुनेव बभावित्यर्थः । बालिकाश्च पितुरङ्के लुठन्तीति भावः । अत्रान्यशैशवेनान्यसम्बन्धासम्भवेऽपि तत्सदृशमिति सादृश्याक्षेपान्निदर्शना । पूर्वोक्ततद्गुणरूपकाभ्यां सङ्कीर्णा ॥ १०३ ॥

स्वेति ॥ यत्कामिनी यन्नगराङ्गना, विमानेन कलितं कान्तं व्योम याभिस्तास्साक्षादप्सरसो दिव्याङ्गनैवाभवत् । "स्त्रियां बहुष्वप्सरसः" इत्यभिधानादेकत्वेऽपि बहुवचनप्रयोगः । कुतः यद्यस्मान्निजकेलिसौधशिखरादपादानात्

[illegible]

[illegible] निमेष[illegible] ॥

वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशु[illegible]-

ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः ।

कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशं गताग्रै-

र्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ॥

विधुकरपरिरम्भादात्तनिष्यन्दपूर्णै-

श्शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम् ।

विफलितजलसेकप्रक्रियागौरवेण

व्यरचि स हृतचित्तस्तत्र भैमीवनेन ॥ १०६ ॥

स्वप्राणेश्वरस्य नर्महर्म्ये क्रीडासौधं तस्य कटकान्नितम्बादातिथ्यस्य प्रहाग स्वीकाराय, तत्र विश्रमार्थमित्यर्थः । उत्सुकमुत्सुकं गच्छन्तमित्यर्थः । पाथोद मेघमारुह्य रसाद्रागाद्यान्ती गच्छन्ती । अध्वनि अभ्रतरसा मेघवेगेन हेतुना निमेषं न प्राप । अत्र नगरामराङ्गनयोर्भेदेऽपि अनिमेषमेघारोहणव्योमयानै रैक्यभेदोक्तेरतिशयोक्तिभेदः । शार्दूलविक्रीडितवृत्तम् ॥ १०४ ॥

वैदर्भीति ॥ उत्ताना वै देवगवा वहन्तीति श्रुत्यर्थमाश्रित्य आह— वैदर्भीकेलिशैले मरकतशिखरादुत्थितैः अथ ब्रह्माण्डाघातेन भग्नो स्यदजमदे वेगगर्वो येषां तत्तया ह्रिया धृतं अवाङ्मुखत्वं यैस्तैरधोमुखैः । अत एव दिव्युत्तानगाया ऊर्ध्वमुखाया इत्यर्थः । कस्याः सुरसुरभेर्देवगव्या आस्यदेश गताग्रैरंशुभिरेव दर्भैर्यस्या नगर्याः सम्बन्धिगोग्रासप्रदानव्रतसुकृतमविश्रान्त नोज्जृम्भते स्म । किंतु सर्वस्या अपि प्राप्तवानायत्तत् सुकृतमेवोज्जृम्भित मित्यर्थः । [illegible] केचित् । अंशुदर्भाणां ब्रह्माण्डाघाता सम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः । स्रग्धरा वृत्तम् । "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्" इति लक्षणात् ॥ १०५ ॥

विधुकरेति ॥ तत्र तस्यां नगर्यां, शशिदृषदुपक्लृप्तैश्चन्द्रकान्तशिला

अथ कनकपतत्रस्तत्र तां राजपुत्रीं
सदसि सदृशभासां विस्फुरन्तीं सखीनाम् ।
उडुपरिषदि मध्यस्थायिशीतांशुलेखा-
नुकरणपटुलक्ष्मीमक्षिलक्षीचकार ॥ १०७ ॥

भ्रमणरयविकीर्णस्वर्णभासा खगेन
क्वचन पतनयोग्यं देशमन्विष्यताधः ।
मुखविधुमदसीयं सेवितुं लम्बमान-
श्शशिपरिधिरिवोर्ध्वैर्मण्डलस्तेन तेने ॥ १०८ ॥

अद्भिरत एव विधुकरपरिरम्भाच्चन्द्रकिरणसम्पर्काद्धेतोरात्तनिष्यन्दैः जलप्रस्रवणैरेव पूर्णैस्तरूणामालवालैर्विफलितं व्यर्थीकृतं जलसेकस्य प्रक्रियायां प्रकारे गौरवं भारो यस्य तेन भैमीवनन स हंसो हृतचित्तो व्यरचि । कर्मणि लुङ् । अत्राल-वालानां चन्द्रकान्तनिष्यन्दासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः । [illegible] रभ्य चतुःश्लोकपर्यन्तं मालिनीवृत्तम् । "ननमयययुतेयं मालिनी भोगिलोकैः" इति लक्षणात् ॥ १०६ ॥

अथेति ॥ अथ दर्शनानन्तरं कनकपतत्रः स्वर्णपक्षी, तत्र वने सदृश-भासां आत्मतुल्यलावण्यानां सखीनां सदसि विस्फुरन्तीम् । "स्फुरतिस्फुलत्योः परिनिविभ्यश्च" इति षत्वम् । उडुपरिषदि तारकासमाजे मध्यस्थायिन्याः शीतांशुलेखायाश्चन्द्रकलायाः अनुकरणे पटुः, समर्था लक्ष्मीः शोभा यस्याः सा इत्युपमालङ्कारः । तां राजपुत्रीं अक्षिलक्षीचकार अद्राक्षीदित्यर्थः ॥ १०७ ॥

भ्रमणेति ॥ अधो भूतले क्वचन कुत्रचित् पतनयोग्यं देशं [illegible] अन्विष्यता गवेषमाणेन । अत एव भ्रमणरयेण विकीर्णा स्वर्णस्य भा [illegible] तेन खगेन, अमुष्या अयमदसीयम् । "[illegible]" इति वृद्ध-संज्ञा । मुखविधुं मुखेन्दुं सेवितुं लम्बमानः स्रंसमानः शशिपरिधिः चन्द्रपरिवेष इव, ऊर्ध्वैरुपरि मण्डलो वलयस्तेने वितेने । तनोतेः कर्मणि लिट् । उत्प्रेक्षा-[illegible]ल्योः सङ्करः ॥ १०८ ॥

अनुभवति शचीत्थं सा घृताचीमुखाभि-
र्न सह सहचरीभिर्नन्दनानन्दमुच्चैः ।
इति मतिरुदयासीत्पक्षिणः प्रेक्ष्य भैमीं
विपिनभुवि सखीभिस्सार्धमाबद्धखेलाम् ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरस्सुतं
श्रीहीरस्सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥

अनुभवतीति ॥ विपिनभुवि वनप्रदेशे, सखीभिः सहचरीभिः, "सख्यशिश्वीति भाषायाम्" इति निपातनात् ङीप् । सार्धं आबद्धखेलां अनुबद्धक्रीडाम् । 'क्रीडा खेला च कूर्दनम्' इत्यमरः । भैमीं प्रेक्ष्य पक्षिणः, सा प्रसिद्धा शची इन्द्राणी, घृताचीमुखाभिः सहचरीभिः, सह इत्थमुच्चैरुत्कृष्टं नन्दनानन्दं नन्दनसुखं नानुभवतीति मतिः बुद्धिरुदयासीदुत्थिता । अत्र प्रेक्ष्य मतिरिति मननक्रियापेक्षया समानकर्तृकत्वात् पूर्वकालत्वाच्च प्रेक्ष्येति क्त्वानिर्देशोपपत्तिः । तावन्मात्रस्यैव तत्प्रत्ययोत्पत्तौ प्रयोजकत्वात् प्राधान्यं त्वप्रयोजकमिति न कश्चिद्विरोधः । अत्रोपमानादुपमेयस्याधिक्योक्तेर्व्यतिरेकालङ्कारः । "भेदप्रधानसाधर्म्यमुपमानोपमेययोः । आधिक्यादल्पकथनाद्व्यतिरेकस्स उच्यते" इति लक्षणात् ॥ १०९ ॥

श्रीहर्षमित्यादि व्याख्यातम् । द्वितीय एव द्वैतीयीकः । द्वितीयादीकक् स्वार्थे वा वक्तव्य इतीकक् । द्वैतीयीकतया मितो द्वितीयत्वेन गणितः द्वितीय इत्यर्थः । अगमत् ॥ ११० ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्यायकोलचल-
मल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने
द्वितीयः सर्गः समाप्तः ।

तृतीयः सर्गः

आकुञ्चिताभ्यामथ पक्षतिभ्यां नभोविभागात्तरसाऽवतीर्य ।
निवेशदेशाततधूतपक्षः पपात भूमावुपभैमि हंसः ॥ १ ॥
आकस्मिकः पक्षपुटाहतायाः क्षितेस्तदा यस्स्वन उच्चचार ।
द्रागन्यविन्यस्तदृशस्स तस्यास्संभ्रान्तमन्तःकरणश्चकार ॥ २ ॥
नेत्राणि वैदर्भसुतासखीनां विमुक्ततत्तद्विषयग्रहाणि ।
प्रापुस्तमेकं निरुपाख्यरूपं ब्रह्मेव चेतांसि यतव्रतानाम् ॥ ३ ॥

आकुञ्चिताभ्यामिति ॥ अथ मण्डलीकरणानन्तरं, हंसः, आकुञ्चिताभ्यामावर्जिताभ्यां, पक्षतिभ्यां पक्षमूलाभ्यां, नभोविभागादाकाशदेशात्, तरसा वेगेन, अवतीर्य । निवेशदेशे उपवेशस्थाने, आततौ प्रसारितौ धूतौ कम्पितौ च पक्षौ येन सः तथाभूतस्सन्, उपभैमि भैम्याः समीपे । सामीप्येऽव्ययीभावः । नपुंसकत्वं ह्रस्वत्वञ्च । भूमौ पपात । स्वभावोक्तिरलङ्कारः ॥ १ ॥

आकस्मिक इति ॥ तदा पतनसमये, पक्षपुटाहतायाः क्षितेर्भूतलात्, अकस्माद्भव आकस्मिकः निर्हेतुकः अपरिदृष्टहेतुक इत्यर्थः । यः स्वनो ध्वनिः, द्राग्झटिति उच्चचार उत्थितः । सः स्वनः, अन्यविन्यस्तदृशः विषयान्तरनिष्ठदृष्टेस्तस्या भैम्याः, अन्तःकरणं सम्भ्रान्तं ससम्भ्रमञ्चकार । अकाण्डे असम्भावितशब्दश्रवणाच्चमत्कृतचित्ताभूदित्यर्थः । अत्रापि स्वभावोक्तिः ॥ २ ॥

नेत्राणीति ॥ विदर्भाणां राज्ञो वैदर्भस्य भीमस्य सुतायाः भैम्याः सखीनां नेत्राणि विमुक्तास्तत्तद्विषयग्रहास्तत्तदर्थग्रहणाणि । अन्यत्र तत्तद्विषया

हंसं तनौ सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम् ।
ग्रहीतुकामादरिणा शयेन यत्नादसौ निश्चलतां जगाहे ॥ ४ ॥
तामिङ्गितैरप्यनुमाय मायामयं न धैर्योद्वियदुत्पपात ।
तत्पाणिमात्मोपरिपातुकं तु मोघं वितेने प्लुतिलाघवेन ॥ ५ ॥
व्यर्थीकृतं पत्त्ररथेन तेन तथाऽवसाय व्यवसायमस्याः ।
परस्परामर्पितहस्तताळं तत्कालमाळीभिरहस्यतालम् ॥ ६ ॥

सन्ति यैस्तानि सन्ति । एकमेकचरमद्वितीयं नोपाख्यायत इति निरुपाख्यमवाच्यं रूपमाकारः स्वस्वरूपञ्च यस्य, तं पुरोवर्तिनं हंसं तत् पदार्थभूतञ्च । यतव्रतानां योगिनां चेतांसि ब्रह्म परमात्मानमिव प्रापुः अत्यादरेणाद्राक्षुरित्यर्थः ॥ ३ ॥

हंसमिति ॥ असौ दमयन्ती, मुनेर्योगिनो मनोवृत्तिरिव स्विकायां स्वकीयायाम् । "प्रत्ययस्थात्कात्पूर्वस्य" इतीकारः । तनौ शरीरान्तिके, अन्यत्र तदभ्यन्तरे, सन्निहितमासन्नमाविर्भूतञ्च । चरन्तं सञ्चरन्तं वर्तमानञ्च हंसं मराळं परमात्मानञ्च । 'हंसो विहगभेदे स्यात् परमात्मनि मत्सरे' इति विश्वः । अदरिणा निर्भीकेन शयेन पाणिना । 'दरोऽस्त्रियां भये श्वभ्रे ; पञ्चशाखः शयः पाणिः' इति चामरः । अन्यत्र आदरिणा आदरवता, आशयेन चित्तेन ग्रहीतुकामा साक्षात्कर्तुकामा च । यत्नान्निश्चलतां निश्चलाङ्गत्वं निश्चलचित्तत्वञ्च, जगाहे जगाम ॥ ४ ॥

तामिति ॥ अयं हंसः, तां पूर्वोक्तां मायां कपटं, इङ्गितैश्चेष्टाभिः अनुमाय निश्चित्यापि, धैर्यात् धैर्यं स्थैर्यमास्थाय । ल्यब्लोपे पञ्चमी । वियदाकाशं प्रति । नोत्पपात नोड्डिड्ये । आत्मन उपरि पातुकम्पतयालुम् । "लष-पत" इत्यादिना उकञ्प्रत्ययः । तस्याः पाणिं तु प्लुतिलाघवेन उत्पतनकौशलेन मोघं वितेने व्यधत्त । विफलयञ्च अकरोत् आशाञ्च जनयति न तु पाणौ लगतीत्यर्थः ॥ ५ ॥

व्यर्थीकृतमिति ॥ अस्या भैम्याः, व्यवसायं हंसग्रहणोद्योगं, तेन

उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः ।
यान्वेति मां द्रुह्यति मह्यमेव सात्रेत्युपालम्भि तयालिवर्गः ॥ ७ ॥

धृताल्पकोपा हसिते सखीनां छायेव भास्वन्तमभिप्रयातुः ।
श्यामाथ हंसस्य करानवाप्तेर्मन्दाक्षलक्ष्या लगति स्म पश्चात् ॥ ८ ॥

पत्त्ररथेन पक्षिणा व्यर्थीकृतं यथा तथा । अवसाय सम्यक् ज्ञात्वा, तत्कालं तस्मिन्काले । अत्यन्तसंयोगे द्वितीया । स एव कालो यस्य इति बहुव्रीहिणा क्रियाविशेषणं वा । परस्परां परस्परस्यामित्यर्थः । कर्मव्यतीहारे सर्वनाम्नो द्विर्भावः । "समासवच्च बहुलम्" इति बहुलग्रहणादसमासवद्भावे पूर्वपदस्य प्रथमैकवचने कस्कादित्वाद्विसर्जनीयस्य सत्वम् । उत्तरपदस्य यथा योगं द्वितीयैकवचनम् । "स्त्रीनपुंसकयोरुत्तरपदस्याम्भावो वक्तव्य" इति विकल्पादामादेशः । अर्पितहस्तताळं दत्तहस्तताडनं यथा तथा । आळीभिः सखीभिः, अलमहस्यत हसितम् । भावे लङ् ॥ ६ ॥

उच्चाटनीय इति ॥ हे सख्यः, इदानीं भवतीभिरेष हंसः, करतालिकानां दानादन्योन्यहस्तताडनकरणादुच्चाटनीयः निष्कासनीयः किमिति काकुः । नोच्चाटनीय एवेत्यर्थः । अत्र सखीसमूहे यामामन्वेति । सा मह्यमेव द्रुह्यति मां जिघांसतीत्यर्थः । "क्रुधद्रुह" इत्यादिना सम्प्रदानत्वाच्चतुर्थी । इतीत्थं तया भैम्या, आलिवर्गः सखीसङ्घः, उपालम्भि अशापि शापेनैव निवारित इत्यर्थः ॥ ७ ॥

धृतेति ॥ अथ सखीनिवारणानन्तरं, सखीनां हसिते हास्यनिमित्ते सति, धृताल्पकोपा । तास्वीषत्कुपितेत्यर्थः । भास्वन्तमभिप्रयातुः सूर्याभिमुखं गच्छतः छाया अनातपरेखेव । श्यामा यौवनमध्यस्था । 'श्यामा यौवनमध्यस्था' इत्युत्पलमालायाम् । अन्यत्र श्यामला । हंसस्य कर्मणि षष्ठी । करेण हस्तेन अनवाप्तेरग्रहणाद्धेतोर्यन्मन्दाक्षं ह्रीस्तेन लक्ष्या उपलक्ष्या ह्रीणा सतीत्यर्थः । अन्यत्र हंसस्य रवेः करानवाप्तेरंशुस्पर्शाभावान्मन्दाक्षैरपटुदृष्टिभिर्लक्ष्या ग्राह्या ।

शस्ता न हंसाभिमुखी तवेयं यात्रेति ताभिश्छलहास्यमाना ।
साह स्म नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः ॥ ९ ॥

हंसोऽप्यसौ हंसगतेस्सुदत्याः पुरःपुरश्चारु चरन् बभासे ।
वैलक्ष्यहेतोर्गतिमेतदीयामग्रेऽनुकृत्योपहसन्निवोच्चैः ॥ १० ॥

तैः छाया लक्ष्यते । न प्रकाश इति भावः । पश्चाद्गति स्म पृष्ठलग्नाभूत् । प्राप्त्याशया तमन्वगादेवेत्यर्थः । 'रविश्वेतच्छदौ हंसौ । बलिहस्तांशवः कराः' इति चामरः ॥ ८ ॥

शस्तेति ॥ तवेयं हंसस्य श्वेतच्छदस्य सूर्यस्य च, अभिमुखी यात्रागमन शस्ता प्रशस्ता श्रेयस्करी न । शास्त्रविरोधात् श्रमसन्तापरूपदृष्टदोषाच्चेति भावः । सा इतीत्थं ताभिः सखीभिः छलेन व्याजोक्त्या । हास्यमाना परिहास्यमाना सती भाविप्रियावेदकः मङ्गलमूर्तित्वादागामिशुभसूचकः एष हंसः, मे मम नाशकुनीभवेत् न दुःखशकुनीभवेदेव । किन्तु, सुशकुनमेव भवेदित्यर्थः । अपक्षी न भवेदिति च गम्यते । 'शकुनन्तु शुभा शंसा निमित्ते शकुनः पुमान्' इति विश्वः । अभूततद्भावे च्विः । प्रार्थनायां लिङ् । इत्याह स्म अवोचत् । "लट् स्म" इति भूतार्थे लट् । "ब्रुवः पञ्चानाम्" इत्याहादेशः । एतेन तदीययात्रानिषेधोक्तदोषः परिहृतो वेदितव्यः ॥ ९ ॥

एवं दमयन्तीव्यापारमुक्त्वा सम्प्रति हंसव्यापारमाह—**हंस इति** ॥ असौ हंसोऽपि हंसस्य गतिरिव गतिर्यस्यास्तस्याः सुदत्याः शोभनदन्तायाः भैम्याः सुदती व्याख्याता । पुरःपुरः । वीप्सायां द्विर्भावः । अग्रे समन्तादित्यर्थः । चारु चरन् रम्यं गच्छन्, वैलक्ष्यमेव हेतुः, तस्य वैलक्ष्यहेतोः । अयं मामपि विडम्बयतीति तस्या विस्मयजननार्थमित्यर्थः । 'विलक्षो विस्मयान्वितः' इत्यमरः । "षष्ठी हेतुप्रयोगे" इति षष्ठी । एतदीयां गतिमग्रेऽनुकृत्याभिनीयोच्चैरुपहसन्निवेत्युत्प्रेक्षा । बभासे बभौ । यथा लोके परिहासकास्तच्चेष्टाद्यनुकरणेन परान्विलक्षयन्ति तद्वदिति भावः ॥ १० ॥

पदे पदे भाविनि भाविनी तं यथा करप्राप्यमवैति नूनम् ।
तथा सखेलं चलता लतासु प्रतार्य तेनाचकृषे कृशाङ्गी ॥ ११ ॥

रुषा निषिद्धालिजनां यदैनां छायाद्वितीयां कलयाञ्चकार ।
तदा श्रमाम्भःकणभूषिताङ्गीं स कीरवन्मानुषवागवादीत् ॥ १२ ॥

अये कियद्यावदुपैषि दूरं व्यर्थं परिश्राम्यसि वा किमर्थम् ।
उदेति ते भीरपि किन्नु बाले विलोकयन्त्या न घना वनाली ॥

वृथार्पयन्तीमपथे पदं त्वां मरुल्ललत्पल्लवपाणिकम्पैः ।
आलीव पश्य प्रतिषेधतीयं कपोतहुङ्कारगिरा वनालिः ॥ १४ ॥

पदे पद इति ॥ भावयतीति भाविनी तद्ग्रहणमेव मनसा भावयन्ती कृशाङ्गी भैमी, भाविनि भविष्यति, अनन्तर इत्यर्थः । "भविष्यति गम्यादय" इति साधुः । पदे पदे तं हंसं यथा करप्राप्यं करग्राह्यम्, नूनं निश्चितं अवैति प्रत्येति, तथा सखेलं सलीलं, चलता गच्छता, तेन हंसेन प्रतार्य वञ्चयित्वा लतासु, आचकृषे आकृष्टा एकान्तं नीतेत्यर्थः ॥ ११ ॥

रुषेति ॥ यदा, रुषा निषिद्धालिजनां निवारितसखीजनां, एनां छायैव द्वितीया यस्यास्तामेकाकिनी, कलयाञ्चकार विवेद । तदा, श्रमाम्भःकणैः भूषिताङ्गीं खिन्नगात्रीं तां, स हंसः कीरवच्छुक इव मनुष्यस्येव वाग्यस्य स सन्नवादीत् ॥ १२ ॥

अये इति ॥ अये बाले, व्यर्थं कियद्दूर, यावदुपैषि उपैष्यसि । "यावत् पुरा निपातयोर्लट्" इति लट् । किमर्थं परिश्राम्यसि वा । घनाः सान्द्राः वनालीर्वनपङ्क्तीः [illegible]कयन्त्यास्ते भीरपि नोदेति किन्नु ॥ १३ ॥

वृथेति ॥ वृथा व्यर्थमेव । न पन्थाः अपथम् । "ऋक्पूः" इत्यादिना समासान्तोऽच् । "अपथं नपुंसकम्" इति नपुंसकत्वम् । तस्मिन्नपथे दुर्गम-

धार्यः कथंकारमहं भवत्या वियद्विहारी वसुधैकगत्या ।
अहो शिशुत्वं तव खण्डितं न स्मरस्य सख्या वयसाप्यनेन ॥१५॥

सहस्रपत्रासनपत्रहंसवंशस्य पत्राणि पतत्रिणः स्म ।
अस्मादृशां चाटुरसामृतानि स्वर्लोकलोकेतरदुर्लभानि ॥ १६ ॥

मार्गे अकृत्ये च, पद पादं व्यवसायश्च । अर्पयन्तीं कुर्वन्तीं त्वाम् । 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । मरुता ललन् चलन् पल्लव एव पाणिस्तस्य कम्पैः कपोतहुङ्कार एव गीः तया च । इयं वनालिः आलीव सखीव, प्रतिषेधति । पश्य । अस्य वाक्यार्थः कर्म । यथा लोके अमार्गप्रवृत्तं सुहृज्जनः पाणिना वाचा च वारयति तद्वदित्यर्थः । अत एव पल्लवपाणिरित्यादौ रूपकाश्रयणम् । तत्सङ्कीर्णा चेयमालीवेत्युपमा ॥ १४ ॥

धार्य इति ॥ एकत्रैव गतिर्यस्यास्तया एकगत्या वसुधायामेकगत्या, वसुधामात्रचारिण्येत्यर्थः । शिवभागवतवत्समासः । भवत्या वियद्विहारी खेचरोऽहम् । कथंकारं कथमित्यर्थः । "अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्" इति कथंशब्दोपपदात्करोतेर्णमुल्प्रत्ययः । धार्यः धर्तुं गृहीतुं शक्य इत्यर्थः । 'शकि लिङ् च' इति चकाराच्छक्यार्थे कृत्यप्रत्ययः । अनेन स्मरस्य सख्या सखिना तदुद्दीपकेन वयसा यौवनेन । सखिशब्दस्य भाषितपुंस्कत्वात् पुंवद्भावः । तव शिशुत्वं शैशवं, न खण्डितं न निवर्तितम् । अहो विरुद्धवयसोरेकत्र समावेशश्चाश्चर्यमित्यर्थः । अधार्यत्वस्य वसुधागतिवियद्विहारपदार्थहेतुकत्वादेकः, काव्यलिङ्गभेदः । तथा शैशवाखण्डनस्य पूर्ववाक्यार्थहेतुकत्वादपर इति सजातीयसङ्करः ॥

अथ प्रस्तुतोपयोगितया निजान्ववायं निवेदयति—**सहस्रेति** ॥ सहस्रपत्रासनस्य कमलासनस्य, पत्रहंसाः वाहनहंसास्तेषां वंशस्य कुलस्य, वेणोश्च, पत्राणि वाहनानि पर्णानि च । 'वंशो वेणौ कुले वर्गे । पत्रं स्याद्वाहने पर्णे' इति च विश्वः । पतत्रिणः स्म ब्रह्मवाहनहंसवंश्यवयमित्यर्थः । अस्मानिव

स्वर्गापगाहेममृणालिनीनां नालामृणालाग्रभुजो भजामः ।
अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते ॥ १७ ॥

धातुर्निदेशादिह नैषधीयं लीलासरस्सेवितुमागतेषु ।
हैमेषु हंसेष्वहमेक एव भ्रमामि भूलोकविलोकनोत्कः ॥ १८ ॥

पश्यन्ति तानित्यस्मादशस्तेषामस्मद्विधानाम् । "त्यदादिषु" इत्यादिना दृशेः क्विन्प्रत्ययः । वाक्षु सुभाषितेषु ये रसाः शृङ्गारादयः त एवामृतानि स्वर्लोके लोकाः जनाः । 'लोकस्तु भुवने जन' इत्यमरः । तेभ्यः इतरैर्मनुष्यैर्दुर्लभानि ॥

अथ स्वकायस्य कनकत्वे कारणमाह—**स्वर्गेति** ॥ स्वर्गापगा स्वर्णदी । तस्यां हेममृणालिन्यः कनककमलिन्यः, तासां या नालाः काण्डाः, यानि मृणालानि कन्दाश्च । अत्र मृणालिनीशब्दस्य । अथ शब्दानुशासनं केषां शब्दानामितिवत्समासे गुणभूतेन सम्बन्धः सोढव्यः । 'नाला नालम्' इत्यमरवचनात् स्त्रीलिङ्गनिर्देशः । न च, तत्रापि सन्देहः कार्यः । तद्व्याख्यानेषु देशान्तरकोशेषु च, सर्वत्र स्त्रीलिङ्गपाठस्यैव दर्शनात् । तथात्रैव प्रथमसर्गे प्रयुज्यते । मृदुत्वमप्रौढमृणालनालयेति । 'मृणालं स्याद्बिसः कन्द' इति हलायुधः । तेषामग्राणि भुञ्जत इति तद्भुजः, वयमिति शेषः । अन्नानुरूपा आहारसदृशीं तनोः शरीरस्य रूपऋद्धिं वर्णसमृद्धिम् । "ऋत्यक" इति प्रकृतिभावः । भजामः प्राप्ताः स्म इत्यर्थः । तथाहि—कार्यं जन्यद्रव्यम् । निदानादुपादानकारणात् । "आख्यातोपयोगे" इत्यपादानता । गुणान् रूपादिविशेषगुणान्, अधीते प्राप्नोतीत्यर्थः । प्राप्तिविशेषवाची इण्धातुः । प्रायेणाहारपरिणतिपूर्विकाः प्राणिनां कायकान्तय इति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ १७ ॥

आत्मनः क्ष्मालोकसञ्चारे कारणमाह—**धातुरिति** ॥ धातुः ब्रह्मणः, नियोगादादेशात्, इह भूलोके, नैषधीयं लीलासरः सेवितुं क्रीडासरसि विहर्तुमित्यर्थः । आगतेषु हैमेषु हेममयेषु, विकारार्थेऽण्प्रत्ययः । "नस्तद्धित" इति

विधेः कदाचिद्भ्रमणीविलासे श्रमातुरेभ्यस्स्वमहत्तरेभ्यः ।
स्कन्धस्य विश्रान्तिमदां तदादि श्राम्यामि नाविश्रमविश्वगोपि ॥

बन्धाय दिव्ये न तिरश्चि कश्चित्पाशादिरासादितपौरुषस्स्यात् ।
एकं विना मादृशि तं नरस्य स्वर्भोगभाग्यं विरळोदयस्य ॥ २०

टिलोपः । हंसेषु मध्ये अहमेक एव भूलोकविलोकने उत्कः उत्सुकस्सन् । 'दुर्मना विमना अन्तर्मनास्स्यादुत्क उन्मनाः' इत्यमरः । उत्क उन्मना इत्युच्छब्दात्कप्रत्ययान्तो निपातः । भ्रमामि पर्यटामि ॥ १८ ॥

अनवरतभ्रमणेऽपि श्रमजये कारणमाह—विधेरिति ॥ कदाचिद्विधेः ब्रह्मणः भ्रमणीविलासे भुवनभ्रमणविनोदे श्रमादातुरेभ्यः अवसन्नेभ्यः स्वमहत्तरेभ्यः स्वकुलवृद्धेभ्यः स्कन्धस्यांसस्य । 'स्कन्धो भुजशिरोंऽसो स्त्री' इत्यमरः । विश्रान्तिम् । अदां प्रादाम् । स्वयमेक एव वहामीत्यर्थः । ददातेर्लुङ् । "गाधिस्था" इत्यादिना सिचो लुक् । तदादि तत्प्रभृति, अविश्रममनवरतम् । "नोदात्तोपदेशस्य" इत्यादिना श्रमेर्धे वृद्धिप्रतिषेधः । विश्वगोपि विश्वं गच्छन्नपि । अतोऽन्यत्रापि दृश्यत इति गमेर्डप्रत्ययः । न श्राम्यामि न खिद्ये ॥

अथ व्याधादिबन्धभयमपि न मेऽस्तीत्याह—बन्धायेति ॥ मादृशि दिव्ये तिरश्चि विषये विरलोदयस्य दुर्लभजन्मनो नरस्य मर्त्यस्य प्रायेणैवंविधो नास्तीत्यर्थः । अन्यत्र, विरो विगतरेफः, स चासौ ळोदयो ळोदयवांश्च । मत्वर्थीयोकारः। तस्य रेफस्थानाविष्टळकारस्येत्यर्थः (नळस्येति भावः) शब्दधर्मोऽर्थे उपचर्यते। भुज्यत इति भोगः सुखं, स्वर्भोगस्य स्वर्गसुखस्य भाग्यम्, तत्प्रापकादृष्टमित्यर्थः। स्वप्राप्तेस्तत्प्रायत्वादिति भावः । तदेकं विना कश्चित्पाशादिः पाशाद्युपायः, बन्धाय बन्धनार्थं, आसादितपौरुषः प्राप्तव्यापारः न स्यात् । स्वर्भोगभाग्यैकसुलभा वयं नोपायान्तरसाध्या इति भावः । अस्मत्संसर्गादन्यः को नाम स्वर्गपदार्थ इति भावः ॥ २० ॥

इष्टेन पूर्तेन नलस्य वश्यास्स्वर्भोगमत्रापि सृजन्त्यमर्त्याः ।
महीरुहो दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति ॥ २१ ॥

सुवर्णशैलादवतीर्य तूर्णं स्वर्वाहिनीवारिकणावकीर्णैः ।
तं वीजयामस्स्मरकेळिकाले पक्षैर्नृपं चामरबद्धसख्यैः ॥ २२ ॥

क्रियेत चेत्साधुविभक्तिचिन्ता व्यक्तिस्तदा सा प्रथमाभिधेया ।
या स्वौजसां साधयितुं विलासैस्तावत्क्षमानामपदं बहु स्यात् ॥

तत्र भाग्यं नलस्यैवास्तीत्याह — **इष्टेनेति** ॥ इष्टेन यागेन पूर्तेन खातादिकर्मणा । 'त्रिष्वथ क्रतुकर्मेष्टं पूर्तं खातादि कर्म यत्' इत्यमरः । वश्याः वश्यगताः वशगत इति प्राग्दीव्यतीयो यप्रत्ययः । अमर्त्याः देवाः, नलस्यात्रापि भूलोकेऽपि स्वर्भोगं सृजन्ति स्वर्गसुखं सम्पादयन्तीत्यर्थः । ननु देवाश्च कथं कालान्तरभोग्यं स्वर्गसुखमिहेदानीं सृजन्तीत्याशङ्क्यां दृष्टान्तेन परावष्टे । महीरुहो वृक्षाः दोहदस्याकालप्रसवोत्पादकस्य द्रव्यस्य, सेकस्य जलसेचनस्य शक्तेः सामर्थ्यात् । 'तरुगुल्मलतादीनामकाले कुशलैः कृतम् । पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रिया" इति शब्दार्णवे । समानकालावाद्यन्तावुत्पत्तिविनाशावस्येत्याकालिकः उत्पत्त्यनन्तरविनाशीत्यर्थः । "आकालिकडाद्यन्तवचने" इति समानकालशब्दस्याकालशब्दादेशे ठञ्प्रत्ययान्तो निपातः । प्रकृतेस्त्वकालभवं कोरकमुद्गिरन्तीत्यर्थः । दोहदवशा वृक्षा इव देवा उत्कटपुण्यवशाददेशकालेऽपि फलं प्रयच्छन्तीत्यर्थः । दृष्टान्तालङ्कारः ॥ २१ ॥

स्वर्भोगमेवाह—**सुवर्णेति** ॥ सुवर्णशैलात् मेरोः तूर्णमवतीर्य स्वर्वाहिनीवारिकणावकीर्णैः मन्दाकिनीजलबिन्दुसंपृक्तैः, चामरेषु बद्धसख्यैः, तत्सदृशैरित्यर्थः । पक्षैः पतत्रैः स्मरकेलिकाले तं नृपं वीजयामः । तादृक् पक्षवीजनैः सुरतश्रान्तिमपनुदाम इत्यर्थः ॥ २२ ॥

क्रियेतेति ॥ साधुविभक्तिचिन्ता सुजनविभागविचारः, क्रियेत चेत् ।

राजा स यज्वा विबुधव्रजत्रा कृत्वाध्वरराज्योपमयेव राज्यम् ।
भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः पूर्वं त्वहो शेषमशेषमन्त्यम् ॥ २४ ॥
दारिद्र्यदारिद्रविणौघवर्षैरमोघमेघव्रतमर्थिसार्थे ।
सन्तुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम् ॥ २५

तदा, सा नलाभिधाना व्यक्तिः मूर्तिः, प्रथमाभिधेया प्रथम परिगणनीया । कुतः, या व्यक्तिः, स्वौजसां स्वतेजसां विलासैः व्याप्तिभिः, तावद्बहु तथा प्रभूतम् । नास्ति नाम नतिर्यस्येत्यनाम अनम्र पदं परराष्ट्रं, साधयितुं स्वाधत्तीकर्तुं क्षमा शक्ता स्यात् । अन्यत्र, साधु सम्यक् विभक्तिचिन्ता सप्तविभक्तिविचारः, क्रियेत चेत् । प्रथमा व्यक्तिः प्रथमा विभक्तिः, अभिधेया विचार्या, या स्वौजसाम् सु, औ, जस् इत्येषां प्रत्ययानां, विलासैः विन्यासैः, तावद्बहु अनेकं, नामपदं सुबन्तपदं, वृक्ष इत्यादिकं, साधयितुं निष्पादयितुं, क्षमा । अत्राभिधायाः प्रकृतार्थमात्र-नियन्त्रितत्वाल्लक्षणयाश्चानुपपत्त्यभावादप्रकृतार्थप्रतीतेर्ध्वनिरेव ॥ २३ ॥

राजेति ॥ यज्वा विधिनेष्टवान । 'यज्वा तु विधिनेष्टवान्' इत्यमरः । सुयज्वोर्ङ्वनिप् । श्रिताः आश्रिताः, ये श्रोत्रियाः छान्दसाः, अधीतवेदा इत्यर्थः । 'श्रोत्रियश्छान्दसौ समौ' इत्यमरः । 'श्रोत्रियः छन्दोऽधीत' इति निपातः । त्सात्कृता दानेन तदधीना कृता श्रीसम्पद्येन सः, स राजा नलः, अध्वरेषु [illegible]षु, यद्राज्यं तदुपमया तत्सादृश्येनैव, तद्वदेवेत्यर्थः । राज्यम्, विबुधा देवाः विद्वांसश्च, तद्व्रजत्रा दानेन तत्सङ्घाधीनं कृत्वा, "तद्धितश्चासर्वविभक्तिः" इत्य-व्ययसंज्ञा । चकारात् "देये त्रा च" इति त्राप्रत्ययः । "त्रा च" इति चकारा-दितरत्र सातिप्रत्ययश्च । पूर्वं पूर्वनिर्दिष्टम् । अध्वरराज्यं शेषं हुतशेषं भुङ्क्ते । अन्त्यं पश्चान्निर्दिष्टं, राज्यम् अशेषं कृत्स्नं अखण्डं भुङ्क्ते । अहो । उपयुक्तादन्यः शेषः । तथा च, पूर्वस्य तथाभूतस्य शेषत्वम् । अन्त्यस्याशेषत्वञ्च कथं विरोधा-दित्याश्चर्यम् । अत एव विरोधाभासोऽलङ्कारः ॥ २४ ॥

दारिद्र्येति ॥ दारिद्र्यं दारयति निवर्तयतीति दारिद्र्यदारि, तच्च [illegible]द्रविणौघस्य धनराशेर्वर्षैः, अर्थिसार्थे [illegible] अमोघमेघव्रतं वर्षुकत्वलक्षणं यस्य



अस्मत्किल श्रोत्रसुधां विधाय रम्भा चिरं भामतुलां नलस्य ।
तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ॥ २६ ॥

स्वर्लोकमस्माभिरितः प्रयातैः केळीषु तद्गानगुणान्निपीय ।
हा हेति गायन् यदशोचि तेन नाम्नापि हाहा हरिगायनोऽभूत् ॥

तम् । सन्तुष्ट दानहृष्टम्, इष्टदेवं यज्ञाराधितसुरं लोकनाथं, तं नलं, के नाम इष्टार्नामितानि, न नाथन्ति न याचन्ते । सर्वेऽपि नाथन्त्येवेत्यर्थः । नाथते-र्याच्ञार्थस्य दुह्यादित्वाद्द्विकर्मकत्वम् ॥ २५ ॥

अस्मदिति ॥ सा प्रसिद्धा रम्भा, नलस्य, अतुलामनुपमां, भां कान्ति सौन्दर्य चिरं अस्मत् मत्तः श्रोत्रसुधां विधाय कर्णामृतं कृत्वा, रसादा-कर्ण्येत्यर्थः । तत्र तस्मिन्नले, अनुरक्ता सती, तं नलं, अनाप्याप्राप्य । आङ्पूर्वा-दाप्नोतेः क्त्वा ल्यपि नञ्समासः । अन्यथात्वसमासे ल्यबादेशो न स्यात् । तन्नामगन्धात् तस्य नलस्य नामाक्षरस्पर्शाद्धेतोः, नलकूबरं कुबेरात्मसम्भवं भेजे किल । तादृक् तस्य सौन्दर्यमित्यर्थः ॥ २६ ॥

स्वर्लोकमिति ॥ केळीषु विनोदगोष्ठीषु, तस्य नलस्य, कर्तुः ग गुणान्विशेषान्, निपीयास्वाद्य, इतोऽस्माल्लोकात्, स्वर्गलोकं प्रयातैरस्मा , हरिगायनः इन्द्रगायको गन्धर्वः । "ण्वुल् च" इति गायतेः शिल्पे ण्वुल्प्रत्ययः। गायन् यद्यस्मात् हा हेत्यशोचि शोचितः तेनैव कारणेन नाम्नापि हा हा अभूत् । न त्वालापाक्षरानुकारादिति भावः । 'हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसः' इत्यमरः । आलापाक्षरानुकारनिमित्तोऽयं हाहा-शब्द आकारान्तः । "पुंसि च" इति केचित् । अत एव 'हाहा खेदे, हूहू हर्षे, गन्धर्वेऽमू त्वनव्यय' इति विश्वः । 'अव्ययमेव' इति श्रीभोजराजः । अत्र शोकनिमित्तासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । तथा च गन्धर्वातिशायि गानमस्येति वस्तु व्यज्यते ॥ २७ ॥

शृण्वन् सदारस्तदुदारभावं हृष्यन्मुहुर्लोम पुलोमजायाः ।
पुण्येन नालोकत नाकपालः प्रमोदबाष्पावृतनेत्रमालः ॥ २८ ॥

सापीश्वरे शृण्वति तद्गुणौघान् प्रसह्य चेतो हरतोऽर्धशम्भुः ।
अभूदपर्णाङ्गुलिरुद्धकर्णा कदा न कण्डूयनकैतवेन ॥ २९ ॥

अलं सजन् धर्मविधौ विधाता रुणद्धि मौनस्य मिषेण वाणीम् ।
तत्कण्ठमालिङ्ग्य रसस्य तृप्तां न वेद तां वेदजडस्स वक्राम् ॥

शृण्वन्निति ॥ नाकपाल इन्द्रः, सदारः सवधूकः, तस्य नलस्य, उदारभावमौदार्यम्, शृण्वन् । अत एव, प्रमोदबाष्पैः आनन्दाश्रुभिः, आवृत-नेत्रमालः तिरोहितदृष्टिस्सन्, पुलोमजायाः शच्याः, मुहुः हृष्यत् नलानुरागा-दुल्लसत्, लोम रोमाञ्चम्, पुण्येन शचीभाग्येन, नालोकत नापश्यत् । अन्यथा, मानसव्यभिचारापवाददण्डश्चैव स्यादित्यर्थः ॥ २८ ॥

सेति ॥ ईश्वरे, प्रसह्य चेतो हरतः बलान्मनोहारिणः, तस्य नलस्य, गुणौघान् शृण्वति सति । सा प्रसिद्धा अर्धं शम्भोः अर्धशम्भुः, शम्भोरर्धाङ्ग-भूतेत्यर्थः । तथा चापसरणमशक्यमिति भावः । अपर्णा पार्वत्यपि, कदा कण्डूयनकैतवेन कण्डूयापनोदनव्याजेन, अङ्गुल्या रुद्धः पिहितः, कर्णो यया सा, नाभूत् सर्वदा अभूदेवेत्यर्थः । अन्यथा, चित्तचलनभयादिति भावः ॥ २९ ॥

अलमिति ॥ विधाता ब्रह्मा, अलमत्यन्तं, धर्मविधौ सुकृताचरणे सजन् धर्मासक्तस्सन्नित्यर्थः । वाणीं स्वभार्यां वाग्देवीं वर्णात्मिकाञ्च, मौनस्य वाग्यमनव्रतस्य, मिषेण रुणद्धि । नलकथाप्रसङ्गान्निरुन्धे तस्या उभय्या अपि तदासङ्गभयादिति भावः । किन्तु, वेदजडः छान्दसः, स विधाता, तामुभयी-मपि वाणीम् । तस्य नलस्य, कण्ठं ग्रीवामालिङ्ग्य गुणमाश्रित्य च, रसस्य तृप्तां तद्रागसन्तुष्टाम् । अन्यत्र शृङ्गारादिरसपुष्टां सम्बन्धसामान्ये षष्ठी । "पूरण-गुण" इत्यादिना षष्ठीसमासनिषेधादेव ज्ञापकादिति केचित् । वक्रां प्रतिकूल-

श्रियस्तदालिङ्गनभूर्न भूता व्रतक्षतिः कापि पतिव्रतायाः ।
समस्तभूतात्मतया न भूतं तद्भर्तुरीर्ष्याकलुषाऽणुनापि ॥ ३१ ॥

धिक् तं विधेः पाणिमजातलज्जं निर्माति यः पर्वणि पूर्णमिन्दुम् ।
मन्ये स विज्ञः स्मृततन्मुखश्रीः कृतार्धमौज्झद्धरमूर्ध्नि यस्तम् ॥

निलीयते ह्रीविधुरः स्वजैत्रं श्रुत्वा विधुस्तस्य मुखं मुखान्नः ।
सूरे समुद्रस्य कदापि पूरे कदाचिदभ्रभ्रमदभ्रगर्भे ॥ ३३ ॥

कारिणीं, वक्रोक्त्यलङ्कारयुक्ताश्च, न वेद न वेत्ति । "विदो लटो वा" इति णलादेशः । अशक्यरक्षाः श्रिय इति भावः । अत्र प्रस्तुतवाग्देवीवृत्तान्तवर्णनादप्रस्तुतवर्णात्मकवाणीवृत्तान्तप्रतीतेः प्रागुक्तरीत्या ध्वनिरेवेत्यनुसन्धेयम् ॥ ३० ॥

श्रिय इति ॥ पतिव्रतायाः श्रियः, तद्भर्तुर्विष्णोः समस्तभूतात्मतया सर्वभूतात्मकत्वेन, नलस्यापि विष्णुरूपत्वेनेत्यर्थः । तदालिङ्गनभूः नलाश्लेषभवा । कापि व्रतक्षतिः पातिव्रत्यभङ्गो न भूता नाभूत् । अत एव, तद्भर्तुर्विष्णोश्च ईर्ष्यया नलालिङ्गनभुवा अक्षमया, यत्कलुषं कालुष्यं मनःक्षोभः सुखादित्वेनास्य धर्मधर्मिवचनत्वात् । अत एव क्षीरस्वामी च—'शस्तश्चाथ त्रिषु द्रव्ये पापपुण्यसुखादि च' इत्यत्रादिशब्दाच्छ्रेयःकलुषशिवभद्रादीन् सजग्राह । तस्याणुना लेशेनापि, न भूतं नाभावि । नपुंसके भावे क्तः । अत्र शच्यादिन्वित्तचाञ्चल्योक्तेः नलसौन्दर्ये तात्पर्यात्रानौचित्यदोषः ॥ ३१ ॥

धिगिति ॥ तमजातलज्जं निस्त्रपं विधेः पाणिं धिक् । यः पाणिः स्मृततन्मुखश्रीरपि, पर्वणि । जातावेकवचनम् । पर्वस्वित्यर्थः । पूर्णमिन्दुं निर्माति । अद्यापीति भावः । स तु विज्ञः अभिज्ञ इति मन्ये । यः पाणिः, श्रिततन्मुखश्रीस्सन् तमिन्दुं कृतः अर्ध एकदेशो यस्य तं कृतार्धम्, अर्धनिर्मितमेव । हरमूर्ध्नि भवशिरसि । औज्झदत्यजत् । अतीन्दुसौन्दर्यमस्यास्यमिति भावः ॥ ३२ ॥

निलीयत इति ॥ विधुश्चन्द्रः, स्वजैत्रं स्वस्य जेतृ । प्रज्ञादित्वात्

संज्ञाप्य नस्स्वध्वजभृत्यवर्गान् दैत्यारिरत्यब्जनलास्यनुत्यै ।
तत्संकुचन्नाभिसरोजपीताद्धातुर्विलज्जं रमते रमायाम् ॥ ३४ ॥
रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दन्तमयीभिरन्तः ।
चतुर्दशाष्टादश वात्र विद्या द्वेधापि सन्तीति शशंस वेधाः ॥३५॥
श्रियौ नरेन्द्रस्य निरीक्ष्य तस्य स्मरामरेन्द्रावपि न स्मरामः ।
वासेन सम्यक् क्रमयोश्च तस्मिन् बुद्धौ न धर्मः खलु शेषबुद्धौ ॥

त्वार्थेऽप्पलयः । तस्य नलस्य मुखं, नोऽस्माकं मुखाच्छ्रुत्वा, ह्रीविधुरो लज्जाक्लिष्टस्सन् । सूरे सूर्ये, दर्शीभवति भावः । कदापि समुद्रस्य पूरे जलौघे, कदाचित् अभ्रे खे भ्रमतामटता, अभ्राणां मेघानां, गर्भे उदरे, निलीयते अन्तर्वर्तते । कदाचिद्... त्यात् नोत्सहत इत्यर्थः । अत्र विधोः स्वाभाविके सूर्यादिप्रवेशे पराजयक... ह्रीनिमित्तत्वोत्प्रेक्षा । व्यञ्जकाप्रयोगाद्गम्या ॥ ३३ ॥

संज्ञाप्येति ॥ दैत्यारिः विष्णुः, ...स्वध्वजस्य ...भृत्यवर्गान् नोऽस्मान् अतिक्रान्तमब्जमत्यब्जं, अब्जविजयीत्यर्थः । "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासः । ...स्य नलस्य आस्यस्य नुत्यै स्तोत्राय । 'नुतिः स्तोत्रं ...' इत्यमरः । संज्ञाप्य संकेत्य । तया नुत्या, संकुचता निमीलता, नाभिसरोजेन पीतात् तिरोहितात्, धातुः ब्रह्मणः, विलज्जं यथा तथा । रमायां रमते । अत्र विष्णोः ...व्यापारासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥

रेखाभिरिति ॥ अस्य नलस्य आस्ये, अन्तर्दन्तमयीभिः द्वात्रिंशता रेखाभिर्गणना... , चतुर्दश वाष्टादश वा विद्याः द्वेधाप्यत्रास्ये सन्ति । सम्भ...न्यायेनेति वेधाः शशंसेवेत्युत्प्रेक्षा । अत्र मनुः --"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥ आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यतः... । अर्थशास्त्रं परं तस्माद्विद्या ह्यष्टादश स्मृताः ॥" इति ॥ ३५ ॥

श्रियाविति ॥ तस्य नरेन्द्रस्य, श्रियौ सौन्दर्यसम्पदौ, निरीक्ष्य ।

विना पतत्रं विनतातनूजैस्समीरणैरीक्षणलक्षणीयैः ।
मनोभिरासीदनणुप्रमाणैर्न लङ्घिता दिक्कतमा तदश्वैः ॥ ३७ ॥

सङ्ग्रामभूमीषु भवत्यरीणामस्त्रैर्नदीमातृकतां गतासु ।
तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिस्सुभिक्षम् ॥ ३८ ॥

"शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरपि कथ्यत" इति शाश्वतः । स्मरामरेन्द्रावपि न स्मरामः । किञ्च, तस्मिन्नरेन्द्रे क्षमयोः क्षितिक्षान्त्योः । 'क्षितिक्षान्त्योः क्षमा' इत्यमरः । तत्र सम्यग्वासेन नियतस्थित्या, शेषबुद्धौ फणिपतिबुद्धदेवौ, बुद्धौ न धर्मः चित्ते न धारयामः* । अत्र द्वयोरपि श्रियोः द्वयोरपि क्षमयोः, प्रकृतत्वात् केवलप्रकृतश्लेषः । तेन सौन्दर्यादिगुणैः स्मरादिभ्योऽधिक इति व्यतिरेको व्यज्यते । श्लेषव्यतिरेकयोः सङ्करः ॥ ३६ ॥

विनेति ॥ पतत्रं विना, स्थितैरिति शेषः । विनतातनूजैः वैनतेयैः, अपक्षताक्ष्यैरित्यर्थः । ईक्षणलक्षणीयैः समीरणैश्चाक्षुषवायुभिः, अनणुप्रमाणैः अणुपरिमाण मन इति काणादाः तद्विपरीतैः महापरिमाणैर्मनोभिः वैनतेयादिसमानवेगैरित्यर्थः । एवंविधैस्तदश्वैः, कतमा दिक् न लङ्घितासीत् । सर्वापि विलङ्घितासीदित्यर्थः । अत्राश्वानां विशिष्टवैनतेयादित्वेन रूपणाद्रूपकालङ्कारः ॥

सङ्ग्रामेति ॥ अरीणामस्त्रैरसृग्भिः, नद्येव माता यासां तास्तत्ता नदीमातृकता, नद्यम्बुसम्पन्नसस्याढ्यता । 'देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः । स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्' इत्यमरः । "नद्यृतश्च" इति कप् । "त्वतलोर्गुणवचनस्य" इति पुंवद्भावः । तां गतासु सङ्ग्रामभूमीषु, तस्य नलस्य बाणधारा बाणपरम्परास्ता एव पवनाशनाः सर्पाः, तेषां, राजव्रजीयैः राजसङ्घसम्बन्धिभिः, "वृद्धाच्छः" । असुभिः प्राणवायुभिः, सुभिक्षं भिक्षाणां समृद्धि-

---

* धर्मः इति रूपं चिन्त्यम् ; अथवा कवयो निरङ्कुशाः । बुद्धौ न दध्म इत्यभियुक्ताः पठन्ति ।

यशो यदस्याजनि संयुगेषु कण्डूलभावं भजता भुजेन ।
हेतोर्गुणादेव दिगापगालीकूलंकषत्वव्यसनं तदीयम् ॥ ३९ ॥

यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारेपरार्धं गणितं यदि स्याद्गणेयनिःशेषगुणोऽपि स स्यात् ॥ ४० ॥

भवति । समृद्धावव्ययीभावः । नदीमातृकदेशेषु सुभिक्षं भवतीति भावः ।
रूपकालङ्कारः ॥ ३८ ॥

यश इति ॥ संयुगेषु युद्धेषु, कण्डूलभावं कण्डूतिमत्त्वं, "सिध्मादिभ्यश्च" इति मत्वर्थीयो लच् । भजता अस्य भुजेन यद्यशः अजनि जनितम् । जनेर्ण्यन्तात्कर्मणि लुङ् । तदीयं तस्य यशस्सम्बन्धि । दिश एव आपगाः नद्यः, तासामाल्यः, तासाम् कूलं कषतीति कूलंकषम् । शिवभागवतवत्समासः । "सर्वकूल" इत्यादिना खचि मुमागमः । तस्य भावस्तत्त्वम् । तत्र व्यसनमासक्तिः, हेतोः कारणस्य भुजस्य, गुणात्कण्डूलत्वादेव, आगतमिति शेषः । अत्र यशसो दिक्कूलकषणानुमितायाः कण्डूलतायाः तत्कारणकण्डूलभुजगुणपूर्वकत्वमुत्प्रेक्ष्यते ॥ ३९ ॥

यदीति ॥ किं बहुना, त्रयाणां लोकानां समाहारस्त्रिलोकी । कर्त्री । "तद्धितार्थ" इत्यादिना समाहारे द्विगुः । अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते । 'द्विगोः' इति ङीप् । गणनापरा नलगुणसङ्ख्यानतत्परा । स्याद्यदि तस्याः त्रिलोक्याः, आयुषस्समाप्तिर्न स्याद्यदि । अमरत्वं यदि स्यादित्यर्थः । परार्धस्य चरमसङ्ख्यायाः पारे पारेपरार्धम् । "पारे मध्ये षष्ठ्या वा" इत्यव्ययीभावः । गणितं स्याद्यदि । परार्धात् परतो यदि सङ्ख्या स्यादित्यर्थः । तदा स नलोऽपि गणेयाः गणयितुं शक्या निश्शेषास्सर्वे गुणा यस्य सः तादृशस्स्यात् । गणेरेय इत्यौणादिक एयप्रत्ययः । अत्र नलगुणानां गणेयत्वासम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिभेदः ॥ ४० ॥

अवारितद्वारतया तिरश्चामन्तःपुरे तस्य निविश्य राज्ञः ।
गतेषु रम्येष्वधिकं विशेषमध्यापयामः परमाणुमध्याः ॥ ४१ ॥

पीयूषधारानधराभिरन्तस्तासां रसोदन्वति मज्जयामः ।
रम्भादिसौभाग्यरहःकथाभिः काव्येन काव्यं सृजताहृताभिः ॥

काभिर्न तत्राभिनवस्मराज्ञाविश्वासनिक्षेपवणिक्क्रियेऽहम् ।
जिह्रेति यन्नैव कुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन ॥ ४३ ॥

एवं नलगुणाननुवर्ण्य गूढाभिसन्धिनात्मनस्तदन्तःपुरे परिचयं दर्शयति—**अवारितेत्यादि** ॥ तिरश्चां पक्षिणां, अवारितद्वारतया अप्रतिषिद्धप्रवेशतयेत्यर्थः । तस्य राज्ञो नलस्य, अन्तःपुरे निविश्य संस्थाय, परमाणुमध्या अतिसूक्ष्ममध्यास्तदङ्गनाः, रम्येषु गतेषु गतिषु, अधिकमपूर्वं, विशेषं भेदं, अध्यापयामः अभ्यासयामः । दुहादित्वाद्द्विकर्मकत्वम् ॥ ४१ ॥

पीयूषेति ॥ किञ्च, पीयूषधाराभ्यः अनधराभिरन्यूनाभिः, अमृतसमानाभिः, काव्यं सृजता स्वयं प्रबन्धकर्त्रा । कवेरपत्येन पुंसा । काव्येन शुक्रेण । 'शुक्रो दैत्यगुरुः काव्य' इत्यमरः । "कुर्वादिभ्यो ण्यः" इति ण्यप्रत्ययः । आहृताभिः तस्यापि विस्मयकरीभिरित्यर्थः । रम्भादीनां दिव्यस्त्रीणां सौभाग्यं पत्युर्लभ्यं, तत्प्रयुक्ताभिः रहःकथाभिः रहस्यवृत्तान्तवर्णनाभिः, तासां नलान्तःपुरस्त्रीणां, अन्तरन्तःकरणं, रसोदन्वति शृङ्गाररससागरे, मज्जयामः अवगाहयामः ॥ ४२ ॥

काभिरिति ॥ किञ्च, यद्यस्मात्, तिर्यक् पक्षी, कुतोऽपि जनात्, न जिह्रेति न लज्जत एव । 'ह्री लज्जायाम्' इति धातोर्लट् । "श्लौ" इति इति द्विर्भावः । तिरश्चोऽपि कश्चिज्जनो न त्रपते न लज्जते । तेन कारणेन, तत्रान्तःपुरे, काभिः स्त्रीभिः अहं अभिनवोऽपूर्वः स्मराज्ञा रतिरहस्यवृत्तान्तः, स एव विश्वासनिक्षेपः विश्वासेन गोप्यार्थः, तस्य वणिक् गोप्ता, न क्रिये न कृतोऽस्मि । सर्वासामप्यहमेव विस्रम्भकथापात्रमित्यर्थः ॥ ४३ ॥

वार्ता च साऽसत्यपि नान्यमेति योगादरन्ध्रे हृदि यां निरुन्धे ।
विरिञ्चिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः ॥ ४४ ॥
नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बतान्या ।
कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्याः ॥ ४५ ॥
तन्नैषधानूढतया दुरापं शर्म त्वयास्मत्कृतचाटुजन्म ।
रसालवन्या मधुपानुविद्धं सौभाग्यमप्राप्तवसन्तयेव ॥ ४६ ॥

अथ स्वस्यैवं विश्वास्यत्वे हेतुमाह—**वार्तेति** ॥ विरिञ्चब्रह्मणो नानाननैर्बहुमुखैः, वादेन व्याख्यानेन, धौतस्य शोधितस्य, समाधिशास्त्रस्य वाङ्नियमविद्यायाः, श्रुत्या श्रवणेन पूर्णकर्णः, चतुर्मुखादभ्यस्तवाङ्नियमविद्य इत्यर्थः । एवंभूतोऽहं, योगादुपायात्, यां वार्ताम्, अरन्ध्रे निरवकाशे, हृदि निरुन्धे नियच्छामि । अत एव सा वार्ता च लोकवार्ता च लोकवार्तापि । किमुत रहस्यवार्तेति भावः । असत्यपि विनोदार्थं कल्पितापि किमुत सतीति भावः । अन्यं नैति जनान्तरं न गच्छति, न कस्मैचित्कथ्यत इत्यर्थः । यथा वामती दुर्गे नीरन्ध्रस्थाने रुद्धा नान्यमेति तद्वदिति भावः । अतोऽहमासां विश्वास्य इति पूर्वेणान्वयः । अत्र वार्तानिरोधस्य विरिञ्चीत्यादिपदार्थहेतुकत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४४ ॥

अथ श्लोकद्वयेनास्या नलानुरागमुद्दीपयति—**नलेति** ॥ तवानवाप्यं नलपरिग्रहाभावात् त्वया दुरापम् । "कृत्यानां कर्तरि वा" इति षष्ठी तृतीयार्थे । त्रिदिवः स्वर्गः । पृषोदरादित्वात्साधुः । तस्योपभोगं तादृग्भोगमित्यर्थः । तस्येन्द्रसमैश्वर्यत्वादिति भावः । अम्बुजिन्या दुर्लभं इन्दुपरिग्रहाभावात् दुष्प्रापं ज्योत्स्नोत्सवं चन्द्रिकाभोगं, इन्दोः कर्तुः परिग्रहेण कुमुदान्यस्यां सन्तीति कुमुद्वतीव कुमुदिनीव । कुमुदनड्वेतसेभ्यो ड्मतुप् । "मादुपधायाश्च" इत्यादिना मकारस्य वकारः । नलस्य कर्तुराश्रयेणाश्रयणेन स्वीकारेण, अन्या लभते । बतेति खेदे । ईदृग्भोगोपेक्षिणी त्वं बुद्धिमान्द्याच्च शोचसीति भावः ॥ ४५ ॥

तदिति ॥ किञ्च, तत्प्रसिद्धम् । अस्माभिः कृतेभ्यः चाटुभ्यः प्रिय-

तस्यैव वा यास्यसि किं न हस्तं दृष्टं विधेः केन मनः प्रविश्य ।
अजातपाणिग्रहणासि तावद्रूपस्वरूपातिशयाश्रयश्च ॥ ४७ ॥

निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥ ४८ ॥

वेलातिगस्त्रैणगुणाब्धिवेणी न योगयोग्यासि नलेतरेण ।
सन्दभ्यते दर्भगुणेन मल्लीमाला न मृद्वी भृशकर्कशेन ॥ ४९ ॥

वाक्येभ्यः, जन्म यस्य तत्तज्जन्यमित्यर्थः । चाटुग्रहणं पूर्वोक्तनिजपक्षवीजना-दीनामप्युपलक्षणम् । शर्म सुखं, त्वया अप्राप्तो वसन्तो यया तया, वसन्ता-नधिष्ठितयेत्यर्थः । रसालवन्या सहकारश्रेण्या, मधुपानुविद्धं सौभाग्यं भृङ्गसङ्ग-जन्यं, रामणीयकमिव नैषधेन नलेन, अनूढतया अपरिणीतत्वेन, हेतुना, दुरापं दुष्प्रापं, तस्मात्त नलपरिग्रहे यत्नः कर्तव्य इति भावः ॥ ४६ ॥

अथ पुनरस्या नलप्राप्त्याशां जनयन्नाह—**तस्यैवेत्यादि** ॥ यद्वा, तस्य नलस्यैव हस्तं किं न यास्यसि यास्यस्येव, केन विधेर्मनः प्रविश्य दृष्टम् । विध्यानुकूल्यमपि सम्भावितमिति भावः । कुतः तावदद्यापि अजातपाणिग्रहणा अकृतविवाहा, असि । तवायं विवाहविलम्बो नलपाणिग्रहणार्थ एव किं न स्यादिति भावः । किञ्च, रूपं सौन्दर्यं, स्वरूपं स्वभावः, शीलमिति यावत् । तयोरतिशयः प्रकर्षः, तस्याश्रयश्चासि योग्यगुणाश्रयत्वाच्च तद्धस्तमेव गमिष्य-सीति भावः ॥ ४७ ॥

सत्यं, विधिसङ्कल्पस्तु दुर्ज्ञेय इत्यत आह—**निशेति** ॥ निशा निशया । "पद्दन्" इत्यादिना निशाया निशादेशः । शशाङ्कं, शिवया गौर्या, गिरीशं शिवं, श्रिया हरिञ्च, योजयतो विधेः, प्रयासः प्रयत्नोऽपि, परस्परम् । योग्य-समागमायैव योग्यसङ्घटनायैव, स्वारसिकः स्वरसप्रवृत्तः, प्रतीतः ज्ञातः । निशा शशाङ्कादिदृष्टान्ताद्विधिसङ्कल्पोऽपि सुज्ञात इति भावः ॥ ४८ ॥

नलान्यसम्बन्धस्त्वयोग्य इत्याह—**वेलातिगेति** ॥ वेलामतिगच्छन्तीति

नलकेलियोग्याम् ।
...स्य संक्रीडति चक्रचक्रे ॥ ५० ॥

...न्या त्वयि योजितायां विज्ञत्वकीर्त्या गतजन्मनो वा ।
जनापवादार्णवमुत्तरीतुं विधा विधातुः कतमा तरिस्स्यात् ॥ ५१॥

बेलातिगाः निस्सीमाः, स्त्रीणामिमे स्त्रैणाः । स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति नञ्प्रत्ययः । गुणाः सौशील्यादयः, त एवाब्धिः, तस्य वेणी प्रवाहभूता । त्वमिति शेषः । 'वेलाब्धिजलबन्धने । काले सीम्नि च । वेणी तु केशबन्धे जलस्रुतौ' इति वैजयन्ती । नलादितरेण योगयोग्या योगार्हा, नासि । तथा हि मृद्वी मल्ली-माला मृशकर्कशेन दर्भगुणेन कुशगूतेण, न सदृभ्यते न गुम्भ्यते । 'दृभि ग्रथने' इति धातोः कर्मणि लट् । व्यतिरेकेण दृष्टान्तालङ्कारः ॥ ४९ ॥

विधिमिति ॥ किञ्च, विधिं ब्रह्माण, नलस्य केलेः क्रीडायाः, योग्या-मर्हां, वधूसृष्टिं स्त्रीशिल्प, तस्य विधेः यानस्य रथस्य, युग्यो युगवोढा, तत्र परिचित इत्यर्थः । तदर्हति रथयुगप्रासङ्गमिति यत्प्रत्ययः । अहमपृच्छमेव । दुहादित्वाद्द्विकर्मकत्वम् । मया अस्य तथा...य, चक्रचक्रे रथाङ्गव्रजे, संक्रीडति कूजति सति "समोऽकूजन इति वक्तव्यम्" इति कूजने नात्मनेपदम् । त्वन्नामवर्णा इव कर्णेन पीता गृहीताः । न वे... लिङ्गाम्भिकत्वागमादपि ज्ञातो-यमर्थ इत्यर्थः ॥ ५० ॥

अन्येनेति ॥ किञ्च, त्वयि अन्येन ... पत्या, योजितायां, विज्ञत्व-कीर्त्या गतजन्मनः अभिज्ञत्वख्यात्यैव निर्गतायुष इत्यर्थः, विधातुर्वा । जनापवादा-र्णवं, उत्तरीतुं निस्तरितुम् । "वृतो वा" इतीटो दीर्घः । कतमा विधा कः प्रकारः तरिस्तरिणी स्यात् न कापीत्यर्थः । अतो दैवगत्या नल एव ते भर्तेति भावः ॥ ५१ ॥

आस्तां तदप्रस्तुतचिन्तयालं मे
सोऽहं तदागः परिमार्ष्टुकामस्तवेप्सि...

इतीरयित्वा विरराम पत्री स राजपुत्रीहृदयं बुभुत्सुः ।
ह्रदे गभीरे हृदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः ॥ ५३

किञ्चित्तिरश्चीनविलोलमौलिर्विचिन्त्य वाचं मनसा मुहूर्तम् ।
पतत्रिणं सा पृथिवीन्द्रपुत्री जगाद वक्त्रेण तृणीकृतेन्दुः ॥ ५४ ॥

इत्थमाशङ्कुपाद्य अस्याः चित्तवृत्तिपरिज्ञानाय प्रसङ्गान्तरेण निगमयति—**आस्तामिति** ॥ तत्पूर्वोक्तं, आस्तां तिष्ठतु, अप्रस्तुतचिन्तया अलं, तया साध्यं नास्तीत्यर्थः । गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीया । अत एवाह "न केवलं श्रूयमाणक्रियापेक्षया कारकोत्पत्तिः । किंतु, गम्यमानक्रियापेक्षयापि" इति न्यासोद्योतकारः। किंतु, हे तन्वि कृशाङ्गि, मैया अतिवेलमत्यन्तं, श्रमितासि खेदितासि । श्रमण्यन्तात्कर्मणि क्तः । अहं तच्छ्रमणरूपं आगोऽपराधम् । परिमार्ष्टुकामः परिहर्तुकामः । "तुं काममनसोरपि" इति मकारलोपः । किं तवेप्सितं, विदधे । ते मनोरथं पूरयामि अभिधेहि ब्रूहि ॥ ५२ ॥

इतीति ॥ स पत्री हंसः, इतीरयित्वा राजपुत्र्याः भैम्याः, हृदय बुभुत्सुः जिज्ञासुः, विरराम तूष्णींबभूव । "व्याङ्परिभ्यो रमः" इति रमेः परस्मैपदम् । तथाहि, सन्तः कार्यज्ञाः, गभीरे अगाधे, ह्रदे हृदि, परहृदये च, अवगाढे, प्रविश्य दृष्टे सति, कार्यस्य स्नानादेः रहस्योक्तेश्च अवतरं तीर्थं प्रस्तावञ्च, शंसन्ति कथयन्ति । अन्यथा, अनर्थे स्यादि भावः । अवतरो व्याहृगातः । अर्थान्तरन्यासः ॥

किञ्चिदिति ॥ किञ्चित्तिरश्चीना स्वभावादीषत्साचीभूता, विलोला आयासाद्विलुलिता मौलिः, केशबन्धो यस्याः सा । 'मौळयः संयताः कचाः' इत्यमरः । वक्त्रेण तृणीकृतेन्दुः अधरीकृतचन्द्रा, सा पृथिवीन्द्रपुत्री भैमी, मुहूर्तमल्पकालं मनसा विचिन्त्य पर्यालोच्य, पतत्रिणं, वाचं जगाद ॥ ५४ ॥

धिक्चापले वत्सिमवत्सलत्वं यत्प्रेरणादुत्तरळीभवन्त्या ।
समीरसङ्गादिव नीरभङ्ग्या मया तटस्थस्त्वमुपद्रुतोऽसि ॥ ५५ ॥
आदर्शतां स्वच्छतया प्रयासि सतां स तावत्खलु दर्शनीयः ।
आगः पुरस्कुर्वति सागसं मां यस्यात्मनीदं प्रतिबिम्बितं ते ॥ ५६
अनार्यमप्याचरितं कुमार्या भवान्मम क्षाम्यतु सौम्य तावत् ।
हंसोऽपि देवांशतयासि वन्द्यः श्रीवत्सलक्ष्मेव हि मत्स्यमूर्तिः ॥

धिगिति ॥ चापले चपलकर्मणि, युवादित्वादण्प्रत्ययः । वत्सस्य भावः वत्सिमा शिशुत्वम् । पृथ्वादित्वादिमनिच्प्रत्ययः । तेन निमित्तेन वत्सलत्वं वात्सल्यं, बाल्यप्रयुक्तचापलासक्तिमित्यर्थः । तद्धिक्, कुतः यस्य चापलवात्सल्यस्य, प्रेरणादुत्तरळीभवन्त्या चञ्चलायमानया, मया, समीरसङ्गाद्वाताहतेः उत्तरळीभवन्त्या नीरभङ्ग्या जलवीच्येव, तटस्थः उदासीनः, कूलगतश्च । त्वमुपद्रुतोऽसि पीडितोऽसि । अतोऽनर्थहेतुत्वात् बालचापलं हेयमिति भावः ॥

आदर्शतामिति ॥ स्वच्छतया, नैर्मल्यगुणेन, आदृश्यते पुरोगतं वस्तुरूपमस्मिन्नित्यादर्शो दर्पणः, तत्तां प्रयासि । कुतः, यस्य स्वच्छस्य, ते तव, सम्बन्धिनि, सागसं सापराधाम्, मां पुरस्कुर्वति पूजयति अग्रे कुर्वाणे च । आत्मनि बुद्धौ स्वरूपे च । 'पुरस्कृतः पूजिते स्यादभियुक्तेऽग्रतः कृते । आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च' इति चामरः । इदं मदीयं, आगोऽपराधः, प्रतिबिम्बितं, 'मयासि तन्वि श्रामतातिवेलम्' इत्येवंरूपेण प्रतिफलितम् । मदीयमागस्त्वय्यारोपितवानसीत्यर्थः पुरोवर्तिधर्माणामात्मनि, सङ्क्रमणादादर्शोऽसीति भावः । ततः किमित्यत आह—स आदर्शः, सतां साधूनां तावत् प्रथमम्, दर्शनीयः खलु । अथ पूज्यश्चेति तावच्छब्दार्थः । 'रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणीन् । गुरुमग्निं तथा सूर्यं प्रातः पश्येत्सदा बुधः" इति शास्त्रादिति भावः ॥ ५६ ॥

अनार्यमिति ॥ हे सौम्य साधो, भवान् कुमार्याः शिशोः मम सम्बन्धि-

**मत्प्रीतिमाधित्ससि कां त्वदीक्षामुदं मदक्ष्णोरपि यातिशेताम् ।
निजामृतैर्लोचनसेचनाद्वा पृथक्किमिन्दुस्सृजति प्रजानाम् ॥ ५८ ॥
मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः ।
का नाम बाला द्विजराजपाणिग्रहाभिलाषं कथयेदभिज्ञा ॥ ५९ ॥**

अनार्यमनुचितमपि आचरितं त्वदुपद्रवरूपं दुश्चेष्टितम् । क्षाम्यतु सहताम् । हंसोऽपि तिर्यगपीत्यर्थः । त्वमिति शेषः । भवानित्यनुषङ्गेऽस्मीति मध्यमपुरुषायोगात् । देवांशतया मत्स्यमूर्तिः श्रीवत्सलक्ष्मा विष्णुरिव वन्द्योऽसि ॥ ५७

अथ यदुक्तं, "त्वदीप्सितं किं विदधे अभिधेहि" इति तस्योत्तरमाह — **मत्प्रीतिमिति** ॥ कां मत्प्रीतिं किं वा मदीप्सितमित्यर्थः । आधित्ससि आधातुं कर्तुमिच्छसि । आदधातेः सन्नन्ताल्लटि सिप् । या प्रीतिः मदक्ष्णोः त्वदीक्षामुदं त्वदीक्षणप्रीतिम्, अतिशेतामतिलङ्घताम् । त्वद्दर्शनोत्सवादन्यत्किं ममेप्सितमित्यर्थः । तथा हि इन्दुः प्रजानां निजामृतैः लोचनसेचनात् नेत्राप्लवनात् पृथगन्यत् । 'पृथग्विना' इत्यादिना पञ्चमी । किं वा सृजति करोति । न किञ्चित्करोतीत्यर्थः । दृष्टान्तालङ्कारः ॥ ५८ ॥

अथ सर्वथा मनोरथः कथनीय इत्यभिप्रेत्य, तन्न शक्यमित्याह— **मनस्त्विति** ॥ मनो मच्चित्तं (कर्तृ) यं मनोरथं जातु कदापि नोज्झति न जहाति । स मनोरथः कण्ठपदं वाग्विषयं उपकण्ठदेशञ्च कथम् यातु । सम्भावनायां लोट् । यानसम्भवनापि नास्तीत्यर्थः । केनापि प्रतिबद्धस्य रथस्य कथमान्तिके सञ्चार इति भावः । कुतः अभिज्ञा विवेकिनी, का बाला स्त्री द्विजराजस्येन्दोः पाणिना, ग्रहे ग्रहणे, अभिलाषं कथयेत् । तथा हे द्विज पक्षिन्, राजपाणिग्रहाभिलाषं नलपाणिग्रहेच्छामिति च गम्यते । तथा च दुर्लभजनप्रार्थना द्विजराजपाणिग्रहणकल्पा परिहासास्पदीभूता कथं लज्जावत्या वक्तुं शक्यत इत्यर्थः ॥ ५९ ॥

वाचं तदीयां परिपीय मृद्वीं मृद्वीकया तुल्यरसां स हंसः ।
तत्याज तोषं परपुष्टघोषे घृणाञ्च वीणाक्वणिते वितेने ॥ ६० ॥

मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा तस्यां समाकुञ्चितवाचि हंसः ।
तच्छंसिते किञ्चन संशयालुर्गिरा मुखाम्भोजमयं युयोज ॥ ६१ ॥

करेण वाञ्छेव विधुं विधर्तुं यमित्थमात्थादरिणी तमर्थम् ।
पातुं श्रुतिभ्यामपि नाधिकुर्वे वर्णं श्रुतेर्वर्ण इवान्तिमः किम् ॥ ६२ ॥

वाचमिति ॥ स हंसः, मृद्वीकया द्राक्षया । 'मृद्वीका गोस्तनी द्राक्षा' इत्यमरः । तुल्यरसां समस्वादां, मधुरार्थामित्यर्थः । मृद्वीं मधुराक्षरां, तदीयां वाचं परिपीय अत्यादरेणाकर्ण्य, परपुष्टघोषे कोकिलकूजिते तोष प्रीतिं तत्याज । वीणाक्वणिते च घृणां जुगुप्सां वितेने । 'घृणा जुगुप्सा कृपयोः' इति विश्वः ॥

मन्दाक्षेति ॥ तस्यां भैम्यां, मन्दाक्षेण ह्रिया, मन्दा सन्दिग्धार्था, अक्षरमुद्रा द्विजराजपाणिग्रहेत्यादिरक्षरविन्यासो यस्मिन् तत्तथा । उक्त्वा समाकुञ्चितवाचि निगमितवचनायां सत्याम्, अयं हंसः, तच्छंसिते भैमीभाषिते किञ्चन किञ्चित् संशयालुः सन्दिहानस्सन् । "स्पृहिगृहि" इत्यादिसूत्रे शीङ्ग्रहणोपसङ्ख्यानादालुच्प्रत्ययः । मुखाम्भोजं मुखकमलं, गिरा युयोज, मुखेन गिरमुवाचेत्यर्थः ॥ ६१ ॥

करेणेति ॥ हे भैमि, करेण विधुं चन्द्रं, विधर्तुं गृहीतुं, वाञ्छेव तत्कल्पं यमर्थम्, इत्थं द्विजराजपाणिग्रहेत्याद्युक्तप्रकारेण, आदरिणी आदरवती सती, आत्थ ब्रवीषि । "ब्रुवः पञ्चानाम्" इत्यादिना सिपस्थादेशः । ब्रुव आहादेशः । "आहस्थ" इति हकारस्य थकारः । तमर्थं अन्ते भवोऽन्तिमः वर्णः शूद्रः । "अन्ताच्चेति वक्तव्यम्" इतीमनिच्प्रत्ययः । श्रुतेर्वर्णं वेदाक्षरमिव, श्रुतिभ्यां श्रोत्राभ्यां, पातुमपि श्रोतुमपीत्यर्थः । नाधिकुर्वे किं नाधिकार्यस्मि किं, अस्म्येवेत्यर्थः । अतस्सोऽर्थो व्यक्तं वक्तव्य इति तात्पर्यम् ॥ ६२ ॥

अर्थाप्यते वा किमियद्भवत्या चित्तैकपद्यामपि वर्तते यः ।
यत्रान्धकारः किल चेतसोऽपि जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ॥ ६३

ईशाणिमैश्वर्यविवर्तमध्ये लोकेशलोकेशयलोकमध्ये ।
तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम् ॥ ६४ ॥

ननु तमर्थमत्यन्तदुर्लभत्वाद्वक्तुं जिह्मेमीत्याशङ्क्य आह—**अर्थाप्यत इति** ॥ हे भैमि, भवत्या किं वा, इयदेतावद्यथा तथा अर्थाप्यते । किमर्थमयमर्थो द्विजराजपाणिग्रहणवदतिदुर्लभत्वेनाख्यायत इत्यर्थः । अर्थशब्दात्तदाचष्ट इत्यर्थे णिचि अर्थवेदसत्यानामापुग्वक्तव्य इत्यापुगागमः । कुतस्तथा नाख्येय इत्याह—योऽर्थः, एकः पादो यस्यामित्येकपदी, एकपादसञ्चारयोग्यो मार्गः । 'वर्तन्येकपदी' इति चेत्यमरः । "कुम्भपदादिषु च" इति निपातनात्साधुः । चित्तैकपद्यां मनोमार्गेऽपि वर्तते । चक्षुराद्यविषयत्वेऽपीत्यपिशब्दार्थः । स कथं दुर्लभ इति भावः । तथा हि, यत्र यस्मिन् ब्रह्मणि विषये चेतसोऽप्यन्धकारः प्रतिबन्धः किल, तद्ब्रह्मापि जिह्मेतरैरकुटिलैः, कुशलधीभिरिति यावत् । अवाप्यं सुप्राप्यम् । अमनोगम्य ब्रह्मापि कैश्चिद्गम्यते, किमुत मनोगतोऽयमर्थ इत्यर्थः । अत एव अर्थापत्तिरलङ्कारः ॥ ६३ ॥

अथ मयि मृषावादित्वशङ्कया वक्तुं सङ्कोचस्तच्च न शङ्कितव्यमिति त्रयेणाह—**ईशेत्यादि** ॥ ईशस्य यदणिमैश्वर्यं, तस्य विवर्तो रूपान्तरं मध्यो यस्याः सा तथोक्ते । हे कृशोदरीत्यर्थः । लोकेशलोके शेरत इति लोकेशलोकेशयाः ब्रह्मलोकवासिनः । अधिकरणे शेत इत्यच्प्रत्ययः । शयवासवासिष्वकालात् इत्यलुक् । तेषां लोकानां जनानां मध्ये अज्ञं मूढं, तिर्यञ्चं पक्षिणमपि मां, मृषा अनृतं तस्यानभिज्ञा रसज्ञा रसना यस्य तस्य भावस्तत्ता, सत्यवादितेत्यर्थः । उपज्ञायत इत्युपज्ञा, आदौ ज्ञाता । 'उपज्ञा ज्ञानमाद्यं स्यात्' इत्यमरः । "आतश्चोपसर्गे" इत्यङ्प्रत्ययः । बहुलग्रहणात्कर्मार्थत्वम् । तथात्वेनोपज्ञा तदुपज्ञं, उपज्ञोपक्रमं तदाद्याचिख्यासायाम् इति नपुंसकत्वम्, समं साधारणम् ।

मध्ये श्रुतीनां प्रतिवेशिनीनां सरस्वती वासवती मुखे नः ।
ह्रियेव ताभ्यश्चलतीयमद्धापथान्न संसर्गगुणेन बद्धा ॥ ६५ ॥
पर्यङ्कतापन्नसरस्वदङ्कां लङ्कापुरीमप्यभिलाषि चित्तम् ।
कुत्रापि चेद्वस्तुनि ते प्रयाति तदप्यवेहि स्वशये शयालु ॥ ६६ ॥
इतीरिता पत्त्ररथेन तेन ह्रीणा च हृष्टा च बभाण भैमी ।
चेतो नलं कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषम् ॥६७

समैस्सर्वैर्वा ज्ञायत इति समज्ञा कीर्तिः । पूर्ववदङ्प्रत्ययः । तदुपज्ञं तथा-त्वेनादौ ज्ञाता समज्ञा येन तं, तथोक्त, तं सत्यवादिनं, अश्च विद्धीत्यर्थः । अश्वतेर्गत्यर्थत्वात् ज्ञानार्थत्वम् ॥ ६४ ॥

मध्य इति ॥ किञ्च, प्रतिवेशिनीनां प्रतिवेश्यानां, श्रुतीनां ब्रह्ममुख-स्थानां, मध्ये वासवती निवसन्ती, इयं नोऽस्माकं मुखे, सरस्वती वाक्, संसर्ग एव गुणः श्लाघ्यधर्मः तन्तुश्च तेन बद्धा सती, ताभ्यः श्रुतिभ्यः । ह्रियेवेत्युत्प्रे-क्षा । अद्धापथात्सत्यमार्गात्, न चलति । संसर्गजा दोषगुणा भवन्तीति भावः । 'सत्येत्वद्धाञ्जसा द्वयम्' इत्यमरः ॥ ६५ ॥

ततः किमत आह--**पर्यङ्कतेति** ॥ कुत्रापि वस्तुनि द्वीपान्तरस्थेऽपीति भावः । अभिलाषि साभिलाषं, ते तव, चित्तं (कर्तृ), पर्यङ्कतामवसक्थिकात्वं, आपन्नः सरस्वान् सागरः अङ्कः चिह्नं यस्यास्तामतिदुर्गमामित्यर्थः । तां लङ्का-पुरीमपि, प्रयाति चेत् । तदपि दुर्गस्थमपि वस्तु स्वशये स्वहस्ते, शयालु स्थितं, अवेहि । शयालुर्व्याख्यातः । 'पर्यन्तामपि पर्यङ्कः' इति वैजयन्ती ॥ ६६ ॥

इतीति ॥ तेन पत्त्ररथेन पक्षिणा हंसेन, इतीत्थं, ईरिता उक्ता, भैमी, ह्रीणा स्वयमेव स्वाकूतकथनसङ्कोचाल्लज्जिता च । "नुदविद" इत्यादिना विकल्पान्निष्ठानत्वम् । हृष्टा उपायलाभान्मुदिता च सती बभाण । किमिति मदीयं चेतो लङ्कां नायते नैति । अयतेर्लट् । अन्यत्र, कुत्रापि वस्तुनि, साभि-

विचिन्त्य बालाजनशीलशैलं लज्जानदीमज्जदनङ्गनागम् ।
आचष्ट विस्पष्टमभाषमाणामेनां स चक्राङ्गपतङ्गशक्रः ॥ ६८ ॥

नृपेण पाणिग्रहणे स्पृहेति नलं मनः कामयते ममेति ।
आश्लेषि न श्लेषकवेर्भवत्याः श्लोकद्वयार्थस्सुधिया मया किम् ॥

त्वच्चेतसः स्थैर्यविपर्ययं तु सम्भाव्य भाव्यस्मि तदज्ञ एव ।
लक्ष्ये हि बालाहृदि लोलशीले दरापराद्धेषुरपि स्मरस्स्यात् ॥ ७०

लाषं न । अतो वस्त्वन्तरनैस्पृह्यात् लज्जां नायते । किंतु, नलं राजानं, कामयत इति श्लेपभङ्ग्या बभाणेत्यर्थः ॥ ६७ ॥

विचिन्त्येति ॥ विस्पष्टमभाषमाणां श्लेषोक्तिवशात्सन्दिग्धं भाषमाणामित्यर्थः । एनां दमयन्तीं, स चक्राङ्गपतङ्गशकः हंसपक्षिश्रेष्ठः, बालाजनस्य मुग्धाङ्गनाजनस्य, शीलशैलं स्वभावशैलं, लज्जायामेव नद्यां, मज्जन्ननङ्ग एव नागो गजो यस्य तं, विचिन्त्य विचार्य, आचष्ट । तस्या लज्जाविजितमन्मथत्वं दृष्ट्वा लज्जाविसर्जनार्थं वाचमुवाचेत्यर्थः ॥ ६८ ॥

नृपेणेति ॥ श्लेषकवेः श्लेषभङ्ग्या कवयित्र्याः श्लिष्टशब्दप्रयोक्त्र्या इत्यर्थः । 'कविर्वर्णन' इति धातोरौणादिक इकारप्रत्ययः । भवत्यास्तव सम्बन्धि नृपेण (कर्त्रा), पाणिग्रहणं पाणिपीडनं, उभयप्राप्तौ कर्मणि विवक्षितायाः षष्ठ्याः कर्मणि च" इति निषेधेऽपि शेषे षष्ठीसमासः । तत्र स्पृहेति मम मनो नलं कामयत इति च । एवंरूपः श्लोकद्वयार्थः द्विजराजपाणिग्रहेति चेतो नलं कामय इत्येतत् श्लोकद्वयार्थः । सुधिया विदुषा मया नाश्लेषि किं नाग्राहि किं गृहीत एवेत्यर्थः ॥ ६९ ॥

तर्हि किमर्थं करेण वाञ्छेवेत्यादिकमज्ञवदुक्तमित्यत आह—**त्वच्चेतस इति** ॥ किंतु त्वच्चेतसः स्थैर्यविपर्ययमस्थिरत्वं सम्भाव्याशङ्क्य, तदज्ञः तस्य

महीमहेन्द्रः खलु नैषधेन्दुस्तद्बोधनीयः कथमित्थमेव ।
प्रयोजनं संशयकम्पमीदृक्पृथग्जनेनेव स मद्विधेन ॥ ७१ ॥

पितुर्नियोगेन निजेच्छया वा युवानमन्यं यदि वा वृणीषे ।
त्वदर्थमर्थित्वकृतिप्रतीतिः कीदृङ्मयि स्यान्निषधेश्वरस्य ॥ ७२ ॥

श्लोकद्वयार्थस्य अज्ञोऽनभिज्ञः, भावी भविष्यन् । "भविष्यति गम्यादयः" इति साधुः । अस्मि त्वच्चित्तस्थैर्यनिश्चयपर्यन्तमित्यर्थः । "धातुसम्बन्धे प्रत्ययाः" इति भविष्यत्तायागुणत्वाद्वर्तमानतानुरोधः । नन्वेवमनुरक्तायां मयि कुत इयं शङ्केत्याशङ्क्य स्त्रीणां चित्तचाञ्चल्यसम्भवादित्याह—**लक्ष्य इति** ॥ लोलशीले चञ्चलस्वभावे, बालायाः हृदि चित्त एव, लक्ष्ये, स्मरोऽपि दरापराद्धेषुः ईषच्च्युतसायकस्स्यात्, कुशलोऽपि धन्वी चललक्ष्यात् कदाचिदपराध्यतीति भावः । 'अपराद्धपृषत्कोऽसौ लक्ष्याद्यश्च्युतसायक' इत्यमरः । अर्थान्तरन्यासोऽलङ्कारः॥

महीति ॥ किञ्च, नैषधः इन्दुरिवेति नैषधेन्दुः नलचन्द्रः, महीमहेन्द्रो भूदेवेन्द्रः, खलु । तत्तस्मात्, स नलः, पृथग्जनेन प्राकृतजनेनेव, मद्विधेन मादृशेन, विदुषा । ईदृक् संशयकम्पं सन्देहदुःस्थमास्थितं प्रयोजनम्, इत्थमेव सन्दिग्धाकारेणैव, कथं बोधनीयः ज्ञापनीयः, अनर्ह इत्यर्थः । "गतिबुद्धि" इत्यादिना अणि कर्तुर्नलस्य कर्मत्वं ण्यन्ते कर्तुश्च कर्मण इत्यभिहितत्वं च ॥७१॥

अथेत्थमेव बोधने को दोषस्तत्राह—**पितुरिति** ॥ पितुर्नियोगेन आज्ञया निजेच्छया स्वेच्छया वा, अन्यं नलादन्यं युवानं यदि वा वृणीषे । तदा निषधेश्वरस्य नलस्य, मयि विषये, त्वदर्थं तुभ्यम् । "चतुर्थी तदर्थ" इत्यादिना चतुर्थीसमासः । अर्थेन सह नित्यसमासः विशेष्यलिङ्गता च वक्तव्या । तद्यथा तथा, अर्थित्वकृतिः अर्थित्वभजनं, तत्र प्रतीतिर्विश्वासः, कीदृक् स्यात् नश्येदित्यर्थः । तस्मादसन्दिग्धं वाच्यमिति भावः ॥ ७२ ॥

त्वयापि किं शङ्कितविक्रियेऽस्मिन्नधिक्रियेऽहं विषये विधातुम् ।
इतःपृथक् प्रार्थयसे तु यद्यत्कुर्वे तदुर्वीपतिपुत्रि सर्वम् ॥ ७३ ॥

श्रवःप्रविष्टा इव तद्गिरस्ता विधूय वैमत्यधुतेन मूर्ध्ना ।
ऊचे ह्रिया विश्लथितानुरोधा पुनर्धरित्रीपुरुहूतपुत्री ॥ ७४ ॥

मदन्यदानं प्रति कल्पना या वेदस्त्वदीये हृदि तावदेषा ।
निशोऽपि सोमेतरकान्तशङ्कामोङ्कारमग्रेसरमस्य कुर्याः ॥ ७५ ॥

अथ तथा वक्तुं न शक्यते । तर्हि ततोऽन्यत्तवेप्सितं करिष्ये प्रतिज्ञाभङ्गपरिहारायेत्याह– त्वयेति ॥ हे उर्वीपतिपुत्रि भैमि, त्वयापि वा किं विधातुं किं कर्तुम्, शङ्कितविक्रिये सम्भावितविपर्यये, अस्मिन् विषये राजपाणिग्रहणसङ्घटनकार्ये, अहमधिक्रिये नियोज्ये, न नियोज्य इत्यर्थः । करोतेः कर्मणि लट् । किन्तु, इतः पृथक् अस्मादन्यत् यद्यत् प्रार्थयसे तत्सर्वं कुर्वे करिष्यामीत्यर्थः । सामीप्ये लट् । कृतप्रायमित्यर्थः ॥ ७३ ॥

श्रव इति ॥ धरित्रीपुरुहूतपुत्री भूमान्द्रसुता भैमी, श्रवःप्रविष्टाः कर्णप्रविष्टा इव, न तु मनःप्रविष्टाः, तद्गिरः हंसवाचः, वैमत्येन असम्मत्या धुतेन कम्पितेन मूर्ध्ना, विधूय प्रतिषिध्य, ह्रिया (कर्त्र्या) विश्लथितानुरोधा शिथिलितानुवृत्तिः, त्यक्तलज्जा सती, पुनरनुक्ले प्रवाच ॥ ७४ ॥

मदन्येति ॥ ममान्यस्मै दानं प्रति दानमुद्दिश्य, या कल्पना पितुर्नियोगेनेत्यादिश्लोकोक्तः । एषा कल्पना त्वदीये हृदि, वेदस्तावत् सत्यैवेत्यर्थः । निशः निशाया अपि । "पद्दन्" इत्यादिना निशायानिश् । सोमाच्चन्द्रादितरकान्तशङ्कां पुरुषान्तरकल्पनामेव, ओंकारं प्रणवं, अस्य वेदस्य, अग्रेसरमादिं, कुर्याः । सर्वस्यापि वेदस्य प्रणवपूर्वकत्वादिति भावः । यथा निशायाः निशाकरेतरपरिग्रहो न शङ्कितव्यः । तथा ममापि नलेतरपरिग्रह इत्यर्थः । रूपकालङ्कारः ॥

सरोजिनीमानसरागवृत्तेरनर्कसम्पर्कमतर्कयित्वा ।
मदन्यपाणिग्रहशङ्कितेयमहो महीयस्तव साहसिक्यम् ॥ ७६ ॥

साधु त्वयातर्कि तदेकमेव स्वेनानलं यत्किल संश्रयिष्ये ।
विनामुना स्वात्मनि तु प्रहर्तुं मृषागिरं त्वां नृपतौ न कर्तुम् ॥ ७७ ॥

मद्विप्रलम्भं पुनराह यस्त्वां तर्कः स किं तत्फलवाचि मूकः ।
अशक्यशङ्कव्यभिचारहेतुर्वाणी न वेदा यदि सन्तु के तु ॥ ७८ ॥

सरोजिनीति ॥ सरोजिन्याः पद्मिन्याः, मानसरागवृत्तेः मनोऽनुराग-वृत्तेः, अनर्कसम्पर्कमर्केतरकान्तसङ्क्रान्तिं, अतर्कयित्वा अनूहित्वा, तव, मदन्यस्य नलेतरस्य पाणिग्रहे शङ्कित इति तच्छङ्की, तस्य भावस्तत्ता । महीयः महत्तरं साहसिक्यं साहसिकत्वं, अहो असम्भावितार्थ-सम्भावनादश्रद्धेयम् ॥ ७६ ॥

साध्विति ॥ किञ्च, स्वेन स्वेच्छया, अनलं नलादन्यमग्निञ्च, संश्रयिष्ये प्राप्स्यामीति यत् त्वया अतर्कि ऊहितं, तदेकमेव साध्वतर्कि । किंतु, अमुना नलेन विना, तदलाभ इत्यर्थः । स्वात्मनि प्रहर्तुं स्वात्मानं हिंसितुं, कर्मण्यधि-करणत्वविवक्षायां सप्तमी । "अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः । सर्वदा सर्वथाभावात् क्वचित् किञ्चिद्विवक्ष्यते" इति वचनात् । अनलं संश्रयिष्य इत्यनुषङ्गः । नृपतौ नले विषये, त्वां मृषागिरं असत्यवाचं कर्तुं न । नल एव मे शरणं, अन्यथा मरणमेव शरणमिति भावः ॥ ७७ ॥

मदिति ॥ किञ्च, यस्तर्कः ऊहः, त्वां मद्विप्रलम्भ्यं मया विप्रलम्भनीयम् । "पोरदुपधात्" इति यत्प्रत्ययः । आह बोधयतीत्यर्थः । स तर्कः, तस्य विप्रलम्भस्य, फलवाचि प्रयोजनाभिधाने, मूकः शक्तः किम् । अतो मय्यसत्य-वादित्वशङ्का न कार्येत्यर्थः । कथमेतावता सत्यवाक्त्वनिश्चयोऽत आह—अशक्येति ॥ अशक्या शङ्का यस्य सोऽशक्यशङ्कः शङ्कितुमशक्यः, व्यभि-चारहेतुः विप्रलिप्सालक्षणो यस्यास्सा वाणी, न वेदा यदि न प्रमाणञ्चेत् ।

जुहोति किं मां तातः कृशानौ न शरीरशेषाम् ।
[illegible] पि म[illegible]णनाथस्तु नलस्स एव ॥ ७९ ॥

तदे[illegible]पदा[illegible] मदी[illegible] साधु विधित्सुता ते ।
अहेलि[illegible] किं नलि[illegible] विधत्ते सुधाकरेणापि सुधाकरेण ॥ ८० ॥

तर्हि के तु [illegible] वा, वेदा[illegible] न वे[illegible] सम्भावना[illegible] । वेद वाचामसत्यत्वे [illegible] यथेति [illegible] ॥ ७८ ॥

एवं निजेच्छया [illegible] तां निरस्यति—अनैषधायेति [illegible] पिता [illegible] अनैषधायैव नलाद[illegible] करोति ददाति किं, [illegible] तदा शरीरशेषां मृतां, तत[illegible] कृशानौ न जुहोति किम् । [illegible] नाप्यग्नेरन्यत्र जुहोतीत्यर्थः । तदङ्गीकर्तव्यमेवेति भाव[illegible] । कुतः, स [illegible] रात्मजशरीरस्य, ईष्टे स्वामी भवतीत्यर्थः । "अधीगर्थदयेशां [illegible]" इति कर्मणि शेषे षष्ठी । तथापि शरीरस्य पितृस्वामिकत्वेऽपीत्यर्थः [illegible] स नल एव, प्राणानां [illegible] भाव[illegible] । [illegible] कुर्वित्यर्थ[illegible] ॥ ७९ ॥

फलितमाह—तदेकेति ॥ तस्य नलस्य [illegible] पदमधिकारः, तस्मिन् [illegible] के, मदीसते [illegible] विधित्सुता विचिकीर्षुतैव, साधु साध्वी, अविचारेण [illegible] युक्तमित्यर्थः । [illegible] सामान्योपक्रमान्नपुंसकत्वम् । [illegible] क्षुन्निवर्तयितुम्' इति भाष्यकारवचनम् । ननु किमत्राभिनिवेशेन [illegible] स्वीकारे को दोषस्तत्राह—अहेलिनेति ॥ नलिनी सुधाकरेण [illegible] नापि अहेलिना असूर्येण, सुधाकरेण चन्द्रेण किं विधत्ते, किं तेन तस्या इति भावः । तद्वन्ममापि युवान्तरेणेति भावः । दृष्टान्तालङ्कारः ॥ ८० ॥

तदेकलुब्धे हृदि मेऽस्ति लब्धुं चिन्ता न चिन्तामणिमप्यनर्घम् ।
वित्ते ममैकस्सकलत्रिलोकीसारो निधिः पद्ममुखस्स एव ॥ ८१ ॥

श्रुतश्च दृष्टश्च हरित्सु मोहाद्ध्यातश्च नीरन्ध्रितबुद्धिधारम् ।
ममाद्य तत्प्राप्तिरसुव्ययो वा हस्ते तवास्ते द्वयमेव शेषः ॥ ८२ ॥

सध्रीयतामाश्रुतपालनोत्थं मत्प्राणविश्राणनजं च पुण्यम् ।
निवार्यतामार्य वृथा विशङ्का भद्रेऽपि मुद्रेयमये भृशं का ॥ ८३ ॥

तदिति ॥ किञ्च, तस्मिन्नल एवैकस्मिन् लुब्धे लोलुपे, मे हृदि, अनर्घं चिन्तामणिमपि, लब्धुं चिन्ता विचारो नास्ति । तथा वित्ते धनविषयेऽपि, मम सकलत्रिलोकीसारः त्रैलोक्यश्रेष्ठः, पद्ममुखः पद्माननः, स नल एव त्रैलोक्यसारः पद्ममुखो निधिश्च । नलादन्यत्र कुत्रापि मे स्पृहापि नास्ति । किमुत युवान्तर इति भावः ॥ ८१ ॥

श्रुतश्चेति ॥ किं बहुना, स नलः, श्रुतः दूतद्विजवन्दिचारणादिमुखादाकर्णितः, मोहात् भ्रान्तिवशात्, हरित्सु दिक्षु, दृष्टः साक्षात्कृतश्च । तथा नीरन्ध्रितबुद्धिधारं निरन्तरीकृततदेकविषयबुद्धिप्रवाहं यथा तथा, ध्यातः चिन्तितश्च । तथाद्य मम तत्प्राप्तिः नलप्राप्तिः, असुव्ययः प्राणत्यागो वा, द्वयमेव द्वयोरन्यतरमेवेत्यर्थः शेषः कार्यशेषः । स च तव हस्ते आस्ते त्वदायत्तस्तिष्ठतीत्यर्थः । तत्र तत्वार्थश्रवणमनननिदिध्यासनसम्पन्नस्य ब्रह्मप्राप्तिदुःखोच्छेदलक्षणो मोक्षो गुर्वायत्त एवेत्यर्थान्तरप्रतीतेर्ध्वनिरेव । अभिधायाः प्रकृतार्थनियन्त्रणादिति सङ्क्षेपः ॥ ८२ ॥

सध्रीयतामिति ॥ हे हंस, आश्रुतपालनोत्थं प्रतिज्ञातार्थनिर्वाहोत्पन्नम् । 'अङ्गीकृतमाश्रुतं प्रतिज्ञातम्' इत्यमरः । मत्प्राणानां विश्राणनं दानं तज्जञ्च पुण्यं सुकृतं, सध्रीयतां सङ्गृह्यताम् । हे आर्य, वृथा विशङ्का सन्देहः, निवार्यतां

अलं विलङ्घ्य प्रिय विज्ञ याच्ञां कृत्वापि वाम्यं विविधं विधेये ।
यशःपथादाश्रवतापदोत्थात् खलु स्खलित्वास्तखलोक्तिखेलात् ॥

स्वजीवमप्यार्तमुदे ददद्भ्यस्तव त्रपा नेदृशबद्धमुष्टेः ।
मह्यं मदीयान्यदसूनदित्सोर्धर्मः कराद्भ्रश्यति कीर्तिधौतः ॥ ८५ ॥

त्यज्यताम् । अये अङ्ग, भद्रे पूर्वोक्तपुण्यरूपे श्रेयस्यपि विषये भृशं केय मुदा औदासीन्यम् । श्रेयसि नोदासितव्यमित्यर्थः ॥ ८३ ॥

अलमिति ॥ हे प्रिय प्रीतिकर, विज्ञ विशेषज्ञ, उभयत्र "इगुपध" इत्यादिना कप्रत्ययः । याच्ञां प्रार्थनां, विलङ्घ्यालं याच्ञाभङ्गो न कार्य इत्यर्थः । विधेये विनीतजने, विविधं वाम्यं वक्रत्वं कृत्वाप्यलम् । तच्च न कार्यमित्यर्थः । आश्रवो यथोक्तकारी । 'वचने स्थित आश्रव' इत्यमरः । तस्य भावस्तत्ता । सैव पदं पदक्षेपः, तदुत्थात् अस्तखलोक्तिखेलात् अस्ता निरस्ता खलोक्तिखेला मिथ्यालापविनोदो येन तस्मात्, यशःपथात्, स्खलित्वा चलित्वा खलु । न स्खलितव्यमित्यर्थः । अन्यथा यशोहानिस्स्यादिति भावः । 'निषेधवाक्यालङ्कारजिज्ञासानुनये खलु' इत्यमरः । 'अलं खल्वोः प्रतिषेधयोः' इत्यादिनोभयत्रापि क्त्वाप्रत्ययः । इह "न पादादौ खल्वादयः" इति निषेधस्योद्वेजकाभिप्रायत्वान्नञर्थस्य खलुशब्दस्यानुद्वेजकत्वान्नञ्त्वादेव पादादौ प्रयोगो न दुष्यत इत्यनुसन्धेयम् ॥ ८४ ॥

स्वेति ॥ हे हंस, ईदृशबद्धमुष्टेः ईदृशकष्टलुब्धस्य, तव आर्तानां मुदे प्रीत्यै, स्वजीवं ददद्भ्यः स्वप्राणव्ययेनापि परप्राणत्राणं कुर्वद्भ्यो जीमूतवाहनादिभ्य इत्यर्थः । 'जीवं जीमूतवाहन' इति प्रसिद्धिः । त्रपा नेति काकुः । त्रपायाः मनः प्रत्यावृत्तिरूपत्वात्तदपेक्षया तेषामपादानत्वात् पञ्चमी । यद्यस्मात् मदीयामेव असून् प्राणान् मह्यमदित्सोः तव, कीर्त्या धौतः शुद्धः, धर्मः कराद्धस्तात्, भ्रश्यति । न चैतत्तवार्हमिति भावः ॥ ८५ ॥

दत्वात्मजीवं त्वयि जीवदेऽपि शुद्ध्यामि जीवाधिकदे तु केन ।
विधेहि तन्मां त्वदृणेष्वशोद्धुममुद्रदारिद्र्यसमुद्रमग्नाम् ॥ ८६ ॥
क्रीणीष्व मज्जीवितमेव पण्यमन्यं न चेद्वस्तु तदस्तु पुण्यम् ।
जीवेशदातर्यदि ते न दातुं यशोऽपि तावत्प्रभवामि गातुम् ॥ ८७
वराटिकोपक्रिययापि लभ्यानिभ्याः कृतज्ञानथवाद्रियन्ते ।
प्राणैः पणैः स्वं निपुणं फणन्तः क्रीणन्ति तानेव तु हन्त सन्तः ॥

दत्वेति ॥ किञ्च, जीवदे प्राणप्रदे, त्वयि विषये, आत्मजीवं मत्प्राणं, दत्वापि, शुद्ध्यामि आनृण्यं गमिष्यामीत्यर्थः । किंतु, जीवादधिकः प्रियः तद्दे त्वयि केन शुद्ध्यामि न केनापि तत्तुल्यवस्त्वभावादिति भावः । सन्ति प्राणाः प्राणैस्समाः, प्राणाधिकमन्यत्तु न किञ्चिदिति भावः । तत्तस्मात्तदभावादेव । मां त्वदृणेषु विषये अशोद्धुमृणप्रस्तां भवितुमेव । अमुद्रे अपरिमिते, दारिद्र्यं त्वद्देयवस्त्वभावः तस्मिन्नेव समुद्रे मग्नां विधेहि । नलसङ्घटनेन मामृणग्रस्तां कुर्वित्यर्थः । अशोद्धुं मग्नामिति मग्नत्वानुवादेन अशुद्धिर्विधीयते । दरिद्राणामृणविमुक्तिर्नास्तीति भावः ॥ ८६ ॥

क्रीणीष्वेति ॥ हे जीवेशदातः प्राणेश्वरप्रद, मज्जीवितमेव पण्यं क्रेयं वस्तु क्रीणीष्व, जीवितेशरूपमूल्यदानेन स्वीकुरुष्वेत्यर्थः । अन्यदेतन्मूल्यानुरूपं वस्त्वन्तरं नास्ति चेत् । तर्हि, पुण्यं सुकृतं अस्तु । किञ्च, यदि ते तुभ्यं दातुं यत्किञ्चित् प्रदातुं न प्रभवामि न शक्नोमि । तावत्तर्हि, यशोऽपि कीर्तिं वा, गातुं प्रभवामि । ख्यातिसुकृतार्थमेवोपकुरुष्वेत्यर्थः ॥ ८७ ॥

अथ साधुस्वाभाव्येनापि परोपकारं कुर्वित्याह—**वराटिकेति** ॥ अथवा वराटिकोपक्रियया कपर्दिकादानेनापि, लभ्यान् सुलभान् कृतज्ञान् तावतैव बहुमन्यमानानुपकारज्ञान्, इभ्याः धनिकाः । 'इभ्य आढ्यो धनिको स्वामी' इत्यमरः, नाद्रियन्ते । धनलोभान्नोपकुर्वन्तीत्यर्थः । सन्तो विवेकिनस्तु स्वमात्मानं निपुणं फणन्तः व्यवहरन्तः । एते वयं त्वदधीना इति साधु वदन्त इत्यर्थः ।

स भूभृदष्टावपि लोकपालास्तैर्मे तदेकाग्रधियः प्रसेदे ।
न हीतरस्माद्घटते यदेत्य स्वयं तदाप्तिप्रतिभूर्ममाभूः ॥ ८९ ॥

अकाण्डमेवात्मभुवार्जितस्य भूत्वापि मूलं मयि वीरणस्य ।
भवान्न मे किं नलदत्वमेत्य कर्ता हृदश्चन्दनलेपकृत्यम् ॥ ९० ॥

तानेव कृतज्ञान् प्राणैरेव पणैर्मूल्यैः, क्रीणन्त्यात्मसात्कुर्वन्ति । किमुत धनैरिति भावः । अतस्त्वयापि सता कृतज्ञाहमुपकर्तव्येति भावः । हन्तेति हर्षे ॥ ८८ ॥

स इति ॥ किञ्च, स भूभृन्नलः अष्टावपि लोकपालाः तदात्मक इत्यर्थः । "अष्टाभिर्लोकपालानां मात्राभिर्निर्मितो नृप" इति स्मरणात् । अत एव तदेकाग्रधियः नलैकतानबुद्धेः मे मम तैर्लोकपालैः, प्रसेदे प्रसन्नम् । भावे लट् । देवता हि ध्यायतः प्रसीदन्तीति भावः । कुतः, इतरस्मात् प्रसादादन्यथेत्यर्थः । त्वं स्वयमेव, एत्यागत्य, मम तदाप्तिप्रतिभूः नलप्राप्तिलग्नकोऽभूरिति यत्, तन्न घटते हि । तत्प्रसादाभावे कुतो ममेदं श्रेय इति भावः ॥ ८९ ॥

अकाण्डमिति ॥ हे हंस, विः पक्षी । 'वि विष्किरपतत्रिण' इत्यमरः "रो रि" इति रेफलोपे "ढ्रलोपे पूर्वस्य दीर्घो णः" इति दीर्घः । भवान् अकाण्डं अनवसर एव । अत्यन्तसंयोगे द्वितीया । आत्मभुवा कामेन, मयि विषये आर्जितस्य कृतस्य रणस्य गाढप्रहारलक्षणस्य, मूलं हंसानामुद्दीपकत्वेन निदानं भूत्वापि । अन्यत्र, काण्डः दण्डः तद्वर्जितमकाण्डं यथा तथा । आत्मभुवा ब्रह्मणा, आर्जितस्य सृष्टस्य, वीरणस्य तृणविशेषस्य, मूलं मूलावयवकं भूत्वा । अत एव नलदत्वं नैषधदातृत्वम् । अन्यत्र, उशीरत्वञ्च । एत्य, मे हृदः चन्दनलेपकृत्यं शैत्योत्पादनं, न कर्ता न करिष्यति किं करिष्यत्येव परोपकारशीलत्वादिति भावः । 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु स्याद्वीरणं वीरतृणं मूलेऽस्योशीरमस्त्रियाम् ॥ अभयं नलदं सेव्यम्' इति चामरः अत्र वीरणस्येति शब्दश्लेषः । तथा च नलदत्वमेत्येति प्रकृताप्रकृतयोरभेद

अलं विलम्ब्य त्वरितुं हि वेला कार्ये किल स्थैर्यसहे विचारः ।
गुरूपदेशं प्रतिभेव तीक्ष्णा प्रतीक्षते जातु न कालमार्तिः ॥ ९१॥

अभ्यर्थनीयस्स गतेन राजा त्वया न शुद्धान्तगतो मदर्थम् ।
प्रियास्यदाक्षिण्यबलात्कृतो हि तदोदयेदन्यवधूनिषेधः ॥ ९२ ॥

शुद्धान्तसंभोगनितान्ततृप्ते न नैषधे कार्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा स्वादुस्सुगन्धिः स्वदते तुषारा ॥

ध्यवसायेन हंसे आरोप्यमाणोशीरत्वस्य प्रकृततादात्म्येन चन्दनकृत्यलक्षणप्रकृत-कार्योपयोगात्परिणामालङ्कारः । 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इति लक्षणात् । स चोक्तश्लेषप्रतीपोत्थापित इति सङ्करः ॥ ९० ॥

अलमिति ॥ हे हंस, विलम्ब्यालं न विलम्बितव्यमित्यर्थः । अलं खल्वित्यादिना क्त्वाप्रत्यये ल्यबादेशः । त्वरितुं वेला हि त्वराकालः खल्वय-मित्यर्थः । कालसमयवेलासु तुमुन । कुतः स्थैर्यसहे विलम्बसहे, कार्ये विचारः विमर्शः । किलेति प्रसिद्धौ । अन्यथा, विपत्स्यत इति भावः । तथा हि तीक्ष्णा शीघ्रग्राहिणी, प्रतिभा प्रज्ञा गुरूपदेशमिव । आर्तिराधिः, जातु कदापि कालं न प्रतीक्षते कालक्षेपं न सहत इत्यर्थः । उपमार्थान्तरन्यासयोः संसृष्टिः ॥ ९१ ॥

अथानन्तरकृत्यं सविशेषमुपदिशति—**अभ्यर्थनीय इत्यादिना** श्लोक-पञ्चकेन ॥ गतेन इतो यातेन । त्वया स राजा नलः शुद्धान्तगतोऽन्तःपुरस्थः, मदर्थं मत्प्रयोजनं, नाभ्यर्थनीयः न याच्यः । दुहादित्वाद्द्विकर्मकत्वम् । अत एवाप्रधाने दुहादीनामपि राज्ञोऽभिहिते कर्मत्वम् । कुतः, हि यस्मात्, तदा तस्मिन्काले, प्रियाणामास्यदाक्षिण्यं मुखावलोकनोत्थतच्छन्दानुवृत्तिबुद्धिरित्यर्थः । तेन बलात्कृतः बलात्प्रवृत्तः, अन्यवधूनिषेधः उदयेदुत्पद्येत ॥ ९२ ॥

शुद्धान्तेति ॥ किञ्च, शुद्धान्तसम्भोगेन अन्तःपुरस्त्रीसम्भोगेन, निता-न्ततृप्ते अत्यन्ततुष्टे, नैषधे नले विषये, इदं कार्यं न निगाद्यं न निगदितव्यम् ।

विज्ञापनीया न गिरो मदर्थाः क्रुधा कदुष्णे हृदि नैषधस्य ।
पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस ॥ ९४ ॥

धरातुरासाहि मदर्थयाच्ञा कार्या न कार्यान्तरचुम्बिचित्ते ।
तदार्थितस्यानवबोधनिद्रा बिभर्त्यवज्ञाचरणस्य मुद्राम् ॥ ९५ ॥

क्षुहलोप्र्येत् । गदमदेत्यादिना सोपसर्गाद्यतो निषेधात् । तथा हि अपां तृप्ताय, अद्भिस्तृप्तायेत्यर्थः । "पूरणगुण" इत्यादिना षष्ठीसमासप्रतिषेधादेव ज्ञापकात् षष्ठी । "रुच्यर्थानां प्रीयमाणः" इति सम्प्रदानत्वाच्चतुर्थी । स्वादुर्मधुरा, सुगन्धिः कर्पूरादिवासनया, शोभनगन्धा । अत्र कवीनां निरङ्कुशत्वाद्गन्धस्येत्वे तदेकान्त-नियमानादरः । तुषारशीतला वारिधारा, न स्वदते न रोचते हि । दृष्टान्ता-लङ्कारः ॥ ९३ ॥

विज्ञापनीया इति ॥ हे हंसकुलावतंस, नैषधस्य नलस्य, हृदि हृदये, क्रुधा क्रोधेन, कदुष्णे ईषदुष्णे सति । "कवं चोष्णे" इति चकारात्कोः कदादेशः । मह्यमिमा मदर्थाः । अर्थेन सह नित्यसमासः विशेष्यलिङ्गता च वक्तव्या । गिरो वाचः, न विज्ञापनीयाः क्रोधावस्थायां न विज्ञाप्या इत्यर्थः । तथा हि पित्तेन पित्त-दोषेण, दूने दूषिते, रसने रसनेन्द्रिये, सिता शर्करापि, तिक्तायते तिक्ता भवति । लोहितादित्वात् क्यष् । "वा क्यषः" इत्यात्मनेपदम् । अत्रापि दृष्टान्तालङ्कारः ॥

धरेति ॥ तुर त्वरितं, साहयत्यभिभवत्यरीनिति तुराषाडिन्द्रः, साहयते-र्णौरादिकत्वात् क्विप् । "नहिवृति" इत्यादिना पूर्वपदस्य दीर्घः प्रतिकृति-करणे व्यधिकरणस्यापि ग्रहणात् । मुग्धबोधस्तुराशब्दं डाबन्तमाह । तस्मिन् धरातुरासाहि भूमीन्द्रे नले, अजादिष्वसाद्रूपत्वात् "सहेस्साडस्सः" इति षत्वं नास्ति । कार्यान्तरचुम्बिचित्ते अन्यकार्यव्यासक्तचित्ते सति मदर्थयाच्ञा मत्प्रयोजनप्रार्थना न कार्या । तथा हि, तदान्यासङ्गकाले अर्थितस्य प्रार्थितार्थस्य अनवबोधो बोधाभावः, स एव निद्रा सा, अवज्ञाचरणस्यानादरस्य मुद्रामभि-ज्ञानं बिभर्ति । अनादरप्रतीतिं करोतीत्यर्थः । तच्चातिकष्टमिति भावः ॥ ९५ ॥

विज्ञेन विज्ञाप्यमिदं नरेन्द्रे तस्मात्त्वयास्मिन्समयं समीक्ष्य ।
आत्यन्तिकासिद्धिविलम्बसिद्ध्योः कार्यस्य कार्यस्य शुभा विभाति ॥

इत्युक्तवत्या यदलोपि लज्जा सानौचिती चेतसि नश्चकास्तु ।
स्मरस्तु साक्षी तददोषतायामुन्माद्य यस्तत्तदवीवदत्ताम् ॥ ९७ ॥

उन्मत्तमासाद्य हरः स्मरश्च द्वावप्यसीमां मुदमुद्वहेते ।
पूर्वस्स्मरस्पर्धितया प्रसूनं नूनं द्वितीयो विरहाधिदूनम् ॥ ९८ ॥

विज्ञेनेति ॥ तस्मादुक्तकारणात्, विज्ञेन विवेकिना, त्वया समयं समीक्ष्य, इदं कार्यं अस्मिन्नरेन्द्रविषये, विज्ञाप्यम् । नन्वेवं कार्यविलम्बस्स्यादित्याशङ्क्य आह—**आत्यन्तिकेति** ॥ हे हंस, कार्यस्य आत्यन्तिकासिद्धिविलम्बसिद्ध्योर्मध्ये, आर्यस्य विदुषः ते तव, का कतरा, शुभा समीचीना, विभाति प्रतिभाति । अनवसरविज्ञापनेन कार्यविघाताद्दूरं विलम्बनेनापि कार्यसाधनमिति भावः ॥ ९६ ॥

इतीति ॥ इतीत्थं, उक्तवत्या तया भैम्या, लज्जा, अलोपि त्यक्तेति यत्, सा विधेयप्राधान्यात् स्त्रीलिङ्गनिर्देशः । अनौचिती अनौचित्यं कथं नोऽस्माकं शृण्वतां चेतसि चकास्तु । किंतु, तस्य लज्जात्यागस्य अदोषतायाम्, स्मरस्साक्षी प्रमाणं, यः स्मरः, तां भैमीं, उन्माद्य उन्मादावस्थां प्रापय्य, तत्तदनुचितं अवीवदत् वादयति स्म । वदतेर्णौ चङ् । "गतिबुद्धि" इत्यादिना वदतेरणिकर्तुः कर्मत्वम् । प्रकृतिस्थस्य स्मरस्यायं दोषो न कामोपहतचेतस इति भावः ॥ ९७ ॥

ननु कामो वा किमर्थमेवं कारयतीत्याशङ्क्य, तस्यायं निसर्गो यदुन्मत्तेन क्रीडतीति सदृष्टान्तमाह—**उन्मत्तमिति** ॥ हरः स्मरश्च द्वावपि, उन्मत्तमासाद्य असीमामनन्तां, मुदमुद्वहेते । 'वहे स्वरित' इत्यात्मनेपदम् । किंतु, तत्र निर्देशक्रमात्, पूर्वः पूर्वोक्तो हरः, स्मरस्पर्धितया स्मरद्वेषितया, प्रसूनं धुत्तूरकुसुमं, तस्य तदायुधतयेति भावः । नूनं द्वितीयः स्मरस्तु विरहाधिदूनं

तथाभिधात्रीमथ राजपुत्रीं निर्णीय तां नैषधबद्धरागाम् ।
अमोचि चञ्चूपुटमौनमुद्रा विहायसा तेन विहस्य भूयः ॥ ९९॥
इदं यदि क्ष्मापतिपुत्रि तत्त्वं पश्यामि तन्न स्वविधेयमस्मिन् ।
त्वामुच्चकैस्तापयता नलं च पञ्चेषुणैवाजनि योजनेयम् ॥ १०० ॥
त्वद्बद्धबुद्धेर्बहिरिन्द्रियाणां तस्योपवासव्रतिनां तपोभिः ।
त्वामद्य लब्ध्वामृततृप्तिभाजां स्वं देवभूयं चरितार्थमस्तु ॥ १०१॥

विरहव्यथातप्तं, उन्मादावस्थापन्नजनमित्यर्थः । तत्र विनोदलाभादिति भावः । 'उन्मत्त उन्मादवति दुस्तूरमुचिकुन्दयोः' इति विश्वः । उभयोरप्यभेदाध्यवसायात्समानधर्मत्वम् । विशेषणमात्रश्लेषात् प्रकृताप्रकृतगोचरत्वाच्चोभयश्लेषः । तेन हरवत् स्मरोऽपि उन्मत्तप्रिय इत्युपमा गम्यते ॥ ९८ ॥

तथेति ॥ अथानन्तरं, तथा अभिधात्रीं वक्त्रीं, तां राजपुत्रीं, नैषधे नले, बद्धरागां निर्णीय । तेन विहायसा विहङ्गेन, विहस्य भूयः पुनः, चञ्चूपुटमौनमुद्रा निर्वचनत्वम्, अमोचि अवादीत्यर्थः ॥ ९९ ॥

इदमिति ॥ हे क्ष्मापतिपुत्रि, इदं त्वदुक्तम्, तत्त्वं सत्यं, यदि तर्हि, अस्मिन्विषये स्वविधेयं मत्कृतं न पश्यामि । किंतु, त्वां नृपञ्च उच्चकैरत्यन्तं तापयता पञ्चेषुणैव इयं योजना युवयोः सङ्घटना, अजनि जनिता । जनेः कर्मणि चिण् । चिणो लुक् ॥ १०० ॥

त्वदिति ॥ किंतु, त्वद्बद्धबुद्धेस्त्वदासक्तचित्तस्य, त्वामेव ध्यायत इत्यर्थः । अत एव तस्य नलस्य, उपवासव्रतिनां त्वदासङ्गाद्विषयान्तरव्यावृत्तानां, तपोभिरुक्तोपवासव्रतरूपैः, अद्य त्वां लब्ध्वा मन्मुखेन लब्धप्रायां निश्चित्य साक्षात्कृत्येति च गम्यते । अत एवामृतेन या तृप्तिस्तद्भाजाम्, बहिरिन्द्रियाणां स्वं स्वकीयं, देवभूयं देवत्वमिन्द्रियत्वं सुरत्वञ्च । 'देवस्सुरे घने राज्ञि देवमाख्यातमिन्द्रियम्' इति विश्वः । चरितार्थं सफलम् अस्तु । अमृतपानैकफलत्वाद्देवत्वस्येति भावः । अर्थान्तरप्रतीतिर्ध्वनिरेवेत्यनुसन्धेयम् ॥ १०१॥

तुल्यावयोर्मूर्तिरभून्मदीया दग्धा परं सास्य न ताप्यतेऽपि ।
इत्यभ्यसूयन्निव देहतापं तस्याऽतनुस्त्वद्विरहाद्विधत्ते ॥ १०२ ॥
लिपिं दृशा भित्तिविभूषणं त्वां नृपः पिबन्नादरनिर्निमेषः ।
चक्षुर्जलैरार्जितमात्मचक्षूरागं स धत्ते रचितं त्वया नु ॥ १०३ ॥
पातुर्दृशालेख्यमयीं नृपस्य त्वामादरादस्तनिमीलयास्ति ।
ममेदमित्यश्रुणि नेत्रवृत्तेः प्रीतेर्निमेषच्छिदया विवादः ॥ १०४ ॥

यदुक्तं नृपश्च पञ्चेषुस्तापयतीति तदाह---**तुल्येति** ॥ आवयोः नलस्य मम चेत्यर्थः । "त्यदादीनि सर्वैर्नित्यम्" इति सर्वग्रहणात्त्यदादीनां नलेन सह समासे कृते त्यदादेरेकशेषः । मूर्तिस्तनुः, तुल्या तुल्यरूपा, अभूत् । अत्र मदीया सा मूर्तिः परं निश्शेषं, दग्धा भस्मीकृता । अस्य नलस्य, मूर्तिस्तु न ताप्यतेऽपि तापमपि न प्राप्यत इति हेतो, अभ्यसूयन्निव ईर्ष्यन्निवेत्युत्प्रेक्षा । अतनुरनङ्गः, त्वद्विरहात् त्वद्विरहमेव रन्ध्रमन्विष्येत्यर्थः । तस्य नलस्य, देहतापं विधत्ते । तस्मात् सिद्धिपदमुपतिष्ठते ते मनोरथ इति भावः ॥ १०२ ॥

अथास्य दशावस्थां वर्णयन् चक्षुःप्रीतिं तावत् श्लोकद्वयेनाह—**लिपिमिति** ॥ हे भैमि, स नृपः भित्तिविभूषणं कुड्यालङ्कारभूताम् । लिपिं चित्रमयीं त्वाम्, आदरेणास्थया, निर्निमेषः दृशा पिबन् । चक्षुर्जलैर्निर्निमेषत्वकृतैरश्रुभिः आर्जितं त्वया नु त्वया वा रचितम् । आत्मचक्षुषोरागमारुण्यमनुरागञ्च धत्ते । अत्रोभयकार्यसम्भवादुभयस्मिन्नपि रागे जाते श्लेषमहिम्ना एकत्रानभिमानात् कारणविशेषसन्देहः ॥ १०३ ॥

इममेवार्थं भङ्ग्यन्तरेणाह---**पातुरिति** ॥ अस्तनिमीलया निर्निमेषया दृशा आलेख्यमयीं चित्रगतां त्वां, आदरात् पातुः द्रष्टुरित्यर्थः । पिबतेस्तृन्प्रत्ययः । अत एव "न लोक" इत्यादिना षष्ठीप्रतिषेधात् त्वामिति द्वितीया । नृपस्य नेत्रवृत्तेः नेत्रप्रवृत्तेः प्रीतेश्चक्षुःप्रीतेः, निमेषस्य छिदया विच्छेदेन सह नेत्रवृत्त्येति शेषः । भिदादित्वादङ्प्रत्ययः । अश्रुणिविषये इदमश्रु । ममेति

त्वं हृद्गता भैमि बहिर्गतापि प्राणायिता नासिकयास्य गत्या ।
न चित्तमाक्रामति तत्र चित्रमेतन्मनो यद्भवदेकवृत्ति ॥ १०५ ॥

अजस्रमारोहसि दूरदीर्घां सङ्कल्पसोपानततिं तदीयाम् ।
श्वासान् स वर्षत्यधिकं पुनर्यद्ध्यानात्तव त्वन्मयतामवाप्य ॥१०६

मत्कृतं मत्कृतमिति । विवादः कलहोऽस्ति भवतीत्यर्थः । अतिगाढा चक्षुः-प्रीतिरित्यर्थः ॥ १०४ ॥

अथ मनस्सङ्गमाह—त्वमिति ॥ हे भैमि, त्वं बहिर्गतापि हृद्गता अन्तर्गता । 'अपिर्विरोधे' तस्याभासत्वाद्विरोधाभासोऽलङ्कारः । अस्य नलस्य, कया गत्या केन प्रकारेण, प्राणायिता प्राणवदाचरिता प्राणसमा, उपमानादाचारे कर्तुः क्यङ्प्रत्ययः । नासि अस्येनेत्यर्थः । यतः प्राणोऽपि नासिकया नासाद्वारा, अस्य गत्या मुखद्वारेणोच्छ्वासनिश्वासरूपेण, बहिर्गतोऽपि अन्तर्गतो भवतीति शब्दश्लेषः । अत एव प्राणायितेति श्लिष्टविशेषणेयमुपमा । पूर्वोक्तविरोधाभासेन सङ्कीर्णा । तत्र प्राणायितत्वे, चित्रं आश्चर्यरसः, चित्तं नाक्रामति न किञ्चि-च्चित्रमित्यर्थः । कुतः यद्यस्मादेतन्मनो नलचित्तम्, भवती त्वमेवैका वृत्तिर्जीविका यस्य तद्भवदेकवृत्ति, भवच्छब्दस्य सर्वनामत्वाद्वृत्तिमात्रे पुंवद्भावः । जीवित-प्राणायितत्वे किं चित्रम्, जीवितस्य प्राणधारणात्मकत्वादिति भावः ॥ १०५ ॥

अथ द्वाभ्यां सङ्कल्पावस्थामाह—अजस्रमिति ॥ दूरदीर्घामत्यायतां, तदीयां नलीयां, सङ्कल्पा मनोरथा एव सोपानानि, तेषां ततिं पङ्क्तिं, अजस्रं त्वमारोहसि, श्वासान् पुनः स नलः, अधिकं वर्षति मुञ्चतीति यत्, तच्छ्वास-वर्षणं, तव ध्यानात् त्वन्मयतां त्वदात्मकत्वं, अवाप्य प्राप्य, आप्नोतेराङ्समासे क्त्वो ल्यबादेशः । नूनमिति शेषः । अन्यथा कथमन्यायासादस्य श्वासमोक्ष इति भावः । अत्र श्वाससोपानारोहणयोः कार्यकारणयोर्वैयधिकरण्योक्तेरसङ्गत्यलङ्कारः । "कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः" इति लक्षणात् । तन्मूला चेयं नलस्य दमयन्तीतादात्म्योत्प्रेक्षेति सङ्करः ॥ १०६ ॥

हृत्तस्य यां मन्त्रयते रहस्त्वां तां व्यक्तमामन्त्रयते मुखं यत् ।
तद्वैरिपुष्पायुधमित्रचन्द्रसख्यौचिती सा खलु तन्मुखस्य ॥ १०७

स्थितस्य रात्रावधिशय्य शय्यां मोहे मनस्तस्य निमज्जयन्ती ।
आलिङ्ग्य या चुम्बति लोचने सा निद्राधुना न त्वदृतेऽङ्गना वा ॥

स्मरेण निस्तक्ष्य वृथैव बाणैर्लावण्यशेषां कृशतामनायि ।
अनङ्गतामप्ययमाप्यमानः स्पर्धां न सार्धं विजहाति तेन ॥ १०९

हृदिति ॥ तस्य नलस्य, हृत् हृदयं (कर्तृ), यां त्वां रहः उपांशु । 'रहश्चोपांशु चालिङ्ग' इत्यमरः । मन्त्रयते सम्भाषते । तां त्वां, मुखं (कर्तृ) व्यक्तं प्रकाशं, आमन्त्रयते सम्भाषते । हे प्रिये, क्व यासि मामनुयान्तं पश्येत्येव-मुच्चैरुच्चारयतीति यत् । सा तद्रहस्यप्रकाशनं, विधेयप्राधान्यात् स्त्रीलिङ्गता । तन्मुखस्य, तद्वैरिणो नलद्वेषिणः, पुष्पायुधस्य मित्रं सहचरश्चन्द्रः, तेन यत्सख्यं मैत्री सादृश्यं तस्यौचिती औचित्यं खलु । अरिमित्रमित्रस्याप्यरित्वादुचितमेतद्रहस्यभेदनमित्यर्थः । अत्र मुखकर्तृकरहस्योद्भेदनस्योक्तवैरनिमित्तकत्वमुत्प्रेक्ष्यते ॥

अथैकेन जागरमरतिं चाह—**स्थितस्येति** ॥ रात्रौ शय्यामधिशय्य शय्यायां शयित्वा । "अधिशीङ्स्थासां कर्म" इत्यधिकरणस्य कर्मत्वम् । स्थितस्य नलस्य मनः, मोहे सुखपारवश्ये, निमज्जयन्ती सती, या आलिङ्ग्य, लोचने चुम्बति । सा निद्रा त्वदृते त्वत्तो विना "अन्यारादितरर्ते" इत्यादिना पञ्चमी । त्वद्विरहाद्धेतोः त्वदन्या चेति द्रष्टव्यम् । अङ्गना वा अधुना नास्ति । निद्रानिषेधाज्जागरः, अङ्गनान्तरनिषेधाद्विषयद्वेषलक्षणा अरतिश्चोक्ता । अत्र निद्राङ्गनयोः प्रस्तुतयोरेवालिङ्गनाक्षिचुम्बनादिधर्मसाम्यादौपम्यप्रतीतेः केवल-प्रकृतगोचरा तुल्ययोगिता । "प्रस्तुताऽप्रस्तुतानाञ्च केवलं तुल्यधर्मतः । औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥" इति लक्षणात् ॥ १०८ ॥

अथ कार्श्यावस्थामाह—**स्मरेणेति** ॥ अयं नलः, स्मरेण बाणैः निस्तक्ष्य निशाय्य, वृथैव लावण्यं कान्तिविशेषः, "मुक्ताफलेषु च्छायाया-

त्वत्प्रापकात्त्रस्यति नैनसोऽपि त्वय्येव दास्येऽपि न लज्जते यत् ।
स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लून:स्वभावोऽपि कियान् किमस्य ॥

स्मारं ज्वरं घोरमपत्रपिष्णोस्सिद्धागदंकारचये चिकित्सौ ।
निदानमौनादविशद्विशाला साङ्क्रामिकी तस्य रुजेव लज्जा ॥ १११

स्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते" इति भूपालः । तदेव शेषो यस्यास्तां कृशतां कार्श्यं, अनायि नीतः । नयतेर्द्विकर्मकत्वादप्रधाने कर्मणि लुङ् । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति वचनात् । वृथात्वं व्यनक्ति । अनङ्गतां कृशाङ्गतां, अनुदरा कन्येतिवदीषदर्थे नञ्समासः । आप्यमानो नीयमानोऽपि पूर्ववदप्रधाने कर्मणि शानच्प्रत्ययः । तेन स्मरेण, सार्धं स्पर्धां न विजहाति, तथापि तं जिगीषत्येवेत्यर्थः । अङ्गकार्श्येऽपि स्पर्धाबीजस्य लावण्यस्याकार्श्यादङ्गकर्शनं वृथैवेति भावः । अत एव विशेषोक्तिरलङ्कारः । "तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते" इति लक्षणात् ॥ १०९ ॥

अथ द्वाभ्यां लज्जात्यागमाह—**त्वदित्यादि** ॥ स्मरेण तीक्ष्णैर्बाणैः, अतितक्ष्य । शरीरमिति शेषः । अस्य नलस्य, स्वभावोऽपि पापभीरुत्वनीचकृत्यगर्हतात्च्छील्यमपि, कियानल्पो लूनः किमित्युत्प्रेक्षा । कुतः, यद्यस्मात्, त्वत्प्रापकात्त्वत्प्राप्तिसाधनात् एनसः पापादपि, न त्रस्यति । "भीत्रार्थानां भयहेतुः" इत्यपादानत्वम् । एष नलः, त्वयि दास्येऽपि विषये न लज्जते ॥११०

स्मारमिति ॥ घोरं दारुणं, स्मारं ज्वरं कामसन्तापं, चिकित्सौ प्रतिकर्तरि, 'कित निवासे' इति धातोः, 'गुप्तिज्किद्भ्यस्सन्' निन्दा क्षमा व्याधिप्रतीकारेषु स्याप्यत इति रोगप्रतीकारार्थे सन्प्रत्ययः। "सनाशंसभिक्ष उः, न लोक" इत्यादिना षष्ठीप्रतिषेधः । सिद्धागदंकारचये सिद्धवैद्यसङ्घे । कर्मण्यच् । "कारे सत्यागदस्य" इति मुमागमः । निदानमौनाद्रोगनिदानानभिधानाद्धेतोः, अपत्रपिष्णोः लज्जाशीलस्य । "अलं कृञ्" इत्यादिना इष्णुच्प्रत्ययः । तस्य

बिभेति रुष्टासि किलेत्यकस्मात्स त्वां किलोपेत्य हसत्यकाण्डे ।
यान्तीमिव त्वामनुयात्यहेतोरुक्तस्त्वयेव प्रतिवक्ति मोघम् ॥ ११२
भवद्वियोगाभिदुरार्तिधारायमस्वसुर्मज्जति निश्शरण्यः ।
मूर्छामयद्वीपमहान्ध्यपङ्के हाहा महीभृद्भटकुञ्जरोऽयम् ॥ ११३ ॥
सव्यापसव्यत्यजनाद्द्विरुक्तैः पञ्चेषुबाणैः पृथगर्जितासु ।
दशासु शेषा खलु तद्दशा या तया नभःपुष्प्यतु कोरकेण ॥

नलस्य, विशाला महती, लज्जा सङ्क्रमादागता साङ्क्रामिकी, रुजेव । 'अक्षिरोगो ह्यपस्मारः क्षयः कुष्ठं मसूरिका । दर्शनात् स्पर्शनाद्दानात् सङ्क्रामन्ति नरान्नरम्' इत्युक्तरोग इवेत्यर्थः । भिदादित्वादङ्प्रत्ययः । अविशत्, अज्ञातनिदाना हि लज्जाभाजिनो भवन्तीत्यर्थः ॥ १११ ॥

अथोन्मादावस्थामाह --**बिभेतीति** ॥ स नलः, अकस्मात् अकाण्डे रुष्टा कुपितासि, किलेति बिभेति । अकाण्डे अनवसरे, त्वामुपेत्य किल प्राप्येव, हसति । अहेतोरकस्माद्यान्तीमिव गच्छन्तीमिव, त्वामनुयाति । त्वयोक्त इव मोघं निर्विषयं प्रतिवक्ति । सर्वोऽयमुन्मादानुभावः । उन्मादश्चित्तविभ्रमः ॥११२

अथ मूर्छावस्थामाह--**भवदिति** ॥ भवत्या वियोगो भवद्वियोगः । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । तस्मिन् अभिदुरा अविच्छिन्ना । विच्छिदेः कुरच् । आर्तिधारा दुःखपरम्परा, तस्या एव यमस्वसुः यमुनायाः, **मूर्छामयं** मूर्छावस्थारूपं द्वीपम्, तत्र यन्महान्ध्यं महामोहः, तस्मिन्नेव पङ्के, अयं महीभृद्भटो राजवीरः, स एव कुञ्जरः, शरण्यः त्राणसमर्थः । "तत्र साधुः" इति यत्प्रत्ययः । तद्रहितो निश्शरण्यः निरालम्बस्सन्, मज्जति । हाहेति खेदे । रूपकालङ्कारः । आर्तिधारायास्तमोविकारत्वेन रूपसाम्याद्यमुनारूपणम् ॥ ११३ ॥

दशमावस्था तु तस्य कदापि सुगमा मा भूदित्याह--**सव्येति** ॥ सव्यापसव्याभ्यां वामदक्षिणाभ्यां, त्यजनान्मोचनात्, द्विरुक्तैः द्विगुणीकृतैः,

त्वयि स्मराधेस्सततास्मितेन प्रस्थापितो भूमिभृतास्मि तेन ।
आगत्य भूतस्सफलो भवत्या भावप्रतीत्या गुणलोभवत्याः ॥ ११५

धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥

दशभिरित्यर्थः । पञ्चेषुबाणैः पृथगर्जितासु प्रत्येकमुत्पादितासु, दशासु । "दृङ्मनःसङ्गसङ्कल्पो जागरः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्छान्ता इत्यनङ्ग दशा दश ॥" इत्युक्तासु चक्षुःप्रीत्यादिदशावस्थासु । शेषा अवशिष्टा या तद्दशा खलु तद्दशापि दशमावस्थेत्यर्थः । तयैव कोरकेण कलिकयेति रूपकम् । नभः-पुष्प्यतु नभः पुष्पितमस्तु । मा दशा खपुष्पकल्पास्तु, कदापि मा भूदित्यर्थः । तव त्वत्प्राप्तिलाभादित्यर्थः । पुष्प विकसन इति धातोः दैवादिकत्वाच्छयन् ॥

किं बहुना—**त्वयीति** ॥ अहमपि, त्वयि विषये, स्मराधेः कामदुःखा-द्धेतोः, सततमस्मितेन नित्यखिन्नेन, तेन भूमिभृता नलेन, प्रस्थापितोऽस्मि । अथागत्य, गुणलोभवत्याः भवत्यास्तव, भावप्रतीत्या अभिप्रायज्ञानेन, सफलोभूतः सिद्धार्थोऽस्मीत्यर्थः ॥ ११५ ॥

धन्यासीति ॥ हे वैदर्भि भैमि, वैदर्भी रीतिरपि गम्यते । धनं लब्धा धन्या कृतार्थासीत्यर्थः । "धनगणं लब्धा" इति यत्प्रत्ययः । कुतः, यया त्वया उदारैरुत्कृष्टैः, गुणैः लावण्यादिभिः । अन्यत्र, कोपप्रसादादिभिः, पाशैश्चेति गम्यते । नैषधः नलोऽपि, तादृग्विधोऽपीत्यर्थः । समाकृष्यत सम्यगाकृष्टः वशीकृत इत्यर्थः । एतेन वैदर्भीरीत्या श्लेषादिगुणैर्भावैः, कविरिवेत्युपमालङ्कारो व्यज्यते । तथा हि, चन्द्रिकायाः, अब्धिमपि अतिगम्भीरमपीत्यर्थः, उत्तरली करोति क्षोभयतीति यत् । इतोऽधिका स्तुतिर्वर्णना । का खलु न कापीत्यर्थः दृष्टान्तालङ्कारः । तेन नलस्य समुद्रगाम्भीर्यं दमयन्त्याश्चन्द्रिकासौन्दर्यंश्च व्यज्यते ॥ ११६ ॥

नलेन भायाश्शशिना निशेव त्वया स भायान्निशया शशीव ।
पुनःपुनस्तद्युगयुग्विधाता स्वभ्यासमास्ते नु युवां युयुक्षुः ॥ ११७

स्तनद्वये तन्वि परं तवैव पृथौ यदि प्राप्स्यति नैषधस्य ।
अनल्पवैदग्ध्यविवर्धिनीनां पत्रावळीनां रचना समाप्तिम् ॥११८॥

एकस्सुधांशुर्न कथञ्चन स्यात्तृप्तिक्षमस्त्वन्नयनद्वयस्य ।
त्वल्लोचनासेचनकस्तदस्तु नलास्यशीतद्युतिसद्वितीयः ॥ ११९ ॥

फलितमाह—**नलेनेति** ॥ शशिना निशेव त्वं नलेन भायाः भाहि । भातेराशिषि लिङ् । सोऽपि निशया शशीव त्वया भायात् भातु । पूर्ववल्लिङ् । किञ्च, अत्र दैवानुकूल्यमपि सम्भाव्यत इत्याह—पुनःपुनः मुहुर्मुहुः, तयोर्निशाशशिनोः युगं युग्मं, युनक्ति योजयतीति तद्युगयुक् । क्विप् । विधाता, युवां त्वां नलञ्च । "त्यदादीनि सर्वैर्नित्यम्" इत्येकशेषः । योक्तुमिच्छुः युयुक्षुः । युजेः सन्नन्तादुप्रत्ययः । स्वभ्यासं अभ्यासस्य समृद्धौ, निरन्तराभ्यास इत्यर्थः । समृद्ध्यर्थेऽव्ययीभावः । ततः परस्याः सप्तम्याः वैकल्पिकोऽम्भावः । आस्ते नु, अद्यापि अभ्यस्यति किमित्यर्थः । अत्र तादर्थ्ये चतुर्थ्यामम्भाव इति व्याख्याने अभ्यासार्थमभ्यस्यतीत्यर्थः स्यात् । तथा चात्माश्रयस्स्यादित्युपेक्षणीयम् । अत्र दमयन्तीनलयोरन्योन्यशोभाजननोक्तेरन्योन्यालङ्कारः । परस्परक्रियाजननमन्योन्यमिति लक्षणात् । स चोपमाद्वयानुप्राणित इति सङ्करः । तन्मूला चेयं विधातुः पुनःपुनः निशाशशियोजनायां दमयन्तीनलयोजनार्थाभ्यासत्वोत्प्रेक्षेति सङ्करः ॥

स्तनद्वय इति ॥ किञ्च, नैषधस्य नलस्य, अनल्पेन महता, वैदग्ध्येन नैपुण्येन, विवर्धिनीनामुज्जृम्भितानां, पत्रावळीनां रचना, समाप्तिं सम्पूर्णतां प्राप्स्यति यदि, तर्हि, हे तन्वि, पृथौ पृथुनि, भाषितपुंस्कत्वाद्विकल्पेन पुंवद्भावः, तवैव परं स्तनद्वये नान्यस्याः स्तनद्वय इत्यर्थः । अन्यासामयोग्यत्वादिति भावः ॥

एक इति ॥ एकः सुधांशुः त्वन्नयनद्वयस्य, कथञ्चन कथञ्चिदपि, तृप्तौ प्रीणने, क्षमो न स्यात् । तत्तस्मात्, नलास्यशीतद्युतिना नलमुखचन्द्रेण

अहो तपःकल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः ।
त्वद्भ्रूयुगं यस्य खलु द्विपत्री तवाधरो रज्यति यत्कलम्बः ॥ १२०
यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवास्ते ।
अङ्गम्रदिम्ना तव पुष्पितो यः स्तनश्रिया यः फलितस्तवैव ॥

सद्वितीयः सन् । त्वल्लोचनयोरासेचनकः अनन्ततृप्तिकरोऽस्तु । 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' इत्यमरः । आ सिच्यते आप्यतेऽनेनेत्यासेचनः । करणे ल्युट् । स एवासेचनकः ॥ ११९ ॥

अथ द्वाभ्यां नलतपःसाफल्यमाह—**अहो इत्यादि** ॥ नलस्यायं नलीयः । "वा नामधेयस्य" इति वृद्धसंज्ञा, "वृद्धाच्छः" । तप एव कल्पतरुः, प्रसिद्धकल्पतरुविलक्षण इत्यर्थः । अत एवाहो इत्याश्चर्यम् । वैलक्षण्यमेवाह—**त्वदिति** ॥ अत्रापि यच्छब्दो द्रष्टव्यः । यः कल्पतरुः, तव पाणिजाग्रैः करुहाग्रैरेव स्फुरन्ती, अङ्कुरश्रीर्यस्य सः, अङ्कुरवानित्यर्थः । यस्य त्वद्भ्रूयुगमेव, द्वयोः पत्रयोः समाहारः द्विपत्री, प्रथमोत्पन्नं पत्रद्वयं खलु । तवाधरो यत्कलम्बः यस्य नालिका किसलयकाण्ड इत्यर्थः । 'अस्य तु नालिका । कदम्बश्च कलम्बश्च' इत्यमरः । रज्यति स्वयमेव रक्तो भवति । "कुषिरजोः प्राचां श्यन् परस्मैपदञ्चेति कर्मकर्तरि रूपम् ॥ १२० ॥

य इति ॥ यस्ते तव, कराभ्यां पल्लवितः सञ्जातपल्लवः, नवोऽभिनवः, प्रसिद्धकल्पतरुविलक्षण इत्यर्थः । यः तव स्मितेन कोरकितस्सञ्जातकोरकस्सन्नास्ते । यस्तवाङ्गानां म्रदिम्ना मार्दवेन, पुष्पितः सञ्जातपुष्पः । यः तवैव, स्तनश्रिया स्तनसौन्दर्येण, फलितः सञ्जातफलः । सर्वत्र तारकादित्वादितच्प्रत्ययः । अत्र श्लोकद्वये नलतपसि दमयन्तीनखादिषु च कल्पतरुतदवयवत्वरूपणात्सावयवरूपकम् । तच्चावयविनः कल्पतरोरवयवानां नखाङ्कुरादीनां च मिथः कार्यकारणभूतानां भिन्नदेशत्वादसङ्गत्याश्रितमिति सङ्करः । "कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः" इति लक्षणात् ॥ १२१ ॥

कंसीकृतासीत्खलु मण्डलीन्दोः संसक्तरश्मिप्रकरा स्मरेण ।
तुला च नाराचलता निजैव मिथोऽनुरागस्य समीकृतौ वाम् ॥

सत्वस्रुतस्वेदमधूत्थसान्द्रे तत्पाणिपद्मे मदनोत्सवेषु ।
लग्नोत्थितास्त्वत्कुचपत्ररेखास्तन्निर्गतास्तं प्रविशन्तु भूयः ॥ १२३॥

बन्धाढ्यनानारतमल्लयुद्धप्रमोदितैः केळिवने मरुद्भिः ।
प्रसूनवृष्टिं पुनरुक्तमुक्तां प्रतीच्छतं भैमि युवां युवानौ ॥ १२४ ॥

किञ्च, समानुरागित्वाच्च युवयोः समागमः श्लाघ्य इत्याशयेनाह — **कंसीकृतेति** ॥ स्मरेण (कर्त्रा), वां युवयोः, मिथोऽनुरागस्य अन्योन्यानुरागस्य, यस्तव तस्मिन्, यश्च त्वयि तस्य तयोरनुरागयोरित्यर्थः । समीकृतौ समीकरणे निमित्ते, तदर्थमित्यर्थः । संसक्तः संयोजितः, रश्मीनामंशूनां, सूत्राणाञ्च, प्रकरः समूहो यस्यां सा । 'किरणप्रग्रहौ रश्मी' इत्यमरः । इन्दोर्मण्डली बिम्बम्, कंसीकृता लोहपात्रीकृता, आसीत् । 'कंसोऽस्त्री लोहभाजनम्' इति शाब्दिकमण्डने । निजा नाराचलता शरशलाकैव, तुला च तुलादण्डश्च, कृतेति शेषः । अत्रेन्दुमण्डलादौ कंसादिरूपणादेव स्मरे तोलकत्वरूपणासिद्धेरेकदेशवर्तिरूपकम् ॥

सत्वेति ॥ किञ्च, मदनोत्सवेषु सुरतकेळिषु, सत्वेन मनोविकारेण, स्रुतो यः स्वेदः, सत्वविकारविशेष , तेनैव मधूत्थेन मधूच्छिष्टेन, सान्द्रे निरन्तरे । अत एव तस्य नलस्य पाणिपद्मे, लग्नाः सङ्क्रान्ताः, अत एवोत्थिताः त्वत्कुचतटाद्विश्लिष्टाः, मधूच्छिष्टे निकषस्थकनकरेखावदिति भावः । स्नातानुलिप्तवत् पूर्वकालसमासः । तन्निर्गताः तत्पाणिपद्मोत्पन्नाः, त्वत्कुचपत्ररेखाः भूयः तं तत्पाणिपद्मम् । 'वा पुंसि पद्मं नळिनम्' इत्यमरः । प्रविशन्तु । कार्यस्य कारणे लयनियमादिति भावः । युवयोः समागमोऽस्त्विति तात्पर्यार्थः ॥ १२३॥

बन्धेति ॥ किञ्च, हे भैमि, बन्धैर्ध्यानतादिकरणैः कामतन्त्रप्रसिद्धैः, आढ्यं समग्रं, नानारतं उत्तानकादिविविधसुरत, तदेव मल्लयुद्धम् । तेन

अन्योन्यसङ्गमवशादधुना विभातां तस्यापि तेऽपि मनसी विकस-
त्स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तमादाविव द्व्यणुककृत्परमाणुयुग्मम् ॥

काम: कौसुमचापदुर्जयममुं जेतुं नृपं त्वां धनु-
र्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ ।
ग्रीवालङ्कृतिपट्टसूत्रलतया पृष्ठे कियल्लम्बया
भ्राजिष्णुं कषरेखयेव निवसत्सिन्दूरसौन्दर्यया ॥ १२६ ॥

प्रमोदितैस्तोषितैः, केळिवने मरुद्भिर्वायुभिः, देवैश्च । 'मरुतौ पवनामरौ' इत्यमरः । पुनरुक्तं सान्द्रं यथा तथा, मुक्तां प्रसूनवृष्टिं पुष्पवर्षं, युवतिश्च युवा च युवानौ । "पुमान् स्त्रिया" इत्येकशेषः । प्रतीच्छतं स्वीकुरुतम् । युद्धविश्रान्ता हि देवैः पुष्पवृष्ट्या सम्भाव्यन्त इति भावः ॥ १२४ ॥

अन्योन्येति ॥ किञ्च, अधुना, अन्योन्यसङ्गमवशात्, विकसद्विलासे वर्धमानोल्लासे, तस्यापि तेऽपि नलस्य तव च मनसी, मनसिजस्य कामस्य, तनुं शरीरं, पुनः स्रष्टुं, प्रवृत्तं आरब्धम् । अत एव आदौ द्वाभ्यामारब्धं कार्यं द्व्यणुकं, करोतीति यत्, तदारम्भकम् । करोतेः क्विपि तुक् । परमाणुयुग्म-मिवेत्युत्प्रेक्षा । तार्किकमते मनसोऽणुत्वादिति भावः । विभातां कार्यावष्टब्ध-परमाणुयुगळवदविशेषेण विराजतामित्यर्थः । भातेर्लोट् । तसस्तामादेशः ॥

काम इति ॥ असौ, यो नलजिगीषुरिति भावः । कामः, कौसुमेन पौष्पेण, चापेन दुर्जयं जितेन्द्रियत्वादिति भावः । अमुं नृपं, नलञ्च, जेतुम् । अव्रणवंशजां सत्कुलप्रसूतां, दृढवेणुजन्यां च । "द्वौ वंशौ कुलमस्करौ" इत्यमरः । अधिगुणां अधिकलावण्यगुणां, अधिज्यांच । किञ्च, निवसदनुवर्त-मानं सिन्दूरस्य अङ्कुरावस्थायां नालान्तरालक्षितस्य, सौन्दर्यं शोभा यस्यां तया कषरेखया । कालान्तरे सिन्दूरसङ्क्रान्तिपरीक्षार्थकृतघर्षणरेखयेवेत्युत्प्रेक्षा

त्वद्गुच्छावाळमौक्तिकानि गुळिकास्तं राजहंसं विभो-
र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीम् ।
यस्याः नित्याङ्कनिवासलालिततमज्याभुज्यमानं लस-
न्नाभीमध्यबिला विलासमखिलं रोमाळिरालम्बते ॥ १२७

पृष्ठे ग्रीवापश्चाद्भागे, कियत्किञ्चिद्यथा तथा, लम्बया स्रस्तया, ग्रीवालङ्कृतिः कण्ठालङ्कारभूता, या पट्टसूत्रलता, तया, भ्राजिष्णुं ताच्छील्येन भ्राजमानाम् । "भुवश्च" इति चकारादिष्णुच्प्रत्ययः । त्वामेव धनुर्वल्लीं चापलतां, आसाद्य, माद्यति हृष्यति । श्लेषोत्प्रेक्षासंकीर्णरूपकालङ्कारः ॥ १२६ ॥

त्वदिति ॥ किञ्च, विभोर्मनोभुवः कामस्य लक्ष्यवेद्धुरिति शेषः । तव गुच्छावळेर्मुक्ताहारविशेषस्य, मुक्ता एव मौक्तिकानि, 'विनयादित्वात् स्वार्थे ठक्' इति वामनः । गुळिकाः उण्डकान्, विद्धि जानीहि । तं राजहंस, राजश्रेष्ठं, तमेव राजहंसं कलहंसं, श्लिष्टरूपकम् । 'राजहंसो नृपश्रेष्ठे कादम्बकलहंसयोः' इति विश्वः । वेधितुं प्रहर्तुं, अर्हं वेध्यं लक्ष्यम् । विध वेधने । "ऋहलोर्ण्यत्" अनेकार्था धातवः । एवमेवाह—"वेधितच्छिद्रितौ' इत्यत्र क्षीरस्वामी । अन्येऽप्याहुः । स्वल्पेऽपि विधानार्थे प्रयोगश्च । विध वेधन इत्यवाकरस्थः पाठः। पाठान्तरं तु प्रामादिकमयुक्त परम्परायातम् । इति विद्धि । स्वमात्मानमपि, 'स्वो ज्ञातावात्मनि स्वम्' इत्यमरः । तां वक्ष्यमाणप्रकारां, मञ्जुं मञ्जुळां, धनुर्मञ्जरीं चापवल्लरीं, विद्धि । यस्याः धनुर्मञ्जर्याः, नित्यमङ्कनिवासेन समीपस्थित्या, लालिततमया अत्यादृतया, ज्यया मौर्व्या, भुज्यमानं अनुभूयमानं, अखिलं विलासं शोभां, ज्यारूपमित्यर्थः । लसन्नाभ्येव मध्यबिलं गुळिकास्थानं, यस्याः सा, रोमावळिः त्वद्रोमराजिः, आलम्बते भजते । अत्र मौक्तिकादौ गुळिकाद्यवयवरूपणात्, अवयविनि कामे धृद्धत्वरूपणस्य गम्यमानत्वादेकदेशवर्तिसावयवरूपकम् ॥ १२७ ॥

पुष्पेषुश्चिकुरेषु ते शरचयं स्वं फालमूले धनू
रौद्रे चक्षुषि यज्जितस्तनुमनुभ्राष्ट्रं च यश्चिक्षिपे ।
निर्विद्याश्रयदाश्रमं स वितनुस्त्वां तज्जयायाधुना
पत्रालिस्त्वदुरोजशैलनिलया तत्पर्णशालायते ॥ १२८ ॥

इत्यालपत्यथ पतत्रिणि तत्र भैमीं
सख्यश्चिरात्तदनुसन्धिपराः परीयुः ।

पुष्पेषुरिति ॥ यः पुष्पेषुः कामः, यज्जितः येन नलेन, सौन्दर्यात्पराभूतः । अत एव निर्विद्य ईर्ष्यया जीवनवैयर्थ्यं मत्वेत्यर्थः । "तत्त्वज्ञानवदीर्ष्यादेर्निर्वेदो निष्फलत्वधीः" इति लक्षणात् । ते तव, चिकुरेषु, स्वं स्वकीयं, शरचयं, त्वदुप्तकुसुमव्याजादिति भावः । फालमूले ललाटभागे, धनुः, भ्रूव्याजादिति भावः । तथा रौद्रे रुद्रसम्बन्धिनि, चक्षुष्येव । अनुभ्राष्ट्रं अम्बरीषे । विभक्त्यर्थेऽव्ययीभावः । 'क्लीबेऽम्बरीषं भ्राष्ट्रो न' इत्यमरः । तनुं शरीरं, चिक्षिपे क्षिप्तवान् । तद्दग्धतनुव्याजादिति भावः । स्वरितत्वात्तङ् । स पुष्पेषुः वितनुरनङ्गस्सन् अधुना तज्जयाय नलविजयार्थं, त्वामेवाश्रमं तपोवनं, आश्रयत् आश्रितवान्, तपश्चर्यार्थमिति शेषः । अन्यथा, कथमेनं जेष्यतीति भावः । अत एव त्वदुरोजे एव शैलो निलयो यस्यास्सा तन्निष्ठेत्यर्थः । पत्रालिः पत्ररचना पत्रचयश्च, तस्य कामस्य पर्णशालायते । सेव आचरतीत्युपमानात् कर्तुः क्यङ् । अत्र पूर्वार्धे शरचापादीनां पूर्वोक्तपुष्पादिविषयनिगरणेन तदभेदाध्यवसायात् भेदे अभेदलक्षणातिशयोक्तिः । तया तत्पर्णशालायत इत्युपमया चोत्थापितेन त्वामाश्रममिति रूपकेण सङ्कीर्णा व्यञ्जकाप्रयोगाद्गम्या । कामस्याश्रमाश्रयणोत्प्रेक्षेति सङ्करः ॥ १२८ ॥

इतीति ॥ तत्र तस्मिन्, पतत्रिणि भैमीमितीत्थमालपत्याभाषमाणे सति, अथास्मिन्नवसरे, चिरात् प्रभृति, तस्या भैम्याः, अनुसन्धिरन्वेषणम् । "उपसर्गे

शर्मास्तु ते विसृज मामिति सोऽप्युदीर्य
वेगाज्जगाम निषधाधिपराजधानीम् ॥ १२९ ॥

चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रय-
त्प्रेयोदूतपतङ्गपुङ्गवगवीहैयङ्गवीनं रसात्।
स्वादंस्वादमसीम मृष्टसुरभि प्राप्तापि तृप्तिं न सा
तापं प्राप नितान्तमन्तरतुलामानर्छ मूर्छामपि ॥ १३० ॥

घोः किः"। तत्पराः सख्यः, परीयुः तां परिवव्रुः। इणो लिट्। अथ स हंसोऽपि ते तव, शर्म सुखमस्तु, मां विसृजेत्युदीर्य उक्त्वा वेगान्निषधाधिपराजधानीं जगाम ॥

चेत इति ॥ सा भैमी, चेतोजन्मनः कामस्य, शरप्रसूनानां शरभूत-पुष्पाणां, मधुभिस्तद्रसैः, क्षौद्रैश्च। 'मधु मद्ये पुष्परसे क्षौद्रेऽपि' इत्यमरः। व्यामिश्रतामाश्रयत्, मधुमिश्रं सदित्यर्थः। असीम निस्सीम अपरिमित-मित्यर्थः। नकारान्तोत्तरपदबहुव्रीहिः। मृष्टमतिशुद्धमकपटम्, अन्यत्रामलं, तच्च तत्सुरभि श्राव्यं सुगन्धि च। खञ्जकुब्जवद्विशेषणसमासः। प्रेयसो नलस्य, दूतः सन्देशहरो यः पतङ्गः पुङ्गव इवेति पतङ्गपुङ्गवः हंसः, पुमान् गौः पुङ्गवः। "गोरतद्धितलुकि" टच्प्रत्ययः। तस्य गवी वाक् तद्गवी, पूर्ववत्। "टिड्ढाणञ्" इत्यादिना ङीप्। सैव हैयङ्गवीनं गोदोहोद्भवं, घृतमित्यवयवरूपकम्। "हैयङ्गवीनं संज्ञायाम्" इति निपातः तत्। गवी धेनुस्तस्या इति गम्यते। रसाद्रागात्, स्वादं स्वादं पुनःपुनरास्वाद्य। आभीक्ष्ण्ये णमुल्प्रत्ययः। पौनःपुन्यमा-भीक्ष्ण्यमाभीक्ष्ण्ये द्वे भवत इत्युपसङ्ख्यानाद्द्विरुक्तिः। अतुलां अन्तस्तृप्तिं प्राप्तापि, अपिर्विरोधे। नितान्तं तापं न प्राप। मूर्छां नानर्छ नावाप। "ऋच्छत्यृताम्" इति गुणः। "अत आदेः" इत्यभ्यासाकारस्य दीर्घे। "तस्मान्नुड्द्विहल" इति नुट्। मधुमिश्रघृतस्य विषत्वात्तत्पानेऽपि तापाद्यभाव इति विरोधः। स च पूर्वोक्तरूपकोत्थापित इति सङ्करः। "भजते विषरूपत्वं तुल्यांशे मधुसर्पिषोः" इति वाहटः ॥ १३० ॥

तस्या दृशो वियति बन्धुमनुव्रजन्त्या-
स्तद्बाष्पवारि न चिरादवधिर्बभूव ।
पार्श्वेऽपि विप्रचकृषे तदनेन दृष्टे-
रारादपि व्यवदधे न तु चित्तवृत्तेः ॥ १३१ ॥

अस्तित्वं कार्यसिद्धेः स्फुटमथ कथयन् पक्षयोः कम्प्रभेदै-
राख्याता वृत्तमेतन्निषधनरपतौ सर्वमेकः प्रतस्थे ।
कान्तारे निर्गतासि प्रियसखि पदवी विस्मृता किन्नु मुग्धे
मा रोदीरेहि यामेत्युपहृतवचसो निन्युरन्यां वयस्याः ॥

तस्या इति ॥ वियत्याकाशे, बन्धुमनुव्रजन्त्यास्तस्यादृशो भैमीदृष्टेः, तद्बाष्पवारि बन्धुजनविप्रयोगजन्यं, तदृग्जलमव, न चिरादचिरात्, अवधिर्बभूव। 'ओदकान्तं प्रियं पान्थमनुव्रजेत्' इति शास्त्रात्तत् सीमाभूदित्यर्थः। ततस्माद्बाष्पोदयादेव हेतोः, अनेन हंसेन, पार्श्वेऽपि समीपेऽपि, दृष्टेः विप्रचकृषे विप्रकृष्टेनाभावि। बाष्पावरणात्समीपस्थोऽपि नालक्ष्यतेत्यर्थः। चित्तवृत्तेस्तु, आराद्दूरेऽपि न व्यवदधे व्यवहितेन नाभावि। स्नेहबन्धान्मनसा नातीत इत्यर्थः। उभयत्रापि भावे लिट्। समीपस्थस्य विप्रकृष्टत्वं, दूरस्थस्य सन्निकृष्टत्वं चेति विरोधाभासोऽलङ्कारः ॥ १३१ ॥

अस्तित्वमिति ॥ अथैनयोरेको हंसः, पक्षयोः कंप्रभेदैः चेष्टाविशेषैः, कार्यसिद्धेः अस्तित्वं सत्ताम्। अस्तीत्यव्ययं विद्यमानपर्यायः। तस्मात् त्वप्रत्ययः। स्फुटं कथयन् व्यक्तं सूचयन्। वृत्तं निष्पन्नमेतत्सर्वम्। निषधनरपतौ नले विषये आख्याता। तस्मै निवेदयिष्यामीत्यर्थः। प्रतस्थे। अन्यां दमयन्तीं, वयसा तुल्या वयस्याः सख्यः। "णौवय" इत्यादिना यत्प्रत्ययः। हे प्रियसखि मुग्धे, कान्तारे विषमे, निर्गतासि कथं प्रविष्टासीत्यर्थः। पदवी विस्मृता किन्नु, मा रोदीः, एहि याम गच्छामेत्युपहृतवचसः दत्तवचनास्सख्यः, निन्युः ॥ १३२ ॥

सरसि नृपमपश्यद्यत्र तत्तीरभाजः
स्मरतरलमशोकानोकहस्योपमूलम् ।
किसलयदळतल्पम्लापिनं प्राप तं स
ज्वलदसमशरेषुस्पर्धिपुष्पर्धिमौळेः ॥ १३३ ॥

परवति दमयन्ति त्वां न किञ्चिद्वदामि
द्रुतमुपनय किं मामाह सा शंस हंस ।
इति वदति नलेऽसौ तच्छशंसोपनम्रः
प्रियमनु सुकृताञ्च स्वस्पृहाया विलम्बः ॥ १३४ ॥

सरसीति ॥ स हंसो यत्र सरसि नृपमपश्यत् पूर्वं दृष्टवान्, तस्य सरसस्तीरभाजः तटरुहस्य ज्वलद्भिरसमशरस्य पञ्चेषोरिषुभिः स्पर्धत इति तत्स्पर्धिनी सदृशी, पुष्पर्धिः पुष्पसमृद्धिः, मौळौ शिखरे यस्य तस्याशोका-नोकहस्याशोकवृक्षस्य, उपमूलं मूलसमीपे । विभक्त्यर्थेऽव्ययीभावः । स्मरेण तरळं चपलं, किसलयदळतल्पं पल्लवपत्रशयनं म्लापयति स्वाङ्गदाहेन ग्लपयतीति तथोक्तम् । तं नृपं प्राप ॥ १३३ ॥

परवतीति ॥ परवति पराधीने, दमयन्ति त्वां न किञ्चिद्वदामि नोपालभे । किञ्च, हे हंस, द्रुत शीघ्रमुपनय समागच्छ । सा दमयन्ती मां किमाह, शंस कथय, इति नले वदति भ्रान्त्या पुरोवर्तिनमिव, सम्बोध्यालपति सति, असौ हंसः, उपनम्रः पुरोगतस्सन्, तत्सर्वं शशंस कथयामास । तथाहि, सुकृतां साधूनां, "सुकर्मपापमन्त्रपुण्येषु कृञः" इति क्विप् । प्रियमनु इष्टार्थं प्रति, स्वस्पृहाया एव विलम्बः । न त्विच्छानन्तरं तत्सिद्धेर्विलम्ब इति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ १३४ ॥

कथितमपि नरेन्द्रश्शंसयामास हंसं
किमिति किमिति पृच्छन् भाषितं स प्रियायाः ।
अधिगतमतिवेलानन्दमार्द्वीकमत्तः
स्वयमपि शतकृत्वस्तत्तथान्वाचचक्षे ॥ १३५ ॥

श्रीहर्षं कविराजराजिमकुटालङ्कारहीरस्सुतं
श्रीहीरस्सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥

कथितमिति ॥ स नरेन्द्रो नलः, कथितमपि प्रियायाः दमयन्त्याः, भाषितं वचनम् । किमिति किमिति पृच्छन् हंसं शंसयामास पुनःपुनराख्यापयामास । किञ्च, अतिवेलोऽतिमात्रः य आनन्दः, स एव मार्द्वीकः मृद्वीकाविकारं द्राक्षामयम् । 'मृद्वीका गोस्तनी द्राक्षा' इत्यमरः । तेन मत्तः अधिगतं सम्यग्गृहीतं तत्तदुक्तम् । स्वयमपि, शतकृत्वः शतवारम् । सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् । तथा तदुक्तप्रकारेण, अन्वाचचक्षे अनूदितवान् । मत्तो ह्युक्तमेव पुनःपुनः प्रवक्तीति भावः ॥ १३५ ॥

श्रीहर्षमिति ॥ श्रीहर्षमित्यादिसुगतम् । तृतीय एव तार्तीयीकः, द्वितीयतृतीयाभ्यामीकक् स्वार्थे वक्तव्यः । तस्य भावस्तत्ता । तया मितस्तृतीय इत्यर्थः । शेषं सुगमम् ॥ १३६ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्यायकोलचल-
मल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने
तृतीयः सर्गः समाप्तः ।

॥ चतुर्थः सर्गः ॥

अथ नलस्य गुणं गुणमात्मभूस्सुरभि तस्य यशःकुसुमं धनुः ।
श्रुतिपथोपगतं सुमनस्तया तमिषुमाशु विधाय जिगाय ताम् ॥ १ ॥

यदतनुज्वरभाक्तनुते स्म सा प्रियकथासरसीरसमज्जनम् ।
सपदि तस्य चिरान्तरतापिनी परिणतिर्विषमा समपद्यत ॥ २ ॥

अथ राज्ञः स्वयंवरं प्रत्युपोद्घातत्वेनास्मिन्सर्गे भैम्या मदनावस्थां वर्णयितुमारभते—**अथेत्यादि** ॥ अथ भैम्याः प्रियसन्देशश्रवणानन्तरं, आत्मभूः कामः, नलस्य गुणः आत्मोत्कर्षहेतुशौर्यसौन्दर्यादिकोधर्मः, तमेव गुणं मौर्वी, विधाय । सुरभि सुगन्धि, मनोज्ञञ्च । 'सुगन्धौ च मनोज्ञे च वाच्यवत् सुरभिः स्मृतः' इति विश्वः । तस्य नलस्य, यशः, तदेव कुसुमं धनुर्विधाय । तथा सुमनस्तया सुमनस्कत्वेन पुष्पत्वेन च, श्रुतिपथोपगतं कर्णपथं गतं, पुनःपुनः भैम्या श्रुतमित्यर्थः । आकर्णमाकृष्टञ्च, तं नलमेव, इषुं विधाय । तां भैमीं जिगाय । तदेकासक्तचित्तां चकारेत्यर्थः । "सन्लिटोर्जेः" इति कुत्वम् । रूपकालङ्कारः । अस्मिन्सर्गे द्रुतविलम्बितं वृत्तम् । "द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात् ॥ १ ॥

यदिति ॥ सा भैमी, अतनुज्वरमनङ्गज्वरं, अधिकज्वरञ्च, भजतीति तद्भाक् सती । भजो ण्विः । प्रियकथैव सरसी सरः तस्यां रसो रागः जलञ्च, तत्र मज्जनमासक्तिमवगाहञ्च, तनुते स्म । चकारेति यत् । "लट् स्मे" इति भूते लट् । तस्य मज्जनस्य, सपदि चिरं दीर्घकाल, अन्तरमभ्यन्तरं, तापयतीति तत्तापिनी, विषमा उद्दीपनात्मिका, परिणतिः परिपाकः, समपद्यत सञ्जाता ।

ध्रुवमधीतवतीयमधीरतां दयितदूतपतत्रिगतेर्गतः ।
स्थितिविरोधकरीं त्वणुकोदरी तदुदितस्स हि यो यदनन्तरः ॥ ३ ॥
अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् ।
अजनि पङ्गुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जनः ॥ ४ ॥

अत एव, ज्वरशान्त्यर्थाद्रसमज्जनात्तदुद्रेकरूपानर्थोत्पत्तेर्विषमालङ्कारभेदः । "विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् । विरूपघटना वा स्याद्विषमालङ्कृतिस्त्रिधा" इति लक्षणात् । एतेन द्वादशावस्थापक्षे नवमी संज्वरावस्थोक्ता । तदुक्तम्—"चक्षुःप्रीतिर्मनःसङ्गः सङ्कल्पोऽथ प्रलापिता । जागरः कार्श्यमरतिर्लज्जात्यागोऽथ संज्वरः ॥ उन्मादो मूर्छनं चैव मरणञ्चरमं विदुः ॥" इति ॥ २ ॥

ध्रुवमिति ॥ अणुकोदरी सूक्ष्ममध्या, इयं दमयन्ती, स्थितिर्मर्यादा-गतिनिवृत्तिश्च, तद्विरोधकरीं तद्विरोधहेतुमित्यर्थः । गत्युत्पत्तेस्तत् प्रागभाव-विरोधित्वादिति भावः । "कृञो हेतु" इत्यादिना हेत्वर्थे टप्रत्यये ङीप् । अधीरतां चपलतां, एकत्रानवस्थानलक्षणां, दयितदूतो यः पतन् पतत्री हंसः । 'पतत् पत्ररथाण्डजा' इत्यमरः । तस्य गतिवेगतः गमनवेगादधीतवती गृहीतवती, प्राप्तवतीत्यर्थः । एतेन चापलाख्यः सञ्चारीभाव उक्तः । "चापलं त्वनवस्थानं रागद्वेषादिसम्भवम्" इति लक्षणात् । तस्य हंसपक्षवेगजन्यत्वमुत्प्रेक्षते ध्रुवमिति । ननु कथमन्यवेगादन्यत्र क्रियोत्पत्तिरित्याशङ्क्य यदनन्तरन्यायेन समर्थयति । योऽर्थो यस्यानन्तरस्सन्निहितः, स तस्मादुदित उत्पन्न इत्युत्प्रेक्षा-र्थान्तरन्यासयोरङ्गाङ्गिभावेन सङ्करः ॥ ३ ॥

अतितमामिति ॥ तस्या भैम्याः आननं, स्मितलवस्य हासलेशस्य, स्मरणेऽपि, किमुत करण इति भावः । अतितमामतिमात्रम् । "किमेत्तिङ्" इत्यादिना अव्ययादामुप्रत्ययः । जडाशयं मूढचित्तं, समपादि सम्पन्नं, तदन्नं जातमित्यर्थः । "चिण्ते पदः" इति कर्तरि चिण् । तस्या ईक्षणमेव नयनमेव, खञ्जनः खञ्जरीटः, अपाङ्ग एव निजाङ्गणं, तत्र भ्रमिर्भ्रमणं, तस्याः कणे लेशेऽपि

किमु तदन्तरुभौ भिषजौ दिवस्स्मरनलौ विशतस्स्म विगाहितुम् ।
तदभिकेन चिकित्सितुमाशु तां मखभुजामधिपेन नियोजितौ ॥ ५ ॥

कुसुमचापजतापसमाकुलं कमलकोमलमैक्ष्यत तन्मुखम् ।
अहरहर्वहदभ्यधिकाधिकां रविरुचिग्लपितस्य विधोर्विधाम् ॥ ६ ॥

तरुणतातपनद्युतिनिर्मितद्रढिम तत्कुचकुम्भयुगं तदा ।
अबलसङ्गतितापमुपैतु नो कुसुमचापकुठारविलासजम् ॥ ७ ॥

पङ्कुरसमर्थः, अजनि जातः । "दीपजन" इत्यादिना जनेः कर्तरि चिण् । ज्वरवेगात् स्मितवीक्षणे लुप्ते इति भावः ॥ ४ ॥

अथास्याः स्मरनलयोर्निरन्तरान्तःप्रवेशमालक्ष्य उत्प्रेक्षते — **किमिवति** ॥ तदभिकेन भैमीकामुकेन, "अनुकाभिकाभीकः कमिता" इति निपातितः । मखभुजामधिपेन देवेन्द्रेण, तां भैमीमाशु चिकित्सितुमगदीकर्तुं, नियोजितौ प्रेषितौ उभौ, दिवो भिषजौ स्वर्वैद्यावश्विनौ, स्मरनलौ सन्तौ, विगाहितुं रोगनिदानं निश्चेतुम्, तस्याः दमयन्त्याः, अन्तरन्तश्शरीरं प्रविशतः स्म किमु । प्रविश्य स्थितावश्विनावेव तौ किमित्युत्प्रेक्षार्थः । तेनास्य मदनाश्विसमानसौन्दर्यं व्यज्यते । अत्र चिन्ताख्यः सञ्चारिभावः सूचितः । "ध्यानश्चिन्तेप्सितानाप्तिः शून्यता श्वासतापकृत्" इति लक्षणात् ॥ ५ ॥

अथ चिन्तानुभावं सन्तापं वर्णयति—**कुसुमेत्यादि** ॥ कुसुमचापजेन स्मरसमुत्थेन, तापेन समाकुलं विह्वलं, अत एवाहरहः अहन्यहनि । अत्यन्तसंयोगे वीप्सायां द्विर्वचनम् । "रो सुपि" इत्यहो नकारस्य रेफादेशः । अभ्यधिकाधिकामत्यन्ताधिकाम् । आभीक्ष्ण्ये द्विर्भावः । रविरुचिग्लपितस्य अर्कांशुहतस्य, विधोरिन्दोः, विधां प्रकारं, तादृशीमवस्थामित्यर्थः । अत एव, सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धान्निदर्शनालङ्कारः । वहत् प्राप्नुवत्, कमलकोमलं तन्मुखमैक्ष्यत दृष्टं सखीजनेनेति शेषः । सकरुणमिति भावः ॥ ६ ॥

तरुणतेति ॥ तस्याः कुचावेव कुम्भौ तयोर्युगं (कर्तृ), तरुणता

अधृत यद्विरहोष्मणि मज्जितं मनसिजेन तदूरुयुगं तदा ।
स्पृशति तत्कथनं कदलीतरुर्यदि मरुज्ज्वलदूषरदूषितः ॥ ८ ॥

स्मरशराहतिनिर्मितसंज्वरं करयुगं हसति स्म दमस्वसुः ।
अनपिधानपतत्तपनातपं तपनिपीतसरस्सरसीरुहम् ॥ ९ ॥

तारुण्यमेव, तपनद्युतिरातपस्तया निर्मितः कृतो द्रढिमा काठिन्यं यस्य तत्तथा, कुसुमचाप एव कुलालः कुम्भकारस्तस्य विलासेन व्यापारेण जातं तज्जं, अनलसङ्गतिः नलसङ्गत्याभावः । क्वचित् प्रसज्य प्रतिषेधे नञ्समास इष्यते । अर्थाभावेऽव्ययीभावे वा नपुंसकत्वम् । सैवानलसङ्गतिरग्निसंयोग इति श्लिष्टरूपकम्, तया तापमुपैतु नो, काकुः उपेयादेवेत्यर्थः । प्राप्तकाले लोट् । तथा हि, आमोघटः कुलालेन दार्ढ्याय प्रथममातपेन पक्त्वा पश्चादग्निना पच्यते । रूपकालङ्कारः ॥ ७ ॥

अधृतेति ॥ तदा यत्तस्या ऊरुयुगं मनसिजेन विरहोष्मणि विरहदाहे, मज्जितं, अधृत अवस्थितम् । धृङ्वस्थान इति धातोर्लुङि तङ् । "ह्रस्वादङ्गात्" इति सलोपः । कदलीतरुः, मरौ मरुदेशे ज्वलता तप्यमानेन ऊषरेणोषरक्षेत्रेण, दूषिता यदि दूषितश्चेत् । तत्कदनं, तेनोरुयुग्मेन क्रदनं कलहं साम्यमित्यर्थः । स्पृशति । अत्रोपमानस्य कदलीतरोरुपमेयत्वकल्पनात् प्रतीपालङ्कारभेदः । "उपमानस्याक्षेपे उपमेयत्वकल्पनं प्रतीपम्" इति लक्षणात् । ऊषरप्ररूढकदलीकाण्डकल्पं तदासीदित्यर्थः ॥ ८ ॥

स्मरेति ॥ स्मरशराहत्या निर्मितसंज्वरं जनिततापं, दमस्वसुः करयुगं (कर्तृ), अनपिधानादनावरणात् (हेतोः), पतन् प्रविशन्, तपनातपः सूर्यातपः, यस्मिन् तत्तथा, तपेन ग्रीष्मेण निपीते शोषिते सरसि यत्सरसीरुहं पद्मं, तद्धसति स्म तत्सदृशमभूदित्यर्थः । हसतीर्ष्यत्यसूयतीति दण्डिना सदृशपर्याये पठितत्वात् । अत एवोपमालङ्कारः ॥ ९ ॥

मदनतापभरेण विदीर्य नो यदुदपाति हृदा दमनस्वसुः ।
निबिडपीनकुचद्वययन्त्रणा तमपराधमधात्प्रतिबध्नती ॥ १० ॥
निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम् ।
मृदुतनोर्वितनोतु कथं न तामवनिभृत्तु निविश्य हृदि स्थितः ॥
मनसि सन्तमिव प्रियमीक्षितुं नयनयोस्स्पृहयान्तरुपेतयोः ।
ग्रहणशक्तिरभूदिदमीययोरपि न सम्मुखवास्तुनि वस्तुनि ॥ १२ ॥

मदनेति ॥ दमनस्वसुः, हृदा हृदयेन । (कर्त्रा) मदनतापस्य भरेण औत्कट्येन (हेतुना), विदीर्य, नो उदपाति नोत्पतितमिति यत्, भावे लुङ् । तमनुत्पतनरूपमपराधं प्रतिबध्नती निरुन्धती, निबिडपीनकुचद्वयेन यन्त्रणा बन्धकः (कर्त्री), अधात् । हृदयकृतापराधं स्वयमुवाहेत्यर्थः । अत्रातिदाहेऽप्यस्फुटनं हृदयस्यायुःशेषनिबन्धनं, तस्य कुचयन्त्रणानिमित्तत्वमुत्प्रेक्ष्यते । सा च व्यञ्जकाप्रयोगाद्गम्या ॥ १० ॥

निविशत इति ॥ शूकशिखा कण्टकाग्रं, पदे चरणे निविशते प्रविशति यदि, "नेर्विशः" इत्यात्मनेपदम् । सा प्रविष्टा शूकशिखा । कियतीमिव व्यथां पीडां, इवशब्दो वाक्यालङ्कारे । कीदृशीं व्यथामित्यर्थः । न सृजति नोत्पादयति; महतीमेव सृजतीत्यर्थः । अवनिभृद्राजा नलः, पर्वतश्च । स तु, हृदि निविश्य स्थितः सन्, मृदुतनोः कोमलाङ्ग्याः, तां तथाविधां, व्यथां कथं न वितनोतु तनोत्वेवेत्यर्थः । सम्भावनायां लोट् । अत्र पदे सूक्ष्मकण्टकप्रवेशे दुस्सहा व्यथा । किमुत मृद्वङ्ग्या हृदि महत्प्रवेशेनेति कैमुत्यन्यायेनार्थापत्तेरर्थापत्तिरलङ्कारः ॥ ११ ॥

मनसीति ॥ मनसि सन्तं हृदि वर्तमानं प्रियमीक्षितुं स्पृहया, अन्तरुपेतयोरन्तःप्रविष्टयोरिव, इदमीययोरस्याः सम्बन्धिनोः । इदंशब्दात्त्यदादेः "वृद्धाच्छः" । नयनयोस्सम्मुखं पुरोदेशः वास्तु स्थानं यस्य तस्मिन्नपि पुरो-

हृदि दमस्वसुरश्रुझरप्लुते प्रतिफलद्विरहात्तमुखानतेः ।
हृदयभाजमराजत चुम्बितुं नलमुपेत्य किलागमितं मुखम् ॥ १३

सुहृदमग्निमुदश्चयितुं स्मरं मनसि गन्धवहेन मृगीदृशः ।
अकलि निःश्वसितेन विनिर्गमानुमितनिह्नुतवेशनमायिता ॥ १४ ॥

विरहपाण्डिमरागतमोमषीशितिमतन्निजपीतिमवर्णकैः ।
दश दिशः खलु तद्दृगकल्पयल्लिपिकरी नलरूपकचित्रिताः ॥१५॥

र्वातन्यपि वस्तूनि, ग्रहणशक्तिः साक्षात्करणसामर्थ्यं नाभूत् । नलव्यासङ्गान्न किञ्चिदन्यदद्राक्षीदित्यर्थः । तद्व्यासङ्गनिमित्तस्य बाह्यादर्शनस्य चक्षुषोरन्तः-प्रवेशननिमित्तत्वमुत्प्रेक्षते । चिन्तैव सञ्चारीभावः ॥ १२ ॥

हृदीति ॥ विरहेणात्ता प्राप्ता मुखानतिर्यया सा तस्या नम्रमुखायाः दमस्वसुः मुखम् । अश्रुझरेणाश्रुप्रवाहेण, प्लुते सिक्ते हृदि हृदये, प्रतिफलत् प्रतिबिम्बितं सत्, हृदयभाजं हृदि स्थितं, नलं, चुम्बितुमुपेत्य गत्वा, आगमितं सञ्जातागमनं किल, प्रत्यागतमित्युत्प्रेक्षा । तारकादित्वादितच् । किलेति सम्भावनायाम् । 'वार्ता सम्भावयोः किल' इत्यमरः । अराजत रराज । सम्भावनायामुत्प्रेक्षा ॥ १३ ॥

सुहृदमिति ॥ गन्धवहेन बाह्यवायुना, सुहृदं सखायम् । 'रोहिताश्वो वायुसख' इत्यग्नेर्वायुसखत्वाभिधानात् । मृगीदृशः भैम्याः, मनसि, स्मरमेवाग्नि-मुदञ्चयितुमुद्दीपयितुं, निश्वसितेन निश्वासवातव्याजेन, विनिर्गमेण बहिर्निस्सार-णेन, अनुमितं निह्नुतं, प्रागज्ञातं, यद्वेशनमन्तःप्रवेशस्तत्र मायिता मायावित्वम् । तत्कल्पनापाटवं व्रीह्यादित्वादिनिः । अकलि कलितं प्राप्तम्, नूनमिति शेषः । अग्निदो हि गूढं प्रविश्य प्रकाशं निर्गच्छति, तद्वद्वायुरपि तादृङ्निश्वासव्याजेन तथा कृत्वा निर्गत इत्युत्प्रेक्षा ॥ १४ ॥

विरहेति ॥ तस्या दमयन्त्याः, दृग्दृष्टिरेव, लिपिकरी चित्रकरी, विरहेण पाण्डिमा शरीरश्वैत्यं, रागोऽनुरागः, स एव रागो रक्तिमा । श्लिष्ट-

स्मरकृतिं हृदयस्य मुहुर्दशां बहु वदन्निव निःश्वसितानिलः ।
व्यधित वाससि कम्पमदःश्रिते त्रसति कः सति नाश्रयबाधने ॥

करपदाननलोचननामभिश्शतदळैस्सुतनोर्विरहज्वरे ।
रविमहो बहु पीतचरं चिरादनिशतापमिषादुदसृज्यत ॥ १७ ॥

रूपकम् । तमो मोहस्तदेव मषी तस्याः शितिमा नीलिमा । तस्या भैम्याः, निजो नैसर्गिकः पीतिमा कनकवर्णः, चतुर्णां द्वन्द्वः तैरेव वर्णकैः चित्रसाधनैः, दशदिशस्ता एव भित्तीरिति शेषः । नलस्य रूपकैः प्रतिकृतिभिः, चित्रिताः सञ्जातचित्राः, तारकादित्वादितच् । अकल्पयदसृजत्खलु । निरन्तरचिन्ताजनितया भ्रान्त्या प्रतिदिशं मिथ्यानलानद्राक्षीदित्यर्थः ॥ १५ ॥

स्मरकृतिमिति ॥ निःश्वसितानिलः, स्मरकृतिं मदनकर्तृकत्वष्टिरूपां, हृदयस्य हृत्पिण्डस्य, दशामवस्थां, बहु बहुवारं (क्रियाविशेषणम्), वदन्निव एवं कम्पत इति कथयन्निवेत्युत्प्रेक्षा । अदो हृदयं, श्रिते वाससि कम्पश्चलनं, तत्कारणं त्रासञ्च, मुहुः व्यधित विहितवान् । दधातेर्लुङि तङ् । "स्थाघ्वोरिच्च" इतीकारः । "ह्रस्वादङ्गात्" इति सिचो लोपः । तथा हि, आश्रयबाधने सति, को नाम न त्रसति । सर्वोऽपि त्रसत्येवेत्यर्थः । तद्बाधे तदाश्रितस्य स्वस्यापि बाधादिति भावः । अर्थान्तरन्यासोऽलङ्कारः ॥ १६ ॥

करेति ॥ करौ पदे आननं लोचनं इति नामानि येषां तैः, तदाकारपरिणामात्तन्नामधारिभिः, शतदळैः कुशेशयैः (कर्तृभिः), चिरात् चिरात्प्रभृति, पीतचरं रसवशात् पूर्वं पीतं, भूतपूर्वे चरट्प्रत्ययः । बहु भूरि रविमहः सूर्यतेजः, सुतनोः दमयन्त्याः, विरहज्वरे ज्वरावस्थायां, अनिशतापमिषान्निरन्तरोष्मव्याजात्, उदसृज्यत उत्सृष्टम् । नूनमिति शेषः । अत्र पद्मानां भैमीकरचरणादिभ्यो नाममात्रभेदः । न रूपभेद इत्यभेदोक्तेरतिशयोक्तिः । तन्मूला चेयं पूर्वपीततेजोवमनोत्प्रेक्षा । सा च तापव्याजादित्यपह्नवानुप्राणितेति सङ्करः ॥

उदयति स्म तदद्भुतमालिभिर्धरणिभृद्भुवि तत्र विमृश्य यत् ।
अनुमितोऽपि च बाष्पनिरीक्षणाद्व्यभिचचार न तापकरो नलः ॥

हृदि विदर्भभुवं प्रहरन् शरैरतिपतिर्निषधाधिपतेः कृते ।
कृततदन्तरगस्वदृढव्यथ[illegible]फलदनीतिरमूर्छदलं खलु ॥ १९ ॥

उदयतीति ॥ आलिभिः सखीभिः, तत्र तस्यां, धरणिभृतो भीमभूपाद्भवतीति तद्भूः भैमी तस्यां पर्वतभूमौ च, विमृश्य व्याप्तिमनुसन्धाय, बाष्पनिरीक्षणादश्रुलिङ्गदर्शनात् । अन्यत्र, धूमदर्शनात् । बाष्पोऽश्रुण्यम्बुधूमे च' इति वैजयन्ती । अनुमितः अभ्यूहितः, अन्यत्र, लिङ्गभासावधारितोऽपि तापकरः सन्तापजनकः, नलो नैषधः, अन्यत्र अनलोऽग्निः, न व्यभिचचार नान्यथा बभूवेति यत्, तदद्भुतमुदयति स्म उत्पन्नमित्यर्थः । 'अय गतौ' इति धातोर्भूते लट् । नलचिन्ताजन्योऽयं सन्ताप इत्यश्रुदर्शनात्सखीभिरूहितमहो इति परमार्थः । अग्रबाष्पलिङ्गदर्शनादनलज्ञानम् । तच्चाव्यभिचारीति स्फुरतो विरोधस्याश्रुलिङ्गात्सन्तापकरो नलो निश्चित इत्याभासीकरणाद्विरोधाभासः । स च श्लेषानुप्राणितः । सन्तापकरो नल इति शब्दश्लेषः । अन्यत्रार्थश्लेषः । अपिर्विरोधे ॥ १८ ॥

हृदीति ॥ निषधाधिपतेः कृते नलस्यार्थे, तत्प्रहारार्थमित्यर्थः । "अर्थे कृते च शब्दौ द्वौ तादर्थ्येऽव्ययसंज्ञितौ" इति वचनात् । विदर्भभुवं दमयन्तीं, शरैर्हृदि प्रहरन्, नलस्य सदा तद्गतत्वादिति भावः । रतिपतिः कामः, कृता तदन्तरगस्य भैमीहृद्गतस्य स्वस्य दृढव्यथा येन सः, स्वयमपि तद्गतत्वात् प्रहृतस्सन्नित्यर्थः । फलन्ती अनीतिर्दुर्नीतिर्यस्य सोऽलमत्यन्तममूर्छदवर्धत खलु । अमुह्यदिति च गम्यते । 'मूर्छा मोहसमुच्छ्राययोः' इत्यनुशासनात्, तदभेदेन मूर्छालक्षणकार्यदर्शनाद्रतिपतेः स्मरस्यापि प्रहार उत्प्रेक्ष्यते । व्यञ्जकाप्रयोगाद्गम्या । सा च श्लेषमूलातिशयोक्त्युत्थापितेति सङ्करः । परप्रहारोद्यतस्य स्वप्रहाररूपानर्थोत्पत्तेर्विषमभेदश्च व्यज्यते ॥ १९ ॥

विधुरमानि तया यदि भानुमान् कथमहो स तु तद्धृदयं तथा ।
अपि वियोगभरास्फुटनस्फुटीकृतदृषत्त्वमजिज्वलदंशुभिः ॥ २० ॥

हृदयदत्तसरोरुहया तया क सदृगस्तु वियोगनिमग्नया ।
प्रियधनुः परिरभ्य हृदा रतिः किमनुमर्तुमशेत चितार्चिषि ॥ २१ ॥

अनलभावमियं स्वनिवासिनो न विरहस्य रहस्यमबुध्यत ।
प्रशमनाय विधाय तृणान्यसून् ज्वलति तत्र यदुज्झितुमैहत ॥ २२ ॥

विधुरिति ॥ तया दमयन्त्या, विधुश्चन्द्रः, भानुमान् सूर्यः, अमानि मेने यदि, विरहिणस्तन्न चित्रम् । किन्तु, सः सूर्यत्वाभिमतो विधुः, वियोग एव भरो भारस्तेनापि यदस्फुटनमविशरणं, तेन स्फुटीकृतं दृषत्त्वं, सूर्योपलत्वं यस्य तत् । अन्यथातिभाराल्लोष्टादिवद्विशीर्येतेति भावः । तद्धृदयमपि भैमीहृदयरूपं सूर्यकान्तमपीत्यर्थः । कथं तथा सूर्यवत् अंशुभिः स्वतेजोभिः, अजिज्वलत् ज्वलयति स्म । ज्वलतेर्णौ चङ् । अहो विधुर्विरहिणामुद्दीपकत्वात् सूर्यवत्पततु नाम । तद्धृदर्कोपलज्वलयितृत्वं तु चित्रमित्यर्थः ॥ २० ॥

हृदयेति ॥ वियोगनिमग्नया विरहाग्निमग्नया, अत एव हृदयदत्तसरोरुहया सन्तापशान्तये वक्षोनिक्षिप्तपद्मया तया, समाना दृश्यत इति सदृक् सदृशी स्त्री, समानान्ययोश्च इत्युपसङ्ख्यानात्समानोपपदाद्दृशेः क्विन्प्रत्ययः । "दृग्दृशवतुषु" इति समानशब्दस्य सभावः । कास्तु न क्वापीत्यर्थः । यद्वा रतिः कामपत्नी, हृदा वक्षसा, प्रियस्य स्वभर्तुः धनुः पौष्पमित्यर्थः । परिरभ्य अनुमर्तुं अनुगमनं कर्तुं, चितार्चिषि, अशेत शयिता किम् । प्रियमनुमर्तुं चितार्चिषि शयाना साक्षाद्रतिरेवेयमित्युत्प्रेक्षा । तज्ज्वराग्निस्तथा प्रज्वलतीति भावः ॥ २१ ॥

अनलभावमिति ॥ इयं दमयन्ती, स्वनिवासिनः स्वनिष्ठस्य, विरहस्य नलवियोगजस्य, रहस्यं शमीवह्निवन्निगूढं, अनलभावमग्नित्वं, नलरहितत्वञ्च गम्यते । नाबुध्यत नाजानादित्यर्थः । कुतः, यद्यस्मात्, तत्र तस्मिन्विरहे

प्रकृतिरेतु गुणस्स न योषितां कथमिमां हृदयं मृदु नाम यत् ।
तदिषुभिः कुसुमैरपि धुन्वता सुविवृतं विबुधेन मनोभुवा ॥ २३

रिपुतरा भवनादविनिर्यतीं विधुरुचिर्गृहजालबिलैर्नु ताम् ।
इतरथात्मनिवारणशङ्कया ज्वलयितुं बिसवेषधराविशत् ॥ २४ ॥

हृदि विदर्भभुवोऽश्रुभृति स्फुटं विनमदास्यतया प्रतिबिम्बितम् ।
मुखदृगोष्ठमरोपि मनोभुवा तदुपमाकुसुमान्यखिलाश्शराः ॥२५॥

ज्वलति सति, प्रशमनाय प्रज्वलनप्रतीकारार्थं असून् प्राणान्, तृणानि विधाय तृणप्रायान् कृत्वा तृणात्मकानिति गम्यते । उज्झितुं त्यक्तुं प्रक्षिप्तुञ्च । ऐहत ऐच्छत् । अग्नित्वज्ञाने कथं तच्छान्तये तत्र तृणप्रक्षेप इत्यर्थः । विरहदुःखान्मर्तुमैच्छदिति तात्पर्यार्थः ॥ २२ ॥

प्रकृतिरिति ॥ योषितां हृदयं मृदु नामेति यत् । नामेति प्रसिद्धौ । स इति विधेयप्राधान्यात् पुंलिङ्गता । प्रकृतिः प्रकृतिसिद्धः, गुणो मार्दवगुणः, इमां दमयन्तीं, कथं नैतु प्राप्नोत्येवेत्यर्थः । कुतस्तन्मृदुत्वं कुसुमैरपि इषुभिः, धुन्वता विबुधेन देवेन विदुषा च मनोभुवा, सुविवृतं सम्यग्व्याख्यातम्, विद्वद्धिकारत्वात्सन्दिग्धार्थनिर्णयस्येत्यर्थः। कुसुमादपि सुकुमारमस्या हृदयमित्यर्थः ॥

रिपुतरेति ॥ रिपुतराऽतिद्वेषिणी, विधुरुचिश्चन्द्रप्रभा, भवनादविनिर्यतीमनिर्गच्छन्तीं, इणश्शतरि ङीप् । तां भैमीं ज्वलयितुं सन्तापयितुं, इतरथा, निजरूपेण प्रवेशे आत्मनिवारणशङ्कया स्वप्रवेशप्रतिषेधभिया, बिसवेषस्य धरा सती, गृहस्य जालबिलैर्गवाक्षरन्ध्रैः, अविशन्नु प्रविष्टा किम् । शिशिरोपचारबिसाङ्कुरा निरन्तरान्तःस्थितभैमीबाधनाय प्रच्छन्नप्रविष्टेन्दुकरा इव प्रविभान्तिस्मेत्युत्प्रेक्षा ॥ २४ ॥

हृदीति ॥ विदर्भभुवो वैदर्भ्याः, विनमदास्यतया नम्राननत्वेन (हेतुना), अश्रूणि बिभर्तीत्यश्रुभृत्, क्विप् । तस्मिन्नश्रुसिक्त इत्यर्थः । हृदि वक्षसि,

विरहपाण्डुकपोलतले विधुर्व्यधित भीमभुवः प्रतिबिम्बितः ।
अनुपलक्ष्यसितांशुतया मुखं निजसखं सुखमङ्कमृगार्पणात् ॥ २६

विरहतापिनि चन्दनपांसुभिर्वपुषि सार्पितपाण्डिममण्डना ।
विषधराभबिसाभरणा दधे रतिपतिं प्रति शम्भुबिभीषिकाम् ॥२७

वैमल्यात् स्फुटं यथा तथा । प्रतिबिम्बितं मुखं च दृशौ च ओष्ठं च मुखदृगोष्ठम् । प्राण्यङ्गत्वादेकवद्भावः । मनोभुवा कामेन, तस्य मुखादेः उपमाकुसुमानि पद्मं उत्पले बन्धूके च पञ्चधा स्थितान्युपमानपुष्पाणि तान्येव अखिलाः पञ्चापि शराः सदरोऽपि रोपितम् । तस्यास्तथाविधे वक्षसि प्रतिफलितं मुखाद्यवयवपञ्चकं पञ्चशरनिखातम्, तदुपमानकुसुमशरपञ्चकमिवालक्ष्यतेत्युत्प्रेक्षार्थः ॥ २५ ॥

विरहेति ॥ विधुः भीमभुवः भैम्याः, विरहेण पाण्डुनि कपोलतले गण्डस्थले, प्रतिबिम्बितस्सन्, अनुपलक्ष्यसितांशुतया सावर्ण्यात् दुर्लक्ष्यशुभ्रकिरणतया, सुखमनायासेन, अङ्कमृगार्पणादसितकळङ्कमृगसमर्पणात्, मुखं भैमीमुखं, निजसखं स्वसदृशं, व्यधित विहितवान् । दोषिणो हि स्वदोषं निर्दोषेऽपि स्वसंसर्गिणि सङ्क्रमय्य समीकुर्वन्तीति भावः । केचित्किञ्चिद्दानेनामित्रं मित्रं कुर्वन्तीति भावं वर्णयन्ति । अत्र चन्द्रस्य कपोलसावर्ण्येन तदेकत्वकथनात् सामान्यालङ्कारः । "सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता" इति लक्षणात् ॥ २६ ॥

विरहेति ॥ सा दमयन्ती, विरहतापिनि वपुषि, चन्दनपांसुभिः, भस्मधवलैरिति भावः । अर्पितः सम्पादितः, पाण्डिमैव मण्डनं यस्याः सा, विषधराभं शेषाहिकल्पं, बिसमेवाभरणं यस्याः सा सती, रतिपतिं स्मरं, प्रति शम्भुरेवेयमिति बिभीषिकां विशेषेण भयोत्पादनं, भीषयतेर्धात्वर्थनिर्देशे ण्वुल् । "सुप्सुपा" इति समासः । न तु, शम्भोर्बिभीषिकेति कर्तरि षष्ठीसमासः । "तृजकाभ्यां कर्तरि" इति निषेधात् । दधे दधार नूनमिति शेषः । गम्योत्प्रेक्षा ॥ २७ ॥

विनिहितं परितापिनि चन्दनं हृदि तया भृतबुद्बुदमाबभौ ।
उपनमन् सुहृदं हृदयेशयं विधुरिवाङ्कगतोडुपरिग्रहः ॥ २८ ॥

स्मरहुताशनदीपितया तया बहु मुहुस्सरसं सरसीरुहम् ।
श्रयितुमर्धपथे कृतमन्तरा श्वसितनिर्मितमर्मरमुज्झितम् ॥ २९ ॥

प्रियकरग्रहमेवमवाप्स्यति स्तनयुगं तव ताम्यति किं न्विति ।
जगदतुर्निहिते हृदि नीरजे दवथुकुड्मलनेन पृथुस्तनीम् ॥ ३० ॥

विनिहितमिति ॥ तया, भैम्या, परितापिनि हृदये वक्षसि, विनिहित भृतबुद्बुदं अतिक्राथकृपीटकं, चन्दनं सुहृदं सखायं, हृदये शेत इति हृदयेशयं मन्मथं, "अधिकरणे शेतेः" इत्यच्प्रत्ययः । "शयवासवासिष्वकालात्" इत्यलुक् । उपनमन्नुपसर्पन्, अङ्कगतोडुपरिग्रहः अन्तिकस्थतरकापरिकरः, विधुरिवाबभावित्युत्प्रेक्षा ॥ २८ ॥

स्मरेति ॥ स्मरहुताशनदीपितया कामाग्नितप्तया, बहु भूरि सरसं सार्द्रं, सरसीरुहं सरोजं, मुहुः, श्रयितुं शैत्याय सेवितुं, अर्धे पथि अर्धपथे कृतं, तत्पर्यन्तमानीतं सत्, अन्तरा मध्ये, श्वसितेन भैमीनिश्वासेन, निर्मितं मर्मरं सद्य शोषात् कृतमर्मरशब्दं सत्, उज्झितं वैयर्थ्यात्त्यक्तम् । तथोष्णस्तन्निश्वास इति भावः । 'अथ मर्मरः । स्वनिते वस्त्रपर्णानाम्' इत्यमरः । ईदृग्धर्मासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदोऽलङ्कारः ॥ २९ ॥

प्रियेति ॥ हृदि वक्षसि, निहिते न्यस्ते, नीरजे पद्मे, दवथुः परितापः, टुनः टित्वादवथुच्प्रत्ययः । तेन यत्कुड्मलनं मुकुलनं निपीड्य ग्रहणमिति यावत् । तेन पृथुस्तनीं दमयन्तीं, तव स्तनयुगं (कर्तृ), एवमनेन प्रकारेण, प्रियकरेण ग्रहं निपीड्यग्रहणं, अवाप्स्यति । किं नु किमर्थं, ताम्यतीति जगदतुः ऊचतुः । नूनमिति शेषः ॥ ३० ॥

त्वदितरो न हृदापि मया धृतः पतिरितीव नलं हृदयेशयम् ।
स्मरहविर्भुजि बोधयति स्म सा विरहपाण्डुतया निजशुद्धताम् ॥
विरहतप्ततदङ्गनिवेशिता कमलिनी निमिषद्दलमुष्टिभिः ।
किमपनेतुमचेष्टत किं पराभवितुमैहत तद्दवथुं पृथुम् ॥ ३२ ॥
इयमनङ्गशरावलिपन्नगक्षतविसारिवियोगविषावशा ।
शशिकलेव खरांशुकरार्दिता करुणनीरनिधौ निदधौ न कम् ॥

त्वदिति ॥ सा भैमी, हृदयेशयं हृदि स्थितं, नलं त्वदितरस्त्वत्तोऽन्यः, समानो वाऽन्यो वा पतिः, मया हृदापि न धृत. मनसापि न चिन्तितः, इति निजशुद्धतां आत्मनिर्दोषतां, पाण्डुत्वञ्च । विरहपाण्डुतया तद्व्याजेनेत्यर्थः । स्मरहविर्भुजि बोधयति स्मेव मदनाग्निमग्ना सा *अग्निदीव्येन स्वसिद्धिं सीता राममिव नलं बोधयामासेवेत्युत्प्रेक्षा । "गतिबुद्धि" इत्यादिना अणि कर्तुर्नलस्य णौ कर्मत्वम् ॥

विरहेति ॥ विरहतप्ते तदङ्गे भैमीशरीरे, निवेशिता निहिता, कमलिनी पद्मलता, निमिषद्भिरानमद्भिर्दलैः पत्रैरेव, मुष्टिभिः मुष्टिबन्धैः, करणैः, पृथुं तद्दवथुं तस्यास्तापम्, अपनेतुमपच्छेत्तुमचेष्टत व्याप्रियत किम् । पराभवितुं तिरस्कर्तुमैहत किम् । अचेष्टत किमित्युत्प्रेक्षा । वस्तुतस्तु, न किञ्चित्कर्तुं शशाक । प्रत्युत स्वयमेव दग्धेत्यर्थः । सोऽयं मापकस्य भयप्रवेश इति भावः । अत एवानर्थोत्पत्तिलक्षणो विषमालङ्कारः । तदुत्थापिता चेयमुत्प्रेक्षेति सङ्करः ॥

इयमिति ॥ इयं भैमी, अनङ्गशरावलिरेव पन्नगाः तैः क्षतं क्षतिः, नपुंसके भावे क्तः । तेन विसारिणा व्यापिना, वियोगेनैव विषेण अवशा विवशा सती, खरांशोस्तिग्मांशोः, करैरर्दिता पीडिता, शशिकलेव कं जन करुणनीरनिधौ शोकरसाब्धौ । 'करुणस्तु रसे वृक्षे कृपायां करुणा मता' इति विश्वः । न निदधौ निदधावेव, निमज्जयामासेवेत्यर्थः । अत्र रूपकोपमयोरङ्गाङ्गिभावेन सङ्करः ॥

* अग्निदिव्यशब्दो जलदिव्यशब्देन व्याख्यातः । द्वितीयसर्गस्थ २७-तम-श्लोकव्याख्यानाद्विशेषोऽवगन्तव्यः ।

ज्वलति मन्मथवेदनया निजे हृदि तयार्द्रमृणाललतार्पिता ।
स्वजयिनोस्त्रपया सविधस्थयोर्मलिनतामभजद्भुजयोर्भृशम् ॥ ३४ ॥

पिकरुतश्रुतिकम्पिनि शैवलं हृदि तया निहितं विचलद्बभौ ।
सततत्तद्व्रतहृच्छयकेतुना हृतमिव स्वतनूघनघर्षिणा ॥ ३५ ॥

न खलु मोहवशेन तदाननं नलमनश्शशिकान्तमबोधि तत् ।
इतरथाऽभ्युदये शशिनस्ततः कथमसुस्रुवदश्रुमयं पयः ॥ ३६ ॥

ज्वलतीति ॥ तया भैम्या, मन्मथवेदनया मदनज्वरदुःखेन, ज्वलति प्रज्वलिते, निजे हृदि वक्षसि, अर्पिता आर्द्रा, सरसा, मृणाळलता बिसवल्ली, स्वजयिनोः स्वजेत्रोः, "जिदृक्षि" इत्यादिना इनिप्रत्ययः । भुजयोस्तदीयबाह्वोरेव, सविधस्थयोस्समीपस्थयोस्सतोः, त्रपया त्रपयेवेत्यर्थः । गम्योत्प्रेक्षा । भृशं मलिनतां वैवर्ण्यमभजत् । जितो जेतुरग्रे लज्जया वैवर्ण्यं भजतीति भावः ॥ ३४

पिकेति ॥ तया भैम्या, पिकरुतश्रुत्या कोकिलकूजितश्रवणेन, कम्पिनि वेपमाने, हृदि वक्षसि, निहितं शैत्यार्थं न्यस्तं, विचलत् आधारचलनादिति भावः । शैवलं, स्वतन्वा शैवलशरीरेण सह, घनघर्षिणा भृशसङ्घर्षिणा, द्वयोरपि जलचरत्वादिति भावः । सततं तद्व्रतस्य भैमीद्व्रतस्य हृच्छयस्य कामस्य, केतुना चिह्नेन, मत्स्येन हृतं ताडितमिव, बभावित्युत्प्रेक्षा ॥ ३५ ॥

नेति ॥ नलमनः (कर्तृ), मोहवशेन विरहप्रयुक्ताज्ञानबलेन, तदाननं भैमीमुखं, (कर्म) शशिकान्तमिन्दुसुन्दरं, इन्दूपलञ्च, नाबोधि खलु नाबुद्ध किमिति काकुः । अबुध्यत एवेत्यर्थः । तच्च सत्यमिति भावः । "दीपजन" इत्यादिना कर्तरि चिण् । इतरथा, तदसत्यत्वे शशिनोऽभ्युदये ततो भैमीमुखादश्रुमयमश्रुरूपं पयः, कथं असुस्रुवत् स्रुतं, चन्द्रोदये पयस्स्रावाच्चन्द्रकान्तत्वं सत्यमित्यर्थः । चन्द्रोदये दाहोद्रेकाद्रुरोदेति भावः । द्रवतेर्लुङ् णिश्रीत्यादिना च्लेश्चङि धातोरुवङादेशः ॥ ३६ ॥

रतिपतेर्विजयास्त्रमिषुर्यथा जयति भीमसुतापि तथैव सा ।
स्वविशिखानिव पञ्चतया ततो नियतमैहत योजयितुं स ताम् ॥

शशिमयं दहनास्त्रमुदित्वरं मनसिजस्य विमृश्य वियोगिनी ।
झडिति वारुणमश्रुमिषादसौ तदुचितं प्रतिशस्त्रमुपाददे ॥ ३८ ॥

अतनुना नवमम्बुदमांबुदं सुतनुरस्त्रमुदस्तमवेक्ष्य सा ।
उचितमायतनिश्वसितच्छलाच्छ्वसनमस्त्रममुञ्चदमुं प्रति ॥ ३९ ॥

रतिपतेरिति ॥ रतिपतेः कामस्य, यथेषुः विजयस्यास्त्रं विजयास्त्रं विजयसाधनमायुधं जयति । तथैव सा भीमसुतापि विजयास्त्रं सती जयति । ततस्तस्मात् (हेतोः), स कामः, स्वस्य विशिखानिषूनिव, तां भैमीं, पञ्चतया पञ्चसङ्ख्याकत्वेन, मरणेन च । 'पञ्चता पञ्चभावे स्यात् पञ्चता मरणेऽपि च' इति विश्वः । योजयितुमैहत । स्वेषुधर्मविजयास्त्रत्वेनेव पञ्चत्वेनापि योजयितुमैच्छत् । नियतं सत्यमित्युत्प्रेक्षार्थः । अन्यथा, किमर्थमेनामित्थं पीडयेदिति भावः । उपमानोत्प्रेक्षयोः सङ्करः ॥ ३७ ॥

शशिमयमिति ॥ वियोगिन्यसौ भैमी, उदेतीत्युदित्वरमुद्यत्, "इण्नशजिसर्तिभ्यः क्वरप्" । शशिमयं शशिरूपं, मनसिजस्य दहनास्त्रं आग्नेयास्त्रं, विमृश्यालोच्य, झडिति द्राक् । अश्रुमिषाद्वारुणं वरुणदेवताकं, "सास्य देवता" इत्यण्प्रत्ययः । तस्याग्नेयस्योचितं प्रतीकारक्षमं प्रतिशस्त्रमुपाददे प्रयुक्तवतीत्यर्थः । चान्द्रतापासहिष्णुरशरणा केवलमरोदीदित्यर्थः । सापह्नवोत्प्रेक्षा ॥ ३८ ॥

अतनुनेति ॥ सा सुतनुर्भैमी, नवं नूतनं, अम्बुदं मेघमेव, अतनुना अनङ्गेन, उदस्तं उत्क्षिप्तं, आम्बुदमम्बुदसम्बन्ध्यस्त्रं पर्जन्यास्त्रं, अवेक्ष्य आयतनिश्वसितच्छलाद्दीर्घनिश्वासमिषादमुमम्बुदं प्रति, उचितं प्रतीकारक्षमं, श्वसनं श्वसनात्मकमस्त्रं वायव्यास्त्रममुञ्चत् प्रायुङ्क्त । मेघदर्शनात् दीप्तमदनज्वरा, दीर्घमुष्णञ्च निशश्वासेत्यर्थः । अत्रापि सापह्नवोत्प्रेक्षा ॥ ३९ ॥

रतिपतिप्रहितानिलहेतितां प्रतियती सुदती मलयानिले ।
तदुरुतापभयात्तमृणालिकामयमियं भुजगास्त्रमिवादित ॥ ४० ॥

न्यधित तद्धृदि शल्यमिव द्वयं विरहिताञ्च तथापि च जीवितम् ।
किमथ तत्र निहत्य निखातवान्रतिपतिस्स्तनबिल्वयुगेन तत् ॥

अतिशरव्ययता मदनेन तां निखिलपुष्पमयस्वशरव्ययात् ।
स्फुटमकारि फलान्यपि मुञ्चता तदुरसि स्तनतालयुगार्पणा ॥४२

रतिपतीति ॥ सुदतीयं भैमी, मलयानिले विषये, रतिपतिप्रहितानिलहेतितां कामप्रयुक्तवायव्यास्त्रताम् । 'हेतिश्शस्त्रं प्रहरणं ह्यायुधं चास्त्रमेव च' इति हलायुधः । प्रतियती जानती । इणश्शतरि ङीप् । तेनास्त्रेण य उरुस्तापः ततो भयात्, मृणालिकामयं बिसरूपं, भुजगास्त्रं, आदितेव आत्तवती किमित्युत्प्रेक्षा । भुजगानां वाताहारत्वादिति भावः । 'स्थाघ्वोरिच्च" इतीकारः । "ह्रस्वादङ्गात्" इति सलोपः ॥ ४० ॥

न्यधितेति ॥ रतिपतिस्तद्धृदि, भैमीहृदये, विरहितां विरहित्वं च, तथापि विरहित्वेऽपि, जीवितं चेति द्वयं, शल्यं शङ्कुमिव, न्यधित निखातवानित्यर्थः । जीवतो विरहः विरहिणो जीवनञ्च द्वे अपि शल्यप्राये इत्यर्थः । दधातेर्लुङि तङ् । "स्थाघ्वोरिच्च" इतीकारः । "ह्रस्वादङ्गात्" इति सलोपः । अथ निखननानन्तरं, तच्छल्यद्वयं स्तनावेव बिल्वे परिणतबिल्वफले, तयोर्युगेन तत्र हृदि निहत्य आहत्य, निखातवान् किम् । यथा लोके निखातं शङ्कुं दार्ढ्याय पाषाणेन घ्नन्ति तद्वदिति भावः । पूर्वार्धे शल्यनिखननोत्प्रेक्षा । उत्तरार्धे निहत्य निहननोत्प्रेक्षा । निखातवानित्यनुवादः ॥ ४१ ॥

अतीति ॥ तां दमयन्तीं, अतिशरव्ययता, शरव्यं लक्ष्यं कुर्वता, शरव्यशब्दात् "तत्करोति" इति ण्यन्ताल्लटश्शतृप्रत्ययः । अत एव निखिला ये पुष्पमयाः स्वशरास्तेषां, व्ययात् क्षयात्, फलान्यपि मुञ्चता क्षिपता

अथ मुहुर्बहुनिन्दितचन्द्रया स्तुतविधुन्तुदया च तया बहु ।
पतितया स्मरतापमये गदे निजगदेऽश्रुविमिश्रमुखी सखी ॥ ४३ ॥
नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा ।
विरहिणामपि तद्रतवत्स्वियुक्षणमितं न कथं गणितागमे ॥ ४४ ॥
जनुरधत्त सती स्मरतापिता हिमवतो न तु तन्महिमादृता ।
ज्वलति फालतले लिखितस्सतीविरह एव हरस्य न लोचनम् ॥

मदनेन तदुरसि भैमीवक्षसि, स्तनावेव ताले तालफले, तयोर्युगरागर्पणा क्षेपः, अकारि । स्फुटमित्युत्प्रेक्षा । शरक्षये पाषाणादिनापि प्रहरन्तीति भावः ॥ ४२ ॥

अथेति ॥ अथानन्तरं, स्मरतापमये कामज्वररूपे, गदे रोगे । 'रोगव्याधिगदा मयाः" इत्यमरः । पतितया मग्नया । अत एव, मुहुः बहु बहुधा, निन्दितचन्द्रया, तस्योद्दीपकत्वादिति भावः । मुहुः स्तुतो विधुं तुदतीति विधुन्तुदो राहुर्यया तया, विधुन्तुदत्वादेवेति भावः। 'तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुद' इत्यमरः । "विध्वरुषोस्तुद" इति खश्प्रत्ययः । "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः । तया दमयन्त्या, अश्रुविमिश्रं मुखं यस्यास्सा अनिष्टाशङ्कया रुदती सखी, निजगदे निगदिता । विप्रकृतो ह्यपकारं निन्दति तदपकर्तारञ्च स्तौतीति भावः ॥ ४३ ॥

नरेति ॥ नरसुराब्जभुवां मनुष्यदेवब्रह्मणामिव, यावता अनेहसा कालेन, यस्य जन्तोर्यद्युगं भवति, गणितागमे ज्योतिश्शास्त्रे, तत्सर्वं वक्तव्यमेवेति शेषः । यथा ब्रह्मणो दिनं देवादीनां युगादिकमित्युक्तम्, तद्वदन्यस्यापि गणितशास्त्रे वक्तव्यमिति भावः । ततः किमित्याशङ्क्य आह । तर्हि, विरहिणां तद्युगं कथं किमिति रतवतामवियुक्तानां यूनां क्षणेन मितं गणितं न । अवियुक्तानां क्षणो वियुक्तानां युगमिति किमिति नोक्तमित्यर्थः । तथा तस्या एकैकक्षणः एकैकयुगकल्पोऽभूदित्यर्थः ॥ ४४ ॥

जनुरिति ॥ सती भवपूर्वपत्नी दक्षकन्या, स्मरतापिता विरहाभितप्ता हिमवतो जनुर्जन्माधत्त । तस्य हिमवतो महिमा आदृतो यया सा

दहनजा न पृथुर्दवथुर्व्यथा विरहजैव पृथुर्यदि नेदृशम् ।
दहनमाशु विशन्ति कथं स्त्रियः प्रियमपासुमुपासितुमुद्धुराः ॥

हृदि लुठन्ति कला नितरामतूर्विरहिणीवधपङ्ककलङ्किताः ।
कुमुदसख्यकृतस्तु बहिष्कृताः सखि विलोकय दुर्विनयं विधोः ॥

अयि विधुं परिपृच्छ गुरोः कुतः स्फुटमशिक्ष्यत दाहवदान्यता ।
ग्लपितशम्भुगलाद्गरलात्त्वया किमुदधौ जड वा बडवानलात् ॥

तन्महि[illegible], आहतन्महिमा सती तु न । आहिताग्न्यादित[illegible] पर-निपात[illegible] । विरहतापशान्त्यर्थं हिमाद्रेर्जातः । [illegible] तु [illegible]सागरसामर्थ्यान्[illegible] -[illegible] उत्प्रेक्षा । [illegible] लिखितो [illegible] लिखितः [illegible] एव ज्व[illegible]ति, [illegible] नेत्यारोप्यमाण[illegible]लङ्कारः ॥ ४५ ॥

दहनेति ॥ दहनजा अग्निदाह[illegible], [illegible] तापदु[illegible], पृथुः अधिका न । किंतु, विरहजैव [illegible] । ईदृशं न [illegible]सामर्थ्यं न [illegible] । स्त्रियः, अपगतासुमपगतप्राणं, मृतं प्रियं, [illegible] धूर्मार्गे [illegible] [illegible]द्धुराः अनर्गलास्सत्य इत्यर्थः । "ऋतपूः" इत्यादि[illegible] समासान्त[illegible]कारः । [illegible] दहनं विशन्ति । अग्निदाहा[illegible] [illegible]धिक इत्यर्थः । तस्य [illegible]र्थसमर्थनात् कार्येण कारण[illegible]समर्थनरूपो-ऽर्थान्तरन्यासः ॥ ४६ ॥

हृदीति ॥ विरहिणीवधाख्यः पङ्कः पाप्मा । 'अस्त्री पङ्कं पुमान् पाप्मा' इत्यमरः । तेन कलङ्किताः सञ्जातकलङ्काः, अमूः [illegible] कलाः हृदि अभ्यन्तरे नितरां [illegible] वर्तन्ते । कुमुदैः सख्यं कुर्वन्तीति तत्कृ[illegible], [illegible] इत्यर्थः । [illegible] कलाः [illegible] । हे सखि, विधोर्दुर्विनयं दौर्जन्यं विलोकय । [illegible] दुर्जनाः पापिष्ठा-[illegible] [illegible] बहिष्कुर्वन्तीति भावः । [illegible] ॥

अयीति ॥ अयि सखि, विधुं परिपृच्छ । हे जड [illegible] दान्यता दाहदातृत्वं, दाहकत्वमित्यर्थः । किं ग्लपितशम्भुगल[illegible]

अयमयोगिवधूवधपातकैर्भ्रमिमवाप्य दिवः खलु पात्यते ।
शितिनिशादृषदि स्फुटदुत्पतत्कणगणाधिकतारकिताम्बरः ॥ ४९ ॥
त्वमभिधेहि विधुं सखि मद्गिरा किमिदमीदृगधिक्रियते त्वया ।
न गणितं यदि जन्म पयोनिधौ हरशिरस्स्थितिभूरपि विस्मृता ॥
निपततापि न मन्दरभूभृता त्वमुदधौ शशलाञ्छन चूर्णितः ।
अपि मुनेर्जठरार्चिषि जीर्णतां बत गतोऽसि न पीतपयोनिधिः ॥

कण्ठात्, गरलात् कालकूटात्, उदधौ बडबानलाद्वा कुतः कस्माद्गुरोः स्फुटमशिक्ष्यत शिक्षिता, अभ्यस्तेत्यर्थः ॥ ४८ ॥

अयमिति ॥ अयं विधुः, अयोगिवधूवधपातकैः वियोगिस्त्रीहिंसापापैः, करणैः, भ्रमिं भ्रमणं, अवाप्य प्राप्य । आप्नोतेर्ल्यबन्तात् सोल्यबादेशः । "विभाषाऽऽपः" इति विकल्पादयादेशाभावः । शितिनिशा कृष्णपक्षरात्रिस्तस्यामेव दृषदि शिलायां स्फुरन्तः पातवेगाद्विदलन्तः तत उत्पतन्तश्च ये कणाः खण्डाः, तेषां गणैरधिक तारकिताम्बरः भन्ना तारकवत्कृताकाशस्सन् । अत्र कृष्णपक्षे ...कबाहुल्यमिति भावः । तारकवच्छब्दात् "तत्करोति" इति यन्तात् कर्मणि क्तः । "विण्मतोर्लुक्" इति मतुपो लुक् । दिवोऽन्तरिक्षात्पात्यते खलु । उत्कटपापकारिणः पुरे परिभ्राम्य शिलायां निपात्य हन्यन्त इति भावः ॥ ४९ ॥

त्वमिति ॥ हे सखि, त्वं मद्गिरा विधुमभिधेहि उपालभस्व । तत्प्रकारमेवाह —त्वया महात्मनेति भावः । किं किमर्थमिदमीदृक् स्त्रीवधात्मकं (कर्म), अधिक्रियते आचर्यते । पयोनिधौ जन्म न गणितं यदि मास्तु । हरशिर एव स्थितिभूर्निवासभूमिः, सापि विस्मृता । महाकुलप्रसूतस्य शम्भुशिरोधृतस्य तवेदमनुचितमित्यर्थः ॥ ५० ॥

निपततेति ॥ हे शशलाञ्छन, सकलङ्केत्यर्थः । त्वमुदधौ निपतता । मथनसमय इति शेषः । मन्दरभूभृता मन्दराद्रिणापि न चूर्णितः, पीतपयो-

किमसुभिर्गलितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः ।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥ ५२ ॥

मुखरयस्व यशोनवडिण्डिमं जलनिधेः कुलमुज्ज्वलयाधुना ।
अपि गृहाण वधूवधपौरुषं हरिणलाञ्छन मुञ्च कदर्थनाम् ॥ ५३ ॥

निधेराचमितसमुद्रस्य मुनेरगस्त्यस्य, जठराग्निरपि जठरानलेऽपि, जीर्णतां न गतोऽसि । वातापिवदिति भावः । बतेति खेदे । मद्भाग्यविपर्यय एवायमिति भावः ॥ ५१ ॥

किमिति ॥ हे जड मूढ, गलितैर्निष्क्रामितैः, असुभिः प्राणैः, स्वमारणेनेत्यर्थः । भीमसुतामनो मयि चन्द्रे निमज्जतु निमज्जेत् । सम्भावनायां लोट् । इति मन्यसे किम् । "यत्रास्य पुरुषस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते" इति श्रुतिप्रामाण्यादिति भावः । सोऽपि वृथाभिमान इत्याह—सः मृतमनश्चन्द्रमेतीत्येवंरूपोऽर्थोऽभिधेयो यस्यास्तां तदर्थिकां, "शेषाद्विभाषा" इति कप्समासान्तः । "प्रत्ययस्थात्कात्पूर्वस्य इदाप्यसुपः" इतीकारः, श्रुतिं पूर्वोक्तवेदवाक्यम् । विबुधो देवो विद्वांश्च, स्मरः नलमुखेन्दुः मुखचन्द्रः, परो मुख्यार्थो यस्यास्तां तत्पराम् । 'परं दूरान्यमुख्येषु' इति वैजयन्ती । मम आह किल ब्रूते खलु । विद्वदुक्त एवार्थो ग्राह्य इत्यर्थः । परतोऽपि मे भर्ता नल एव नान्य इति भावः ॥ ५२ ॥

मुखरयस्वेति ॥ हे हरिणलाञ्छन शशाङ्क, यशसः नवडिण्डिमं कीर्तिप्रकाशकं नूतनवाद्यविशेषं, मुखरयस्व मुखरं रवणं कुरु, अधुना जलनिधेः स्वजनकस्य कुलमुज्ज्वलय प्रकाशय वधूवधपौरुषमपि स्त्रीवधशौर्यं च, गृहाण स्वीकुरु । किंतु, कुत्सितोऽर्थः कदर्थः पीडाकरः, "कोः कत्तत्पुरुषेऽचि" इति कुशब्दस्य कदादेशः । कदर्थीकरणं कदर्थना कदर्थनशब्दात् "तत्करोति" इति ण्यन्तात् युच् । तां मुञ्च शीघ्रं मारय । न तु पीडयेत्यर्थः । अत्र वधूवधाप-

[illegible] कैतवभानुतामसति भास्वति तापय पाप माम् ।
[illegible]कयितास्मि ते पुनरहर्पतिनिर्धुतदर्पताम् ॥ ५४ ॥
शशकळङ्क भयङ्कर मादृशां ज्वलसि यन्निशि भूतपतिं श्रितः ।
तदमृतस्य तवेदृशभूतताद्भुतकरी परमूर्धविधूननी ॥ ५५ ॥
श्रवणपूरतमालदलाङ्कुरं शशिकुरङ्गमुखे सखि निक्षिप ।
किमपि तुन्दिलितस्स्थगयत्वमुं सपदि तेन तदुच्छ्वसिमि क्षणम् ॥

निष्टत्वेनाविधेयस्य विधानात् । "विष भुङ्क्ष्व" इतिवन्निषेधपरो विध्याभासः । अनिष्टनिषेधाभासपराक्षेपालङ्कारभेदः । तथा चालङ्कारसूत्रम् । अनिष्टं विध्याभासश्चेति ॥ ५३ ॥

निशीति ॥ हे शशिन्, पाप क्रूर । 'नृशंसो घातुकः क्रूरः पापः' इत्यमरः । निशि भास्वत्यसति । कैतवभानुतां कपटसूर्यत्वं भज । मां तापय, किं त्वहन्यहनि, अहर्पतिना सूर्येण, "अहरादीनां पत्यादिषु" इति रेफादेशः । ते तव, निर्धुतदर्पतां निरहङ्कारतां, अवलोकयितास्मि द्रक्ष्यामीत्यर्थः । लुटि सिपि तासिप्रत्ययः । पापिष्ठाः स्वनाशमासन्नमपश्यन्तः परान् हिंसन्तीति भावः ॥ ५४ ॥

शशकळङ्केति ॥ हे शशकळङ्क शशाङ्क, मादृशां वियोगिनामित्यर्थः । भयं करोतीति भयङ्कर उद्वेजक, "मेघर्तिभयेषु कृञः" इति खच्प्रत्ययः । "अरुर्द्विषत्" इत्यादिना मुमागमः । यद्यस्मात्, भूतपतिं शिवं, पिशाचपतिं च श्रितस्सन् निशि ज्वलसि प्रदीप्यसे । तत्तस्मादमृतस्यामृतमयस्य, मृततरस्य च तव परेषां शत्रूणां स्वाविष्टानां च, मूर्धविधूननी एकत्र विस्मयादन्यत्रावेशाच्च शिरःकम्पकरी ईदृशभूतता इत्थंभूतत्वम् ईदृक्पिशाचत्वञ्च, अद्भुतकरी विस्मयकरी । हरशिरोमणेरमृतस्य तव इत्थं प्रज्वलनात्मकत्वमद्भुतमिति वाच्यार्थः । जीवत ईदृग्जातपिशाचत्वमद्भुतमिति व्यङ्ग्यार्थः ॥ ५५ ॥

श्रवणेति ॥ हे सखि, श्रवणपूरः कर्णावतंसः, यस्तमालदलाङ्कुरस्तमा[illegible] [illegible] शशिकुरङ्गस्य मुखे वक्त्रे निक्षिप । तेन [illegible]

असमये मतिरुन्मिषति ध्रुवं करगतैव गता यदियं कुहूः ।
पुनरुपैति निरुध्य निवास्यते सखि मुखं न विधोः पुनरीक्ष्यते ॥

अयि ममैष चकोरशिशुर्मुनेर्व्रजति सिन्धुपिबस्य न शिष्यताम् ।
अशितुमब्धिमधीतवतोऽस्य वा शशिकराः पिबतः कति शीकराः ॥

कुरु करे गुरुमेकमयोघनं बहिरितो मुकुरं च कुरुष्व मे ।
विशति तत्र यदैव विधुस्तदा सखि सुखादहितं जहि तं द्रुतम् ॥

कियदपि, तुन्दिलितः तुन्दिलीकृतः, स्थूलीकृतस्सन्, अमुं शशिनं, स्थगयतु छादयतु । ततस्तस्मादितः, क्षणमुच्छ्वसिमि प्राणिमि, "रुदादिभ्यः सार्वधातुके" इतीडागमः ॥ ५६ ॥

असमय इति ॥ हे सखि, असमये मतिः कार्यधीः, उन्मिषति उदेति ध्रुवम् । न तु, योग्यकाल इत्यर्थः । कुतः, यद्यस्मादियं कुहूः नष्टचन्द्रामावास्या, करगता स्वायत्तैव, हस्तनक्षत्रगता च गता । तदास्तां, पुनरुपैति पुनरागच्छति चेदित्यर्थः । निरुध्य निवास्यते स्थाप्यते । तस्य फलमाह—विधोर्मुखं पुनर्नेक्ष्यते । तस्यास्तन्नाशकत्वादिति भावः । पापिष्ठस्य तस्यादर्शनमेव फलमित्यर्थः ॥

अयीति ॥ अयि सखि, एष मम चकोरशिशुर्विनोदार्थं गृहसंवर्धितो बालचकोरः । यथाह कामन्दः—"चकोरस्य विरज्येते नयने विषदर्शनात्" इति । पिबतीति पिबः, "पाघ्राध्मा" इत्यादिना शतृप्रत्यये पिबादेशः । सिन्धोः पिबस्य समुद्रपायिनो मुनेरगस्त्यस्य शिष्यतां, न व्रजतीति काकुः । व्रजतीत्यर्थः । तथा च इत्थं चकोरश्चन्द्रं निश्शेषं पास्यतीत्याशयः, न चैतदशक्यमित्याह—अब्धिमशितुं पातुमधीतवतः अभ्यस्तवतः, अत एव, पिबतः अभिपानप्रवृत्तस्यास्य चकोरस्य, शशिकराः कति वा शीकराः कतिचित्कणा इत्यर्थः । अत्र समुद्रपायिनो दण्डापूपिकया शशिकरपानसिद्धेरर्थापत्तिरलङ्कारः ॥ ५८ ॥

कुर्विति ॥ हे सखि, एकं गुरुं महान्तं, अयोघनं तप्तायःपिण्डघनं अयोमुद्गरं, करे कुरु बिभृहीत्यर्थः । इतोऽस्मत्स्थानाद्बहिः, मे मम मुकुरं दर्पणं

उदरे एव किं न भृतः किमुदन्वता न विषमो बडवानलवद्विधुः ।
विषवदुज्झितमप्यमुना न स स्मरहरः किममुं बुभुजे विभुः ॥ ६० ॥
असितमेकसुराशितमप्यभून्न पुनरेष पुनर्विशदं विषम् ।
अपि निपीय सुरैर्जनितक्षयं स्वयमुदेति पुनर्नवमार्णवम् ॥ ६१ ॥
विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम् ।
सुरनिपीतसुधाकमपापकं ग्रहविदो विपरीतकथाः कथम् ॥ ६२ ॥

च कुरुष्व विधेहि । तत्र मुकुरे यदा विधुर्विशति प्रतिफलति, तदैव, मुखात् दनाय आसात्, अहितं शत्रुं, तं विधुं, द्रुतं जहि मारय । हन्तेर्लोटि सिपि हिरादेशः । "हन्तेर्जः" इति जादेशस्य "असिद्धवदत्राभात्" इत्यसिद्धत्वान्न हेर्लुक् । अत्र चन्द्रप्रहारादिप्रलापा मेघसन्देशादिवन्मदनोन्मादविकारा इत्यनुसन्धेयम् ॥

उदर इति ॥ विषमः क्रूरकर्मा, विधुः, उदन्वता उदधिना, "उदन्वानुदधौ च" इति निपातः । बडवानलवद्वडवाग्निना तुल्यं, "तेन तुल्यं क्रिया चेद्वतिः" । उदरे कुक्षावेव किं न भृतः । अथवा, अमुना उदन्वता उज्झितमप्यमुं विधुं विभुस्समर्थः स्मरहरः विषवद्विषेण कालकूटेन तुल्यं, पूर्ववद्वतिः । किं न बुभुजे न ग्रसते । उभयथापि स्वयं जीवेम इति भावः ॥ ६० ॥

असितमिति ॥ आर्णवमर्णवे जातं, "तत्र जातः" इत्यण्प्रत्ययः । असितं मेचकं, विषं कालकूटाख्यमेकेनैव, सुरेण महादेवेन, अशितं गलितमपि, पुनर्नाभून्नाजनि । एष चन्द्रो नामार्णवं विशदं विषं पुनस्सितं त्वित्यर्थः, सुरैर्बहुभिर्देवैः, प्रथमां पिबति वह्निरित्याद्युक्तक्रमेण, निपीय जनितक्षयं कृतनाशमपि, स्वयं नवं तद्रूपेणैव, पुनरुदेत्यागच्छतीति व्यतिरेकः ॥ ६१ ॥

विरहीति ॥ हे सखि, विरहिवर्गवधे व्यसनेनासक्त्या, आकुलं सङ्कुलं, सशब्दं, अशेषकलं पूर्णकलं, विधुं पापं कलय क्रूरं विद्धि, सुरैर्निपीता सुधा यस्य तं, क्षीणमित्यर्थः । औपिकः कप्समासान्तः । "आपोऽन्यतरस्याम्", इति

विरहिभिर्बहुमानमवापि यस्स बहुलः खलु [illegible]
तदमितिस्सकलैरपि यत्र तैर्व्यरचि सा च तिथिः किममाकृता ॥
स्वरिपुतीक्ष्णसुदर्शनविभ्रमात्किमु विधुं ग्रसते न विधुन्तुदः ।
निपतितं वदने कथमन्यथा बलिकरम्भनिभं निजमुज्झति ॥६४॥

विकल्पाद्भ्रसाभावः । अपाप एवापापकस्तं सौम्यं कलय । तथा [illegible]यदर्शनादीति भावः । किंतु, महाविदो दैवज्ञास्तु कथं विपरीतकथाः--"क्षीणेन्द्वर्कार्किभूपुत्राः पापास्तत्संयुतो बुधः । पूर्णचन्द्रबुधाचार्यशुक्रास्ते स्युश्शुभग्रहाः ॥" इत्येवं विरुद्धवाचः । अनुभवविरोधादग्राह्यं तद्वाक्यमिति भावः ॥ ६२ ॥

विरहिभिरिति ॥ यः पक्षो विरहिभिः बहुमानं सत्कारमवापि प्रापितः, क्षीयमाणचन्द्रत्वादिति भावः । अवपूर्वादाप्नोतेर्ण्यन्तात् कर्मणि लुङ् । "गतिबुद्धि" इत्यादिना अणि कर्तुः कर्मत्वम् । "ण्यन्ते कर्तुश्च कर्मणः" इत्यभिधानम् । स विरहिभिर्बहूकृतः पक्षः इहास्मिन् लोके, बहु बहुकारं, लानि आदत्त इति व्युत्पत्त्या बहुलः "आतोऽनुपसर्गे कः" । न तु 'बहोर्लच्' इति भावः । अजनि जातः । खल्वित्युत्प्रेक्षा । किञ्च, तत्रापि, यत्र यस्यां तिथौ सकलैरपि तैर्विरहिभिः तदमितिस्तस्य बहुमानस्यामितिरपरिमितिर्व्यरचि अकारि । नष्टचन्द्रत्वादिति भावः । सा च तिथिः अमा अमितिर्बहुमानस्यास्या अस्ति [illegible] व्युत्पत्त्या अमा, अमानामका कृता किं, मातेर्भावार्थे सम्पदादित्वात् [illegible] मत्वर्थीये चाकारप्रत्यये यस्येति लोपे अजाद्यतष्टाप् । न त्वमा सहभावो[illegible] सूर्याचन्द्रमसोरिति व्युत्पत्त्येत्युत्प्रेक्षा । अमेति सहार्थे अव्ययं ततो भावप्रा[illegible]न्मत्वर्थीयाकारटाप् ॥ ६३ ॥

स्वेति ॥ विधुन्तुदो राहुः, विधुं चन्द्रं, स्वरिपोर्विष्णोस्तीक्ष्णं निशितं सुदर्शनं तदिति विभ्रमात् सादृश्यमूलभ्रमात् ग्रसते किमु । तालुच्छेदभयादिति भावः । अन्यथा, भ्रमाभावे वदने निपतितं वक्त्रान्तर्गतम् । अत एव, निजं स्वायत्तं, बलिकरम्भनिभं उपहृतदध्युपसिक्तसक्तुसदृशं, स्वाधिष्ठितमित्यर्थः । 'करम्भा दधिसक्तव' इत्यमरः । एनमिति शेषः । कथमुज्झति उद्गिरतीत्युत्प्रेक्षा ॥

... निजेच्छया ... राहुरसंशयम् ।
... गळत्ययमत्ययं सखि विना गळनाळबिलाध्वना ॥ ६५ ॥

ऋजुदृशः कथयन्ति पुराविदो मधुभिदं किल राहुशिरश्छिदम् ।
विरहिमूर्धभिदं निगदन्ति न क नु शशी यदि तज्जठरानलः ॥ ६६ ॥

स्मरसखौ रुचिभिस्स्मरवैरिणा मखमृगस्य यथा दलितं शिरः ।
सपदि संदधतुर्भिषजौ दिवः सखि तथा तमसोऽपि करोतु कः ॥

अवनेति ॥ हे सखि, यद्वा राहुः वदनगर्भगत... प्रविष्टं शशिनं निजेच्छया स्वेच्छया, नोज्झति । असंशयं संशयो नास्ति । अर्थाभावेऽव्ययीभावः । किं स्वयं शशी अशितो गळित एव अत्ययं विना अकृच्छ्रेणेत्यर्थः । 'अत्ययोऽतिक्रमे कृच्छ्रे' इति वैजयन्ती । गळनाळबिलाध्वना कण्ठनाळान्तःकुहरमार्गेण, गळति निस्सरति । राहोः शिरोमात्रत्वेन कण्ठनाळान्तर्गतस्याशितस्य जठराग्निसंयोगविरहादस्य पापिष्ठस्येन्दोः पुनरुदय इत्युत्प्रेक्षार्थः ॥ ६५ ॥

ऋजुदृश इति ॥ ऋजुदृशः तात्कालिककार्यमात्रदर्शिनः, न त्वागामिकार्यदर्शिन इत्यर्थः । पुराविदः पुराणज्ञाः, पूर्वपुरुषाः मधुभिदं विष्णुं, राहुशिरश्छिदं कथयन्ति किल । किलेति वार्तायाम् । विरहिमूर्धभिदं वियोगिशिरश्छिदं, न निगदन्तीति काकुः । तथैव कथनीयमित्यर्थः । कुतस्तस्य राहोर्जठरानलो यदि अस्तीति शेषः । शशी क नु न क्वापि स्यादित्यर्थः । राहुशिरश्छेदेन तदीयजठराग्निविच्छेदकत्वाद्विरहिमारकं शशिनमुज्जीवयमयं विष्णुर्विरहिशिरश्छेदेनैव व्यपदेश्यः न राहुशिरश्छेदीत्यर्थः ॥ ६६ ॥

स्मरसखाविति ॥ रुचिभिः कायकान्तिभिः, स्मरसखौ स्मरसदृशौ ... दिवो भिषजौ स्वर्वैद्यौ स्मरवैरिणा हरेण दलितं भिन्नं, मख एव मृगः तस्य मृगरूपधारिणो मखस्येत्यर्थः, शिरो यथा सपदि संदधतुः संयोजयामासतुः । यो यस्य मित्रं स तस्य वैरं निर्यातयतीति युक्तम् । किंतु, हे सखि,

नलविमस्तकितस्य रणे रिपोर्मिळति किं न कबन्ध-
मृतिभिया भृशमुत्पततस्तमोग्रहशिरस्तदसृग्दृढबन्धनम् ॥
सखि जरां परिपृच्छ तमश्शिरस्सममसौ दधतापि कबन्धताम् ।
मगधराजवपुर्दळयुग्मवत् किमिति न प्रतिसीव्यति केतुना ॥ ६९ ॥
वद विधुन्तुदमाळि मदीरितैस्त्यजसि किं द्विजराजधिया रिपुम् ।
किमु दिवं पुनरेति यदीदृशः पतित एव निषेव्य हि वारुणीम् ॥

कस्तमसो राहोरपि तथा शिरस्सन्धानं करोतु । न कोऽपीत्यर्थः । हरस्य मख-मृगशिरश्छेदे पुराणं प्रमाणं, अश्विनोः पुनस्तत्सन्धाने "ततो वै तौ यज्ञस्य शिरः प्रत्यधत्ताम्" इति श्रुतिः ॥ ६७ ॥

नलेति ॥ अथवा, रणे नलेन, विमस्तकितस्य तथापि मृतिभिया भयेन, भृशमुत्पतत उद्गच्छतो रिपोः, कबन्धगळेन अपमूर्धकळेबरकण्ठेन सह तमोग्रहस्य शिरः, तस्य गलस्यासृजा रक्तेन दृढबन्धनं निबिडसंयोगं युक्तिं न मिळति न [illegible] । तथा च तज्जठराग्निना चन्द्रो जीर्येदिति भावः ॥ ६८ ॥

सखीति ॥ अथवा, हे सखि, जरां जराख्यां, निशाचरीं परिपृच्छ । असौ जरा कबन्धतां [illegible]कतां दधतापि केतुना समं केतुग्रहेण सह, तमसो राहोः शिरः, मगधराजस्य जरासन्धस्य, वपुर्दलयोश्शरीरार्धभागयोः, युग्मवत् युगळमिव, किमिति न प्रतिसीव्यति न सन्धत्ते । शिरोमात्रं राहुश्शरीरमात्रं केतुः तयोस्सन्धाने पूर्ववत्तज्जठराग्निना चन्द्रो जीर्येदिति भावः । जराकृताङ्ग-सन्धानो जरासन्ध इति भारती कथानुसन्धेया ॥ ६९ ॥

वदेति ॥ हे आळि सखि, मदीरितैः मद्वाक्यैः, विधुन्तुदं राहुं वद, रिपुं द्विजराजश्चन्द्रो ब्राह्मणश्रेष्ठश्च, तद्धिया त्यजसि किम् । [illegible]स्तीत्याह— यद्यस्मादेष चन्द्रो वारुणीं प्रतीचीं सुरां च । "वारुणी गन्धदूर्वायां प्रतीच्यां सुरयोरपि" इति विश्वः । [illegible]

[illegible] खलु तेन किं गरुडवद्द्विजवासनयोज्झितः ।
[illegible] विधुन्तुद दाहिका मयि निरागसि का वद विप्रता ॥
सकलया कलया किल दंष्ट्रया समवधाय यमाय विनिर्मितः ।
विरहिणीगणचर्वणसाधनं विधुरतो द्विजराज इति श्रुतः ॥ ७२ ॥
[illegible]मुखं हरनेत्रहुताशनाज्ज्वलदिदं निधिना चक्रुषे विधुः ।
बहुविधेन वियोगिवधैनसा शशमिषादथ कालिकयाङ्कितः ॥ ७३ ॥

ईदृशः पतितोऽपि पुनर्दिवमन्तरिक्षं स्वर्गं च एति गच्छति किमु । द्वयोरपि पतितयोरधोगतिरेव नोर्ध्वगतिरित्यर्थः । अतः पतितस्य कुतः श्रैष्ठ्यं कुतस्तरां [illegible] दोषश्चेति भावः ॥ ७० ॥

दहतीति ॥ हे विधुन्तुद, अयं विधुः द्विजवासनया द्विजत्वसामान्येनेत्यर्थः । पातित्येऽपि जातेरनपायादिति भावः । गरुडवद्गरुडस्येव । "तत्र तस्येव" इति वतिप्रत्ययः । ते तव कण्ठं दहति खलु । विधुः तेन दाहेनोज्झितः किम् । अस्य विप्रता का वद, न कापीत्यर्थः । तथा हि, अस्य विधोः प्रकृतिः निरागसि निरपराधायां मयि दाहिका दग्ध्री । अनपराधस्त्रीघातुकस्य कुतो ब्राह्मण्यमित्यर्थः । "आगोऽपराधो मन्तुश्च" इत्यमरः । पुरा किल, क्षुधितेन गरुत्मता पित्रादेशेन म्लेच्छान् भक्षयता गळतः प्रविष्टो द्विजः कश्चित् तद्दग्धगलेन सहसोद्गीर्ण इति पौराणिकी कथा । तथा माघश्चाह—"विप्रं पुरा पतगराडिव निर्जगार" इति ॥

सकलयेति ॥ विधुः सकलया कलया सकलाभिः कलाभिरेव, दंष्ट्रया दंष्ट्राभिः दन्तविशेषैः प्रकृतिद्रव्येण । उभयत्र जात्येकवचनम् । यमाय [illegible] समवधाय सम्यगवहितीभूय, विरहिणीगणस्य चर्वणसाधनं, [illegible] विनिर्मितः किल, ब्रह्मणेति शेषः । अतोऽस्माद्दंष्ट्राविशेषवत्त्वाद्द्विजराज इति श्रुतः, न तु विप्रविशेषत्वादित्यर्थः । 'दन्तविप्राण्डजा द्विजाः' इत्यमरः । [illegible] इति भावः ॥ ७२ ॥

[illegible]मिति ॥ अथ विधुश्चन्द्रो नामेदं [illegible]

इति विधोर्विविधोक्तिविगर्हणं व्यवहितस्य वृथेति विमृश्य सा ।
अतितरां दधती विरहज्वरं हृदयभाजमुपालभत स्मरम् ॥ ७४ ॥

हृदयमाश्रयसे बत मामकं ज्वलयसीत्थमनङ्ग तदेव किम् ।
स्वयमपि क्षणदग्धनिजेन्धनः क्व भवितासि हताश हुताशवत् ॥

पुरभिदा गमितस्त्वमदृश्यतां त्रिनयनत्वपरिप्लुतिशङ्कया ।
स्मर निरैक्ष्यत कस्यचनापि न त्वयि किमक्षिगते नयनैस्त्रिभिः ॥

विधिना दैवेन हरनेत्रहुताशनाच्चक्षुषे मध्ये आकृष्टः । अथवा, बहुविधेन वियोगि-वधेन यदेनः पापं, तेनैव कालिकया श्यामिकया, शशमिषादङ्कितः । दाहकालिमा वा, पापकालिमा वा, शशमिषाद्दृश्यत इति सापह्नवोत्प्रेक्षाद्वयम् ॥ ७३ ॥

इतीति ॥ अतितरामतिमात्रं, अव्ययघादामुप्रत्ययः । विरहज्वरं दधती सा दमयन्ती, इतीत्थं, व्यवहितस्य विप्रकृष्टस्य, विधोर्विविधोक्तिभि-र्विगर्हणं निन्दा वृथेति विमृश्य, अरण्यरुदितप्रायमिति विचार्य, हृदयभाजं सन्निहितं स्मरमुपालभत निनिन्द । पाक्षिकफलसम्भावनयेति भावः ॥ ७४ ॥

हृदयमिति ॥ हे अनङ्ग, ममेदं मामकम् । "तवकममकावेकवचने" इत्यणि ममकादेशः । हृदयमाश्रयसे । तदेवेत्थं किं ज्वलयसि दहसि, बत । हताश दुर्बुद्धे, स्वयं त्वमपि हुतमश्नातीति हुताशोऽग्निः, कर्मण्यण् । तद्वत् । क्षणदग्धनिजेन्धनः दग्धाश्रयस्सन्नित्यर्थः । क्व भवितासि क्व भविष्यसि, न क्वापीत्यर्थः । अनद्यतने लुट् । परं हिंसाव्यसनेनात्मनाशं न पश्यसीत्याशयेन हताशेत्यामन्त्रणम् ॥ ७५ ॥

पुरभिदेति ॥ हे स्मर, त्वं अक्षिगत इति शेषः । अनक्षिसन्निकृष्ट-त्वेऽपि दग्धुमशक्यत्वाद्द्वेष्यस्य च दाहायोगादिति भावः । पुरभिदा हरेण, त्रिनयनत्वं त्र्यक्षत्वं, क्षुभ्नादित्वाण्णत्वाभावः । तस्य परिप्लुतिशङ्कया भ्रंशा-शङ्कया विपर्ययभयेनेत्यर्थः । अदृश्यतां गमितो भस्म आपितः, "माकिनादि"

[illegible] विश्रुतिरस्त्वयि वसत्यपि मे न रतिः कुतः ।
अथ न सम्प्रति सङ्गतिरस्ति वामनुमृता न भवन्तमियं किल ॥
रतिवियुक्तमनात्मपरज्ञ किं स्वमपि मामिव तापितवानसि ।
कथमतापभृतस्तव सङ्गमादितरथा हृदयं मम दह्यते ॥ ७८ ॥"

इत्यादिना अणि कर्तुः कर्मत्वे तत्रैव क्तः । "ण्यन्ते कर्तुश्च कर्मणः" इति वचनात् । किन्तु, कस्यचनापि यस्य कस्यचिदपि, जनस्याक्षिगते दृग्गोचरे, द्वेष्ये च । 'द्वेष्ये त्वक्षिगतो वध्यः' इत्यमरः । त्वयि त्रिभिर्नयनैः किं न निरैक्षि निरीक्षितम् । हरोऽस्य त्रिनयनत्वं व्यर्थमेवेत्यर्थः । स्वाक्षिगत इव मादृशाक्षिगतेऽपि त्वयि तृतीयाक्षिनिरीक्षणाभावादपरोपकारिणस्तस्य वैयर्थ्यं, निरीक्षणस्य देवस्य जितकामत्वादन्येषां तु कामजितत्वादुत्प्रेक्ष्यत इति । त्वयि निरैक्ष्यतेत्यत्र कर्मणोऽपि स्मरस्य अनेकशक्तियुक्तस्येति न्यायेन मातरि प्रहृत-मित्यादिवदाधारत्वविवक्षायामविवक्षितकर्मकादीक्षतेर्भावे लकारः । "प्रसिद्धेर-विवक्षातः कर्मणोऽकर्मिका क्रिया" इति वचनात् ॥ ७६ ॥

सहचर इति ॥ हे स्मर, रतेः रतीदेव्याः, सन्तुष्टेश्च सहचरोऽसीति विश्रुतिः प्रसिद्धिः । त्वयि च सति हृदयस्थे सत्यपि, मे कुतो रतिर्न । अथवा, सम्प्रति वां युवयोस्सङ्गतिर्नास्ति । कुतः, इयं रतिर्भवन्तं नानुमृता किल । किलेति वार्तायाम् । अनुमरणाभावादसङ्गतिर्युक्तेत्यर्थः । अत्र प्रीतिलक्षणाया रतेर्देव्या सहाभेदाध्यवसायादयमुपालम्भः । अत एवातिशयोक्तिरलङ्कारः ॥ ७७

रतीति ॥ आत्मानं परञ्च न जानातीत्यनात्मपरज्ञ सर्वघातुक मार, मामिव रतिवियुक्तं स्वमात्मानमपि तापितवानसीत्युत्प्रेक्षा । कुतः, इतरथा, स्वाऽसन्तापने अतापभृतस्तापरहितस्य तव सङ्गमात् सम्पर्कान्मम हृदयं कथं दह्यते । तत्स्पर्शात्तापो नातत्स्पर्शादित्यर्थः । सन्तापनादपि, स्वयमतप्तेन त्वया परसन्तापः क्रियते, यथा तच्छीलैस्तप्तमुखैः शिलीमुखैरिति भावः ॥ ७८ ॥

अनुममार न मार कथं नु सा रतिरिति प्रथितापि पतिव्रता ।
इयदनाथवधूवधपातकी दयितयापि तयासि किमुज्झितः ॥ ७९ ॥

सुगत एव विजित्य जितेन्द्रियस्त्वदुरुकीर्तितनुं यदनाशयत् ।
तव तनूमवशिष्टवतीं ततस्समिति भूतमयीमहरद्धरः ॥ ८० ॥

फलमलभ्यत यत्कुसुमैस्त्वया विषमनेत्रमनङ्ग निगृह्णता ।
अहह नीतिरवाप्तभया ततो न कुसुमैरपि विग्रहमिच्छति ॥ ८१ ॥

अनुममारेति ॥ हे मार मारक, पतिव्रतेति प्रथितापि सा रतिः कथं नानुममार कथं नानुमृता । 'मृते म्रियेत या नारी सा स्त्री ज्ञेया पतिव्रता' इत्यनुस्मरणादिति भावः । अथवा, इयद्भिरेतावद्भिरसङ्ख्यैरित्यर्थः । अनाथवधूनां वियोगिस्त्रीणां, वधैः पातकी त्वं, तया दयितयापि विरहासहमानयापीति भावः उज्झितः त्यक्तोऽसि किमित्युत्प्रेक्षा । "आशुद्धेस्संप्रतीक्ष्यो हि महापातकदूषित" इति स्मरणादिति भावः ॥ ७९ ॥

सुगत इति ॥ जितेन्द्रियो वशी सुगतो बुद्ध एव, विजित्य, तव उरुं महतीं कीर्तिमेव तनुं शरीरं, यद्यस्मादनाशयत् नाशितवान् । ततः, कारणादवशिष्टवतीमवशिष्टां भूतमयीं पाञ्चभौतिकां तव तनुं समिति युद्धे हरश्शम्भुरहरत् भस्मीचकारेत्यर्थः । तथापि निर्लज्जः कथमित्थमस्मादृशानकरुणं व्यथयसीति हसिताः स्म इति भावः ॥ ८० ॥

फलमिति ॥ हे अनङ्ग, विषमनेत्रं त्र्यक्षं, कुसुमैर्निगृह्णता निरुन्धता, प्रहरतेत्यर्थः । त्वया यत्फलं मरणरूपमलभ्यत । ततस्तस्मात् फलादवाप्तभया नीतिः, सर्वथा साधनान्तरेणापि वैरनिर्यातनं कार्यमित्येवंरूपा (कर्त्री), कुसुमैरपि विग्रहं नेच्छति । अहहेत्यद्भुते । किमुत साधनान्तरैः, पुष्पैरपि न योद्धव्यं किं पुनर्निशितैश्शरैरिति नीत्या कुसुमान्यपि मोक्तुं बिभेतीति भावः ॥ ८१ ॥

अपि यद्यमितरामरवत्सुधां त्रिनयनात्कथमापिथ तां दशाम् ।
फण रतेरधरस्य रसादरादमृतमाप्तघृणः खलु नापिबः ॥ ८२ ॥
भुवनमोहनजेन किमेनसा तव परेत बभूव पिशाचता ।
यदधुना विरहाधिमलीमसामभिभवन् भ्रमसि स्मर मद्विधाम् ॥
फण ददासि न मृत्युमपि स्मर स्खलति ते कृपया न धनुःकरात् ।
अथ मृतोऽसि मृतेन च मुच्यते न किल मुष्टिरुरीकृतबन्धनः ॥

अपीति ॥ हे स्मर, इतरामरवद्देवतान्तरवत्, सुधां धयन् पिबन्नपि, चेद्धशतृप्रत्ययः । त्रिनयनादीश्वरात्, कथं तां दशां मरणावस्थां, आपिथ प्राप्तो भूः, आप्नोतेर्लिटि थलि क्रयादिनियमादिडागमः, फण वद । अथवा, रतेर्देव्याः, अधरस्योष्ठस्य, रसे स्वादे, आदरादास्थावशात्, आप्तघृणः प्राप्तामृतजुगुप्सः सन्, 'घृणा जुगुप्सा कृपयोः' इति वैजयन्ती । अमृतं नापिबः खलु । अमृतपाने, कथमन्येष्वमरेषु त्वमेकः मृत इति भावः ॥ ८२ ॥

भुवनेति ॥ परेत प्रेत, तव भुवनानां मोहनमचेतनीकरणं तज्जेनैनसा पापेन, पिशाचता बभूव किम् । कुतः, स्मर, यद्यस्मादधुना विरहाधिना वियोगव्यथया मलीमसां मलिनां, मद्विधां मादृशीमबलामभिभवन् पीडयन्, भ्रमसि, पापिष्ठाः किल पिशाचतां गताः दुर्बलस्त्रीबालादीन् पीडयन्ति, त्वञ्च तादृशोऽपि पिशाच इत्युत्प्रेक्षा ॥ ८३ ॥

फणेति ॥ हे स्मर, मृत्युमपि न ददासि । तेन दुःखान्तो भवेदिति भावः । अथवा, कृपया ते कराद्धनुरपि न स्खलति न भ्रश्यति । पूर्ववद्भावः । अथ मृतोऽसि । तथापि न स्खलतीत्याह—मृतेन च मृतेनापि, उरीकृतबन्धनः अङ्गीकृतबन्धनः दृढबद्ध इत्यर्थः । 'उर्यङ्गयूर्युररीभ्यश्च करोति कुरुते परः' इति महमल्लः । मुष्टिर्न मुच्यते खलु । फणेति खेदे । ततः कृतान्तादपि क्रूरोऽसीति भावः ॥ ८४ ॥

दृगपहत्यपमृत्युविरूपताश्शमयते परनिर्जरसेविता ।
अतिशयान्ध्यवपुःक्षतिपाण्डुतास्स्मर भवन्ति भवन्तमुपासितुः ॥

स्मर नृशंसतमस्त्वमतो विधिस्सुमनसः कृतवान् भवदायुधम् ।
यदि धनुर्दृढमाशुगमायसं तव सृजेत् प्रलयं त्रिजगद्व्रजेत् ॥ ८६ ॥

स्मररिपोरिव रोपशिखी पुरां दहतु ते जगतामपि मा त्रयम् ।
इति विधिस्त्वदिषून् कुसुमानि किं मधुभिरन्तरसिञ्चदनिर्वृतः ॥

दृगिति ॥ हे स्मर; परनिर्जरसेविता त्वत्तोऽन्यदेवतासेवको जनः, तृच् । दृशोरपहतिः, आन्ध्यं, अपमृत्युरकालमरणं, विरूपता अङ्गवैवर्ण्यञ्च, शमयते निवर्तयति । "णिचश्च" इत्यात्मनेपदम् । मित्त्वाद्ध्रस्वत्वम् । भवन्तमुपासितुः त्वत्सेविनो जनस्य तु। ताच्छील्ये तृन् । "न लोक" इत्यादिना षष्ठीप्रतिषेधः । अतिशयेनान्ध्यं दृष्ट्युपघातः वपुःक्षतिः शरीरविपातः पाण्डुता वैवर्ण्यञ्च भवन्तीति देवतान्तरभक्तस्य उक्तदोषशान्तिः फलं, तद्भक्तस्य तदुद्रेक इत्यहो भक्तवात्सल्यं कामदेवस्येत्युपहासः । अत्रानर्थोत्पत्तिलक्षणो विषमालङ्कारभेदः ॥ ८५ ॥

स्मरेति ॥ हे स्मर, नॄन् शंसतीति नृशंसो घातुकः, 'शंस हिंसायाम्' इति धातो पचाद्यच् । त्वमतिनृशंसः नृशंसतमः, अतो (हेतोः) विधिः स्रष्टा, सुमनसः पुष्पाणि भवतः, आयुधं कृतवान् । तव दृढं धनुरायसमयोमयं आशुगं शरञ्च सृजेद्यदि । त्रयाणां जगतां समाहारस्त्रिजगत् (कर्तृ), प्रलयं विनाशं, व्रजेत् । तव, पापिष्ठतां दृष्ट्वा, विदुषा परमेष्ठिना सम्यगनुष्ठितमिति भावः ॥ ८६ ॥

स्मरेति ॥ स्मररिपोस्त्वदरेर्हरस्य रोपशिखी बाणाग्निः । 'पत्री रोप इषुर्द्वयोः' इत्यमरः । पुरां त्रयमिव ते तव, रोपशिखी जगतां त्रयं मा दहत्विति मत्वेति शेषः । गम्यमानार्थत्वादप्रयोगः । विधिः स्रष्टा, अनिर्वृतस्त्वा, कुसुमेषु

विधिरनङ्गमभेद्यमवेक्ष्य ते जनमनः खलु लक्ष्यमकल्पयत् ।
अपि स वज्रमदास्यत चेत्तदा त्वदिषुभिर्व्यदलिष्यदसावपि ॥ ८८

अपि विधिः कुसुमानि तवाशुगान् स्मर विधाय न निर्वृतिमाप्तवान् ।
अदित पञ्च हि ते स नियम्य तान् तदपि तैर्बत जर्जरितं जगत् ॥

उपहरन्ति न कस्य सुपर्वणस्सुमनसः कति पञ्च सुरद्रुमाः ।
तव तु हीनतया पृथगेकिकां धिगियतापि न तेऽङ्गविदारणम् ॥

कृत्वाप्यपरितुष्टस्सन्, त्वदिषून् कुसुमानि मधुभिर्मकरन्दैः अन्तरासिञ्चत् अग्नि शान्त्यर्थमोक्षत् किमित्युत्प्रेक्षा । अन्यथा पापिष्ठस्य ते को वारयितेति भावः ॥

विधिरिति ॥ विधिर्ब्रह्मा, अनङ्गमनवयवम् । 'अङ्गं प्रतीकोऽवयवः' इत्यमरः । अत एवाभेद्यमवेक्ष्य, निरवयवद्रव्यत्वादविनाश्यं निश्चित्य जनमनः ते तव, लक्ष्यमकल्पयादत्युत्प्रेक्षा । सावयवलक्ष्यदानपक्षे, स विधिर्वज्रमदास्यत चेद्दद्याद्यदि, तदा त्वदिषुभिरसौ वज्रोऽपि व्यदलिष्यद्विशीर्णो भवेत् । अतो युक्तकारी स्रष्टेति भावः ॥ ८८ ॥

अपीति ॥ हे स्मर, विधिः कुसुमान्येव तवाशुगान्विधायापि, निर्वृतिं कृतकृत्योऽस्मीति परितोषं नाप्तवानित्युत्प्रेक्षा । कुतः, हि यस्मात् सोऽनिर्वृतो विधिस्तान् कुसुमान्याशुगानपि, नियम्य इयन्त एवेति नियमं कृत्वा । ते तव, पञ्चैवादित दत्तवान् । तदपि तथापि तैः पञ्चभिरेव जगत् जर्जरितं जर्जरीकृतं बतेति खेदः । विश्वनियन्ताप्येव विफलयत्नः, कोऽन्योऽस्ति नियन्तेति भावः ॥

उपहरन्तीति ॥ हे स्मर, पञ्च सुरद्रुमा मन्दारादयः, कस्य सुपर्वणः, कति सुमनसः, कियन्ति कुसुमानि, नोपहरन्ति नोपायनीकुर्वन्ति । सर्वस्याप्यमितमुपहरन्तीत्यर्थः । 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः । तव तु हीनतया नीचतया, पृथक् प्रत्येकमेकिकामेकाकिनीमेकैकां सुमनोव्यक्तिमुपहरन्तीत्यर्थः । अत एव पञ्चबाणत्वन्तवेति भावः । "एकादाकिनञ्चासहाये"

कुसुममप्यतिदुर्नयकारि ते किमु वितीर्य धनुर्विधिरग्रहीत् ।
किमकृतैष यदेकतदास्पदे द्वयमभूदधुनापि नलभ्रुवोः ॥ ९१ ॥

षडृतवः कृपया स्वकमेककं कुसुममक्रमनन्दितनन्दनाः ।
ददति षड् भवते कुरुते भवान् धनुरिवैकमिषूनिव पञ्च तैः ॥९२॥

यदतनुस्त्वमिदं जगते हितं क स मुनिस्तव यः सहते क्षतीः ।
विशिखमाश्रवणं परिपूर्य चेदविचलद्भुजमुज्झितुमीशिषे ॥ ९३ ॥

इति चकारात् कन्प्रत्यये पूर्वस्येकारः । इयता एतावदवमानेनापि ते तवाङ्ग-विदारणं शरीरविपत्तिर्नास्ति धिक् । अवमतस्य जीवनान्मरणमेव वरमिति भावः ॥ ९० ॥

कुसुममिति ॥ विधिः कुसुममपि दुर्बलमपीत्यर्थः । अतिदुर्णयकारि अनर्थकारकं धनुस्ते तव वितीर्य दत्त्वा, अग्रहीत् किमु पुनर्जहार किमित्युत्प्रेक्षा । पापीयसे दत्तं हर्तव्यमेवेति भावः । किंत्वेष विधिः, किमकृत अकार्यमेव कृतवानित्यर्थः । कुतः, यद्यस्मादेकस्य तस्य धनुष आस्पदे स्थाने, अधुना नलभ्रुवो-र्द्वयमभूदि । तेनैव धनुषा नलभ्रुवौ द्वे निर्मितवता तेन [illegible]कमुद्भूय[illegible]ल्यमारोपितं, यदेकासहिष्णोर्द्वयमसह्यं सम्पादितमिति भावः ॥ ९१ ॥

षडिति ॥ अक्रमेण यौगपद्येन नन्दितनन्दनाः प्रकाशितसुरोद्यानाः, युगपन्निजकुसुमदानसमर्था इत्यर्थः । षडृतवो वसन्तादयः, कृपया, न तु प्रीत्येति भावः । स्वकं स्वसम्बन्धिनं, एककमेकैकमेव, असहाये कन्प्रत्ययः । कुसुमं ददाना इति शेषः । तथा चोपकरीत्या, प्रत्येकमेकैकदानान्मिलित्वा, षड् भवते तुभ्यं ददति । तैः षड्भिः, कुसुमैरेकं धनुरिव, एकेनेति शेषः । पञ्चेषूनिव, पञ्चभिरिति शेषः । भवान् कुरुते । अहो [illegible]ऽपि निर्लज्जस्य ते परहिंसा-व्यसनमिति भावः ॥ ९२ ॥

यदिति ॥ हे मार, त्वमतनुरशरीरीति यत्तदिदमतनुत्वं जगते हितं "हितयोगे च". इति चतुर्थी वक्तव्या । तथाहि विशिखं बाणमविचलद्भुज-

सह यया स्मर भस्म झटित्यभूः पशुपतिं प्रति यामिषुमग्रहीः ।
ध्रुवमभूदधुना वितनोश्शरस्तव पिकस्वर एव स पञ्चमः ॥ ९४ ॥

स्मर समं दुरितैरफलीकृतो भगवतोऽपि भवद्दहनश्रमः ।
सुरहिताय हुतात्मतनुः पुनर्ननु जनुर्दिवि तत्क्षणमापिथ ॥ ९५ ॥

विरहिणो विमुखस्य विधूदये शमनदिक्पवनस्स न दक्षिणः ।
सुमनसो नमयन्नटनौ धनुस्तव तु बाहुरसौ यदि दक्षिणः ॥ ९६ ॥

मकंप्रहृत्तं यथा तथा, आश्रवण परिपूर्णकर्णमाकृष्य उज्झितुं मोक्तुमीशिषे शक्नोषि चेद्यस्तव क्षतीः प्रहारान् सहेत, स मुनिः क, न क्वापीत्यर्थः । अनङ्गत्वेऽप्येवं जगद्द्रोहिणस्तव धानुष्कान्तरवत् कायव्यापारे, जगति जितेन्द्रिय-कथैवास्तमियादित्यनङ्गत्वमेव जगद्धितमित्यर्थः ॥ ९३ ॥

सहेति ॥ हे स्मर, पशुपतिं प्रति, यामिषुमग्रहीस्तया सह झटिति सहसा भस्माभूः, अधुना वितनोरनङ्गस्य तव पिकस्वरः कोकिलालाप एव, सः दग्धः पञ्चमः, पञ्चसङ्ख्यापूरणश्शरोऽभूत् । ध्रुवम् । अत एव, पिकः कूजति पञ्चममित्याख्यो पिकस्वरे पञ्चमसंज्ञाप्रवृत्तिश्चेति भावः । 'पञ्चमो रागभेदे स्यात् पञ्चानामपि पूरणे' इति विश्वः । शरकार्यकारित्वात् पिकस्वरस्य शरत्वोत्प्रेक्षा ॥

स्मरेति ॥ हे स्मर, भगवतो हरस्यापि, दुरितैस्समं भवत्पापैस्सह भगवद्दृष्टिपातस्य पापहरत्वादिति भावः । भवद्दहनश्रमोऽफलीकृतो निष्फलीकृतः, सुरहिताय हुतात्मतनुर्हरकोपानले त्यक्तस्वदेहस्सन्, तत्क्षणं तस्मिन्नेव क्षणे अत्यन्तसंयोगे द्वितीया । दिवि द्युलोके, पुनर्जनुः पुनरुत्पत्तिमापिथ ननु प्राप्नोषि खलु । सुरप्रार्थितात्तस्माद्देवेति शेषः । तथास्मत्पापफलमिति भावः ॥ ९५ ॥

विरहिण इति ॥ हे शूर, तवासौ बाहुर्यदि विधूदये चन्द्रोदये, सहाय-लाभे सतीत्यर्थः । सुमनसः पुष्पं नाम धनुः, अटनौ कोटौ । 'कोटिरस्याटनिर्गोधा' इत्यमरः । नमयन् दाक्षिण्यो विरहिजनप्रहारदक्षत्वात्, प्रहर्तुं प्रवृत्तश्चे-

किमु भवन्तमुमापतिरेककं मदमुदन्धमयोगिजनान्तकम् ।
यदजयत्तत एव न गीयते स भगवान् मदनान्धकमृत्युजित् ॥ १७

त्वमिव कोऽपि परापकृतौ कृती न ददृशे न च मन्मथ शुश्रुवे ।
स्वमदहद्दहनाज्ज्वलतात्मना ज्वलयितुं परिरभ्य जगन्ति यः ॥ १८

दित्यर्थः । "सव्येतरश्च" इति ध्वनिः । तदा विमुखस्य विह्वलमुखस्य चन्द्रोदयपराङ्मुखस्य विरहिणो वियोगिजनस्य . सः दक्षिणत्वेन प्रसिद्धश्शमनदिक्पवनो याम्यदिगागतः, दक्षिणो दाक्षिण्यवान् सव्येतरश्च न । किं तु सोऽपि त्वत्सहकारित्वान्निर्दयप्रहर्तैवेत्यर्थः । अतस्सर्वानर्थमूलत्वात् त्वमेव पापिष्ठ इत्यर्थः । प्रत्यङ्मुखस्य दक्षिणोऽपि वाम इति ध्वनिः । शमनदिक्पवनोऽपि न दाक्षिण इति स्फुरणाद्विरोधाभासोऽलङ्कारः ॥ १६ ॥

किम्विति ॥ हे मदन, उमापतिः मदश्च मुच, द्वन्द्वैकवद्भावः । तेन मदमुदा मदानन्दाभ्यां अन्धयति व्यामोहयति कामिजनमित्यन्धं अन्धकम् । 'अन्ध दृष्टिप्रतीघाते' इति धातोश्चौरादिकात् पचाद्यच् । अयोगिजनान्तकं वियोगिजनमृत्युं, एककमेकाकिनं, भवन्तमेव अजयदिति यत् । तत एव स, भगवान् उमापतिः । मदनान्धकमृत्युजित् मदनजिदन्धकजिन्मृत्युजिदिति न गीयते किमु, गीयत एवेत्यर्थः । मदनवदन्धकमृत्यू अपि त्वत्तोऽन्यौ न स्त इति भावः । अत्र मदनादीनां मिथो भेदेऽप्यभेदोक्तेरतिशयोक्तिः ॥ १७ ॥

त्वमिति ॥ हे मन्मथ, त्वमिव परापकृतौ परापकारे कृती कुशलः कोऽपि न ददृशे न दृष्टः, न शुश्रुवे न च श्रुतः, यः अपकर्ता दहनादग्निसंयोगात्, ज्वलता प्रज्वता, आत्मना स्वाङ्गेन जगन्ति परिरभ्याश्लिष्य ज्वलयितुं दग्धुं, स्वमात्मानं, अदहत् । परिरभ्य परगात्रदूषणाय स्वगात्रे पङ्कलेपवत्, परदाहव्यसनोद्रेकात्स्वदाहाङ्गीकारस्तवेत्यहो दुर्व्यसनमिति भावः ॥ १८ ॥

त्वमुचितं नयनार्चिषि शम्भुना भुवनशान्तिकहोमहविः कृतः ।
तव वयस्यमपास्य मधुं मधुं हृतवता हरिणा बत किं कृतम् ॥ ९९ ॥
इति वियद्वचसैव भृशं प्रियाधरपिपासु तदाननमाशु तत् ।
अजनि पांसुलमप्रियवाग्ज्वलन्मदनशोषणबाणहतेरिव ॥ १०० ॥
प्रियसखीनिवहेन सहाथ सा व्यरचयद्गिरमर्धसमस्यया ।
हृदयमर्मणि मन्मथसायकैः क्षततमा बहु भाषितुमक्षमा ॥ १०१ ॥

त्वमिति ॥ हे मार, शम्भुना नयनार्चिषि नेत्राग्निशिखायां त्वं भुवनानां शान्तिके शान्तिप्रयोजके । "प्रयोजनम्" इति ठक् । होमहविराहुतिः कृतः । उचितं वध्यस्य वधादिति भावः । तव वयस्यं सखायं, मधुं वसन्तं अपास्योपेक्ष्य मधुं मध्वाख्यं, दैत्यं हतवता हरिणा किं कृतम् । बतेति खेदे । वध्यवधाद्धरस्साधुकारी । हरिस्तदुपेक्षणादसाधुकारीत्यर्थः । समित्रः स्मरो वध्य इति भावः ॥ ९९ ॥

इतीति ॥ प्रियस्य नलस्याधरमोष्ठं पिपासु पातुमिच्छु, मधुपिपासुप्रभृतीनां गम्यादिपाठात् समास इति वामनः । तत् प्रसिद्धम्, तस्या भैम्या आननम्, इतीत्थं, वियद्वचसैव, अप्रियवाग्भिर्निष्ठुरोक्तिभिः, ज्वलतः क्रुध्यतो मदनस्य यः शोषणबाणः तस्य हतेः प्रहारादिवेति हेतूत्प्रेक्षा । आशु भृशं, पांसुलं पांसुमद्रूक्षं, अजनि जातम् ॥ १०० ॥

प्रियसखीति ॥ अथ सा दमयन्ती, मन्मथसायकैः हृदयमर्मणि क्षततमा गाढं प्रहृता । अत एव बहु भाषितुं प्रपञ्चेन वक्तुमक्षमा सती प्रियसखीनिवहेन सह आप्तसखीसङ्घेन सार्धं अर्धरूपया समस्यया सङ्ग्रहकारिकया । 'समस्या तु समासार्था' इत्यमरः । संज्ञायां समजनिषदेत्यत्र संपूर्वादस्यतेर्बाहुलकात् क्यप्' इति क्षीरस्वामी । गिरं व्यरचयत् । पूर्वार्धं सखीजनसमस्या, तदुत्तरत्वेनोत्तरार्धं स्वयमरचयदित्यर्थः ॥ १०१ ॥

अकरुणादव सूनशरादसून् सहजयाऽऽपदि धीरतयात्मनः ।
असव एव ममाद्य विरोधिनः कथमरीन् सखि रक्षितुमात्थ माम् ॥

हितगिरं न शृणोषि किमाश्रवे प्रसभमप्यव जीवितमात्मनः ।
सखि हिता यदि मे भवसीदृशी मदरिमिच्छसि या मम जीवितम् ॥

अमृतदीधितिरेष विदर्भजे भजसि तापममुष्य किमंशुभिः ।
यदि भवन्ति मृतास्सखि चन्द्रिकाः शशभृतः क तदा परितप्यते ॥

अकरुणादिति ॥ हे भैमि, आपदि सहजया धीरतया धैर्येण । विपदि धैर्यमिति नीतेरिति भावः । अकरुणान्निर्दयात् सूनशरात् कुसुमेषोः, आत्मनः स्वस्यासून् प्राणान् अव रक्ष । अथेदानीमसव एव मम विरोधिनः शत्रवः । तन्मूलत्वाद्दुःखसंवेदनस्येति भावः । हे सखि, मां कथमरीन्रक्षितुमात्थ ब्रवीषि "ब्रुवः पञ्चानाम्" इति साधुः । सम्प्रति मे प्राणरक्षणमाशीविषपोषणं पयोभिरिति भावः ॥ १०२ ॥

हितगिरमिति ॥ आशृणोति वाक्यमिति आश्रवा । पचाद्यच् । हे आश्रवे वाक्यकारिणि । 'वचने स्थित आश्रव' इत्यमरः । प्रसभं बलादप्यात्मनो जीवितं प्राणमव रक्ष । "एति जीवन्तमानन्दो नरं वर्षशतादपि" इति न्यायादिति भावः । हितगिरमाप्तवाक्यं किं न शृणोषि । हे सखि, या त्वं मदरिं मम जीवितमिच्छस्यपेक्षसे । ईदृशीत्थं शत्रुवृद्धिमीहमानापि, मे हिता भवसि यदि । न तु भवसि । अतो न शृणोमीत्यर्थः ॥ १०३ ॥

अमृतदीधितिरिति ॥ हे विदर्भजे दमयन्ति, एष इति पुरोवर्तिनो हस्तेन निर्देशः । अमृतदीधितिः सुधांशुः, अमुष्य सुधांशोरंशुभिः किमिति तापं भजसि । अत्रामृतशब्दस्यार्थान्तराश्रयेणोत्तरमाह—यदीति ॥ हे सखि, शशभृतश्चन्द्रिकाः मृताः भवन्ति यदि तदा क परितप्यते, न कापीत्यर्थः । अस्यामृतदीधितित्वादेवेदं दुःखं, मृतदीधितिश्चेत् सर्वोऽरिष्टशान्तिरस्यापीति भावः।

व्रज धृतिं त्यज भीतिमहेतुकामयमचण्डमरीचिरुदञ्चति ।
ज्वलयति स्फुटमातपमुर्मुरैरनुभवं वचसा सखि लुम्पसि ॥ १०५

अयि शपे हृदयाय तवैव तद्यदि विधोर्न रुचेरसि गोचरः ।
रुचिफलं सखि दृश्यत एव यज्ज्वलयति त्वचमुल्ललयत्यसून् ॥

विधुविरोधितिथेरभिधायिनीमयि न किं पुनरिच्छसि कोकिलाम् ।
सखि किमर्थगवेषणया गिरं किरति सेयमनर्थमयीं मयि ॥ १०७

अत्र अमृतेति सुधाविवक्षया प्रयुक्तस्य मृततरार्थत्वेन योजनाद्वक्रोक्तिरलङ्कारः । "अन्ययोक्तस्य वाक्यस्य काक्वा श्लेषेण वा भवेत् । अन्यथा योजनं यत्र सा वक्रोक्तिर्निगद्यते ॥" इति ॥ १०४ ॥

व्रजेति ॥ (हे मुग्धे), धृतिं व्रज धैर्यं भज । अहेतुकां भीतिं त्यज । अयम् अचण्डमरीचिश्शीतांशुरुदञ्चत्युदेति, न चण्डांशुरित्यर्थः । आतपैरेव मुर्मुरैस्तुषानलैः 'मुर्मुरस्तु तुषानल' इति वैजयन्ती । स्फुटं प्रत्यक्षं यथा तथा ज्वलयति दहति । हे सखि, अनुभवं प्रत्यक्षं वचसा आगमेन लुम्पसि बाधसे । तदयुक्तं प्राबल्यवन्-वाक्यवत् प्रत्यक्षेणैवास्य बाधादित्यर्थः । अत्राचण्डकरे चण्डकरभ्रान्त्या भ्रान्तिमदलङ्कारः ॥ १०५ ॥

यदुक्तमयमचण्डमरीचिरिति तद्विश्वासयति—अयीति ॥ अयि (मुग्धे), भैमि, विश्वसिहीति शेषः । विधोश्चन्द्रस्य रुचेस्तेजसो गोचरो विषयो नासि यदि, त्वदङ्गसङ्गीदं तेजश्चान्द्रं न चेदित्यर्थः । तत्तर्हि तवैव हृदयाय शपे । त्वज्जीविताय शपामीत्यर्थः । "श्लाघह्नुङ्" इत्यादिना सम्प्रदानत्वाच्चतुर्थी । तर्हि, सखि रुचिफलमेव तेजोमात्रकार्यमेव दृश्यते । न तु चन्द्रकार्यम् । भाग्यविपर्ययेणाभिभवनिवृत्तेरिति भावः । कुतः, यद्यस्मात्त्वचं ज्वलयति दहति । असून् प्राणान्, उल्ललयति उन्मूलयति । सर्वं तेजः उष्णत्वाद्दाहकमेव अभिभवात्तु विपर्यय इति पदार्थतत्त्ववादिनः ॥ १०६ ॥

विधिवेति ॥ अयि भैमि, विधुविरोधितिथेः कुह्वाख्याया नष्टेन्दुतिथेः

हृदय एव तवास्ति स वल्लभस्तदपि किं दमयन्ति विषीदसि ।
हृदि परं न बहिः खलु वर्तते सखि यतस्तत एव विषद्यते ॥

स्फुटति हारमणौ मदनोष्मणा हृदयमप्यनलंकृतमद्य ते ।
सखि हतास्मि तदा यदि हृद्यपि प्रियतमस्स मम व्यवधापितः ॥

इदमुदीर्य तदैव मुमूर्छ सा मनसि मूर्छितमन्मथपावका ।
क सहतामवलम्बलवच्छिदामनुपपत्तिमतीमपि दुःखिता ॥११०॥

रभिधायिनीं, तदभिधायककुहूशब्दोच्चारिणीं कुहू कुहूति नामग्राहं तदाह्वयिनीमित्यर्थः । कोकिलां पुनः किं नेच्छसीत्यर्थः । हे सखि, अर्थगवेषणया कुहूशब्दस्य नष्टचन्द्रा तिथिरर्थ इति विचारेण किम् । तत्साध्यं किमपि नास्तीत्यर्थः । गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीया । कुतः, सेयं कोकिला मयि विषये गवादिशब्दवदभिधेयवती न भवतीत्यनर्थमयी, रथघोषादिवदर्थशून्यत्वात् । किंच, अनर्थमयीं अशनिघोषवदापद्रूपां च तां । अनर्थशब्दान्मयट्प्रत्ययः । गिरं किरति विक्षिपति ॥ १०७ ॥

हृदय इति ॥ हे दमयन्ति, सः ते वल्लभः नलः तव हृदय एवास्ति वर्तते । तदपि तथापि किं विषीदसि खिद्यसे । हे सखि, यतो हृदि परं हृद्येव वर्तते बहिर्न वर्तते खलु । तत एव विषद्यते खिद्यते । सदेर्भावे लट् । यतः स्मर्यत एव । न तु दृश्यते । अतो मे विषाद इत्यर्थः ॥ १०८ ॥

स्फुटतीति ॥ हे भैमि, मदनोष्मणा कामज्वरेण, हारमणौ हृदयालङ्कारेऽस्मिन् स्फुटति विदलति सति, अद्य ते तव हृदयं वक्षोऽपि अलङ्कृतं न भवतीत्यनलङ्कृतं अपरिष्कृतं जातम् । अथ हृदयमन्तरङ्गमप्यनलं नलरहितं कृतमित्यर्थान्तरं मत्वोत्तरमाह—हे सखि, स प्रियतमः मम हृद्यपि व्यवधापितो यदि दूरीकृतश्चेत् । दधातेर्ण्यन्तात्कर्मणि क्तः । "अर्तिह्री" इत्यादिना पुगागमः । तदा हतास्मि । वक्रोक्तिरलङ्कारः । लक्षणमुक्तम् ॥ १०९ ॥

इदमिति ॥ सा भैमी, इदं पूर्वोक्तं सखि हतास्मीति वाक्यं उदीर्य उच्चार्य. तदैव मनसि मूर्छितमन्मथपावका प्रवृद्धकामानला सती. मुमूर्छ मुमोह ।

[illegible] कापि मुखे सलिलं सखी न्यधित कापि सरोजदलैः स्तनौ।
न्यधित कापि हृदि व्यजनानिलं न्यधित कापि हिमं सुतनोस्तनौ॥
उपचचार चिरं मृदुशीतलैर्जलजजालमृणालजलादिभिः।
प्रियसखीनिवहस्स तथा क्रमादियमवाप यथा लघु चेतनाम्॥
अथ कले कलय श्वसिति स्फुटं चलति पक्ष्म चले परिभावय।
अधरकम्पनमुन्नय मेनके किमपि जल्पति कल्पलते शृणु॥ ११३

मूर्छा मोहसमुच्छ्राययोरित्यर्थद्वयेऽपि धातोः स्मरणात्। तथाहि, दुःखिता सञ्जातदुःखा, दुःखिनी सा। अनुपपत्तिमर्तामनलङ्कृतमिति श्लेषशब्दश्रवणजन्यभ्रान्तिविषयत्वादनुपपन्नामर्गीत्यर्थः। अवलम्बलवस्य हृदयसन्ततिमात्रलक्षणस्य प्राणाधारलेशस्यापि छिदामुच्छेदं क सहतां, कथं सहेदित्यर्थः। दुःखोद्विग्नस्य भ्रान्तमभ्रान्तं वानिष्टसंवेदनमतिदुःसहमतो युक्तमस्या मूर्छनमिति भावः। अर्थान्तरन्यासोऽलङ्कारः॥ ११०॥

अधितेति॥ कापि सखी सुतनोर्भैम्या मुखे सलिलं अधित आहितवतीत्यर्थः। कापि स्तनौ सरोजदलैः न्यधित निहितवती, 'वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यपेरकारलोपः। कापि हृदि व्यजनानिलं न्यधित निहितवती। तालवृन्तेन वीजयामासेत्यर्थः। कापि तनौ शरीरे हिमं चन्दनम्। 'चन्दनेऽपि हिमं विदुः' इति विश्वः। न्यधित निहितवती॥ १११॥

उपचचारेति॥ स प्रियसखीनिवहः मृदुशीतलैर्जलजजालमृणालजलादिभिः, जलजजालैः पद्मसमूहैः, मृणालैर्जलैः, आदिशब्दाद्व्यजनादिसाधनविशेषैः, क्रमाच्चिरं तथोपचचार। यथेयं भैमी लघु क्षिप्रं चेतनां संज्ञामवाप॥

अथ भैम्याः कलादयस्सप्त सख्यस्तासां तद्दशापरीक्षाव्यग्राणां मिथः कलकलं श्लोकद्वयेनाह—**अथेति**॥ अथानन्तरं, इति गिरः शुश्रुविर इति सम्बन्धः। ता एवाह—हे कले स्फुटं व्यक्तं श्वसिति प्राणिति, कलय आकलय।

रचय चारुमते स्तनयोर्वृतिं गणय केशिनि केश्यमसंयतम् ।
अवगृहाण तरङ्गिणि नेत्रयोर्जलझराविति शुश्रुविरे गिरः ॥ ११४ ॥

कलकलस्स तदालिजनाननादुदलसद्विपुलस्त्वरितैरितैः ।
यमधिगम्य सुतालयमेतवान् द्रुततरस्स विदर्भपुरन्दरः ॥ ११५ ॥


कन्यान्तःपुरबोधनाय यदधीकारान्न दोषा नृपं
द्वौ मन्त्रिप्रवरश्च तुल्यमगदंकारश्च तावूचतुः ।
देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं
स्यादस्या नलदं विना न दळने तापस्य कोऽपि क्षमः ॥

हे चले, पक्ष्म नेत्रलोम चलति चक्षुरुन्मिषतीत्यर्थः । परिभावय परामृश । हे मेनके, अधरकम्पनमोष्ठचलनमनुभय तर्कय । हे कल्पलते, किमपि जल्पति शृणु ॥ ११३ ॥

रचयेति ॥ हे चारुमते, स्तनयोर्वृतिमावरणं रचय । हे केशिनि, असंयतं विस्रस्तं, कैश्यं केशसमूहं, "केशाश्वाभ्यां यञ् छावन्यतरस्याम्" इति यञ्प्रत्ययः । गणय चिन्तय । बधानेत्यर्थः । हे तरङ्गिणि, नेत्रयोर्जलझरावश्रुप्रवाहौ, अवगृहाण बधान । इति गिरश्शुश्रुविरे श्रुताः ॥ ११४ ॥

कलकल इति ॥ तदा तस्मिन् सखीजनव्याकुलकाले, आळिजनाननात् सखीमुखात्त्वरितैः सम्भ्रमान्वितैः, विपुलो महान्, सः कलकलः उदलसदुत्थितः । यं कलकलमधिगम्याकर्ण्य, स विदर्भपुरन्दरः भीमभूपतिः, द्रुततरोऽतित्वरितः, सुतालयमेतवान् कन्यान्तःपुरं प्राप्तवान् ॥ ११५ ॥

कन्येति ॥ कन्यान्तःपुरस्य बोधनाय योगक्षेमानुसन्धानाय, यदधीकारात् ययोर्मन्त्रिवैद्ययोरधीकारान्नियोगात् । "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः । दोषाः परपुरुषप्रवेशादयो वातादयश्च न सन्तीति शेषः । अखि-



ताभ्यामथ युगपदप्यभिधीयमानं
भेदव्ययाकृति मिथःप्रतिघातमेव ।
श्रोत्रे तु तस्य पपतुर्नृपतेर्न किंचि-
द्भैम्यामनिष्टशतशङ्कितयाकुलस्य ॥ ११७ ॥

भवतिपरोऽप्रयुज्यमानोऽप्यस्तीति वचनात् । तौ मन्त्रिप्रवरश्च अगदमपरोगं करोतीत्यगदङ्कारो वैद्यश्च । 'रोगहार्यगदंकारो भिषग्वैद्यश्चिकित्सक' इत्यमरः । "कर्मण्यण्, कारे सत्यागदस्य" इति मुमागमः । द्वौ नृपं तुल्यमेकवाक्यमूचतुः । हे राजन्नाकर्णय, सुश्रुतेन सम्यक्च्छुतेन, चर एव चरकः गूढचारः, तस्योक्तेन वाक्येन । अन्यत्र सुश्रुतेन चरकस्योक्तेन चरकार्यप्रणीतग्रन्थेन, अखिलं तापनिदानं, जाने । अस्यास्तापस्य दलने निवर्तने, नलं राजानं ददातीति नलदं, तत्सङ्गटकं विना । "आतोऽनुपसर्गे कः" । अन्यत्र, नलदमुशीरं विना । 'मूलेऽस्योशीरमस्त्रियाम् । अभयं नलदं सेव्यम्' इत्यमरः । कोऽपि क्षमो न स्यात् । "शकि लिङ्" इति शक्यार्थे लिङ् । अत्र द्वयोरपि नलदयोः प्रकृतत्वात् केवलप्रकृतश्लेषोऽलङ्कारः ॥ ११६ ॥

ताभ्यामिति ॥ ताभ्यां मन्त्रिभिषग्भ्यां, भेदव्ययो नाभाभेदः स एवाकृतिर्यस्य तत् भेदव्ययाकृति, अभिन्नाकारमेकरूपं यथा तथा, युगपदेकदा, अभिधीयमानं नलदादिवाक्यमिति शेषः । मिथोऽन्योन्यं प्रतिघातो रोधो यस्य तन्मिथःप्रतिघातं मिथोभिन्नमेवाभूत् । अभिधानगौपनशादेकवाक्यतयाभिन्नार्थैकवाक्यवत् प्रतीयमानमपि तत् भिन्नार्थं नानयद्वयमेवासीदित्यर्थः । तास्तु न तत्र दृष्टिरित्याह । भैम्यां विषये अनिष्टशतशङ्कितया अनिष्टानेकशङ्कायुक्ततया आकुलस्य विह्वलचित्तस्य, "प्रेम पश्यति भयान्यपदेऽपि" इति न्यायादिति भावः । तस्य नृपतेः भीमस्य श्रोत्रे तु किञ्चिन्न पपतुः न किञ्चिदूर्ध्वमपप्रतुः । व्याकुलान्तःकरणतया तद्वाक्ये नातीव कर्णौ दत्तवानित्यर्थः ॥ ११७ ॥

द्रुतविगमितविप्रयोगचिह्नामपि तनयां नृपतिः पदप्रणम्राम् ।
अकलयदसमाशुगाधिममां झटिति पराशयवेदिनो हि विज्ञाः ॥

व्यतरदथ पिताशिषं सुतायै नतशिरसे मुहुरुन्नमय्य मौलिम् ।
दयितमभिमतं स्वयंवरं त्वं गुणमयमाप्नुहि वासरैः कियद्भिः ॥

तदनु स तनुजासखीरवादीत्तुहिनऋतौ गत एव हीदृशीनाम् ।
कुसुममपि शरायते शरीरे तदुचितमाचरतोपचारमस्याम् ॥ १२०

द्रुतेति ॥ नृपतिः द्रुतविगमितविप्रयोगचिह्नां द्रागपसारितशिशिरोपचार-चिह्नामपि, पदप्रणम्रां पादपतितां, "उपसर्गादसमासेऽपि णोपदेशस्य" इति णत्वम् । तनयामसमाशुगाधिममां मदनव्यथामग्नां, अकलयन्निश्चिकाय । तथाहि विज्ञाः प्रवीणाः । 'प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता' इत्यमरः । झटिति अविलम्बेन, पराशयवेदिनो हि प्रकाशकलिङ्गमन्तरेण आकारमात्रेण परेङ्गितं निश्चिन्वन्तीत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ११८ ॥

व्यतरदिति ॥ अथ पिता भीमः नतशिरसे लज्जानतमुखायै सुतायै दमयन्त्यै, मौलिं मुखमुन्नमय्य । हे वत्से, कियद्भिः कतिपयैरेव वासरैः स्वयंवरे त्वं गुणमयं गुणाढ्यमभिमतं दयितमाप्नुहीत्याशिषं मुहुर्व्यतरत् ॥ ११९ ॥

तदन्विति ॥ तदनु आशीर्वादानन्तरं, "अनुर्लक्षणे" इति कर्मप्रवचनीय-[illegible] नृपस्तनुजासखीः सुतावयस्याः, अवादीदूचे । किं तत्तदाह—हि यस्मात्, तुहिनऋतौ शिशिरकाले, "ऋत्यकः" इति प्रकृतिभावः । गते निर्गत एव, वसन्ते पुष्पपरिणामातापस्य दुःसहत्वाच्चेति भावः । ईदृशीनां कोमलाङ्गीनां, यौवनप्रविष्टानां शरीरे कुसुममपि शरायते शरवदाचरति । तद्दुःसहं भवति [illegible] एकत्र गात्रमार्दवादन्यत्र मदनबाणत्वाच्चेति भावः । तत्तस्मादस्यां कोमलाङ्ग्यां [illegible]स्यां च उचितं, योग्यमुपचारं, प्रतीकारमाचरत ॥ [illegible] ॥

कतिपयदिवसैर्वयस्यया वः स्वयमभिलष्य वरिष्यते वरीयान् ।
कृशिमशमनयानया तदाप्तुं रुचिरुचिताथ भवद्विधाभिधाभिः ॥

एवं यद्वदता नृपेण तनया नापृच्छि लज्जापदं
यन्मोहस्स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः ।
यच्चाशीः कपटादवादि सदृशी स्यात्तत्र या सान्त्वना
तन्मत्वालिजनो मनोऽब्धिमतनोदानन्दमन्दाक्षयोः ॥१२२

कतीति ॥ किंच, कतिपयदिवसैः अल्पदिनैरेव, वो युष्माकं, वयस्यया सख्या भैम्या, वरीयान् श्रेष्ठः, पुमान् स्वयमभिलष्य कामयित्वा वरिष्यते । यं कामयते तं वरिष्यतीत्यर्थः । तत्तस्मादथेदानीं, अनया दमयन्त्या (कर्त्र्या), भवतीनां विधेव विधा यासां तासां भवद्विधानां सखीनां, सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । अभिधाभिरुक्तिभिर्या कृशिमशमना कार्श्यनिवर्तना, तया उपायभूतया रुचिः कान्तिः, प्रीतिश्च, आप्तुमुचिता आप्तव्या, स्वयंवरपर्यन्तं भवदुपलालना-वचनैः खेदं विहाय प्रसन्नया सन्तुष्टया, च स्थातव्यमित्यर्थः । धृतेत्यादिश्लोक-चतुष्टयं पुष्पिताग्रा वृत्तम् ॥ १२१ ॥

एवमिति ॥ एवं वदता नृपेण, तनया दमयन्ती, लज्जापदं लज्जाहेतुं, नापृच्छि न पृष्टेति यत् । ज्ञातांशे प्रश्नायोगादिति भावः । पृच्छेर्दुहादित्वा-दप्रधाने कर्मणि लुङ् । मोहो मूर्छा च वपुषः पाण्डुत्वतापादिभिर्लिङ्गैः स्मरभूः कामजोऽकल्पि निश्चित इति यत् । तत्र तस्यां पुत्र्यां, सदृशी अनुरूपा या सान्त्वना लालनोक्तिस्स्यात् । सा चाशीः कपटादीप्सितमाप्नुहीत्याशीर्वादव्याजा-दवादीति च यत्, तत् सर्वं मत्वालोच्य, आलिवर्गः मनः स्वचित्तं, आनन्द-मन्दाक्षयोः अब्धिमतनोत् । लज्जानन्दसागरीचकारेत्यर्थः । स्वेष्टसिद्धेरानन्दः स्वरहस्यप्रकाशनाल्लज्जा ॥ १२२ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरस्सुतं
श्रीहीरस्सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तुर्यस्स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महा-
काव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥

श्रीहर्षमिति ॥ श्रीहर्षमित्यादि सुगतम् । तुर्यश्चतुर्थः । "चतुरश्छयतावाद्यक्षरलोपश्च" इति साधुः । स्थैर्यविचारणं नाम स्वप्रणीतप्रकरणं तद्भ्रातरि नलसमानकर्तृक इत्यर्थः ॥ १२३ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्यायकोलचल-
मल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने
चतुर्थः सर्गः समाप्तः ।



पञ्चमः सर्गः

यावदागमयतेऽथ नरेन्द्रान् स स्वयंवरमहाय महीन्द्रः ।
तावदेव ऋषिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम ॥ १ ॥

नात्र चित्रमनु तं प्रययौ यत्पर्वतस्स खलु तस्य सपक्षः ।
नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे ॥ २ ॥

अथ दमयन्तीस्वयंवराय इन्द्राद्यागमनं वक्तुं तदुपयोगितया नारदस्येन्द्रलोकगमनमाह—**यावदिति** ॥ अथ स महीन्द्रो भीमभूपतिः, स्वयंवरमहाय स्वयंवरोत्सवाय, नरेन्द्रान्, यावदागमयते आगमनंनानयनेन विलम्बत इत्यर्थः आगमेः क्षमायामात्मनेपदं वक्तव्यम् । 'क्षमोपेक्षाकालहरणमिति काशिका । तावदेव, ऋषिर्नारदः, "ऋत्यक" इति प्रकृतिभावः । इन्द्रं दिदृक्षुरिन्द्रदिदृक्षुस्सन्, मधुपिपासुवत् । गम्यादिपाठाद्द्वितीयासमासः । त्रिदशधाम स्वर्गं प्रतिजगाम । सर्गेऽत्र स्वागता वृत्तम् । "स्वागतेति रनभाद्गुरुयुग्मम्" इति लक्षणात् ॥ १ ॥

अथ षड्भिस्तद्गमनप्रकारं वर्णयति—**नेत्यादि** ॥ पर्वतो नारदसखो मुनिः शैलश्च । 'पर्वतश्शैलदेवर्ष्योः' इति विश्वः । तं नारदमनुप्रययाविति यत् । अत्र चित्रमाश्चर्यं न । कुतः स पर्वतस्तस्य नारदस्य सपक्षस्सखा खलु पक्षवांश्चेति गम्यते । उभयथाप्यनुयानं युक्तमेवेति न चित्रमित्यर्थः । किंतु, जगतो लोकस्य, उच्चैरुन्नतः, गुरुराचार्यः, तस्मादलघुश्च, स नारदस्तु, विस्मयाय गगनं विललङ्घे लङ्घयामास । तल्लङ्घनं विस्मयाय भवतीत्यर्थः । गुरुद्रव्यस्य पतनार्हस्य उत्पतनं विरुद्धमिति श्लेषोत्थापितो विरोधाभासोऽलङ्कारः ॥ २ ॥

गच्छता पथि विनैव विमानं व्योम तेन मुनिना विजगाहे ।
साधने हि नियमोऽन्यजनानां योगिनां तु तपसाखिलसिद्धिः ॥

खण्डितेन्द्रभवनाद्यभिमानान् लङ्घते स्म मुनिरेष विमानान् ।
अर्थितांऽप्यतिथितामनुमेने नैव तत्पतिभिरङ्घ्रिविनम्रैः ॥ ४ ॥

तस्य तापनभिया तपनः स्वं तावदेव समकोचयदर्चिः ।
यावदेष दिवसेन शशीव द्रागतप्यत न तन्महसैव ॥ ५ ॥

गच्छतेति ॥ पथि विमानं व्योमयानं विनैव गच्छता तेन मुनिना, व्योम विजगाहे प्रविष्टम् । तथाहि, साधने उपाये नियमोऽवश्यंभावः क्रिया-सिद्धौ नियमेन साधनान्तरापेक्षेत्यर्थः । अन्यजनानामस्मदादीनां, योगिनां तु, तपसा योगधर्मेणैवाखिलसिद्धिस्सार्वकार्यसिद्धिर्हि, तस्मान्महायोगिनोऽस्य किं विमानेनेति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३ ॥

खण्डितेति ॥ एष मुनिः, खण्डितो निरस्तः, इन्द्रभवनादीनामभिमानो-ऽहङ्कारो यैस्तान् ततोऽपि समृद्धानित्यर्थः । विमानान् देवगृहान्, लङ्घते स्म अतिचक्राम । किं बहुना, अङ्घ्रिविनम्रैः पादपतितैः, तत्पतिभिर्विमानाध्यक्षैर्देवैः अर्थितः प्रार्थितोऽपि, अतिथितामातिथ्यं, नैवानुमेने । एतन्मात्रविलम्बना-सहिष्णुतयेत्यर्थः ॥ ४ ॥

तस्येति ॥ तपनोऽर्कः, तस्य मुनेः (कर्मणि), तापनाद्भिया, सन्तापो-ऽस्य भविष्यतीति भयेन स्वमात्मीयमर्चिस्तेजस्तावदेव प्रागेव समकोचयत् सङ्कोचितवान् । यावदेष, तपनो दिवसेन दिवा आतपेन, सौजसा शशीव, तन्महसा तस्य तेजसैव द्राक् सपदि स्वयमेव नातप्यत मुनितापनादात्महाने-र्नैरन्तर्यमसङ्कोच इति मत्वा मन्दप्रकाशः स्थित इत्यर्थः । तथा च, सूर्यादपि तेजिष्ठो मुनिरिति भावः ॥ ५ ॥

पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहह तेन तदा तम् ।
पर्यभूत् खलु करैर्द्विजराजः कर्म कस्स्वकृतमत्र न भुङ्क्ते ॥ ६ ॥
विष्टरं तटकुशालिभिरद्भिः पाद्यमर्घ्यमथ कच्छरुहाभिः ।
पद्मवृन्दमधुभिर्मधुपर्कं स्वर्गसिन्धुरदितातिथयेऽस्मै ॥ ७ ॥
स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतनमाप ।
सम्प्रतीर्य भवसिन्धुमनादिं ब्रह्म शर्मभरचारु यतीव ॥ ८ ॥

पर्यभूदिति ॥ दिनमणिः सूर्यः, द्विजराजं चन्द्रं, ब्राह्मणोत्तमञ्च, करैः रश्मिभिः, हस्तैश्च, पर्यभूत् परिभूतवानिति यत् । तेन परिभवेन (हेतुना) तदा नारदागमनकाले, तं दिनमणिं, द्विजराजो ब्राह्मणोत्तमश्चन्द्रश्च, करैरंशुभिर्हस्तैश्च, पर्यभूत् । अहह । स्वकृतद्विजराजपरिभवदोषात् स्वयमपि तेन परिभूत इत्यर्थः । तथा हि, अत्र जीवलोके कः स्वकृतं (कर्म) न भुङ्क्ते । सर्वेणापि स्वकर्मफलमनुभाव्यमेवेत्यर्थान्तरन्यासार्थः ॥ ६ ॥

विष्टरमिति ॥ अथ स्वर्गसिन्धुर्मन्दाकिनी, अतिथये अस्मै नारदाय, तटकुशानामालिभिः पङ्क्तिभिर्विष्टरमासनं, "वृक्षासनयोर्विष्टरः" इति षत्वनिपातः । अद्भिः पाद्यं पादार्थं जलं, कच्छरुहाभिर्लताभिः, अर्घ्यमर्घार्थं पुष्पफलादि, "पादार्घाभ्यां च" इति तादर्थ्ये यत्प्रत्ययः । पद्मवृन्दानां मधुभिर्मकरन्दैः, मधुपर्कञ्च, अदित दत्तवती । ददातेर्लुङि तङ् ॥ ७ ॥

स इति ॥ स मुनिः, अगाधं वियदन्तरं नभोऽभ्यन्तरं, व्यतीत्य । नाकनायकनिकेतनं इन्द्रभवनं, यती योगी, अनादिं भवसिन्धुं संसाराब्धिं, सम्प्रतीर्य, शर्मभरचारु परमानन्दसुन्दरं, ब्रह्म परमात्मानमिव आप ॥ ८ ॥

अर्चनाभिरुचितोच्चतराभिश्चारु तं सदकृतातिथिमिन्द्रः ।
यावदर्हकरणं किल साधोः प्रत्यवायघुतये न गुणाय ॥ ९ ॥

नामधेयसमतासखमद्रेरद्रिभिन्मुनिमथाद्रियत द्राक् ।
पर्वतोऽपि लभतां कथमर्चां न द्विजस्स विबुधाधिपलम्भी ॥१०॥

तद्भुजादतिवितीर्णसपर्याद्द्योद्रुमानपि विवेद मुनीन्द्रः ।
स्वस्सहस्थितिसुशिक्षितया तान् दानपारमितयैव वदान्यान् ॥

अर्चनाभिरिति ॥ इन्द्रः, तमतिथि मुनिं, उचिताद्विहितात्, उच्चतराभिरधिकाभिः, अर्चनाभिः पूजाभिः, चारु सदकृत सत्कृतवान्, आदृतवानित्यर्थः । "आदरानादरयोः सदसती" इति निपातनात् प्राक् प्रयोगः । आधिक्याचरणे हेतुमाह –यावदर्हं यावदुक्तं, "यावदवधारणे" इत्यव्ययीभावः । यावदर्हस्य करणम् इति षष्ठीतत्पुरुषः । साधोः श्रद्धालोः, प्रत्यवायघुतये अकरणदोषनिवारणाय गुणायोत्कर्षाय न किल न खलु । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ९ ॥

नामधेयेति ॥ अथ नारदसत्कारानन्तरं, अद्रिभिदिन्द्रः, अद्रेः पर्वतस्य, नामधेयसमतया नामसामान्येन सखायं तत्सखं मुनिं पर्वताख्यं, द्राक् द्रुतमाद्रियत सत्कृतवान् । पर्वतः पर्वतारेः कथं सत्कारमलभतेत्यत्राह –पर्वतोऽपि स द्विजो विबुधाधिपं देवेन्द्रं, पण्डितोत्तमं च, लभते प्राप्नोतीति तल्लम्भी । "विबुधः पण्डिते देवे" इति विश्वः । स मुनिः, कथमर्चां पूजां, न लभतां, लभतामेवेत्यर्थः । द्विजोऽभ्यागतो महतः प्रतिपक्षादपि विवेकिनः पूजां लभत इति भावः ॥ १० ॥

तदिति ॥ मुनीन्द्रो नारदस्तान् प्रसिद्धान् द्योद्रुमान् कल्पवृक्षानपि, अतिवितीर्णसपर्यादतिमात्रदत्तपूजात्, तस्येन्द्रस्य, भुजाद्धस्तादेव, गुरोः, स्वः स्वर्गे, सहस्थित्या सहवासेन, सुशिक्षितया स्वभ्यस्तया, दानपारमितानाम दानकर्तव्यताप्रतिपादको ग्रन्थविशेषः । तयैव कारणेन वदान्यान् विवेद । इन्द्र-

मुद्रितान्यजनसङ्कथनस्सन्नारदं बलरिपुस्समवादीत् ।
आकरस्स्वपरभूरिकथानां प्रायशो हि सुहृदोस्सहवासः ॥ १२ ॥

तं कथानुकथनप्रसृतायां दूरमालपनकौतुकितायाम् ।
भूभृतां चिरमनागमहेतुं ज्ञातुमिच्छुरवदच्छतमन्युः ॥ १३ ॥

प्रागिव प्रसुवते नृपवंशाः किन्तु सम्प्रति न वीरकरीरान् ।
ये परप्रहरणैः परिणामे विक्षताः क्षितितले निपतन्ति ॥ १४ ॥

हस्तः कल्पवृक्षाणामपि दानविद्योपदेष्टेत्युत्प्रेक्षितवानित्यर्थः । कल्पानुल्लङ्घ्यौदार्यमस्येति भाव. ॥ ११ ॥

मुद्रितेति ॥ बलरिपुरिन्द्रः, मुद्रितान्यजनसंकथनो निवारितेतरजनालापस्सन्, नारदं समवादीत् । तेन सह संलापमकार्षीदित्यर्थः । किं संलापेन तदाह—प्रायशः सुहृदोर्मित्रयोस्सहवासस्सङ्गमः, स्वे आत्मीयाः परे च स्वपरे तेषां याः भूरयः कथाः प्रसङ्गास्तासां आकरः खनिर्हि, इतरजनानामिव तत्सद्भावात् संवादसिद्धिरित्यर्थान्तरन्यासाभिप्रायः ॥ १२ ॥

तमिति ॥ शतमन्युश्शतक्रतुः । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः । आलपनकौतुकितायां आभाषणोत्कण्ठायां, दूरं कथानुकथनप्रसृतायां उक्तप्रत्युक्ताभ्यां दूरङ्गतायां सत्यां, प्रसक्तानुप्रसक्तया, सञ्जातायामित्यर्थः । चिरं चिरात्प्रभृति । भूभृतां राज्ञां, अनागमनहेतुं ज्ञातुमिच्छुस्सन् । तं नारदं, अवदत्पृष्टवानित्यर्थः ॥ १३ ॥

प्रागिति ॥ नृपवंशाः राजकुलानि नृपा एव वंशाः वेणवश्च । 'वंशो वेणौ कुले वर्गे' इति विश्वः । प्राक् पूर्वमिव । सम्प्रति, वीरानेव करीरानङ्कुरान् । 'वंशाङ्कुरे करीरोऽस्त्री' इत्यमरः । न प्रसुवते न जनयन्ति । किंभूतास्त आह । ये इति ॥ ये वीरकरीराः, परिणामे परिपक्वावस्थायां, परेषामरीणां अन्येषां च । 'परं दूरान्यमुख्येषु परोऽरिपरमात्मनोः' इति वैजयन्ती । प्रहरणैरायुधैः शस्त्रादिभिश्च, विक्षतास्सन्तः । क्षितितले निपतन्ति ॥ १४ ॥

पार्थिवं हि निजमाजिषु वीरा दूरमूर्ध्वगमनस्य विरोधि ।
गौरवादपुरपास्य भजन्ते मत्कृतामतिथिगौरवऋद्धिम् ॥ १५ ॥

साभिशापमिव नातिथयस्ते मां यदद्य भगवन्नुपयान्ति ।
तेन न श्रियमिमां बहुमन्ये स्वोदरैकभृतिकार्यकदर्याम् ॥ १६ ॥

पूर्वपुण्यविभवव्ययलब्धास्सम्पदो विपद एव विमृष्टाः ।
पात्रपाणिकमलार्पणमासां तासु शान्तिकविधिर्विधिदृष्टः ॥ १७ ॥

ततः किमत आह—**पार्थिवमिति** ॥ वीराः पूर्वोक्ताः रणपातिनः, पार्थिवं पृथिवीविकारं, अत एव गौरवात् गुरुत्वगुणयोगित्वादूर्ध्वगमनस्योत्पतनकर्मणः, पार्थिवत्वादूर्ध्वलोकप्राप्तेश्च, दूरमत्यन्तं विरोधि निजं वपुः, आजिषु युद्धेषु अपास्य मत्कृतामतिथिसत्कारस्तस्य ऋद्धिं समृद्धिं, "ऋत्यकः" इति प्रकृतिभावः । भजन्ते । तादृग्वीरालाभे स्वस्यातिथिलाभो न स्यादिति भावः ॥

ननु तदलाभे तेषामेव सत्कारहानिस्तव तु न कदाचित् क्षतिरित्यत आह—**साभिशापमिति** ॥ हे भगवन् मुने, ते वीराः अतिथयः, अभिशापेन सह वर्तत इति साभिशापं मिथ्याभिशप्तमिव । 'अथ मिथ्याभिशंसनं अभिशापम्' इत्यमरः । मामद्य नोपयान्तीति यत् । तेन हेतुना । स्वोदरस्यैकस्यैव, भृतकार्येण पोषणकृत्येन कदर्यां कृपणाम् । 'कदर्ये कृपणक्षुद्र' इत्यमरः । "आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् । लोभाद्यः पितरौ भ्रातॄन् स कदर्य इति स्मृतः" इति च । इमां श्रियं न बहु मन्ये अतिथिसत्कारशून्यस्य श्रीवैफल्यमेव मे क्षतिरिति भावः ॥ १६ ॥

पूर्वेति ॥ पूर्वपुण्यविभवस्य व्ययेन लब्धास्सम्पदो विमृष्टाः विचारिताः विपद एव । सद्यः स्वोदयेन पुरा कृतसुकृतनाशकरत्वादिति भावः । तासु विपत्स्वापद्रूपसम्पत्सु । आसां सम्पदां पात्राणां विद्याजातितपोवृत्तसम्पन्नानां पाणिकमलेष्वर्पणं दानमेव विधिदृष्टश्शास्त्रदृष्टः शान्तिकविधिः शान्तिकर्मानुष्ठानं, नष्टसुकृतादपि उत्कृष्टसुकृतोत्पादनादिति भावः । अनेन बीजाङ्कुरन्याय उक्तः ॥

तद्विमृज्य मम संशयशिल्पि स्फीतमत्र विषये सहसाघम् ।
भूयतां भगवतश्श्रुतिसारैरद्य वाग्भिरघमर्षणऋग्भिः ॥ १८ ॥

इत्युदीर्य मघवा विनयर्धि वर्धयन्नवहितत्वभरेण ।
चक्षुषां दशशतीमनिमेषां तस्थिवान्मुनिमुखे प्रणिधाय ॥ १९ ॥

वीक्ष्य तस्य विनये परिपाकं पाक[illegible] मनपदं स्पृशतोऽपि ।
नारदः प्रमदगद्गदयोक्त्या विस्मितस्स्मितपुरस्सरमाख्यत् ॥ २० ॥

तदिति ॥ तत्तस्मात्, अत्र विषये आत्मार्थं, मम संशयस्य शिल्पि तज्जनकं स्फीतं प्रभूतं, अघमेनः तन्मूलत्वान्मिथ्याज्ञानस्येति भावः । **यद्वा,** संशयः शिल्पी जनको यस्य तदघं दुःखं, दुःखहेतुत्वात् संशयस्येति भावः । '**दुःखैनोव्यसनेष्वघम्**' इति वैजयन्ती । सहसा विमृज्य निवर्त्य, **भगवतो** वाग्भिरद्य श्रुतिसारैर्वेदसारैः, कर्णामृतैश्च । अघमर्षणऋग्भिः अघमर्षणीभिः ऋग्भिः । "स्त्रियाः पुंवत्" इत्यादिना पुंवद्भावः । भूयताम् । भावे लोट् । राज्ञामनागमनकारणमसंदिग्धं ब्रूहीत्यर्थः । अत्र मुनिवाक्येष्वारोप्यमाणस्य अघमर्षणत्वस्य प्रकृताघहरणोपयोगात् परिणामालङ्कारः । "आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः" इति लक्षणात् ॥ १८ ॥

इतीति ॥ मघवा इन्द्रः, इत्युदीर्य अवहितत्वभरेण एकाग्रतातिशयेन, विनयर्धि विनयातिशयं वर्धयन्ननिमेषाश्चक्षुषां दशशतीं, दशानां शतानां समाहारः दशशती सहस्रं, "तद्धितार्थ" इत्यादिना समाहारे द्विगावकारान्तोत्तरपदत्वात् स्त्रियां "द्विगोः" इति ङीप् । एतेन शतमखो व्याख्यातः । मुनिमुखे प्रणिधाय तस्थिवान् तस्थौ । लिटः क्वसुरादेशः ॥ १९ ॥

वीक्ष्येति ॥ नारदः पाकशासनपदं स्पृशतोऽपीन्द्रत्वे तिष्ठतोऽपि । तस्येन्द्रस्य विनये परिपाकं प्रकर्षं वीक्ष्य विस्मितस्सन् सविस्मयस्सन् कर्तरि क्तः । प्रमदगद्गदयोक्त्या हर्षविस्वरया वाचा, स्मितपुरस्सरं स्मितपूर्वमाख्यदाचचक्षे । "अस्यतिवक्तिख्यातिभ्योऽङ्" इत्यङ्प्रत्ययः ॥ २० ॥

भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदस्स्वविभूतौ ।
तत्फले तव परं यदि हेला क्लेशलब्धमधिकादरदं तु ॥ २१ ॥
सम्पदस्तव गिरामपि दूरा यन्न नाम विनयं विनयन्ते ।
श्रद्दधाति क इवेह न साक्षादाह चेदनुभवः परमाप्तः ॥ २२ ॥

भिक्षितेति ॥ शतानां मखानां समाहारः शतमखी (द्वात्री), यत् सुकृतं, भिक्षिता याचिता । भिक्षेः दुहादित्वादप्रधाने कर्मणि क्तः । तत्फले तस्य सुकृतस्य फले, स्वविभूतौ निजैश्वर्ये हेला अवज्ञा अनास्था यदि । 'हेलावज्ञा' इति वैजयन्ती । तत्परिश्रमविदो याच्ञाक्लेशाभिज्ञस्य । तव परं केवलं तवैव । नान्यस्येत्यर्थः । 'परं स्यादुत्तमानात्मवैरिदूरेषु केवले' इति विश्वः । याचक एव याचनदुःखं जानातीति भावः । ननु धनिनां दातृत्वं किं चित्रं तत्राह— **क्लेशेति** ॥ यत क्लेशलब्धं तु अधिकादरदं अतिलोभकारि दुस्त्यजं, त्वन्तु मखशतक्लेशलब्धमप्यैश्वर्यमर्थिसात्करोषीति कथं न चित्रमित्यर्थः । अत्र क्लेश-वाक्येन हेलात्वसमर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । "हेतोर्वाक्यपदार्थ-त्वे काव्यलिङ्गमुदाहृतम्" इति लक्षणात् ॥ २१ ॥

सम्पद् इति ॥ किं बहुना, तव सम्पदो गिरामपि दूराः अगोचराः, कुतः, यद्यस्माद्विनयं न विनयन्ते नाम न लुम्पन्ति खलु । नयतेर्लट् । "स्वरित" इत्यादिना आत्मनेपदं "कर्तृस्थे चाशरीरे कर्मणि" इत्यस्माधिति केचित् । तदसत् । सम्पदां कर्तॄणां अचेतनत्वेन कर्मणो विनयस्येन्द्रियानिग्रहत्वेन चाकर्तृ-स्थत्वादिति । अतः स्तोतुमशक्या इत्यर्थः । किं त्विह विनयोत्तरत्वे परमाप्तः प्रमाणभूतः साक्षादनुभवः प्रत्यक्षादनुभवः, नाह चेत्क इव को वा श्रद्दधाति विश्वसिति न कश्चिदित्यर्थः । त्वत्सम्पदां विनयोत्तरत्वे साक्षादनुभवतां मादृशा-मेव श्रद्धा जायते नान्येषां, प्रायेणान्यत्र सम्पदां विनयहारित्वात् । किं बहुना, वयमपि न श्रद्दध्म इति भावः । अत्र सम्पदां वाग्गोचरत्वेऽपि तदगोचरत्वो-क्त्या असम्बन्धरूपातिशयोक्तिः ॥ २२ ॥

श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता न हितेति ।
पश्यतो बहिरिवान्तरपीयं दृष्टिसृष्टिरधिका तव कापि ॥

आः स्वभावमधुरैरनुभावैस्तावकैरतितरान्तरलास्स्मः ।
द्यां प्रशाधि गलितावधिकालं साधु साधु विजयस्व बिडौजः ॥

सङ्गरविक्षततनुस्रवदस्रक्षालिताखिलनिजाघलघूनाम् ।
यस्त्विहानुपगमश्शृणु राज्ञां तं जगत्सुखमुदं तमुदन्तम् ॥ २५ ॥

श्रीभरानिति ॥ श्रीभरान् सम्पत्समूहान् अतिथिसात् दानेनातिथ्यधीनं, "देये त्रा च" इति चकारात् सातिप्रत्ययः । करवाणि कुर्याम् । विध्यर्थे लोट् । "आडुत्तमस्य पिच्च" इत्याट् । स्वोपभोगपरता आत्मम्भरित्वं, न हिता न श्रेयस्करीति पश्यतो जानतः प्रेक्षमाणस्य च तव बहिरिव देह इव अन्तरात्मन्यपि कापीयं अद्भुता दृष्टिः ज्ञानदृष्टिरधिकास्ति । 'दृष्टिर्ज्ञानेऽक्षिदर्शने' इत्यमरः । अधिका असाधारणी । द्वयोरपि दृष्ट्योः श्लिष्टशब्दोपात्तयोरभेदाध्यवसायेन बहिरिवेत्युपमा ॥ २३ ॥

आ इति ॥ विडं भेदकम् । बिड भेदने । इगुपधलक्षणः कः । तदोजो यस्य तस्य सम्बुद्धिः हे विडोजः, स्वभावमधुरैः निसर्गरमणीयैः, तवेमे तावकाः, "तवकममकावेकवचने" इत्यणि तवकादेशः । तैरनुभावैश्चेष्टैरतितरामत्यन्तम्, अव्ययघादाम्प्रत्ययः । तरलाः लोलाः आनन्दलहरीमग्नाः स्म इत्यर्थः । आ इत्यानन्दास्वादानुकारः । गलितावधिकालमनन्तकालम् । अत्यन्तसंयोगे द्वितीया । द्यां स्वर्गं साधु प्रशाधि पालय । साधु, विजयस्व सर्वोत्कृष्टो भव । "विपराभ्यां जेः" इत्यात्मनेपदम् ॥ २४ ॥

एवमिन्द्रमभिनन्द्य, तत्प्रश्नस्योत्तरमाह—**सङ्गरेति** ॥ सङ्गरे समरे, विक्षताभ्यः प्रहृताभ्यः तनुभ्यो गात्रेभ्यः, स्रवद्भिरस्रैरसृग्भिः क्षालितानि निर्णिक्तानि अखिलानि निजान्यघानि येषां तेषामत एव लघूनां निर्भाराणां राज्ञां

सा भुवः किमपि रत्नमनर्घं भूषणं जयति तत्र कुमारी ।
भीमभूपतनया दमयन्ती नाम या मदनशस्त्रममोघम् ॥ २६ ॥

सम्प्रति प्रतिमुहूर्तमपूर्वा कापि यौवनजवेन भवन्ती ।
आशिखं सुकृतसारभूते सा कापि यूनि भजते किल भावम् ॥

कथ्यते न कतमस्स इति त्वं मां विवक्षुरसि किं चलदोष्ठः ।
अर्धवर्त्मनि रुणत्सि न पृच्छां निर्गमेण न परिश्रमयैनाम् ॥ २८॥

यस्मात् कारणादिह स्वर्गेऽनुपगमो नागमः तत्कारणभूतं जगत्सु ये युवानः तेषां मुदमानन्दकारणं असाधारणार्थे, अभेदेन व्यपदेशः । तं प्रसिद्धं उदन्तं वार्ताम् । "वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः" इत्यमरः । शृणु । अत्र क्षोणिनाथपदार्थस्य विशेषणगत्या तद्युक्तहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २५ ॥

सेति ॥ भुवो भूषणं किमप्यनर्घममूल्यं रत्नम् । असाधारण स्त्रीरत्नमित्यर्थः । कुमारी कन्या, अनूढेत्यर्थः । सा दमयन्ती नाम भीमभूपतनया तत्र भुवि जयति । सर्वोत्कर्षेण जागर्ति, या अमोघं मदनशस्त्रम् ॥ २६ ॥

अथेन्द्रमत्सरोत्पादनाय तस्याः पुरुषान्तरासक्तिञ्च वक्ति **सम्प्रतीति** ॥ सम्प्रतीदानीं, सा दमयन्ती, यौवनस्य जवेनोद्भववेगेन, प्रतिमुहूर्तं काप्यपूर्वा लावण्यमयावयवपोषविशेषेणान्येव भवन्ती । आशिखं शिखापर्यन्तं, अभिविध्यव्ययीभावः । सुकृतसारभूते उत्कृष्टपुण्यभूते ईदृग्भाग्यसम्पन्न इत्यर्थः । कापि कस्मिन्नपि यूनि भावमनुरागं भजते । किलेत्यैतिह्ये ॥ २७ ॥

कथ्यत इति ॥ किञ्च, चलदोष्ठस्त्वं स युवा कतम इति मां विवक्षुर्वक्तुमिच्छुरसि किम् । तर्हि अर्धवर्त्मन्यर्धोक्तौ पृच्छां प्रश्नं, भिदादित्वादङ् । न रुणत्सीति काकुः । एनां पृच्छां निर्गमेनोच्चारणेन न परिश्रमय माखेदय । कुतः, न कथ्यते । यतः पृष्टोऽपि न कथयामि अतो न प्रष्टव्यमेवेत्यर्थः ॥ २८ ॥

यत्पथावधिरणुः परमस्सा योगिधीरपि न पश्यति यस्मात् ।
बालया निजमनःपरमाणौ ह्रीदरीशयहरीकृतमेनम् ॥ २९ ॥

सा शरस्य कुसुमस्य शरव्यं सूचिता विरहतापिभिरङ्गैः ।
तातचित्तमपि धातुरधत्त स्वस्वयंवरमहाय सहायम् ॥ ३० ॥

मन्मथाय यदथादित राज्ञां दूतिदूत्यविषये विधिराज्ञाम् ।
तेन तत्परवशाः पृथिवीशास्सज्वरं गरभियाकलयन्ति ॥ ३१ ॥

किं कपटादकथनं नेत्याह—**यत्पथेति** ॥ परमोऽणुर्यस्या योगिधियः पन्थाः, यत्पथस्तस्यावधिर्मीना, सा योगिधीरपि । बालया निजमन एव परमाणुः । "अणुपरिमाणं मनः" इति सूत्रणात् । तस्मिन् हीरेव दरीगुहा तच्छयहरीकृतं तद्गतसिंहीकृतं, एनं नृपं, यस्मान्न पश्यति तस्मान्न कथ्यत इति पूर्वेणान्वयः । योगिबुद्धेरपि परमाणुस्वरूपग्राहित्वमेव नान्तःप्रवेशशक्तिरित्यज्ञानादकथनं न कपटात् । सा तु मन्दाक्षमन्दतया न कथयतीत्यर्थः ॥२९

तर्हि कामुकीत्वमात्रं वा कथमस्याः प्रतीतमत आह—**सेति** ॥ सा भैमी, विरहतापिभिः विरहव्यञ्जकैरङ्गैः, कार्श्यपाण्डिमादिपरिक्लिष्टैरिति भावः । कुसुमशरस्य कामबाणस्य शरव्यं लक्ष्यं, सूचिता । कुत्रचिन्निर्बन्धमविज्ञातावन्मात्रमवगतेत्यर्थः । तर्हि तत्पित्रा वा वरविशेषज्ञानं विना विवाहोपायः कथं चिन्तितस्तत्राह—तातचित्तमपि, (कर्म) स्वस्वयंवरमहाय धातुस्सहायमधत्त अकरोत् । सहकारीचकारेत्यर्थः । तत्पित्रापि धातृप्रेरणया स्वयंवर एवोपायश्चिन्तित इति भावः ॥ ३० ॥

अस्तु राज्ञामनागमे किं कारणमुक्तं तत्राह—**मन्मथायेति** ॥ अथ विधिर्विधाता, राज्ञां दूतिः स्वयंवराह्वानं, तदेव दूत्यं दूतकर्म । "दूतस्य भावकर्मणोः" इति यत्प्रत्ययः । तस्य विषये करणाय मन्मथायाज्ञामादेशमदित दत्तवानिति यत् । तेनाज्ञादानेन तत्परवशाः मन्मथपरतन्त्राः । शिवभागवत-

येषु येषु सरसा दमयन्ती भूषणेषु यदि वापि गुणेषु ।
तत्र तत्र कलयापि विशेषो यस्स हि क्षितिभृतां पुरुषार्थः ॥ ३२
शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे ।
आदरादहरहः कुसुमेषोरुल्ललास मृगयाभिनिवेशः ॥ ३३ ॥
इत्यमी वसुमतीकमितारस्सादरास्त्वदतिथीभवितुं न ।
भीमभूसुरभुवोरभिलाषे दूरमन्तरमहो नृपतीनाम् ॥ ३४ ॥

त्समासः । पृथिवीशास्स्वर्गं गरमिवाकलयन्ति विषमिव मन्यन्ते । 'विषं स्याद्गरल गर' इति हलायुधः ॥ ३१ ॥

येष्विति ॥ किंच, दमयन्ती, भूषणेषु हारादिषु, यदि वा, गुणेषु दयादाक्षिण्यादिषु वा, येषु येषु सरसा साभिलाषा, तत्र तत्र तेषु तेषु भूषणेषु गुणेषु च कलया मात्रयापि यो विशेषः क्षितिभृतां स हि स एव । 'हि हेताववधारणे' इत्यमरः । पुरुषार्थः प्रयोजनम्, यथा कथञ्चिद्भैमीमनोरञ्जनमेव पुरुषार्थो न तु अपवर्गस्वाराज्यं इत्यर्थः ॥ ३२ ॥

शैशवेति ॥ कुसुमेषोः कामस्य, यौवनोदयिनि यौवनप्रादुर्भाववति राजसमाजे विषये, तस्याः भैम्याः, शैशवव्ययदिनं बाल्यापगमदिनं, अवधि सीमा यस्मिंस्तत्तथा, तद्दिनमारभ्येत्यर्थः । अहरहः प्रत्यहम् । वीप्सायां द्विर्भावः । अत्यन्तसंयोगे द्वितीया । आदरात् मृगयायामभिनिवेशः आग्रहः । उल्ललास ववृधे । सर्वेषामपि यूनां भैमी यौवनोद्भेदात् प्रभृति स्मरव्यसनमेव वर्तते । न स्मरव्यसनमित्यर्थः ॥ ३३ ॥

इतीति ॥ इतीत्थममी नृपाः वसुमत्याः कमितारः कामयितारस्सन्तः तृन् । वसुमतीं वा कमितारः । ताच्छील्ये तृन् । "न लोक" इत्यादिना षष्ठीप्रतिषेधः । "आयादय आर्धधातुके वा" इति विकल्पादुभयत्रापि णिजभावः । त्वदतिथीभवितुं सादरास्साकाङ्क्षा न । तथा हि, नृपतीनां भीमभूः भैमी सुरभूः द्यौस्तयोरभिलाषे तद्विषयानुरागे दूरमन्तरं महत्तारतम्यं, अहो, स्वर्गेऽप्यरुचि-

तेन जाग्रदधृतिर्दिवमागां सङ्ख्यसौख्यमनुसर्तुमनु त्वाम् ।
यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके ॥ ३५

वेद यद्यपि न कोऽपि भवन्तं हन्त हन्तृकरुणं विरुणद्धि ।
पृच्छ्यसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ॥ ३६ ॥

एवमुक्तवति देवऋषीन्द्रे द्रागभेदि मघवाननमुद्रा ।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥ ३७

रित्याश्चर्यम् । एतेन भुवनातिशायिसौन्दर्या दमयन्तीति व्यज्यते । भीमदेशसुरदेशयोः महान् विप्रकर्ष इत्यर्थान्तरप्रतीतेः । अत्रोत्तरवाक्यार्थेन स्वर्गारुत्या पूर्ववाक्यार्थस्यातिशयोक्तेः समर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥

एवं राज्ञां स्वर्गागमनाभावहेतुमुक्त्वाथ स्वस्यागमने हेतुमाह—तेनेति ॥ यद्यस्माद्भुवि लोके भूलोके, तस्यां दमयन्त्यां, निमग्नमनसां आसक्तचेतसां क्षितिभृतां मृधं युद्धं, न विलोके न पश्यामि । तेन युद्धालाभेन जाग्रदधृतिस्संमूर्छदसन्तोषः असन्तुष्टस्सन् सङ्ख्यसौख्यं युद्धसुखम् । 'मृधमास्कन्दनं सङ्ख्यम्' इत्यमरः । अनुसर्तुमनुभवितुं, त्वामनु त्वामुद्दिश्य, दिवं स्वर्गमागाम् ॥ ३५ ॥

वेदेति ॥ हन्तृष्वकरुणं समूलघातं हन्तारं भवन्तं कोऽपि न विरुणद्धि न निगृह्णाति । हन्तेति हर्षे । वेद यद्यपि एतावद्वेद्म्येव । "विदो लटो वा" इति विदो णलादेशः । यद्यप्येवं जानामि तदपि तथापि पृच्छ्यसे । अज्ञः पृच्छति न विद्वानित्यत आह—येन कारणेन विषये भोग्ये रससेको रागानुबन्धो जलसेकश्च विवेकस्य विशेषज्ञानस्य विचित्राद्यसाङ्कर्यस्य च । प्रोञ्छनाय प्रमार्जनाय, विषयतृष्णा लुप्तविवेकः पृच्छामीत्यर्थः ॥ ३६ ॥

एवमिति ॥ देवऋषीन्द्रे नारदे । "ऋत्यकः" इति प्रकृतिभावः । एवमुक्तवति सति, मघोनः आननमुद्रा मौनं मघवाननमुद्रा । "मघवा बहुलम्"

कानुजे मम निजे दनुजारौ जाग्रति स्वशरणे रणचर्चा ।
यद्भुजाङ्कमुपधाय जयाङ्कं शर्मणा स्वपिमि वीतविशङ्कः ॥ ३८ ॥
विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये ।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय ॥ ३९ ॥

इति विकल्पान्मतुबादेशाभावः । द्राक् झटित्यभेदि स्वयमेव भिद्यते स्म "कर्मवत् कर्मणा तुल्यक्रियः" इति कर्तुः कर्मवद्भावात् कर्मकर्तरि लुङ् । तङादिकार्यं यङात्मनेपदम् । 'तीणां चिण्वद्भावाः प्रयोजनम्' इति वचनात् । "क्रियमाणं तु यत्कर्म स्वयमेव प्रसिध्यति । सुकरैः स्वगुणैर्यस्मात् कर्मकर्तेति तं विदुः" इति ॥ तथाहि, विभूनां प्रभूणां, कोऽपि मञ्जुलनमोऽतिहृद्यः क्रमवादः प्रश्नोत्तरक्रमेणोक्तिः । उत्तरोत्तरशुभः उपर्युपरि सुभगो हि । अर्थान्तरन्यासः ॥ ३७ ॥

कानुज इति ॥ निजे स्वीये अनुजे दनुजारौ उपेन्द्रे स्वशरणे स्वरक्षके स्वगृहे वा । 'शरणं गृहरक्षित्रोः' इत्यमरः । जाग्रति जागरूके सति । मम रणचर्चा रणचिन्ता का न कापीत्यर्थः । जयोऽङ्कश्चिह्नं यस्य तं तद्भुजाङ्कं, यस्यानुजस्य भुजोत्सङ्गमुपधायोपधानीकृत्य वीतविशङ्को निरातङ्कस्सन् शर्मणा सुखेन स्वपिमि शयेयम् । यथा रक्षिजने जाग्रति राजा शय्यागारे सुखेन भुजमुपधाय स्वपिति तद्वदिति भावः । इह निरातङ्कत्वोक्तिस्स्तुतिः अस्वप्नत्वादमराणाम् ॥ ३८ ॥

विश्वेति ॥ तस्योपेन्द्रस्य, विश्वरूपकलनात् सर्वार्थसाक्षात्करणात्, यद्वा, एकत्र मत्स्यकूर्माद्यनन्तरूपधारणादन्यत्र विश्वार्थरूपणात्, विश्वरूपाणि सूत्राणि तत्प्रणयनात् (हेतोः), जैमिनिमुनित्वमुदीय उत्पन्नम् । इण् गतौ कर्तरि लिट् । उपपन्नं तत्र युक्तमित्यर्थः । कुतः, स उपेन्द्रः, मखभुजां विग्रहं विरोधमन्यत्र शरीरं, असहिष्णुर्मदशनिं मम वज्रायुधं, अन्यत्र, वज्रहस्त इत्यादिवाक्यजातं, व्यर्थतां स्वायुधेनैव तत्कार्यकारणाभिप्रयोजनत्वम् । अन्यत्र विग्रह-

ईदृशानि मुनये विनयाढिधस्तास्थिवान् स वचनान्युपहृत्य ।
प्रांशुनिःश्वसितपृष्ठचरी वाङ्नारदस्य निरियाय निरोजाः ॥ ४० ॥

स्वारसातलभवाह्वशङ्की निर्वृणोमि न वसन् वसुमत्याम् ।
द्यां गतस्य हृदि मे दुरुदर्कः क्ष्मातलद्वयभटाजिवितर्कः ॥ ४१ ॥

वीक्षितस्त्वमसि मामथ गन्तुं तन्मनुष्यजगतेऽनुमनुष्व ।
किं भुवः परिवृढा न विवोढुं तत्र तामुपगता विवदन्ते ॥ ४२ ॥

वद्देवतानिरासेन अर्थवादत्वान्निरभिधेयत्वं च निनाय अतो जैमिनिमुनित्वं युक्तमित्यर्थः । प्रकृताप्रकृतश्लेषः ॥ ३९ ॥

ईदृशानीति ॥ विनयाढिधस्स इन्द्रो मुनये ईदृशानि युद्धनिराशानि वचनानि उपहृत्य समर्प्य, तस्थिवान् तूष्णींस्थितः । अथ नारदस्य प्रांशुनिश्वसितस्य पृष्ठे चरतीति पृष्ठचरी पश्चाद्गामिनी दीर्घनिश्वासपूर्विकेत्यर्थः । चरेष्टः । निरोजाः दीना वाक् निरियाय निर्जगाम ॥ ४० ॥

स्वरिति ॥ वसुमत्यां भूलोके वसन् स्वश्च रसातलं च स्वारसातले स्वर्गपाताळे, "रो रि" इति रेफलोपे दीर्घः । तयोर्भवमाह्वं शङ्कत इति तच्छङ्की सन् । न निर्वृणोमि न गन्तुष्यामि, द्यां स्वर्गं गतस्य मे हृदि क्ष्मातळे भूपाताळे । 'अधःस्वरूपयोरस्त्री तलम्' इत्यमरः । तयोर्द्वये भटानां आजिवितर्कौ युद्धशङ्कादुरुदर्को दुरन्तः । 'उदर्कः फलमुत्तरम्' इत्यमरः । एवं पाताळगतस्य इतरलोकाजिवितर्क इति शेषः ॥ ४१ ॥

वीक्षित इति ॥ त्वं वीक्षितोऽसि । एतदेवागमनफलमित्यर्थः । तत्तस्मात्फलान्तराभावात् । अथानन्तरं मां मनुष्यजगते गन्तुं मर्त्यलोकं गन्तुमित्यर्थः । गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनीति चतुर्थी । अनुमनुष्व अनुजानीहि । तत्र मर्त्यलोके, तां दमयन्तीं, विवोढुं परिणेतुं उपगता भुवः परिवृढाः, प्रभवो भूपतयः "प्रभौ परिवृढः" इति निपातः । न विवदन्ते न कलहिष्यन्ते किम् । सामीप्ये लट् । भावनादिसूत्रेण विमतावात्मनेपदम् ॥ ४२ ॥

इत्युदीर्य स ययौ मुनिरुर्वीं स्वर्पतिं प्रतिनिवर्त्य जवेन ।
वारितोऽप्यनुजगाम स यान्तं तं कियन्त्यपि पदान्यपराणि ॥ ४३ ॥

पर्वतेन परिपीय गभीरं नारदीयमुदितं प्रतिनेदे ।
स्वस्य कश्चिदपि पर्वतपक्षच्छेदिनि स्वयमदर्शि न पक्षः ॥ ४४ ॥

पाणये बलरिपोरथ भैमीशीतकोमलकरग्रहणार्हम् ।
भेषजं चिरधृताशनिवासव्यापदामुपदिदेश रतीशः ॥ ४५ ॥

इतीति ॥ स मुनिरित्युदीर्य स्वर्पतिमिन्द्रं, "अहरादीनां पत्यादिषु" इति वैकल्पिको रेफादेशः । प्रतिनिवर्त्य जवेनोर्वीं ययौ । स इन्द्रो वारितो निवर्तितोऽपि यान्तं गच्छन्तम् । इणो लटश्शत्रादेशः । तं मुनिमपराण्यपि कियन्ति कतिचनपदानि कतिपयपदानि । आस्वसीममित्यर्थः । अत्यन्तसंयोगे द्वितीया । अनुजगाम ॥ ४३ ॥

पर्वतेनेति ॥ पर्वतेन मुनिना गिरिणा च गभीरं, गम्भीरं, नारदीयमुदितं नारदवाक्यं, परिपीय प्रतिनेदे प्रतिदध्वने तदेवानुकृतमित्यर्थः । पर्वते सन्निकृष्टे प्रतिनादो युक्त इति भावः । नदेर्लिट् । "अत एकहल्मध्येऽनादेशादेर्लिटि" इत्येत्वाभ्यासलोपौ । स्वयं तु न किञ्चिन्निवेदितवानित्याह—पर्वतपक्षच्छेदिनीन्द्रे स्वस्य कश्चिदपि पक्षस्साध्यं प्रयोजनं गरुच्च । 'पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु' इति वैजयन्ती । नादर्शि न दर्शितः । तत्साहचर्यमात्रमागत्य स्वस्य पृथक्साध्याभावात्तदुक्तमेवानुकृतम् । न तु पृथक्किञ्चिन्निवेदितमित्यर्थः । पर्वतपक्षच्छेदित्वादिन्द्रस्याग्रे पर्वतेन स्वपक्षो न प्रकाशित इति ध्वनिः ॥ ४४ ॥

इन्द्रस्तु भैम्यामनुरक्तोऽभूदित्याह—**पाणय इति** ॥ अथ नारदनिर्गमनानन्तरं, रतीशो बलरिपोरिन्द्रस्य पाणये चिरधृतानां चिराभ्यस्तानां अशनिवासेन वज्राग्निसम्पर्केण याः व्यापदो विपदस्तासां भैमीशीतकोमलकरस्य ग्रहं ग्रहणमेवार्हं योग्यं, भेषजमौषधमुपदिदेश । वीराभिभवेन शृङ्गारः प्रवृद्ध इति

नाकलोकभिषजोरसुषमा या पुष्पचापमपि चुम्बति सैव ।
वेद्मि तादृगभिषज्यदसौ तद्द्वारसंक्रमितवैद्यकविद्यः ॥ ४६ ॥

मानुषीमनुसरत्यथ पत्यौ खर्वभावमवलम्ब्य मघोनी ।
खण्डितं निजमसूचयदुच्चैर्मानमाननसरोरुहनत्या ॥ ४७ ॥

यो मघोनि दिवमुत्सरमाणे रम्भया मलिनिमालमलम्भि ।
वर्ण एव स खलूज्ज्वलदस्याश्शान्तमन्तरमभाषत भङ्ग्या ॥ ४८

भावः । अत्र कामनिबन्धस्य भैमीपाणिग्रहणरयासनिवासतापशमनार्थत्वोत्प्रेक्षा । व्यञ्जकाप्रयोगाद्गम्या ॥ ४५ ॥

ननु कामस्य कुतो वैद्यविद्येत्यत आह—नाकेति ॥ नाकलोकभिषजो-रश्विनोर्या सुषमा सौन्दर्यं सैव पुष्पचापं काममपि चुम्बति स्पृशति तस्मादपि तावेव सुषमातन्तावितिं भावः । असौ कामः सा सुषमैव द्वारं तेन सङ्क्रमिता वैद्यकं वैद्यस्य कर्म भैषज्यम् । गोपधाद्वुञ्चोत्तरपदात्... । तदेव विद्या यस्मिन् सः । अत एव तादृक् स्ववैद्यसदृशस्सन् अभिषज्यत चिकित्सितवान् । भिषज्यतेः कण्ड्वादियगन्ताल्लङ् । वेद्मीत्युत्प्रेक्षायाम् । वाक्यार्थः कर्म ॥ ४६ ॥

अथेन्द्राण्या ईर्ष्यानुभावमाह—मानुषीमिति ॥ अथेन्द्रस्य भैमी-रागानन्तरं, मघोनः स्त्री मघोनी शची । "पुंयोगादाख्यायाम्" इति ङीप् । "श्वयुवमघोनामतद्धिते" इति सम्प्रसारणे गुणः । पत्यौ खर्वभावं नीचत्वमव-लम्ब्य मानुषीं मानुषस्त्रीं, "जातेरस्त्री" इत्यादिना ङीप् । अनुसरत्यनुसरमाणे सति, आननसरोरुहनत्या शिरोनमनेन, उच्चैरुन्नत निज मानं सर्वोत्तरत्वाहङ्कारं खण्डितं भग्नमसूचयत । आकारेणैव निजनिर्वेदमवेदयत । न तु वाचा किञ्चिदूचे । गम्भीरनायिकत्वादिति भावः ॥ ४७ ॥

अथान्यासामपि कासांचिदप्सरसामीर्ष्यानुभावानाह—य इत्यादि ॥ मघोनीन्द्रे, "श्वयुवमघोनां" इत्यादिना सम्प्रसारणे गुणः । दिवमाकाशं,

जीवितेन कृतमप्सरसां तत्प्राणमुक्तिरिह युक्तिमती नः।
इत्यनक्षरमवाचि घृताच्या दीर्घनिःश्वसितनिर्गमनेन ॥ ४९ ॥

साधु नः पतनमेवमितस्स्यादित्यफण्यत तिलोत्तमयापि ।
चामरस्य वलनेन कराब्जात्तद्विलोलनवलद्भुजनालात् ॥ ५० ॥

उच्चरमाणे उत्पतति सति, "उदश्चरस्सकर्मकात्" इत्यात्मनेपदम् । रम्भाया यो मलिनिमा मालिन्यं, अत्यमत्यन्तं, चलम्भि अलाभि । "विभाषा चिण्णमुलोः" इति वा नुमागमः । सवर्णो मलिनिमैव, अस्या रम्भायाः, अन्तरमन्तरङ्गं, उज्ज्वलद्रोषादत्युज्ज्वलत्प्रज्वलितं सत्, भङ्ग्या कयाचिद्रीत्या भवितव्यता प्राबल्याधियेत्यर्थः । शान्तं शमितं निर्वापितमित्यर्थः । "वा दान्त" इत्यादिना निपातः । अभाषत खलु । निर्वाणालातमलिनमित्याभ्यदित्यर्थः । अन्तःकरण-वैवर्ण्यमूलत्वाद्बाह्यवैवर्ण्यस्येति भावः ॥ ४८ ॥

जीवितेनेति ॥ अप्सरसां नोऽस्माकं जीवितेन कृतं, कष्टत्वादिति भावः । तत्तस्मादिहास्मिन्समये प्राणमुक्तिः प्राणत्याग एव युक्तिमती युक्तेति घृताच्या नाम देव्या दीर्घनिःश्वसितस्य निर्गमनेन निष्क्रमणमुखेन, अनक्षरमशब्दप्रयोगं, यथा तथा अवाचि । वचेर्ब्रूञो वा कर्मणि लुङ् । उक्तमेवेत्यर्थः । अत एव व्यञ्जनाप्रयोगाद्गम्योत्प्रेक्षा ॥ ४९ ॥

साध्विति ॥ तिलोत्तमयापि देव्या तस्य चामरस्य विलोलनेन आन्दोलनेन वलन्वलमानो भुजो बाहुरेव नालं यस्य तस्मात्, वलतेरात्मनेपदमनित्यज्ञापकादित्याह वामनः । चक्षिङो ङित्करणं ज्ञापकम् । कराब्जात् पाणिकमलाच्चामरस्य पतनेन, अवयवपारवश्यादिति भावः । एवञ्चामरवदेव नोऽस्माकमपि इतः स्वर्गात् पतनमेव साधु स्यादित्यफण्यत । फणितमिवेति पूर्ववदुत्प्रेक्षा । भुजनालात् कराब्जादिति सावयवरूपकेण संसृष्टा ॥ ५० ॥

मेनका मनसि तापमुदीतं यत्पिपित्सुरकरोदवहित्थाम् ।
तत्स्फुटं निजहृदः पुटपाके पङ्कलिप्तिमसृजद्बहिरुत्थाम ॥ ५१ ॥

उर्वशी गुणवशीकृतविश्वा तत्क्षणस्तिमितभावनिभेन ।
शक्रसौहृदसमापनसीम्नि स्तम्भकार्यमनुबद्धवपुषैव ॥ ५२ ॥

कापि कामपि बभाण बुभुत्सुं शृण्वति त्रिदशभर्तरि किञ्चित् ।
एष कश्यपसुतामभिगन्ता पश्य कश्यपसुतश्शतयज्ञः ॥ ५३ ॥

मेनकेति ॥ मेनका नाम काचिद्देवी । मनस्युदीतमुत्पन्नं, तापमाधिं, पिपित्सुः पिधातुमिच्छुरसती, अवहित्थामाकारगोपनमकरोदिति यत् । तदाकारगोपनमेव, निजहृदः स्वमनसः, पुटपाके पुटपाके, बहिरुत्थामुत्थितां, बाह्यामित्यर्थः । "आतश्चोपसर्गे" इति कर्तरि क्तप्रत्ययः । पङ्कलिप्तिं पङ्कलेपं, स्फुटमसृजत । पुटपाके बाह्यः पङ्कलेपोऽन्तः पच्यमानद्रव्यस्येवाकारगोपनमेव बलात् क्रियमाणं, तापस्यान्तस्तापितत्वव्यञ्जकमभूदित्यर्थः ॥ ५१ ॥

उर्वशीति ॥ गुणैः सौन्दर्यादिभिर्वशीकृतविश्वा वशीकृताखिलप्रपञ्चा, उर्वशी नाम काचिद्देवी, तत्क्षणे तत्समये, यः स्तिमितभावः स्तैमित्यं निष्क्रियाङ्गत्वलक्षणः स्तम्भो नाम सात्त्विकभावस्तस्य निभेन मिषेण । 'मिषं निभञ्च निर्दिष्टम्' इति हलायुधः । वपुषैव सुहृद्यशब्दाद्युवादित्वादण्प्रत्यये हृद्भावाभावे उभयपदवृद्धिः । अत एव 'सौहृददौर्हृदशब्दावपि हृद्भावात्' इति वामनः । शक्रसौहृदस्य समापनसीम्नि समाप्तिस्थाने, स्तम्भकार्यं जाड्यकृत्यं, स्थूणाकृत्यञ्च, अपुषत । 'स्तम्भस्स्थूणाजडत्वयोः' इति विश्वः । स्तम्भोत्थानावधिकं मे शक्रसौहृदमिति निर्णयमकरोदित्यर्थः । "पृषादि" इत्यादिना [illegible]ादेशः ॥ ५२ ॥

अथ कासाञ्चिदप्सरसां वागारम्भानाह—**कापीत्यादि** ॥ कापि देवी, बुभुत्सुमिन्द्रं, जिगमिषितं जिज्ञासमानां कामपि देवीं त्रिदशभर्तरि इन्द्रे शृण्वति सत्येव । तच्छ्रवणार्थमेवेत्यर्थः । किञ्चिद्बभाण । किञ्चित्तदाह—कश्यपसुत-

आलिमात्मसुभगत्वसगर्वा कापि शृण्वति मघोनि बभाषे ।
वीक्षणेऽपि सघृणासि नृणां किं यासि न त्वमपि सार्थगुणेन ॥

अन्वयुर्युतिपयः पितृनाथास्तं मुदाथ हरितां कमितारः ।
वर्त्म कर्षतु पुरः परमेकस्तद्गतानुगतिको न महार्घः ॥ ५५ ॥

प्रेषिताः पृथगथो दमयन्त्यै चित्तचौर्यचतुरा निजदूत्यः ।
तद्गुरुं प्रति च नैरुपहारास्सख्यसौख्यकपटेन निगूढाः ॥ ५६ ॥

शतयज्ञो बहुयाजी एष इन्द्रः, कश्यपसुतां काश्यपीं, क्षितिमभिगन्ता अभिगमिष्यति । गमेर्लुट् । एतद् दिव विहाय भुवं गच्छतीत्याश्चर्यं पश्येत्यर्थः । स्वयं कश्यपसुतस्तत्सुतां भगिनीमेव गच्छतीत्याश्चर्यं व्यज्यते ॥ ५३ ॥

आलिमिति ॥ आत्मनस्सुभगत्वेन सगर्वा सुभगमानिनीत्यर्थः । कापि मघोनि इन्द्रे शृण्वति सत्येव, आलिं सखीं बभाषे । तदेवाह । नृणां मनुष्याणां वीक्षणेऽपि । किमुत सङ्गमेऽपीत्यर्थः । सघृणा सजुगुप्सासि । सा त्वमपि सार्थगुणेन सङ्घधर्मेण, गतानुगतिकत्वरूपेणाविवेकित्वेनेति यावत् । न यासि किं विवेकेन नैव यास्येवेत्यर्थः ॥ ५४ ॥

अन्वयुरिति ॥ अथेन्द्रप्रयाणानन्तरं, हरितां कमितारो दिशां कामयितारो दिक्पतयः, इन्द्रानुयानार्हा इत्यर्थः । व्याख्यानमेतत् । युतिपयः पितृणां नाथो यमोऽग्निवरुणयमाः, तमिन्द्रं, मुदा औत्सुक्येन, अन्वयुरनुयाताः । "लङ्शाकटायनस्यैव" इति झेर्जुसादेशः । तथा हि, एकः परमेक एव पुरः, वर्त्म कर्षतु मार्गं करोतु । तस्य मार्गकर्तुः गतमनुगतिर्यस्य स महार्घो महामूल्यः दुर्लभ इति यावत् । न भवति । पुरोग एव दुर्लभस्तत्पृष्ठानुयायिनस्तु सर्वत्र सुलभा एवेति न किञ्चिद् विचित्रमित्यर्थः ॥ ५५ ॥

प्रेषिता इति ॥ अथो अनन्तरं, तैरिन्द्रादिभिः, चित्तचौर्ये दमयन्त्याश्चित्ताकर्षणे, चतुरा निजदूत्यः दमयन्त्यै पृथक् प्रेषिताः, तद्गुरु तत्पितरं, भीमञ्च,

चित्रमत्र विबुधैरपि यत्तैस्स्वर्विहाय बत भूरनुसस्रे ।
द्यौर्न काचिदथवास्ति निरूढा सैव सा चरति यत्र हि चित्तम् ॥

शीघ्रलङ्घितपथैरथवाहैर्लम्भिता सुखममी सुरसाराः ।
वक्रितोन्नमितकन्धरबन्धाः शुश्रुवुर्ध्वनितमध्वनि दूरम् ॥ ५८ ॥

किं घनस्य जलधेरथवैवं नैव संशयितुमप्यलभन्त ।
स्यन्दनं परमदूरमपश्यन्निःस्वनश्रुतिमहोपनतं ते ॥ ५९ ॥

[illegible]न्ति । सत्यमेव [illegible] [illegible]न्ति, [illegible] वृथा, उपहारा [illegible] [illegible]पिता ॥ ५६ ॥

चित्रमिति ॥ [illegible] विबुधैश्च [illegible]भिः, स्वः स्वर्गं, विहाय, बत हन्त, भूरनुसस्रे [illegible] । अत्र [illegible], न चित्रमित्यर्थः । कुतः, अथवा द्यौः [illegible], [illegible] निरूढा [illegible]स्ति । किंतु, यत्र चित्तं चरति रमते । सैव सा [illegible] ॥ ५७ ॥

शीघ्रेति ॥ शीघ्रं लङ्घितपथैरतिक्रान्ताध्वभिः, रथवाहैः रथाश्वैर्सुखं लम्भिताः प्रापिताः, अमी सुरसाराः सुरश्रेष्ठाः, वक्रिताः वक्रिताः, उन्नमिताश्च कन्धराः ग्रीवाः, यस्मिन् बन्धः [illegible] संस्थानविशेषो यथा ते सन्तः, अध्वनि दूरं ध्वनि शुश्रुवुः ॥ ५८ ॥

किमिति ॥ ते देवाः, किं घनस्य ध्वनितं मेघस्तनितं, अथवा जलधेर्ध्वनितं, एवं संशयितुमपि नालभन्तैव । एतावन्मात्रविलम्बोऽपि नास्तीत्यर्थः । "शकधृष" इत्यादिना तुमुन्प्रत्ययः । किंतु, निःस्वनस्य पूर्वोक्तध्वनितस्य, श्रुत्या श्रवणेन, महोपनतं प्राप्तम्, अदूरमासन्नं, स्यन्दनं परं रथमेवापश्यन्निति रथवेगोक्तिः । अत्र सन्देहमहोत्त्योस्संसृष्टिः ॥ ५९ ॥

सूतविश्रमदकौतुकिभावं भावबोधचतुरं तुरगाणाम् ।
तत्र नेत्रजनुषः फलमेते नैषधं बुबुधिरे विबुधेन्द्राः ॥ ६० ॥

वीक्ष्य तस्य वरुणस्तरुणत्वं यद्बभार निबिडं जडभूयम् ।
नौचिती जडपतेः किमु साऽस्य प्राज्यविस्मयरसस्तिमितस्य ॥ ६१

रूपमस्य विनिरूप्य तथाऽतिग्लानिमाप रविवंशवतंसः ।
कीर्त्यते यदधुनापि स देवः काल एव सकलेन जनेन ॥ ६२ ॥

सूतेति ॥ एते विबुधेन्द्रास्तत्र रथे सूतस्य सारथेः, विश्रमदो विश्रान्तिप्रदः, कौतुकिभावो विनोदित्वं यस्य तं, विनोदार्थं स्वयं प्रतिपन्नसारथ्यमित्यर्थः । अत्र हेतुः तुरगाणां भावबोधचतुरं अश्वहृदयवेदिनं, नेत्रजनुषो नेत्रसत्तायाः फलं, लोचनसेचनकमित्यर्थः । नैषधं निषधानां राजानं नलम् । जनपदशब्दात् क्षत्रियादण । बुबुधिरे ज्ञातवन्तः ॥ ६० ॥

वीक्ष्येति ॥ वरुणस्तस्य नलस्य, तरुणत्वं तारुण्यं, तारुण्यभूषितरूपमित्यर्थः । वीक्ष्य यन्निबिडं जडभूयं जडत्वं स्तम्भाख्यं सात्त्विकमित्यर्थः । "भुवो भावे" इति क्यप् । बभार । प्राज्येन प्रभूतेन, विस्मयरसेनाद्भुतरसेन, जलेन च । स्तिमितस्य निश्चलस्य, सा जडभूयं, विधेयप्राधान्यात् स्त्रीलिङ्गता । औचिती उचितकर्म, न किमु भवत्येवेत्यर्थः । विस्मयरसाविष्टस्य स्तम्भसम्भवादिति भावः ॥ ६१ ॥

रूपमिति ॥ रविवंशवतंसो यमः, अस्य नलस्य, रूपं सौन्दर्यं, विनिरूप्य निरीक्ष्य । तथा तेन प्रकारेण, अतिम्लानिमतिवैवर्ण्यं, अतिकालिमानमित्यर्थः । आप । यद्यथा, अधुनापि स देवो यमः, सकलेन जनेन, काल एव काल इत्येव, कीर्त्यते । तथा म्लानिमापेति पूर्वेणान्वयः । नलेर्ष्यानुभावकालिमयोगादयं कालो न तु प्राण्यायुःकलनादिति भावः । अत्र यच्छब्दस्य कारणपरत्वेन व्याख्याने त्वनपेक्षितार्थाभिधानमनन्वयश्च स्यात् । प्रकारार्थत्वे तु न कश्चिद्विरोधः । प्रकारार्थत्वञ्च निपातानामनेकार्थत्वादविरुद्धमित्यर्थः ॥ ६२ ॥

यद्बभार दहनः खलु तापं रूपधेयभरमस्य विमृश्य ।
तत्र मूदनलता जनिकर्त्री सा तदप्यनलतैव तु हेतुः ॥ ६३ ॥
कामनीयकमधःकृतकामं काममक्षिभिरवेक्ष्य तदीयम् ।
कौशिकस्स्वमखिलं परिपश्यन् मन्यते स्म खलु कौशिकमेव ॥
रामणीयकगुणाद्वयवादं मूर्तमुत्थितममुं परिभाव्य ।
विस्मयाय हृदयानि वितेरुस्तेन तेषु न सुराः प्रबभूवुः ॥ ६५ ॥

यदिति ॥ दहनोऽग्निरस्य नलस्य, रूपमेव रूपधेयं सौन्दर्यम् । "नामरूपभागेभ्यः स्वार्थे धेयो वक्तव्यः" इति स्वार्थे धेयप्रत्ययः । तस्य भरं समृद्धिं, विमृश्य विचार्य, तापं बभार बिभर्ति स्म । तत्र तापभरणे, अनलता अग्नित्व, जनिकर्त्री जन्मकरी, उत्पादिका सा सा । [illegible] तस्या अप्रयोजकत्वादिति भावः । किंतु, तदपि तथापि निरुक्तमनलतैवाग्नित्वमेव हेतुरिति विरोधः । नलत्वाभावहेतुरिति परिहारः । अत एव विरोधाभासोऽलङ्कारः ॥

कामनीयकमिति ॥ कौशिक इन्द्रः, अधःकृतकामं तिरस्कृतमदनं, तदीयं नलीयं, कामनीयकं कमनीयस्य सौन्दर्यम् । "योपधाद्गुरूपोत्तमाद्वुञ्" । कामं प्रकाममक्षिभिः सहस्रेणेति भावः । अवेक्ष्य, स्वं स्वात्मानमखिलं, तथा तथा, साकल्येनेत्यर्थः । परिपश्यन् कौशिकमुलूकमेव । "महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः" इत्यमरः । मन्यते स्म खलु । [illegible]मित्यमंस्तेत्यर्थः । तथा चास्य [illegible] मनो [illegible] भावः ॥ ६४ ॥

रामणीयकेति ॥ सुरा इन्द्रादयः, अमुं नलं, मूर्तं मूर्तिमन्तं, उत्थितमुत्पन्नं, रामणीयकं सौन्दर्यं, कामनीयकत्वसिद्धं, तदेव गुणस्तस्याद्वयसकलेवाति वाद प्रवादं, परिभाव्य त्रिजगदेकसुन्दरं मत्वेत्यर्थः । हृदयानि चित्तानि, विस्मयायाद्भुतरसाय, वितेरुर्ददुः । तेन दानेन, तेषु हृदयेषु विषये न प्रबभूवु

प्रैयरूपकविशेषनिवेशैस्संवदद्भिरमराश्श्रुतपूर्वैः ।
एष एव स नलः किमितीदं मन्दमन्दमितरेतरमूचुः ॥ ६६ ॥

तेषु तद्विधवधूवरणार्हं भूषणं स समयस्स रथाध्वा ।
तस्य कुण्डिनपुरं प्रतिसर्पन् भूपतेर्व्यवसितानि शशंसुः ॥ ६७ ॥

धर्मराजसलिलेशहुताशैः प्राणतां श्रितममुं जगतस्तैः ।
प्राप्य हृष्टचलविस्तृततापैश्चेतसा निभृतमेतदचिन्ति ॥ ६८ ॥

तेषां नेत्रम् । तद्दर्शने स्वरूपानन्दोऽभूदिति भावः । विस्मयाकुलत्वेन बभूवुरिति परमार्थः ॥ ६५ ॥

प्रैयरूपकमिति ॥ अमरा इन्द्रादयः, श्रुतपूर्वैः पूर्वं श्रुतैः "सुप्सुपा" इति समासः । सम्प्रति, संवदद्भिः प्रत्यक्षं संवादयद्भिः, प्रियरूपस्य भावः प्रैयरूपकं सौन्दर्यम् । मनोज्ञादित्वाद्वुञ् । तस्य विशेषेषु तत्तदवयवेषु । 'विशेषोऽवयवे व्यक्ते' इत्युत्पलमालायाम् । निवेशैस्संस्थानविशेषैः सः श्रुतपूर्वो नल एष एवमिति हस्तनिर्देशः । इतीदं वाक्यं मन्दमन्दं मन्दप्रकारं, "प्रकारे गुणवचनस्य" इति द्विरुक्तिः । इतरेतरमूचुः ॥ ६६ ॥

तेष्विति ॥ तस्य भूपतेर्नलस्य, सा प्रसिद्धा विधा प्रकारः सौन्दर्यादिसाधारणधर्मो यस्यास्तस्या वध्वाः वरणे अर्हमुचितं भूषणं, स समयः स्वयंवरकालः, कुण्डिनपुरं प्रतिसर्पन्, तदभिमुखः स रथाध्वा च व्यवसितानि नलोद्योगान् तेषु तानधिकृत्य शशंसुः तेभ्यश्शशंसुरित्यर्थः । आधारत्वविवक्षायां सप्तमी । एतैर्लिङ्गैरेतस्य स्वयंवरयात्रेयमिति निश्चिक्युरित्यर्थः ॥ ६७ ॥

धर्मेति ॥ जगतः प्राणतां प्राणत्वं जगज्जीवनत्वं, अतिप्रियतां वा । श्रितममुं नलं, प्राप्यासाद्य, हृष्टाः जगत्प्राणभूतपुरुषदर्शनात्सन्तुष्टाः, चलास्तल्लावण्यदर्शनाद्भैम्यां श्लथानुरागाः, विस्तृततापा रागशैथिल्यादेव विस्मृतविरहतापाश्च तैस्तथोक्तैस्तैः प्रकृतैर्धर्मराजसलिलेशहुताशैः चेतसा, निभृतं निगूढम् । एतद-

नैव नः प्रियतमोभयथासौ यद्यमुं न वृणुते वृणुते वा ।
एकतो हि धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः ॥ ६९ ॥

मामुपैष्यति तदा यदि मत्तो वेद नेयमियदस्य महत्त्वम् ।
ईदृशी च कथमाकलयित्री मद्विशेषमपरान्नृपपुत्री ॥ ७० ॥

नन्तरश्लोकत्रयं, वक्ष्यमाणमचिन्तितं तु निरासि । यतो दृष्टा नलगुणश्रवणो वहिर्विस्तृततापः, कन्यात्वप्रतिपादनपरश्चोत्तरश्लोकत्रयमिति केश्चिद्व्याख्यातम् । तदयुक्तम् । न ह्येते धर्माः प्रतिनियताः । किन्तु, त्रयाणामेकाभिप्रायेणाप्युक्ता धर्मास्साधारणाः, अत एवोत्तरश्लोकत्रयमपि सर्वविषयम् । अत एवानन्तरश्लोकेष्विति बहुवचनोपादानम् । यदपि तदनन्तरश्लोकद्वये एकवचनोपादानम् । तदपि प्रत्येकाभिप्रायादविरुद्धम् । किञ्च, इत्थमेव समस्तानामुपसंहारश्लोके परस्परमुखदर्शनेनापि च त्रयाणामेकाभिप्रायावगमात् अस्माभिरुक्तमेव युक्तमिति पश्यामः ॥ ६८ ॥

चिन्ताप्रकारमेवाह— **नैवेत्यादिना** श्लोकत्रयेण ॥ असौ दमयन्ती, अमुं नलं, यदि न वृणुते वृणुते वा । उभयथापि पक्षद्वयेऽपि, नोऽस्माकं, प्रियतमा न भवत्येव । एकतः, हि यस्मादेकस्मिन् पक्षे अगुणज्ञामम् धिक् । [illegible]सुखावहत्वादिति भावः । अन्यतो नलवरणपक्षे, कथमदःप्रतिलम्भः अमुष्याः परिग्रहः । परदारत्वादिति भावः ॥ ६९ ॥

मामिति ॥ इयं दमयन्ती, इयदेतावदस्य नलस्य, मत्तो मत्सकाशान्महत्त्वमाधिक्यं, न वेद यदि, तदा मामुपैष्यति । तर्हि बहुदेवत्वानुपपत्त्यज्ञानात्त्वामेव वरिष्यतीत्यत आह । ईदृशी सर्वापरिज्ञानलक्षणविशेषानभिज्ञा नृपपुत्री, अपरात् परस्मान्नलादित्यर्थः । "पूर्वादिभ्यो नवभ्यो वा" इति विकल्पात् स्मादेशः । मद्विशेषं मदीयोत्कर्षं च कथमाकलयित्री ज्ञात्री । तृजन्तादीकारः । "न लोक" इत्यादिना षष्ठीप्रतिषेधः ॥ ७० ॥

नैषधे बत वृते दमयन्त्या व्रीडितो हि न बहिर्भवितास्मि ।
स्वां गृहेऽपि वनितां कथमास्यं ह्रीनिमीलि खलु दर्शयिताहे ॥
इत्यवेत्य मनसात्मविधेयं किञ्चन त्रिविबुधी बुबुधे न ।
नाकनायकमपास्य तमेकं साऽस्म पश्यति परस्परमास्यम् ॥ ७२ ॥
किं विधेयमधुनेति विमुग्धं स्वानुगाननमवेक्ष्य ऋभुक्षाः ।
शंसति स्म कपटे पटुरुच्चैर्वञ्चनं समभिलष्य नलस्य ॥ ७३ ॥

नैषध इति ॥ किंच, दमयन्त्या नैषधे नले, वृते सति, व्रीडितस्सन् बहिस्तावन्न भवितास्मि हि । बहिः क्वापि जनसमक्षं स्थातुं न शक्यामीत्यर्थः । भवतेर्लुट् । बतेति खेदे । गृहेऽपि, स्वां वनितां भार्यां, ह्रिया निमीलति सङ्कुचतीति ह्रीनिमीलि । णिनिप्रत्ययः । आस्यं कथं खलु दर्शयिताहे दर्शयिष्यामि । दृशेर्ण्यन्तात्कर्तरि लुट् । अभिवादिदृशोरात्मनेपदेवेत्यणि कर्त्र्या वनितायाः वैकल्पिकं कर्मत्वम् । अत्र णेरणादिसूत्रस्थयद्ग्रहणसामर्थ्यलब्धा श्रूयमाणकर्मत्वाभावेन तदविषयत्वात् "णिचश्च" इत्यात्मनेपदमिति केचित् । अणिकर्तृकर्मश्रवणेऽपि तदतिरिक्तकर्माश्रवणादश्रूयमाणकर्मत्वमस्त्येवेति णेरणादिसूत्रविषयत्वमेवेति भाष्यकारः । तदेतत्सम्यग्विवेचितमस्माभिः किरातार्जुनीयव्याख्याने घण्टापथे । "स सन्ततं दर्शयते गतस्मयः" इत्यत्र ॥ ७१ ॥

इतीति ॥ त्रयाणां विबुधानां समाहारस्त्रिविबुधी यमादिदेवत्रयं, इति पूर्वश्लोकत्रयोक्तप्रकारेण । मनसाऽवेत्यालोच्य, किञ्चनात्मविधेयं स्वकर्तव्यं, न बुबुधे न विवेद । किन्तु, सा त्रिविबुधी, तमेकं नाकनायकमिन्द्रमपास्य अपवार्य, परस्परमास्यं पश्यति स्म । इतिकर्तव्यतामूढास्त्रयोऽपि केवलमन्योन्यमुखान्यपश्यन्नित्यर्थः ॥ ७२ ॥

किमिति ॥ कपटे परवञ्चने, पटुः, ऋभुक्षा इन्द्रः । अधुना किं विधेयमिति विमुग्धमितिकर्तव्यतामूढम् ।, स्वस्यानुगानामनुयायिनां यमादीनां

सर्वतः कुशलभागसि कच्चित्त्वं स नैषध इति प्रतिभा नः ।
स्वासनार्धसुहृदस्तव रेखां वीरसेननृपतेरिव विद्मः ॥ ७४ ॥

क्व प्रयास्यसि नलेत्यलमुक्त्वा यात्रयात्र शुभयाजनि यन्नः ।
तत्तयैव फलसत्वरया त्वं नाध्वनोऽर्धमिदमागमितः किम् ॥ ७५ ॥

एष नैषध स दण्डभृदेष ज्वालजालजटिलस्स हुताशः ।
यादसां स पतिरेष च शेषं शासितारमवगच्छ सुराणाम् ॥ ७६ ॥

आननमवेक्ष्य तेषां दैन्यं दृष्ट्वार्थे । नलस्य च तत्र मर्माभिलष्य अभिसन्धाय । उच्चैः शशति स्म जगाद ॥ ७३ ॥

सर्वत इति ॥ सर्वतस्समस्तवस्तुषु, कुशलभागसि कच्चित् । 'कच्चित् कामप्रवेदने' इत्यमरः । न च त्वां न वेद्मीत्याह । त्वं स प्रसिद्धो नैषधः नल इति नोऽस्माकं, प्रतीतिः । कुतस्तव, रेखामाकृतिं, स्वासनार्धसुहृदः समार्धासनभाजो, वीरसेननृपतेरिव तत्सदृशीं विद्मः तस्मात्तस्यात्मपुत्रो नलस्त्वमिति प्रतीम इत्यर्थः ॥ ७४ ॥

क्वेति ॥ हे नल, क्व प्रयास्यसीत्युक्त्वा पृष्ट्वा अलं, न प्रष्टव्यमित्यर्थः । "अलं खल्वोः" इत्यादिना क्त्वाप्रत्ययः । कुतः, यद्यस्मान्नोऽस्माकमत्र यात्रया २६ागमनेन, शुभया त्वद्दर्शनेन सफलया, अजनि अभावि । भावे लुङ् । तत्तस्मात्, फलेन सत्वरया फलार्थिन्या तया, यात्रयैव कर्त्र्या, त्वमिदमध्वनोऽर्धमर्धमार्गमागमितो न किम् । अस्मदर्थमेवेदं तवागमनमित्यर्थः ॥ ७५ ॥

के यूयमत आह । **एष इति** ॥ हे नैषध नल, एष इति पुरोवर्तिनो हस्तेन निर्देशः । स प्रसिद्धो दण्डभृद्यमः, एष ज्वालजालैर्जटिलो जटावान् । ज्वालामालाकुलीत्यर्थः । 'वह्नेर्द्वयोर्ज्वालकीलौ' इत्यमरः । पिच्छादित्वादिलच् । स हुताशोऽग्निः, एष च स यादसांपतिर्वरुणः, शेषं शिष्टं त्वमित्यर्थः । सुराणां शासितारं अवगच्छ देवेन्द्रं विद्धि ॥ ७६ ॥

अर्थिनो वयममी समुपेमस्त्वां किलेति फलितार्थमवेहि ।
अध्वनः क्षणमपास्य च खेदं कुर्महे भवति कार्यनिवेदम् ॥ ७७ ॥
ईदृशीं गिरमुदीर्य बिडौजा जोषमाप न विशिष्य बभाषे ।
नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य ॥ ७८ ॥
अर्थिनामहृषिताखिललोमा स्वं नृपः स्फुटकदम्बकदम्बम् ।
अर्चनार्थमिव तच्चरणानां सप्रणामकरणादुपनिन्ये ॥ ७९ ॥
दुर्लभं दिगधिपैः किममीभिस्तादृशं कथमहो मदधीनम् ।
ईदृशं मनसिकृत्य विरोधं नैषधेन समशायि चिराय ॥ ८० ॥

अर्थिन इति ॥ हे नल, अमी वयमर्थिनस्सन्तस्त्वां समुपेमः किल प्राप्नुमः खलु । उपपूर्वादिणो लटि मस् । इति फलितार्थं निष्कृष्टार्थमवेहि विद्धि । क्षणमध्वनः खेदमपास्य अध्वश्रमं नीत्वा भवति त्वयि कार्यनिवेदं कार्यविशेषनिवेदनम् । विदण्यन्तादच्प्रत्ययः । कुर्महे ॥ ७७ ॥

ईदृशीमिति ॥ बिडौजाः इन्द्रः, ईदृशीं सामान्यनिर्दिष्टां, गिरमुदीर्य जोषं मौनमाप । 'तूष्णीं जोषं भवेन्मौनम्' इति हलायुधः । विशिष्य विविच्य, न बभाषे विशेषं नाचष्टेत्यर्थः । अत्रास्मिन्नभिधाकुशलत्वे उक्तिचातुर्ये, चित्रं विस्मयो न । कुतः, कस्मादस्य शैशवमवधिर्यस्मिन् कर्मणि तद्यथा तथा तदारभ्येत्यर्थः । गुरुराचार्यो गुरुर्बृहस्पतिः । वाचस्पतिशिष्यस्य वाग्मित्वं किं चित्रमित्यर्थः । 'गुरुर्गीष्पतिपित्राद्योः' इति वैजयन्ती ॥ ७८ ॥

अर्थीति ॥ अर्थिनाम्ना अर्थिनामश्रवणेन, हृषिताखिललोमा रोमाञ्चिततनुः, "हृषेर्लोमसु" इति वैकल्पिक इडागमः । स नृपः, स्वमात्मानं, तच्चरणानामर्चनार्थं स्फुटकदम्बं विकसितनीपकुसुमवृन्दमिवेत्युत्प्रेक्षा । प्रणामकरणात्तद्व्याजादुपनिन्ये समर्पयामास ॥ ७९ ॥

दुर्लभमिति ॥ दिगधिपैरमीभिरिन्द्रादिभिः, दुर्लभं किं तादृशं दुर्लभं वस्तु कथं, मदधीनं मदायत्तं, अहो, ईदृशं विरोधं मनसिकृत्य निधाय ।

जीवितावधि वनीपकमात्रैर्याच्यमानमखिलैस्सुलभं यत् ।
अर्थिनो परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः ॥ ८१ ॥

भीमजा च हृदि मे परमास्ते जीवितादपि धनादपि गुर्वी ।
न स्वमेव मम साऽर्हति यस्याः षोडशीमपि कलां किल नोर्वी ॥ ८२

मीयतां कथमभीप्सितमेषां दीयतां द्रुतमयाचितमेव ।
तं धिगस्तु कलयन्नपि वाञ्छामर्थिवागवसरं सहते यः ॥ ८३ ॥

"अनत्याधान उरसिमनसी" इति गतिसंज्ञापक्षे, "कुगतिप्रादयः" इति समासे ल्यबादेशः। नैषधेन नलेन, चिराय चिरं समशायि मशयितम्। विचारितमित्यर्थः। भावे लुङ् ॥ ८० ॥

विचारप्रकारमेवाह द्वादशश्लोक्या—**जीवितेत्यादि** ॥ यद्यस्मादखिलैर्वनीपकमात्रैः कार्त्स्न्येन याचकैः। 'वनीपको याचनको मार्गणो याचकार्थिनौ' इत्यमरः। जीवितावधि प्राणपर्यन्तं, याच्यमानं वस्तु सुलभं, सुराणां परिवृढाय प्रभवे अर्थिने। किं वस्तु वितीर्य दत्वा, चेतः परितुष्यतु सन्तुष्येत्। प्राणान्तं वस्तु सर्वार्थिसाधारणं ततोऽधिकमिन्द्राय देयं किमस्तीति विचारितमित्यर्थः। वितरणे चेतसः कर्तृत्वविवक्षया वितरणपरितोषयोस्समानकर्तृकत्वसिद्धिः ॥ ८१

नन्वस्ति लोकोत्तरं वस्तु भैमी। सा दीयतामित्यत आह—**भीमजेति** ॥ उर्वी, भूर्यस्या भैम्याः षोडशीमपि कलां नार्हति षोडशांशसाम्यमपि न प्राप्नोतीत्यर्थः। अत एव धनादपि। किं बहुना, जीवितादपि गुर्वी अधिका सा भीमजा दमयन्ती च। मे हृदि हृदये, परं सम्यगास्ते। किंतु मम स्वमेव न भवति। अद्याप्यस्वकरणादस्वस्यादेयत्वात्तत्त्वेऽपि। "देयं दारसुतादृते" इति दाराणां दाननिषेधाच्च विचारस्तदवस्थ एवेति भावः ॥ ८२ ॥

पुनर्विचारमेवाह—**मीयतामिति** ॥ एषामभीप्सितं वस्तु कथं मीयतां ज्ञायेत। ज्ञानस्योपयोगमाह। अयाचितं यथा तथा द्रुतं कथं दीयताम्,

प्रापितेन चटुकाकुविडम्बं लम्भितेन बहुयाचनलज्जाम् ।
अर्थिना यदघमार्जति दाता तन्न लुम्पति विलम्ब्य ददानः ॥ ८४

यत्प्रदेयमुपनीय वदान्यैर्दीयते सलिलमर्थिजनाय ।
याचनोक्तिविफलत्वविशङ्कात्रासमूर्छनचिकित्सितमेतत् ॥ ८५ ॥

अर्थिने न तृणवद्धनमात्रं किंतु जीवनमपि प्रतिपाद्यम् ।
एवमाह कुशवज्जलदायी द्रव्यदानविधिरुक्तिविदग्धः ॥ ८६ ॥

दातव्यमित्यर्थः । तर्हि, अर्थिवाचैव विज्ञाय दीयतामित्यत आह । यो दाता वाञ्छामर्थ्याकाङ्क्षां कलयन् जानन्नपि । अर्थिवागवसरं सहते याच्ञाकालं प्रतीक्षते, न दातारं धिगस्तु स गर्ह्य इत्यर्थः ॥ ८३ ॥

शीघ्राप्रदाने दोषमाह- **प्रापितेनेति** ॥ चटुकाकुभ्यां चटूक्तिकाकुयोगाभ्यां करणाभ्यां, विडम्बं विडम्बेनां हास्यत्वं, प्रापितेन, दात्रेति शेषः । बह्वधिकं यथा तथा याचनेन ... ति वादेन, लज्जां लम्भितेन प्रापितेन, अत्रापि, दात्रेति शेषः । अर्थिना करणभूतेन, उक्तरूपेणार्थिपीडनेनेत्यर्थः । दाता अघं पापमार्जति सम्पादयति, विलम्ब्य ददानो दाता, तदघं न लुम्पति न विहन्ति । तस्य पापस्य प्रायश्चित्तमपि नास्तीत्यर्थः ॥ ८४ ॥

यदिति ॥ वदान्यैर्दातृभिः, प्रदेयं देयद्रव्यमुपनीयार्थिजनाय सलिलं दीयत इति यत् । एतत्सलिलदानं याचनोक्तिविफलत्वविशङ्कया देहीति वादवैफल्यशङ्कया त्रासोभयं तेन सम्मूर्छनं तस्य चिकित्सितमित्युत्प्रेक्षा । अन्यथा किमर्थं तत्सलिलदानमिति भावः ॥ ८५ ॥

अर्थिन इति ॥ कुशवतो जलस्य दायो दानम् । ददातेर्घञ् । युगागमः । स प्रतिपाद्यतया अस्मिन्विधावस्तीति कुशवज्जलदायी सकुशजलदानप्रतिपादक इत्यर्थः । अत एवोक्तिविदग्धः । अभिधाव्यापारमन्तरेणार्थादेवार्थान्तरप्रतिपादनचतुर इत्यर्थः । द्रव्यदानविधिर्धनदायकशास्त्रमेवमाह । किमिति

पङ्कसङ्करविगर्हितमर्हं न श्रियः कमलमाश्रयणाय ।
अर्थिपाणिकमलं विमलं तद्वासवेश्म विदधीत सुधीस्तु ॥ ८७ ॥

याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ॥ ८८ ॥

मा धनानि कृपणः खलु जीवन् तृष्णयार्पयतु जातु परस्मै ।
तत्र नैष कुरुते मम चित्रं यत्तु नार्पयति तानि मृतोऽपि ॥ ८९ ॥

अर्थिने धनमात्र धनमेव । 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः । तृणवत्तृणमिव न प्रतिपाद्यं न देयम् । किंतु जीवनम् । जीवितमपि तथा देयमिति । सकुशं जलं देयमिति च गम्यते । अर्थ्यपेक्षितकुशजलदानं विदधतो द्रव्यदानविधेरयमेवाभिप्राय इति भावः ॥ ८६ ॥

पङ्केति ॥ पङ्कः पापं कर्दमश्च । 'पङ्कोऽस्त्री कर्दमैनसोः' इति वैजयन्ती । तत्सङ्करेण विगर्हितं, कमलं श्रियः आश्रयणाय नार्हम् । ततस्तत्सुधीर्विमलं निष्पङ्कमर्थिपाणिकमलं तद्वासवेश्म लक्ष्मीनिवासस्थानं, विदधीत । सर्वथा धनं पात्रपाणिष्वेव निक्षेप्तव्यम् । न तु भूमाविति भावः ॥ ८७ ॥

याचमानेति ॥ यस्य धनिनो जन्म याचमानजनमानसवृत्तेरर्थिजनमनोरथस्य पूरणाय न भवति । बतेति खेदे । तेनैकेनैव पापीयसा । इयं भूमिरतिभारवती । न द्रुमादिभिर्बहुभिरपीत्यर्थः । तेभ्यः प्रजाना बहूपकारलाभादिति भावः ॥ ८८ ॥

मेति ॥ कृपणः कदर्यो लुब्धो, जीवन् प्राणन् , तृष्णया अतिगर्धनेन, जातु कदापि, परस्मै याचमानाय धनानि, नार्पयतु न प्रयच्छतु । एष कृपण[illegible] जीवनक्षणानर्पणे, मम चित्रं विस्मयं, न कुरुते । किंतु, मृतोऽपि तानि [illegible] नार्पयति न प्रयच्छतीति यत्तत्र चित्रं कुरुते विरोधात् । नार्पाणि नृपसम्बन्धीनि कुरुत इति तदा भासकत्वाद्विरोधाभासोऽलङ्कारः ॥ ८९ ॥

मामममीभिरिह याचितवद्भिर्दातृजातमवमत्य जगत्याम् ।
यद्यशो मयि निवेशितमेतन्निष्क्रयोऽस्तु कतमस्तु तदीयः ॥ ९० ॥
लोक एष परलोकमुपैता हा विहाय निधने धनमेकः ।
इत्यमुं खलु तदस्य निनीषत्यर्थिबन्धुरुदयद्दयचित्तः ॥ ९१ ॥
दानपात्रमधमर्णमिहैकग्राहि कोटिगुणितं दिवि दायि ।
साधुरेति सुकृतैर्यदि कर्तुं पारलौकिककुसीदमसीदन् ॥ ९२ ॥

मामिति ॥ जगत्यां भुवि भुवने वा । 'जगती भुवने भूम्याम्' इति विश्वः । दातृजातमवमत्यावधीर्य, मां याचितवद्भिरमीभिर्देवैर्यद्यशो मयि निवेशितं स्थापितं, एतन्निष्क्रयः एतस्य यशसो निष्क्रयः प्रतिनिधिभूतः । कतमस्तु पदार्थस्तदीयोऽस्तु । इन्द्रादिसम्बन्धी स्यात् । किं वितीर्य अनृणो भविष्यामीत्यर्थः ॥

लोक इति ॥ एष लोको जनः, हा कष्टम्, निधने अन्त्यकाले, धनं विहाय, एकः एकाकी, परलोकमुपैता उपैष्यति । इणो लुट् । इति हेतोरुदयद्दयमुद्यत्कृपाश्रितं यस्य सोऽर्थ्येव, बन्धुरस्य लोकस्य, तद्धनं अमुं परलोकं, निनीषति नेतुमिच्छति खलु । अन्ये तु बन्धवस्स्वयमेव सर्वस्वं भुञ्जन्ति । नैनं प्रापयन्ती-त्ययमेवापहरन्तुस्सङ्ग्राह्य इति भावः । ९१ ॥

दानेति ॥ साधुस्सज्जनो वार्धुषिकश्च । 'साधुः त्रिषु हिते रम्ये वार्धुषौ सज्जने पुमान्' इति वैजयन्ती । इहास्मिन् लोके, एकं गृह्णातीत्येकग्राही । दिवि परलोके, कोटिगुणितं कोटिश आवृत्तं, दायि दातृ । "वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा मता" इति लोके वृद्धेः परिमितत्वात् । इदं त्वपरिमितदायीत्यर्थः । "आवश्यकाधमर्ण्ययोर्णिनिः" इत्याधमर्ण्ये णिनिप्रत्ययः । "अकेनोर्भविष्यदाधमर्ण्ययोः" इति षष्ठीप्रतिषेधाद्द्वितीया । दानपात्रं नामाधमर्णं धनग्राहीति रूपकम् । 'उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात्' इत्यमरः । सुकृतैरेति यदि । तदा असीदन्नविनश्यन् । परलोके भवं पारलौकिकं, "परलोकाच्चेति

एवमादि स विचिन्त्य मुहूर्तं तानवोचत पतिर्निषधानाम् ।
अर्थिदुर्लभमवाप्य च हर्षाद्याच्यमानमुखमुल्लसितश्रि ॥ ९३ ॥

नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः ।
वीक्ष्य वः खलु तनूममृतादां दृङ्निमज्जनमुपैति सुधायाम् ॥ ९४

मत्तपः क्व नु तनु क्व फलं वा यूयमीक्षणपथं व्रजथेति ।
ईदृशान्यपि दधन्ति पुनर्नः पूर्वपूरुषतपांसि जयन्ति ॥ ९५ ॥

वक्तव्यम्" इति भवार्थे ठक्प्रत्ययः । कुसीदं वृद्धिर्जीवनं कर्तुः अस्तीति शेषः । 'कुसीदं वृद्धिजीविका' इत्यमरः । "नादत्तमुपतिष्ठते" इति न्यायाददातुः न किञ्चिदामुष्मिकं सुखम् । दातुः पुनरनन्तानि सर्वशः अर्थिने दातव्यमिति भावः ॥ ९२ ॥

एवमादीनि ॥ स निषधानां पतिः नलः, एवमादि मुहूर्तमल्पकालं, विचिन्त्य । अर्थिभिर्दुर्लभं हर्षादुल्लसितश्रि वर्धमानशोभं, प्रसन्नमित्यर्थः । शैषिकस्य कपो वैभाषिकत्वादप्रसक्तत्वं ह्रस्वत्वम् । याच्यमानमुखं दातृमुखं चावाप्य प्रसन्नमुखो भूत्वेत्यर्थः । तानिन्द्रादीनवोचत ॥ ९३ ॥

नास्तीति ॥ जन्यजनकयोः कार्यकारणयोर्व्यतिभेदो नास्ति । कार्यं स्वोपादानादभिन्नमित्यर्थः । जनदेहः अन्नजनितः भुक्ताहारपरिणामश्चेत्येतदुभयं सत्यमित्यर्थः । कुतः, अमृतमदन्तीत्यमृतादः । 'अदोऽनन्ने' इति सचुप्रत्ययः । तेषाममृतादाममृतभुजां, वो युष्माकं, तनूं मूर्तिं, वीक्ष्य दृग्दृक्सुधायां निमज्जनमुपैति खलु सुधामज्जनसुखमनुभवतीत्यर्थः । जनदेहानामन्नजन्यत्वे तद्वदेव युष्मद्देहानामपि तथात्वे [illegible] न स्यादित्यर्थः । युष्मद्दर्शनादेव तावत्कृतार्थोऽस्मीति भावः ॥

मदिति ॥ तनु स्वल्पं मत्तपः क्व । यूयमीक्षणपथं व्रजथेति फलं युष्मद्दर्शनरूपं महाफलं वा क्व । वैरूप्यादिति भावः । अत एव विरूपघटना

प्रत्यतिष्ठिपदिलां खलु देवीं कर्म सर्वसहनव्रतजन्म ।
यूयमप्यहह पूजनमस्या यन्निजैस्सृजथ पादपयोजैः ॥ ९६ ॥
जीविताववधि किमप्यधिकं वा यन्मनीषितमितो नरडिम्भात् ।
तेन वश्चरणमर्चतु सोऽयं ब्रूत वस्तु पुनरस्तु किमीदृक् ॥ ९७ ॥
एवमुक्तवति मुक्तविशङ्के वीरसेनतनये विनयेन ।
वक्रभावविषमामथ शक्रः कार्यकैतवगुरुर्गिरमूचे ॥ ९८ ॥
पाणिपीडनमहं दमयन्त्याः कामयेमहि महीमिहिकांशो ।
दूत्यमत्र कुरु नः स्मरभीतिं निर्जितस्मर चिरस्य निरस्य ॥ ९९ ॥

रूपो विषमालङ्कारः । अथवा ईदृशानि ईदृङ्महाफलान्यपि दधन्ति पुष्णन्ति । "वा नपुंसकस्य" इति नुमागमः । नोऽस्माकं पूर्वपुरुषतपांसि जयन्ति तानीदानीं फलन्तीत्यर्थः ॥ ९५ ॥

प्रतीति ॥ इलां देवीं भूदेवतां, सर्वसहनं विश्वावमानसहनमेव व्रतं येनसा सर्वसहेति कथ्यते । तस्माज्जन्म यस्य तत्तज्जन्यमित्यर्थः । क्रियत इति कर्म सुकृतं (कर्तृ) प्रत्यतिष्ठिपत् प्रतिष्ठापयामास खलु । "तिष्ठतेरित्" इति "णौ चङ्युपधाया" इतीकारः । यद्यस्माद्यूयमपि निजैः पादैरेव पयोजैरिति रूपकम् । अस्या इलायाः पूजनं पूजां सृजत । कुरुध्वमित्यर्थः । अहहेत्यद्भुते ॥ ९६ ॥

जीवितेति ॥ इतो नरडिम्भान्मानुषशिशोः, जीविताववधि प्राणान्तं, ततोऽधिकं वा किमपि मनीषितमीप्सितं यद्वस्तु सोऽयं नरडिम्भः तेन वस्तुना, वश्चरणमर्चतु पूजयतु । ईदृगलभ्यं वस्तु पुनः किमस्तु किं स्यात् ब्रूत ॥ ९७ ॥

एवमिति ॥ एवं वीरसेनतनये नले, विनयेन कपटेन, मुक्ताविशङ्के विस्रब्धे उक्तवति सति । अथ कार्येषु यानि कैतवानि कपटानि तेषां गुरुरुपदेष्टा शक्रः । वक्रभावः प्रतिकूलाभिप्रायः तेन विषमां प्रतिकूलां गिरमूचे उवाच ॥ ९८

पाणीति ॥ हे महीमिहिकांशो भूतलहिमांशो । 'प्रालेयं मिहिका' इत्यमरः । वयं दमयन्त्याः पाणिपीडनमहं विवाहोत्सवं कामयेमहि अभिलषेमहि ।

आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः ।
किं ग्रहा दिवि न जाग्रति ते ते भास्वतस्तु कतमस्तुलयास्ते ॥ १००

विश्वदृश्वनयना वयमेते त्वद्गुणाम्बुधिगभीरिमवेमः ।
त्वामिहैव विनिवेश्य रहस्ये निर्वृतिं न हि लभेमहि सर्वे ॥ १०१

शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः ।
क्षिप्नुरेनमृजुमाशु सपक्षं सायकं धनुरिवाजनि वक्रः ॥ १०२ ॥

हे निर्जितस्मर, अत एव स्मरभोगे [illegible] निरस्य [illegible] निरस्येत्यर्थः । 'चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः' इत्यमरः । [illegible] नोऽस्माकं दूत्यं दूतकर्म । "दूतस्य भागकर्मणी" इति यत्प्रत्ययः । [illegible] ॥ ९९ ॥

आसत इति ॥ अधिक्षिति क्षितौ । [illegible] । शतं नृपाः आसते अपरिमिता [illegible] । [illegible] । ते भूपाः कूपाः [illegible], भूपत्वसाम्येऽपि तेषां तव च समुद्रकूपयोरिव महदन्तरमित्यर्थः । [illegible], दिव्याकाशे । ते ते [illegible] न प्रकाशन्ते किम् । किन्तु, कतमो ग्रहो [illegible] तुलया साम्येनास्ते । न कोऽपीत्यर्थः । तद्वत्तवापि न कोऽपि [illegible] इति [illegible] ॥ १०० ॥

विश्वेति ॥ विश्वं पश्यन्तीति [illegible] सर्वदर्शीनि । [illegible] । तानि नयनानि [illegible] तव गुणाः दयादाक्षिण्यशीलत्ववात्सल्यसत्त्वादयः, [illegible] । [illegible] । हि यस्मात्, इहास्मिन्, रह[illegible], [illegible] विनिवेश्य नियोज्य, सर्वे वयं निर्वृतिं सुखं न लभेमहीति [illegible] । [illegible] भावः ॥ १०१ ॥

शुद्धेति ॥ शुद्धे [illegible], वंशे कुले, [illegible] च । [illegible] । 'वंशो वेणौ कुले वर्गे' इति [illegible] । गुणस्य शौर्यादेः मौर्व्याश्च । [illegible] रूपादौ शौर्यादौ तन्तु[illegible] । गुणशब्दादिशक्तिन्याय' इति [illegible] । स्थानता-

तेन तेन वचसैव मघोनस्स स्म वेद कपटं पटुरुच्चैः ।
आचचार तदुचितमथ वाणीमार्जवं हि कुटिलेषु न नीतिः ॥ १०३

सेयमुच्चतरता दुरितानामन्यजन्मनि मयैव कृतानाम् ।
युष्मदीयमपि या महिमानं जेतुमिच्छति कथापथपारम् ॥ १०४

वित्त चित्तमखिलस्य न कुर्यां धुर्यकार्यपरिपन्थि तु मौनम् ।
ह्रीगिरास्तु वरमस्तु पुनर्मा स्वीकृतैव परवागपराध्ना ॥ १०५ ॥

मा[illegible]त्वमनुभवमपि शक्रः [illegible]मकुटिलबुद्धिं, अवक्रम् । सपक्षं सुहृदं सपत्रं च । एवं नलं, [illegible] [illegible]पि इव । 'अथास्त्रियां [illegible]' इत्यमरसिंहाभिधानात्[illegible] । [illegible] शब्द उकारान्तोऽप्यस्तीति उणादौ भ्रमशक्यादि[illegible]ण [illegible] प्रत्ययविधानात् । आशु । [illegible] क्षेप्ता सन् । [illegible] वसु । "[illegible]" इत्यादिना षष्ठीप्रतिषेधाद्वितीयैव । [illegible] [illegible]ऽजनि । [illegible] । प्रकृताप्रकृतश्लेष इत्यन्ये ॥ १०२ ॥

तेनेति ॥ [illegible] [illegible]कुशलः, स नलः, तेन तेन वचसैव मघोनः इन्द्रस्य कपटं [illegible] विवेद । अथ वदनानन्तरं, तदुचितान्तस्य [illegible]मनुरूपं वाणीमाचरत् । स्वयमपि कपटोक्तिमेवाकरोदित्यर्थः । [illegible], कुटिलेषु विषये, [illegible]कौटिल्यं नीतिर्न हि । ततः कुटिलेनैव भवितव्यम् । [illegible] महात्मनर्थस्यात् [illegible] भावः ॥ १०३ ॥

सेयमिति ॥ सेयमन्यजन्मनि जन्मान्तरे, मयैव कृतानां दुरितानामुच्चतरता महत्ता । [illegible], तदाह—या पापमहत्ता कथापथस्य वाग्वृत्तेः, पारं दूरम[illegible] । युष्मदीयमपि महिमानं प्रभावमाज्ञारूपं जेतुमुल्लङ्घितुमिच्छति । पाप[illegible]नेच्छा मे जायते इति विनयोक्तिः । सर्वथा युष्माज्ञायोगो न [illegible] इति परमार्थः ॥ १०४ ॥

ननु कुटिल[illegible] मौनमत आह । वित्तेति ॥ हे देवाः, अखिलस्य जनस्य, चित्तं वित्त विदित्वा भूतेत्यर्थः । तर्हि, कीदृक् चित्तं तदाह । धुर्यस्य

यन्मतौ विमलदर्पणिकायां सम्मुखस्थमखिलं खलु तत्त्वम् ।
तेऽपि किं वितरथेदृशमाज्ञां या न यस्य सदृशी वितरीतुम् ॥

यामि यामिह वरीतुमहं तद्दूततामनु करवाणि कथं वः ।
ईदृशां न महतां बत [illegible] वञ्चने मम तृणस्य घृणापि ॥१०७॥

उत्क्रमामि विरहान्मुहुरस्या मोहमेमि च मुहूर्तमहं यः ।
[illegible] नः प्रभवितास्मि रहस्यं रक्षितुं स कथमीदृगवस्थः ॥ १०८

[illegible]समर्थस्य, कार्य[illegible]प्रयोग[illegible], [illegible] विरोधि, [illegible] । [illegible] परिहारो[illegible] [illegible]तु । [illegible] [illegible]नमेव [illegible] । [illegible] प्रति [illegible] तत्र [illegible] । [illegible], स्वीकृत[illegible] । अप्र[illegible]षिद्धमनुमतमिति न्याया[illegible] [illegible] ॥

[illegible] तावत्तानुप[illegible] [illegible]दिति [illegible] ॥ [illegible] [illegible] निर्मलादर्शे, [illegible] प्रत्यक्षं खलु । ते सर्वज्ञा अपि यूयम् [illegible] । [illegible] । आज्ञां किं वितरथ [illegible] । [illegible] मे वितरीतुं दातु, सदृशी योग्या न । तस्मादयं ममोपालम्भ इत्यर्थः ॥ १०६ ॥

[illegible]थाष्टभिर्[illegible] **यामीत्यादि** ॥ [illegible], यां दमीं, [illegible]तुम् । "वृतो वा" इति दीर्घः । यामि गच्छामि । तद्दू[illegible] विषये दूत्यं तु, कथं [illegible] करवाणि । अहो ईदृशां महतां [illegible] । [illegible], [illegible] वञ्चने प्रतारणे, तृणा कृपा जुगुप्सा [illegible], न [illegible] ।

उत्क्रमामीति ॥ किञ्च, [illegible] [illegible] यामि । मुहूर्तमपि कालं, मो[illegible] [illegible] वो युष्माकं रहस्यं रक्षितुं गोप्तुं [illegible] प्रभ[illegible] [illegible]त्यर्थः । वृत । त्रुवो लोट् ॥ १०[illegible] ॥

यां मनोरथमयीं हृदि कृत्वा यः श्वसिम्यथ कथं स तदग्रे ।
भावगुप्तिमवलम्बितुमीशे दुर्जयाः हि विषया विदुषापि ॥ १०९ ॥

यामिकाननुपमृद्य च मादृक्तां निरीक्षितुमपि क्षमते कः ।
रक्षिलक्षजयचण्डचरित्रे पुंसि विश्वसिति कुत्र कुमारी ॥ ११० ॥

आदधीचि किल दातृकृतार्घं प्राणमात्रपणसीम यशो यत् ।
आददे कथमहं प्रियया तत्प्राणतश्शतगुणेन पणेन ॥ १११ ॥

यामिति ॥ योऽहं मनोरथमयीं [illegible], यां भैमीं हृदि कृत्वा श्वसिमि प्राणिमि । अथ सोऽहं तदग्रे तस्याः भैम्याः पुरः, भावगुप्तिं [illegible]विकारगोपनमवलम्बितुं धारयितुं कथमीशे शक्नोमि । तथाहि, विदुषा विवेकिनापि विषयाः[illegible] दुर्जया इत्यर्थान्तरन्यासः ॥ १०९ ॥

यामिकानिति ॥ [illegible] चार्थः । मादृक् [illegible], क्षत्रिय इत्यर्थः कः यामात्रक्षन्तीति यामिकाः प्रहररक्षकाः, [illegible] । ताननुपमृद्य अहत्वा । तां भैमीं, निरीक्षितुमपि क्षमते । [illegible] भावः । तथैव क्रियतां तत्राह । रक्षिणां लक्षाणि तेषां जयेन मर्दनेन, चण्डचरित्रे क्रूरकर्मणि, पुंसि कुमारी कन्या, कुत्र विश्वसिति, न कुत्रापीत्यर्थः । [illegible] । क [illegible]न्तःपुरमर्दनमिति भावः ॥ ११० ॥

आदधीचीति ॥ प्राणमात्र[illegible]मेव, पणसीमा मूल्यावधिर्यस्मिन् कर्मणि तद्यथा तथा । 'पणो [illegible] ग्लहे मान' इति वैजयन्ती । आदधीचि दधीचिमारभ्य अभिविधाव[illegible] । किलेति प्रसिद्धौ । दातृभिर्वदान्यैः कृतार्घं निश्चितमूल्यम् । 'मूल्ये पूजाविधावर्घ' इत्यमरः । यद्यश. तद्यशः प्राणतो जीवाच्छतगुणेन प्रिययैव, पणेन मूल्येन, अहं कथमाददे स्वीकरिष्यामि । हीनक्रयस्य परावर्त्यत्वादिति भावः । अत्र [illegible]रलङ्कारः । "समन्यूनाधिकानां च यथा विनिमयो भवेत् । साकं समाधिकन्यूनैः परिवृत्तिरसौ मता ॥"

अर्थना मयि भवद्भिरिवास्यै कर्तुमर्हति मयापि भवत्सु ।
भीमजार्थपरयाचनचाटौ यूयमेव गुरवः करणीयाः ॥ ११२ ॥

अर्थिताः प्रथमतो दमयन्तीं यूयमन्वहमुपास्य मया यत् ।
ह्रीर्न चेद्व्यतियतामपि तद्वस्सा ममापि सुतरां न तदस्तु ॥११३ ॥

कुण्डिनेन्द्रसुतया किल पूर्वं मां वरीतुमुररीकृतमास्ते ।
व्रीडमेष्यति परं मयि दृष्टे स्वीकरिष्यति न सा खलु युष्मान् ॥

इति लक्षणात् । तव प्राणैर्यशसो न्यूनपरिवृत्तिः । हीनमूल्यत्वात् । प्रियया यशसोऽधिकपरिवृत्तिरधिकमूल्यत्वादिति भावः ॥ १११ ॥

अर्थनेति ॥ अस्यै दमयन्त्यै । तादर्थ्ये चतुर्थी । मयि विषये, भवद्भिरिव मयापि भवत्सु विषये अर्थना प्रार्थना कर्तुमर्हति कर्तव्येत्यर्थः । अथ कथं कामुकमुखात्कामिनी लिप्सेति चेद्यथा भवता तथेत्याह । भीमजार्था या परयाचनचाटुः परप्रार्थनारूपा प्रियोक्तिस्तस्यां यूयमेव गुरवः उपदेष्टारः करणीयाः । करोमि चेति भावः ॥ ११२ ॥

अथ प्रथमप्रार्थकत्वाभिमानः । ताह स्वयमेव प्रथम इत्याह । **अर्थिता इति** ॥ मया अन्वहमनुदिनम् । "अनश्च" इत्यव्ययीभावः, समासान्तष्टच् । यूयमुपास्य प्रथमतो दमयन्तीमर्थिताः । 'अर्थयतेर्दुहादित्वादप्रधाने कर्मणि क्तः' इति यत् तत्, प्रथमप्रार्थनं व्यतियता व्यतिक्रमतामपि । इणो लटश्शत्रादेशः । वः ह्रीर्न चेत्तर्हि सा ह्रीर्ममापि सुतरां नास्तु माभूत् ॥ ११३ ॥

कुण्डिनेति ॥ कुण्डिनेन्द्रसुतया दमयन्त्या । "न लोक" इत्यादिना निष्ठायोगेन षष्ठीप्रतिषेधात् कर्तरि तृतीया । पूर्वमेव मां वरीतुमुररीकृतमङ्गीकृतमास्ते । तया मद्वरणमङ्गीकृतं किलेत्यर्थः । किलेति वार्तायाम् । कर्मणि क्तः । अङ्गीकारस्य कथञ्चिदिच्छार्थत्वमङ्गीकृत्य, समानकर्तृकेषु तुमुन्निति तुमुन्प्रत्ययः । ततो मयि दृष्टे परं व्रीडमेष्यति । एवं च सा युष्मान्न स्वीकरिष्यति ॥ ११४ ॥

तत्प्रसीदत विधत्त न खेदं वृत्यमत्यसदृशं हि ममेदम् ।
हास्यतैव सुलभा न तु साध्यं तद्विधित्सुभिरनौपयिकेन ॥ ११५

ईदृशानि गदितानि तदानीमाकलय्य स नलस्य बलारिः ।
शंसति स्म किमपि स्मयमानः स्वानुगाननविलोकनलोलः ॥ ११६

नाभ्यधायि नृप ते भवतेदं रोहिणीरमणवंशभवेन ।
लज्जते न रसना तव वाम्यादर्थिषु स्वयमुरीकृतकाम्या ॥ ११७॥

भङ्गुरश्च वितथं न कथं वा जीवलोकमवलोकयसीमम् ।
येन धर्मयशसी परिहातुं धीरहो चलति धीर तवापि ॥ ११८ ॥

तदिति ॥ तत्तस्मात्, प्रसीदत प्रसन्नाः स्थ, खेदं क्लेशं, न विधत्त न कुरुत । ममेदं वृत्यं अत्यसदृशं अत्यन्तायोग्यं, हि कुतः । अनौपयिकेन अनुपायेन, उपायं विनेत्यर्थः । "उपायाद्ध्रस्वत्वञ्च" इति स्वार्थे ठक् । तद्वृत्यं विधित्सुभिश्चिकीर्षुभिर्हास्यतैव सुलभा, साध्यं प्रयोजन्तु न सुलभम् । अनुचितकर्मारम्भोऽनर्थाय भवेन्न फलायेत्यर्थः ॥ ११५ ॥

ईदृशानीति ॥ स बलारिः इन्द्रः, तदानीं नलस्येदृशानि गदितानि वाक्यानि, आकलय्य आकर्ण्य । स्मयमानो मन्दं हसन् । स्वानुगानां यमादीनां, आननविलोकने लोलो लोलुपस्सन् । स्ववाक्यानुमोदनार्थमिति भावः । किमपि किञ्चिद्वाक्यं शंसति स्म शशंस ॥ ११६ ॥

नेति ॥ हे नृप, ते भवता इदम् । सेयमुच्चतरेत्यादि प्रतिषेधवाक्यम् । रोहिणीरमणवंशभवेन सोमवंश्येनेव नाभ्यधायि । किं त्वसोमवंश्येनेवाभिहितमित्यर्थः । प्रतिश्रुतपरित्यागादिति भावः । कुतः, अर्थिषु विषये स्वयमुरीकृतकाम्या अङ्गीकृतमनोरथपूरणा तव रसना, वाम्यात् प्रातिकूल्याच्च लज्जते । ततो न सोमवंश्य इव प्रतिभासीत्यर्थः ॥ ११७ ॥

भङ्गुरमिति ॥ हे धीर विद्वन्, इमं जीवलोकं प्राणिजातम् । भङ्गुरं

कः कुलेऽजनि जगन्मकुटे वः प्रार्थकेप्सितमपूरि न येन ।
इन्दुरादिरजनिष्ट कळङ्की कष्टमत्र स भवानपि मा भूत् ॥ ११९ ॥

याप्यदृष्टिरपि या मुखमुद्रा याचमानमनु या च नतुष्टिः ।
त्वादृशस्य सकलस्स कळङ्कः शीतभासि शशकः परमङ्कः ॥ १२० ॥

नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि ।
इत्थमर्थिजनसंशयडोलाखेलनं खलु चकार नकारः ॥ १२१ ॥

रविनश्वरं, भङ्गभासमिदो घुरन्त्। वितथं दुःखमयत्वाद्विफलञ्च । कथं वा नावलोक-यसि न पश्यसि, न जानासीत्यर्थः । येनाज्ञानेन तावपि धीर्धर्मयशसी । अमङ्गुरा-विवितथे अपीति भावः । परिहातुं चलति । अहो अस्थिराविषयलौल्यात् स्थिर-सुकृतपरित्यागो भवादृशामनुचित इत्यर्थः ॥ ११८ ॥

क इति ॥ जगन्मकुटे जगद्भूषणे, वः कुले प्रार्थकेप्सितमर्थिमनोरथो येन नापूरि न पूरितम् । स कोऽजनि जातः, न कोऽपीत्यर्थः । "दीपजन" इत्यादिना कर्तरि लुङि चिण् । आदिर्युष्माकं कूटस्थ इन्दुः कळङ्की अजनिष्ट जातः । कष्टमत्र लोके भवानपि सकळङ्को मा भूत् । अपकीर्तिं मा कुरुष्वेत्यर्थः ॥ ११९ ॥

अथ विचार्यमाणे त्वमेव कळङ्की न शशाङ्क इत्याह—**येति** ॥ त्वादृशस्य याचमानमनु अर्थिनं प्रति; याप्यपदृष्टिर्विकृतदर्शनं, या च मुखमुद्रा मौनं, या नतुष्टिरसन्तोषश्च, स सकलो विकारः कळङ्कः । शीतभासि चन्द्रे शशकः, परं केवलमङ्कः श्रीवत्सादिवत् चिह्नं, न तु कळङ्क इत्यर्थः ॥ १२० ॥

किञ्चेदमर्थिषु ते नास्तिवाद इत्याह—**नेति** ॥ अक्षराणि पठता शैशवे मातृकाक्षराण्यभ्यस्यता भवता, नकारो निषेधवाची नशब्दो नापाठि किम् । अथवा, पठितोऽपि प्रस्मृतो विस्मृतः । इत्थमर्थिजनस्य संशय एव डोला तया खेलनं क्रीडाम् । नकारश्चकार । अत्रार्थिनामीदृक् संशयासम्बन्धेऽपि तत्सम्बन्धो-क्तेरतिशयोक्तिभेदः । स चोक्तसंशयोत्थापित इति सङ्करः ॥ १२१ ॥

अब्रवीत्तमनलः क नलेदं लब्धमुज्झसि यशश्शशिकल्पम् ।
कल्पवृक्षपतिमर्थिनमेनं नाप कोऽपि शतमन्युमिहान्यः ॥ १२२ ॥

न व्यहन्यत कदापि मुदं यः स्वस्सदामुपनयन्नभिलाषः ।
तत्पदे त्वदभिषेककृतां नस्स त्यजत्वसमतामदमद्य ॥ १२३ ॥

अब्रवीदथ यमस्तमहृष्टं वीरसेनकुलदीप तमस्त्वाम् ।
यत्किमप्यभिबुभूषति तत्किं चन्द्रवंशवसतेस्सदृशं ते ॥ १२४ ॥

अब्रवीदिति ॥ अथानलोऽग्निस्तं नलमब्रवीत् । हे नल, इदं वक्ष्यमाणं, लब्ध हस्तप्राप्तं, शशिकल्पं चन्द्रप्रतिमं, यशः, कोज्झसि कुत्र त्यजसि ? किं तद्यशस्तदाह । इह लोके, अन्यस्त्वद्व्यतिरिक्तः, कोऽपि कल्पवृक्षपतिमनन्या-र्थिनमित्यर्थः । एनं शतमन्युमिन्द्रं, अर्थिनं नाप । तदेतद्धस्तगतमिन्द्रयाच्यत्व-यशो वृथा मा विनाशयेत्यर्थः ॥ १२२ ॥

नेति ॥ स्वस्सदः स्वर्वासिनः । "सत्सूद्विष" इत्यादिना क्विप् । तेषां नस्सम्बन्धी योऽभिलाषो मनोरथो मुदमुपनयन् स्वसिद्ध्या सन्तोषमावहन्, कदापि न व्यहन्यत न विहतः । अद्य, तत्पदे तद्व्यवसिते, तत्सम्पादकाधिकार इत्यर्थः । 'पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु' इत्यमरः । त्वदभिषेककृतां त्वां स्थापयतां, नस्सम्बन्धी सोऽभिलाषः । असमता असाधारण्यं, स्वसिद्धा-वनन्यापेक्षत्वमिति यावत् । तन्मदं त्यजतु । अद्य प्रभृति स्वार्थसाधने स्वयमेव समर्थास्सुरा इत्यहङ्कारं मुञ्चाम इत्यर्थः ॥ १२३ ॥

अब्रवीदिति ॥ अथ यमः अहृष्टमसन्तुष्टं, तं नलमब्रवीत् । हे वीर-सेनकुलदीप, किमपि यत्तमो मोहोऽन्धकारश्च त्वामभिबुभूषति अभिभवितु-मिच्छति । तच्चन्द्रवंशे वसतिः स्थितिर्यस्य तस्य ते सदृशं किम् । न हि चान्द्रस्य तेजसस्तमसाभिभवो युक्त इत्यर्थः ॥ १२४ ॥

रोहणः किमपि य कठिनानां कामधेनुरपि या पशुरेव ।
नैनयोरपि वृथा भवदर्थी हा विधित्सुरसि वत्स किमेतत् ॥ १२५ ॥
याचितश्चिरयति क नु धीरः प्राणने क्षणमपि प्रतिभूः कः ।
शंसति द्विनयनी दृढनिद्रां द्राङ्निमेषमिषघूर्णनपूर्णा ॥ १२६ ॥
अभ्रपुष्पमपि दित्सति शीतं सार्थिना विमुखता यदभाजि ।
स्तोककस्य खलु चञ्चुपुटेन म्लानिरुल्लसति तद्घनसङ्घे ॥ १२७ ॥

रोहण इति ॥ यो रोहणो मणीनामाकरोद्रिः, सोऽपि कठिनानां मध्ये किमपि कठिनम् । या कामधेनुः सापि पशुरेव । एनयोः पशुपाषाणयोरपि सम्बन्धी । 'द्वितीयाटौ स्वेनः' इतीदंश एतच्छब्दस्य वा अन्वादेशविषये एनादेशः । अर्थी वृथा विफलो नाभवत् । हे वत्स, किमेतद्विधित्सुर्विधातुमिच्छुरसि । हेति विषादे । हा कष्टं पशुपाषाणाभ्यामपि तुच्छवृत्तिरसीत्यर्थः ॥ १२५ ॥

याचित इति ॥ क नु कुत्र, धीरस्सुधीर्याचितस्सन् चिरयति विलम्बते । न कुत्रापि विलम्बत इत्यर्थः । कुतः, क्षणमपि प्राणने जीवने, प्रतिभूर्लग्नकः कः, न कोऽपीत्यर्थः । द्राङ्निमेषमिषेण शीघ्रपक्ष्मपातव्याजेन, घूर्णनेन कनीनिकाभ्रमणेन पूर्णा द्विनयनी नयनद्वन्द्वमेव, दृढनिद्रां मरणं, शंसति । नयनघूर्णनवत्क्षणिकं जीवनमित्यर्थः ॥ १२६ ॥

अभ्रपुष्पमिति ॥ शीतं शीतलमभ्रपुष्पमुदकम् । 'मेघपुष्पं घनरसम्' इत्यमरः । तद्गगनपुष्पं, तद्वद्दुर्लभं वस्त्विति च गम्यते । दित्सति दातुमिच्छत्यपि न तु, परिजिहीर्षतीत्यर्थः । घनसङ्घे मेघवृन्दे, अर्थिना याचकेन, स्तोककस्य चातकस्य । 'अथ सारङ्गः स्तोककश्चातकस्समौ' इत्यमरः । चञ्चुपुटेन सा प्रसिद्धा विमुखता । पक्षिमुखत्वं पराङ्मुखत्वञ्च । अभाजीति यत् । तस्माद्वैमुख्यभजनात् । म्लानिर्जलभरमन्थरत्वं वैवर्ण्यं चोल्लसति स्फुरति । अत्रार्थिन एव वैमुख्ये दातुरीदृशी म्लानिः । किमुत दातृवैमुख्ये । तस्मात्तादृशस्य तवेदमर्थिवैमुख्यमनुचितमिति भावः ॥ १२७ ॥

ऊचिवानुचितमक्षरमेनं पाशपाणिरपि पाणिमुदस्य ।
कीर्तिरेव भवतां प्रियदारा दाननीरझरमौक्तिकहारा ॥ १२८ ॥

चर्म वर्म किल यस्य नभेद्यं यस्य वज्रमयमस्थि च तौ चेत् ।
स्थायिनाविह न कर्णदधीची तन्न धर्ममवधीरय धीर ॥ १२९ ॥

अद्य यावदपि येन निबद्धौ न प्रभू विचलितुं बलिविन्ध्यौ ।
आश्रुतावितथतागुणपाशस्त्वादृशेन विदुषा दुरपासः ॥ १३० ॥

ऊचिवानिति ॥ पाशपाणिर्वरुणोऽपि, पाणिमुदस्य उद्धृत्य, एनं नलं, उचितं युक्तं, अक्षरं वाक्यं, ऊचिवान् उक्तवान् । यदुक्तं तदाह—**कीर्तिरिति** ॥ दाननीराणां झरः दानजलप्रवाहः, स एव मौक्तिकहारो यस्यास्तथोक्ता कीर्तिरेव भवतां युष्माकं, प्रियदाराः प्रियकलत्रम् । 'पुंभूम्नि दाराः' इत्यमरः । एतेन भार्याया अपि कीर्तिः प्रियतमेति भावः । अतो दमयन्तीलोभान्न कीर्तिं जहीत्यर्थः । अत्र रूपकालङ्कारः ॥ १२८ ॥

चर्मेति ॥ यस्य कर्णस्य चर्म त्वक् नभेद्यमभेद्यम् । नञर्थस्य न-शब्दस्य "सुप्सुपा" इति समासः । वर्म कवचं किल । यस्य दधीचेरस्थि च वज्रमयं किल । किलेति प्रसिद्धौ । तौ कर्णदधीची । इह जगति, स्थायिनौ न चेत् । तर्हि, हे धीर धीमन्, धर्मं नावधीरय नावमन्यस्व । कर्णादीनामस्थिरत्वम् । तद्धर्मस्य च स्थैर्यं दृष्ट्वा त्वमपि तथैवाचरेत्यर्थः ॥ १२९ ॥

अद्येति ॥ येन सत्यसन्धत्वपाशेन, निबद्धौ बलिर्वैरोचनिस्स च विन्ध्यश्च तौ । अद्य यावदेतद्दिनपर्यन्त, विचलितुमपि प्रभू समर्थौ न स्तः । आश्रुतस्य प्रतिज्ञातार्थस्य अवितथा सत्यता, सैव गुणः उत्कृष्टधर्मस्स एव पाशो बन्धः, त्वादृशेन विदुषा स दुरपासः दुरुच्छेदः । बलिविन्ध्यादिदृष्टान्तेन यावज्जीवनिबन्धेनापि प्रतिज्ञातार्थनिर्वाहः कार्य इत्यर्थः ॥ १३० ॥

प्रेयसी जितसुधांशुमुखश्रीर्या न मुञ्चति दिगन्तगतापि ।
भङ्गिसङ्गमकुरङ्गदृगर्थे कः कदर्थयति तामपि कीर्तिम् ॥ १३१ ॥
यान्वरं प्रति परेऽर्थयितारस्तेऽपि यं वयमहो स पुनस्त्वाम् ।
नैव नः खलु मनोरथमात्रं शूर पूरय दिशोऽपि यशोभिः ॥ १३२ ॥
अर्थितां त्वयि गतेषु सुरेषु म्लानदानजनिजोरुयशश्श्रीः ।
अद्य पाण्डु गगनं सुरशाखी केवलेन कुसुमेन विधत्ताम् ॥ १३३ ॥

प्रेयसीति ॥ प्रेयसी प्रियतमा, जिता सुधांशुमुखानां चन्द्रादीनां, श्रीर्यया सा । अन्यत्र, जिता *सुधांशोर्मुखस्य श्रीर्यया सा तथोक्ता । या कीर्तिर्दिगन्तगतापि देशान्तरगतापि, न मुञ्चति । तामपि कीर्तिं भङ्गिसङ्गमः भङ्गुरसङ्गतिर्यस्यास्तस्याः कुरङ्गदृशोऽर्थे तदर्थम् । तादर्थ्येऽव्ययीभावः । कुत्सितोऽर्थः कदर्थः । "कोः कत्तत्पुरुषेऽचि" इति कुशब्दस्य कदादेशः, तं करोति कदर्थयति व्यर्थयतीत्यर्थः । को नामास्थिरार्थे स्थिरं जह्यादिति भावः ॥ १३१ ॥

यानिति ॥ परे अन्ये जनाः, वरं प्रति इष्टलाभमुद्दिश्य, यानस्मानर्थयितारः । ताच्छील्ये तृन् । "न लोक" इत्यादिना षष्ठीप्रतिषेधाद्द्वितीया । ते वयमपि यं त्वामर्थयितारः स्मः । अहो, स त्वं पुनर्नोऽस्माकं, मनोरथमेव नैव पूरय । किंतु, हे शूर, यशोभिर्दिशोऽपि पूरय खलु । तस्मादस्मन्मनोरथपूरणेन ते दिगन्तविश्रान्तकीर्तिर्भविष्यति । अन्यथा, अपकीर्तिरपि तादृशी भविष्यतीति भावः ॥ १३२ ॥

अर्थितामिति ॥ अद्य सुरशाखी कल्पवृक्षस्सुरेष्वस्मासु, त्वयि विषये, अर्थितां गतेषु सत्सु म्लाना अर्थ्यभावक्षीणा, दानजा दानजन्या, निजा उरुर्महती यशःश्रीः कीर्तिसम्पद्यस्य सः, तथा सन्, केवलेन कुसुमेन गगनं पाण्डु शुभ्रं, विधत्ताम् । न तु, वितरणेन यशसा । स्वार्थिनामन्यार्थित्वेन तन्निदानदानकथास्तमियादिति भावः ॥ १३३ ॥

---

* अथवा जितः सुधांशुर्यया सा मुखस्य श्रीर्यस्यास्सा ।

प्रवसते भरतार्जुनवैन्यवत्स्मृतिधृतोऽपि नल त्वमभीष्टदः ।
त्वगमनाफलतां यदि शङ्कसे तदफलं निखिलं खलु मङ्गलम् ॥

इष्टं नः प्रति ते प्रतिश्रुतिरभूद्याद्य स्वराह्लादिनी
धर्मार्था सृज तां श्रुतिप्रतिभटीकृत्यान्विताख्यापदाम् ।
त्वत्कीर्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयावेशना-
द्रव्याणां शितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥ १३५॥

अत्र यात्रावैफल्यशङ्कया ते सङ्कोचसदनाशङ्कनीयमेवेत्याह—प्रवसत इति ॥ हे नळ, प्रवसते प्रयाणं कुर्वते, भरतश्शाकुन्तलेयः, अर्जुनो हैहयः, वैन्यः पृथुः, तैस्तुल्यं तद्वत् । "तेन तुल्यं क्रिया चेद्वतिः" । स्मृत्या धृतः स्मृतिधृतः, स्मर्यमाणोऽप्यभीष्टदः इष्टार्थप्रदस्त्वं, त्वगमनस्य त्वद्यात्रायाः अफलतां वैफल्यं शङ्कसे यदि, तर्हि, लोके निखिलं सर्वमपि मङ्गळं यात्राकालिकं त्वत्स्मरणलक्षणं मङ्गलाचरणमफलं खलु । तथा च—"वैन्यं पृथुं हैहयमर्जुनञ्च शाकुन्तलेयं भरतं नलञ्च । एतान्नृपान्यः स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्च" इति शास्त्रमप्रमाणं स्यादित्यर्थः । तथा च यत्स्मरणादन्येषामर्थसिद्धिः । तस्य तथाऽर्थसिद्धौ कस्सन्देह इति भावः ॥ १३४ ॥

इष्टमिति ॥ अद्य नोऽस्माकं, इष्टमिच्छां, यागञ्च प्रति । 'इष्टिर्यागेच्छयोः' इत्यमरः । यजेरिषेश्च स्त्रियां क्तिन् । "वचिस्वपि" इत्यादिना यजेस्सम्प्रसारणम् । व्रश्चादिना षत्वम् । इषेः क्तिन्प्रत्ययापवादं इति काशिकायाम् । तथा प्रयोगप्राबल्यात् साधुत्वं द्रष्टव्यम् । स्वः स्वर्गं, अन्यत्र स्वरैरुदात्तादिभिराह्लादिनी धर्मोऽर्थः प्रयोजनमभिधेयं च यस्यास्सा धर्मार्था या प्रतिश्रुतिः । जीवितावधि किमप्यधिकं वेति श्लोकोक्तास्मन्मनोरथपूरणप्रतिज्ञा अभूत्, तां प्रतिश्रुतिं श्रुतिप्रतिभटीकृत्य वेदप्रतिनिधीकृत्य, समार्पयित्वेत्यर्थः । अन्विताख्यापदां सृज । सत्यत्वेन श्रुतिप्रतिनिधीकृत्य प्रतिश्रुतिरित्यन्वर्थनामाक्षरां कुरु । सत्यप्रतिज्ञो भवेत्यर्थः । अस्य फलमाशीर्मुखेनाह—त्वत्कीर्तिः पुनस्त्व-

यं प्रासूत सहस्रपादुदभवत्पादेन खञ्जः कथं
स च्छायातनयस्सुतः किल पितुस्सादृश्यमन्विष्यति ।
एतस्योत्तरमद्य नस्समजनि त्वत्तेजसां लङ्घने
साहस्रैरपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन्भानुमान् ॥ १३६॥
इत्याकर्ण्य क्षितीशस्त्रिदशपरिषदस्ता गिरश्चाटुगर्भा
वैदर्भीकामुकोऽपि प्रसभविनिहितं दूत्यभारं बभार ।

यशस्तु, त्रिभुवनं भुवनत्रयं, समाहारे द्विगुरेकवचनं, पात्रादित्वान्नपुंसकत्वम् । पुनती पावयन्ती । पुनातेश्शतरि ङीप् । द्रव्याणां नीलपीतादिद्रव्याणां, शुभ्रः शुक्लगुणः । 'गुणे शुक्लादयः पुंसि' इत्यमरः । तेनाद्वयावेशनादभेदापादनाच्छितिपीतादिनामभिर्वाचकपदैरन्वयं वाच्यत्वलक्षणं सम्बन्धं, लुम्पतु निवर्तयतु । अर्थिमनोरथपूर्त्या कीर्तिं सम्पादयेत्यर्थः । अत्र नीलादीनां वस्तूनां स्वगुणत्यागेन कीर्तिगुणग्रहणात्तद्गुणालङ्कारः । "तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः" इति लक्षणात ॥ १३५ ॥

यमिति ॥ यं शनैश्चरं, सहस्रं पादाः रश्मयोऽङ्घ्रयश्च यस्य सः, सहस्रपात् सूर्यः । 'पादा रश्म्यङ्घ्रितुर्यांशाः' इत्यमरः । "सङ्ख्यासुपूर्वस्य" इति समासान्तलोपः । प्रासूत प्रसूतवान्, सः छायातनयः शनैश्चरः । 'मन्दश्छायासुतश्शनिः' इत्यमरशेषः । कथं पादेन खञ्जो विकलस्सन् । येनाङ्गविकार इति तृतीया । उदभवदुत्पन्नः ? सुतः पितुः सादृश्यमन्विष्यति किल प्राप्नोति खलु । एतस्य प्रश्नस्याद्य त्वत्तेजसां लङ्घने साहस्रैः सहस्रसङ्ख्यैरपि । "अण् च" इति मत्वर्थीयोऽण्प्रत्ययः । अङ्घ्रिभिः पङ्गुः खञ्जः, पूर्ववत्तृतीया । अभिव्यक्तीभवन् भानुमान् सूर्यः, नोऽस्माकमुत्तरं समजनि सञ्जातः । जनेः कर्तरि लुङ् । "दीपजन" इत्यादिना जनेश्चिण् । चिणो लुक् । अत्रार्कस्यापङ्गोः पङ्गुत्वोक्तेरतिशयोक्तिभेदः । तद्धेतुत्वञ्च शनैश्चरपङ्गुत्वस्येत्युत्प्रेक्षा इति तयोः सङ्करः ॥ १३६ ॥

इतीति ॥ क्षितीशो नलः, त्रिदशपरिषदः सुरसङ्घस्य इत्येवरूपाश्चाटुगर्भाः प्रियप्रायास्ता गिर आकर्ण्य वैदर्भीकामुकः सन्नपि "लपपत" इत्यादिना

अङ्गीकारं गतेऽस्मिन्नमरपरिवृढस्संभृतानन्दमूचे
भूयादन्तर्धिसिद्धेरनुविहितभवच्चित्तता यत्र तत्र ॥ १३७ ॥


श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरस्सुतं
श्रीहीरस्सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्य श्रीविजयप्रशस्तिरचनातातस्य भव्ये महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्पञ्चमः ॥

कर्मेरुकञ्प्रत्ययः । अत एव "न लोक" इत्यादिना षष्ठीप्रतिषेधात् मधु-पिपासुवद्द्वितीयासमासः । प्रसभविनिहितं बलादारोपितं दूत्यमेव भारं बभार । अस्मिन्नले, अङ्गीकारं गते सत्यमरपरिवृढो देवेन्द्रः । हे नरेन्द्र, यत्र कुत्रापि, अन्तर्धिसिद्धेः अन्तर्धानशक्तेरनुविहितभवच्चित्तता अनुवृत्तत्वन्मनस्कता, भूयात् भवच्चित्तानुसारेण सर्वत्र तवान्तर्भावशक्तिरस्तु । इति सम्भृतानन्दं सहर्षमूचे । तिरस्करिणीविद्यां प्रादादित्यर्थः ॥ १३७ ॥

श्रीहर्षमित्यादि सुगतम् । श्रीमत्याः विजयप्रशस्तेः ग्रन्थविशेषस्य रचना तातस्य निर्माणकर्तुरित्यर्थः ॥ १३८ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्यायकोलचल-
मल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने
पञ्चमः सर्गः समाप्तः ।





षष्ठः सर्गः ।

दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषधप्रधानः ।
स भीमभूमीपतिराजधानीं लक्षीचकाराथ रथस्यदस्य ॥ १ ॥

भैम्या समं नाजगणद्वियोगं स दूतधर्मे स्थिरधीरधीशः ।
पयोधिपाने मुनिरन्तरायं दुर्वारमप्यौर्वमिवौर्वशेयः ॥ २ ॥

दूत्यायेति ॥ अथ दूत्याङ्गीकारानन्तरं, द्विषां निषेद्धा निवारयिता । निषधानां जनपदानां, प्रधानः मुख्याधिपतिरित्यर्थः । स नळः, दैत्यारिपतेः देवेन्द्रस्य, दूत्याय दूतकर्मणे । "दूतस्य भागकर्मणी" इति यत्प्रत्ययः । प्रवृत्त उद्युक्तस्सन् स रथस्यदस्य रथवेगस्य, भीमभूमीपतिराजधानीं कुण्डिननगरीं, लक्षीचकार लक्ष्यमकरोत्, गमनं चकारेत्यर्थः ॥ १ ॥

भैम्येति ॥ अधीशो मनोनियमनसमर्थः । अत एव, दूतधर्मे दूतकार्ये, स्थिरधीरचलबुद्धिः, स नलः, भैम्या समं सह । 'साकं सत्रा समं सह' इत्यमरः । वियोगं, और्वशेयः ऊर्वशीपुत्रो मुनिरगस्त्यः । 'और्वशेयः कुम्भयोनिरगस्त्यो विन्ध्यकण्टकः" इति हलायुधः । पयोधिपाने दुर्वारं, उर्व्या अपत्यमौर्वो वरुणभयान्मातृगुप्त इति स्वामी । तमौर्वं वडवानलमिव अन्तरायं नाजगणदन्तरायत्वेन नामन्यत । भैमीवियोगमपि विपद्य प्रतिज्ञाभङ्गभयात् दूत्यमेव दृढतरमवलम्बितवानित्यर्थः । अन्तरायविशेषणमुभयत्रापि योजनीयम् ॥ २ ॥

नळप्रणालीमिळदम्बुजाक्षीसंवादपीयूषपिपासवस्ते ।
तदध्ववीक्षार्थमिवानिमेषा देशस्य तस्याभरणीबभूवुः ॥ ३ ॥

तां कुण्डिनाख्यापदमात्रगुप्तामिन्द्रस्य भूमेरमरावतीं सः ।
मनोरथस्सिद्धिमिव क्षणेन रथस्तदीयः पुरमाससाद ॥ ४ ॥

भैमीपदस्पर्शकृतार्थरथ्या सेयं पुरीत्युत्कलिकाकुलस्ताम् ।
नृपो निपीय क्षणमीक्षणाभ्यां भृशं निशश्वास सुरैः क्षताशः ॥ ५

स्विद्यत्प्रमोदाश्रुलवेन वामं रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः ।
अन्यत्पुनः कंप्रमपि स्फुरन्तं तस्याः पुरः प्राप नवोपभोगम् ॥ ६

नलेति ॥ ते इन्द्रादयो देवाः, नल एव प्रणाळी जलनिर्गममार्गः, तया मिळत् प्रवहत् । अम्बुजाक्षीसंवादपीयूषं दमयन्तीसंवादामृतं, पिपासवः पातुमिच्छवः सन्तः, मधुपिपासुवद्द्वितीयासमासः । तदध्ववीक्षार्थं नलमार्गप्रतीक्षार्थमिव अनिमेषाः सन्त इत्युत्प्रेक्षा । तस्य देशस्य नलविसर्जनप्रदेशस्याभरणीबभूवुः तदागमनपर्यन्तं तत्रैव तस्थुरित्यर्थः ॥ ३ ॥

तामिति ॥ तस्यायं तदीयः नलीयः, स रथः, तां कुण्डिनमिति यदाख्यापदं नामपदं, तन्मात्रेण गुप्तां छन्नां, अमरावतीमिन्द्रराजधानीं, तत्कल्पामित्यर्थः । भूमेरिन्द्रस्य भीमभूपतेः, पुरं, मनोरथः सिद्धिमिव क्षणेन आससाद प्राप ॥ ४ ॥

भैमीति ॥ नृपो नलः, इयं भैमीपदस्पर्शेन कृतार्थरथ्या सफलमार्गा, सा श्रूयमाणा पुरी कुण्डिनपुरीत्युत्कलिकया उत्कण्ठया, आकुलः क्षुभितस्सन् । क्षणमीक्षणाभ्यां, तां पुरीं, निपीय, सतृष्णं दृष्ट्वा सुरैः क्षताशः भिन्नाशस्सन् भृशं निशश्वास ॥ ५ ॥

अथैवं विद्यमानस्य तस्येष्टसिद्धिसूचकं दक्षिणाक्षिस्पन्दनं जातमित्याह—
स्विद्यदिति ॥ अस्य नलस्य, वामं चक्षुः, प्रमोदाश्रुलवेन आनन्दबाष्पकणेन

रथादसौ सारथिना सनाथाद्राजावतीर्याशु पुरं विवेश ।
निर्गत्य बिम्बादिव भानवीयात्सौधाकरं मण्डलमंशुसङ्घः ॥ ७ ॥

चित्रं तदा कुण्डिनवेशिनस्सा नलस्य मूर्तिर्ववृते नदृश्या ।
बभूव तच्चित्रतरं तथापि विश्वैकदृश्यैव यदस्य मूर्तिः ॥ ८ ॥

स्विद्यत् स्विन्नं सत्, पक्ष्मभिः उन्मिषद्भिरिति शेषः । रोमाञ्चभृद्रोमाञ्चितं सत्, तस्याः पुरः नगर्याः, स्फुरन्तं प्रकाशमानं, नवोपभोगं अपूर्वदर्शनमाद्यसङ्गमञ्च प्राप । अन्यत् पुनर्दक्षिणं तु कम्प्रमपि कम्पाढ्यं सत् तं प्राप । वामाक्ष्णः स्वेदरोमाञ्चावेव । दक्षिणस्य तु वेपथुरप्यधिकः सात्त्विकः संवृत्त इत्यर्थः । प्रथमसङ्गमे कम्पस्वेदरोमाञ्चादयो जायन्ते । पुरुषस्य दक्षिणाक्षिस्पन्दनं शुभाय भवतीति निमित्तवेदिनः । अत्रानन्दाश्रुपक्ष्मोत्क्षेपाक्षिस्पन्देषु स्वेदादिसात्त्विकरूपणाद्रूपकम् । तदुल्लासितनवोपभोगव्यवहारसमारोपात् पुरीचक्षुषोः स्त्रीपुंसत्वप्रतीतेः रूपकसङ्कीर्णा समासोक्तिरलङ्कारः ॥ ६ ॥

रथादिति ॥ असौ राजा नलः सारथिना सनाथात् सहितात्, रथादवतीर्य अंशुसङ्घः अर्कांशुसमूहः, भानवीयात् बिम्बान्निर्गत्य सौधाकरं चान्द्रं मण्डलमिव आशु पुरं कुण्डिनं विवेश । "सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशम् । क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः ॥" इति शास्त्रादियमुपमा ॥ ७ ॥

चित्रमिति ॥ तदा तस्मिन्समये, कुण्डिनवेशिनः कुण्डिनप्रविष्टस्य नलस्य सा तथा दर्शनीया मूर्तिर्नदृश्या अदर्शनीया । नञर्थस्य नशब्दस्य "सुप्सुपा" इति समासः । ववृते जाता, चित्रं विरोधादिति भावः । इन्द्रवरादृश्यत्वं गतेत्यविरोधः । तथाप्यदृश्यापि तस्य मूर्तिर्विश्वैकदृश्येति यत्तच्चित्रतरं बभूव, दृश्यत्वादृश्यत्वयोर्विरोधादिति भावः । विश्वस्यैकस्यैव दृश्या दृष्टिप्रियेत्यविरोधः । अत्र विरोधाभासयोः संसृष्टिः ॥ ८ ॥

जनैर्विदग्धैर्भवनैश्च मुग्धैः पदे पदे विस्मयकल्पवल्लीम् ।
विगाहमाना पुरमस्य दृष्टिरथाददे राजकुलातिथित्वम् ॥ ९ ॥

लीनश्चरामीति हृदा ललज्जे हेलां दधौ रक्षिजनेऽभिसज्जे ।
द्रक्ष्यामि भैमीमिति संतुतोष दूत्यं विचिन्त्य स्वमसौ शुशोच ॥

अथोपकार्याममरेन्द्रकार्यात्कक्ष्यासु रक्षाधिकृतैरदृष्टः ।
भैमीं दिदृक्षुर्बहु दिक्षु चक्षुर्दिशन्नसौ तामविशद्विशङ्कः ॥ ११ ॥

अयं क इत्यन्यनिवारकाणां गिरा विभुर्द्वारि विमुच्य कण्ठम् ।
दृशं दधौ विस्मयनिस्तरङ्गां विलङ्घितायामपि राजसिंहः ॥ १२ ॥

जनैरिति ॥ अथास्य नलस्य, दृष्टिर्विदग्धैरभिज्ञैः जनैः मुग्धैः सुन्दरैः भवनैश्च पदे पदे विस्मयकल्पवल्लीं आश्चर्यावहामित्यर्थः । पुरं विगाहमाना विभावयन्ती । राजकुलातिथित्वमाददे । क्रमादसौ राजभवनं ददर्शेत्यर्थः ॥ ९ ॥

लीन इति ॥ असौ नलः, अभिः सज्जे सन्नद्धे । 'सन्नद्धो वर्मितस्सज्ज' इत्यमरः । रक्षिजने राजकुलरक्षकवीरवर्गे, हेलामवज्ञां दधाविति गर्वोक्तिः । लीनः (कष्टं शूरोऽपि) गूढश्चरामीति हेतोर्हृदा ललज्जे । भैमीं द्रक्ष्यामीति संतुतोष । स्वं स्वकीयं, दूत्यं विचिन्त्य शुशोचेति निर्वेदोक्तिः । अत्र गर्वलज्जाहर्षनिर्वेदानां बहूनां भावानां परस्परोपमर्देन समावेशाद्भावशबलतोक्ता ॥ १० ॥

अथेति ॥ अथानन्तरं, असौ नलः, कक्ष्यासु गृहप्रकोष्ठेषु । 'कक्ष्या प्रकोष्ठे हर्म्यादेः' इत्यमरः । रक्षायामधिकृतैः रक्षिजनैः, अदृष्टस्सन् भैमीं दिदृक्षुः द्रष्टुमिच्छुः । अत एव, दिक्षु चक्षुर्बहु भूयिष्ठं, दिशन् विशङ्कस्सन्, तां पूर्वनिर्दिष्टां, उपकार्यां राजसदनम् । 'उपकार्या राजसद्मनि' इति विश्वः । अमरेन्द्राणां कार्यात् प्रयोजनात् हेतोराविशत् ॥ ११ ॥

अयमिति ॥ विभुः समर्थः, राजा सिंह इव राजसिंहः राजश्रेष्ठः, उपमितसमासः । स नलः, अयं क इत्यन्यस्य स्वव्यतिरिक्तजनस्य, निवारकाणां

अन्तःपुरान्तस्स विलोक्य बालां कांचित्समालब्धुमसंवृतोरुम् ।
निमीलिताक्षः परया भ्रमन्त्या सङ्घट्टमासाद्य चमत्चकार ॥ १३ ॥
अनादिसर्गस्रजि वानुभूता चित्रेपु वा भीमसुता नलेन ।
जातैव यद्वा जितशम्बरस्य सा शाम्बरीशिल्पमलक्षि दिक्षु ॥ १४ ॥
अलीकभैमीसहदर्शनाच्च बलान्यकन्याप्सरसो रसाय ।
भैमीभ्रमस्यैव ततः प्रसादाद्भैमीभ्रमस्तेन न तास्वलम्भि ॥ १५ ॥

रक्षिणां, गिरा वाक्येन, (हेतुना) कण्ठं विभुज्य किं दृष्टोऽस्मीति शङ्कया ग्रीवां विवलय्य । विलङ्घितायामतिक्रान्तायामपि द्वारि । विस्मयेन कथमेते मामद्राक्षुरित्याश्चर्येण । निस्तरङ्गां निर्निमेषां, दृशं दधौ । सिंहस्य ग्रीवाभङ्गेन लङ्घिताध्वदर्शनं युक्तमिति भावः ॥ १२ ॥

अन्तरिति ॥ स नलः, अन्तःपुरस्यान्तरभ्यन्तरे, अव्ययमेतत् । समालब्धुमुद्वर्तयितुं, असंवृतोरुमनाच्छादितोरुदेशां, काञ्चिद्बालां स्त्रियं विलोक्य, निमीलिताक्षस्सन् पराङ्गनादर्शनपापभीत्येति भावः । भ्रमन्त्या तत्र सञ्चरन्त्या परया स्त्र्यन्तरेण सङ्घट्टमभिघातं आसाद्य, द्वयोरपि दृष्टिप्रतिबन्धादिति भावः । चमत्चकार उल्लसति स्म । चमदित्यनुकारिशब्दः ॥ १३ ॥

अनादीति ॥ अनादौ सर्गस्रजि सृष्टिपरम्परायां वा, कस्मिञ्जन्मान्तर इत्यर्थः । चित्रेषु आलेख्येषु, अनुभूता । अत्यन्ताननुभूतेऽर्थे भ्रमासम्भवादिति भावः । यद्वा, मास्त्वनुभव इति शेषः । किंतु, जितशम्बरस्य मायिनोऽपि मायिनः, कामस्य शाम्बरीशिल्पं मायासृष्टिः । 'स्यान्माया शाम्बरी' इत्यमरः । जातैव, सा भीमसुता नलेन दिक्षु अलक्षि प्रतिदिशमलक्ष्यत । लक्षेः कर्मणि लुङ् । अत्रालीकभैमीसाक्षात्कारो जन्मान्तरानुभवाद्वा चित्रानुभवाद्वा केवलमदनमायाबलाद्वेति हेतूत्प्रेक्षा ॥ १४ ॥

अलीकेति ॥ अन्याः कन्या अप्सरस इव । उपमितसमासः । अप्सरःकल्पा अपि कन्याः तत्रत्याः स्त्रियः, अलीकभैम्या सह दर्शनाद्धेतोः तस्य नलस्य

भैमीनिराशे हृदि मन्मथेन दत्तस्वहस्तात्विरहाद्विहस्तः ।
स तामलीकामवलोक्य तत्र क्षणादपश्यन्व्यषदद्विबुद्धः ॥ १६ ॥

प्रियां विकल्पोपहृतां स यावद्दिगीशसन्देशमजल्पदल्पम् ।
अदृश्यवाग्भीषितभूरिभीरुभवो रवस्तावदचेतयत्तम् ॥ १७ ॥

पश्यन् स तस्मिन्मरुतापि तन्व्यास्तनौ परिस्प्रष्टुमिवास्तवस्त्रौ ।
अक्षान्तपक्षान्तमृगाङ्कमास्यं दधार तिर्यग्वलितं विलक्षः ॥ १८ ॥

रसाय रागाय, नाभवन् । ततोऽपि तासामपकृष्टत्वादिति भावः । तर्हि, किं सारूप्यात्तास्वपि भैमीभ्रमो नाभूदत आह—**भैमीति** ॥ तत इति सार्वविभक्तिकस्तसिः । ततः तस्य भैमीभ्रमस्यैव प्रसादात्तेन नलेन तास्वन्तःपुरस्त्रीषु भैमीभ्रमो नालम्भि न प्राप्तः । अत्यन्तासादृश्यादिति भावः ॥ १५ ॥

भैमीति ॥ भैम्यां निराशे सुरैः क्षताशे, हृदि, मन्मथेन दत्तस्वहस्तावलम्बाज्जनितादित्यर्थः । विरहाद्विहस्तो विह्वलः, स नलः अलीकां तां भैमीमवलोक्य, क्षणात् विबुद्धः निवृत्तभ्रमः, तत्र तामपश्यन् व्यषदत् विषण्णोऽभूत् । सदेर्लुङ् । लिदित्वाच्च्लेरङादेशः । "सदिरप्रतेः" इत्यड्व्यवायेऽपि षत्वम् । भैमीशून्यविबोधात्तद्वान् भ्रम एव तस्याशास्योऽभवदिति भावः ॥ १६ ॥

प्रियामिति ॥ स नलः, विकल्पोपहृतां विभ्रमोपनीतां, प्रियां दमयन्तीं, यावद्दिगीशसन्देशं इन्द्रादिवाचिकं, अल्पमजल्पदकथयत् । तावददृश्यया अलक्ष्यकर्तृकया, वाचाहेतुकर्त्र्या, भीषिता वित्रासिताः । "भियो हेतुभये षुक्" । ताश्च ता भूरयोऽनेका भीरवो भयशीलाः स्त्रियः ताभ्यो भवतीति तद्भवो रवः कलकलः, तं नलमचेतयदबोधयत् । चेततेर्भौवादिकात् णिच् ॥ १७ ॥

पश्यन्निति ॥ स नलः, तस्मिन्नन्तःपुरे मरुतापि अचेतनेनापीति भावः । परिस्प्रष्टुं संस्प्रष्टुमिव । अस्तवस्त्रौ अवनीतांशुकौ तन्व्याः स्तनौ पश्यन् विलक्षो विलज्जितस्सन्, अक्षान्तपक्षान्तमृगाङ्कं, अक्षान्तः असोढः पक्षान्ते पौर्णमास्यां

अन्तःपुरे विस्तृतवागुरोऽपि बालावलीनां वलितैर्गुणौघैः ।
न कालसारं हरिणं तदक्षिद्वन्द्वं प्रभुर्बद्धुमभून्मनोभूः ॥ १९ ॥
दोर्मूलमालोक्य कचं रुरुत्सोस्ततः कुचौ तावनुलेपयन्त्याः ।
नाभीमथैष श्लथवाससोऽनु मिमील दिक्षु क्रमकृष्टचक्षुः ॥ २० ॥
मीलन्न शेकेऽभिमुखागताभ्यां धर्तुं निपीड्य स्तनसान्तराभ्याम् ।
स्वाङ्गान्यपेतो विजगौ स पश्चात्पुमङ्गसङ्गोत्पुलके पुनस्ते ॥ २१ ॥

मृगाङ्कः चन्द्रो येन तदास्यं, तिर्यग्वलितं साचीकृतम् । दधार धृतवान् । यत्राचेतनस्य वायोरपि चपलता तत्रायं निर्विकार एवेत्यहो जितेन्द्रियत्वमस्येति भावः ॥

अन्तरिति ॥ अन्तःपुरे बालावलीनां स्त्रीसमूहानां, वबयोरभेदाद्रोम-समूहानां च, वलितैः पुनःपुनः प्रवृत्तैः आवर्तितैश्च गुणानां कटाक्षविक्षेपादीनां सूत्राणां चौघैः विस्तृतवागुरः प्रसारितमृगबन्धनीकोऽपि । 'वागुरा मृगबन्धनी' इत्यमरः । मनोभूः स एव मृगयुरिति शेषः । तस्य नलस्याक्षिद्वन्द्वमेव काल-सारम्, कृष्णसारम्, अक्षिद्वयन्तु कालेन कनीनिकाकार्ष्ण्येन सारं श्रेष्ठं, हरिणञ्च बद्धुमाक्रष्टुं संयन्तुं च प्रभुः शक्तो नाभूत् । जितेन्द्रियत्वादस्येति भावः । अत्राक्ष्यादिषु हरिणत्वादिरूपणान्मनोभुवो मृगयुत्वं गम्यत इत्येकदेशवर्ति-रूपकम् ॥ १९ ॥

दोरिति ॥ एष नलः, कचं केशपाशं, रुरुत्सोः रोद्धुं बद्धुमिच्छोः, कस्याश्चिद्दोर्मूलं बाहुमूलमालोक्य । ततोऽनन्तरं, कुचावनुलेपयन्त्याः तौ कुचा-वालोक्य, अथ श्लथवाससः स्रस्तांशुकायाः नाभीमालोक्य, अन्वनन्तरं, दिक्षु पुरः पार्श्वभागेषु क्रमेण कृष्टचक्षुः प्रत्याहृतदृष्टिः सन्, मिमील निमीलिताक्षो-ऽभूत् । तत्र तथा यथेष्टचेष्टे स्त्रीमण्डले तस्य पापभीरोर्नेत्रनिमीलनमेव प्राप्त-मित्यर्थः ॥ २० ॥

मीलन्निति ॥ मीलन्निमीलिताक्षः, स नलः, अभिमुखमन्योन्याभिमुख-मागताभ्यां तथापि स्तनाभ्यां निमित्तेन सान्तराभ्यां सव्यवधानाभ्यां काभ्यां

निमीलनस्पष्टविलोकनाभ्यां कदर्थितस्ताः कलयन् कटाक्षैः ।
स रागदर्शीव भृशं ललज्जे स्वतस्सतां ह्रीः परतोऽपि गुर्वी ॥ २२ ॥

रोमाञ्चिताङ्गीमनु तत्कटाक्षैर्भ्रान्तेन कान्तेन रतेर्निसृष्टः ।
मोघश्शरौघः कुसुमानि नाभूत्तद्धैर्यपूजां प्रति पर्यवस्यन् ॥ २३ ॥

हित्वैव वर्त्मैकमिह भ्रमन्त्याः स्पर्शः स्त्रियास्सुत्यज इत्यवेत्य ।
चतुष्पथस्याभरणं बभूव लोकावलोकाय सतां स दीपः ॥ २४ ॥

नित् स्त्रीभ्यां निपीड्य मध्ये निरुध्य धर्तुं गृहीतुं, न शेके शक्यो नाभूत् । स नलः, पश्चात् तोपमृतः स्वाङ्गानि विजगौ, परस्त्री संस्पर्शदोषाद्विजगर्हे, निनिन्द । ते स्त्रियौ पुनः पुंसाऽङ्गसङ्गेन उत्पुलके उद्गतरोमाञ्चे जाते ॥ २१ ॥

निमीलनेति ॥ निमीलनं च स्पष्टविलोकनञ्च ताभ्यां कदर्थितः निषिद्धस्पर्शनदर्शनदोषाद्विजितः । स नलः, ताः स्त्रियः, कटाक्षैः कलयन् निर्विकल्पेन गृह्णन् । रागेण पश्यतीति रागदर्शी, स इव भृशं ललज्जे । कष्टं कामुकदृष्ट्या पश्यामीति भृशं परितप्तोऽभूदित्यर्थः । नन्वप्रकाशेऽर्थे का लज्जा तत्राह सतां सत्पुरुषाणां परतोऽपि स्वत एव ह्रीर्गुर्वी, अकामादप्यकार्यकरणे परस्मादपि स्वस्मादेव लज्जन्ते सज्जना इत्यर्थान्तरन्यासः ॥ २२ ॥

रोमाञ्चितेति ॥ रोमाञ्चिताङ्गीमनु पुमङ्गसङ्गात् पुलकितगात्रीमुद्दिश्य, तस्य नलस्य, कटाक्षैः कटाक्षवीक्षणैः, भ्रान्तेन अयमस्यामनुरक्त इति मन्वानेन, रतेः कान्तेन कामेन, निसृष्टः प्रयुक्तः कुसुमान्येव शरौघः तस्य नलस्य, धैर्यस्य निर्विकारत्वस्य पूजां प्रति पूजायां पर्यवस्यन् पूजात्वेन परिणमन् । मोघो व्यर्थो नाभूत् । शत्रोरपि गुणः पूज्यो भवेदिति भावः । अत्र नलधैर्यभङ्गार्थं प्रयुक्तस्य कुसुमजालस्य, न केवलं तदभञ्जकत्वं प्रत्युत तत्पूजकत्वमापन्नमित्यनर्थोत्पत्तिलक्षणो विषमालङ्कारः ॥ २३ ॥

हित्वेति ॥ सतां स दीपः सुजनश्रेष्ठः, सतां भावनां प्रकाशकः प्रदीपश्च स नलः । इह अन्तःपुरे भ्रमन्त्यास्सञ्चरन्त्याः स्त्रियाः स्पर्शः एकमभिन्नं वर्त्म

उद्वर्तयन्त्या हृदये निपत्य नृपस्य दृष्टिर्न्यवृत द्रुतैव ।
वियोगिवैरात् कुचयोर्नखाङ्कैरर्धेन्दुलीलैर्गळहस्तितेव ॥ २५ ॥
तन्वीमुखं द्रागधिगत्य चन्द्रं वियोगिनस्तस्य निमीलिताभ्याम् ।
द्वयं द्रढीयः कृतमीक्षणाभ्यां तदिन्दुता च स्वसरोजता च ॥ २६ ॥
चतुष्पथे तं विनिमीलिताक्षं चतुर्दिगेतास्सुखमग्रहीष्यन् ।
सङ्घट्य तस्मिन् भृशभीनिवृत्तास्ता एव तद्वर्त्म न चेदवारिष्यन् ॥

हित्वैव मुख्यम इत्यवेत्य निश्चित्य लोकावलोकाय सञ्चारिजनदर्शनाय । अन्यत्र, लोकानां जनानां व्यवहाराय । चतुर्णां पथां समाहारः चतुष्पथं, "तद्धितार्थ" इत्यादिना समाहारे द्विगुः । "ऋक्पूः" इत्यादिना समासान्तः । "पथस्सङ्ख्या-व्ययादेः" इति नपुंसकत्वम् । तस्य आभरणं बभूव । तत्र स्थित इत्यर्थः । क्लिष्टैकमार्गे स्त्रीसंबाधादक्लिष्टे चतुष्पथे स्थित्वा समन्तादवलोकितवानित्यर्थः । चतुष्पथस्थो दीपो लोकावलोकाय कल्पत इति ध्वनिः ॥ २४ ॥

उद्वर्तयन्त्या इति ॥ नृपस्य दृष्टिरुद्वर्तयन्त्या गात्रमुन्मार्जयन्त्याः हृदये वक्षसि, निपत्य अर्धेन्दुलीलैरर्धचन्द्राभिख्यैः, कुचयोर्नखाङ्कैः, कर्तृभिः, वियोगिषु वैरादिन्दुत्वप्रयुक्तविरोधात् । गळे हस्तो गळहस्तः, तद्वती कृता गळहस्तिता हस्तेन गळे गृहीत्वा नुन्नेवेत्युत्प्रेक्षार्थः । मत्वन्तात् करोतीति णिचि णाविष्टवद्भावे विण्मतोर्लुक् । ततः कर्मणि क्तः । 'अर्धेन्दुश्चन्द्रशकले गळहस्तनखाङ्कयोः' इति विश्वः । द्रुता त्वरितैव न्यवृत न्यवर्तिष्ट । पापभयादिति भावः ॥ २५ ॥

तन्वीति ॥ तन्वीमुखमेव चन्द्रं व्यस्तरूपकम् । द्रागधिगत्य हठाद्दृष्ट्वा निमीलिताभ्यां पापभयादिति भावः । वियोगिनस्तस्येक्षणाभ्यां तस्य तन्वी-मुखस्येन्दुता च स्वयोस्सरोजता चेति द्वयं द्रढीयो दृढतरं कृतमित्युत्प्रेक्षा । अन्यथा कथं तत्सन्निधौ तयोर्निमीलनमिति भावः ॥ २६ ॥

नन्वङ्गसङ्घट्टनानन्तरं तास्तं किमिति न गृह्णन्तीत्यत आह—**चतुष्पथ इति** ॥ चतुष्पथे, विनिमीलिताक्षं तं नळम् । चतसृभ्यो दिग्भ्यः । एता

सङ्घट्टयन्त्यास्तरसात्मभूषाहीराङ्कुरप्रोतदुकूलहारी ।
दिशा नितम्बं परिधाप्य तन्व्यास्तत्पापसन्तापमवाप भूपः ॥२८॥

हतः कयाचित्पथि कन्दुकेन सङ्घट्य भिन्नः करजैः कयापि ।
कयाचनाक्तः कुचकुङ्कुमेन संभुक्तकल्पः स बभूव ताभिः ॥ २९ ॥

छायामयः प्रैक्षि कयापि हारे निजे स गच्छन्नथ नेक्ष्यमाणः ।
तच्चित्तयान्तर्निरचायि चारु स्वस्यैव तन्व्या हृदयं प्रविष्टः ॥ ३०

आगताः । आङ्पूर्वादिणः कर्तरि क्तः, उत्तरपदसमासः । तास्सुखमक्लेशेन अग्रहीष्यन् गृह्णीयुः, तस्मिन्नले सङ्घट्य अभिहत्य । आधारत्वविवक्षायां सप्तमी । भृशया गाढया भिया निवृत्तास्ता एव तस्य नलस्य वर्त्म नादास्यन् न दद्युश्चेत् । किंतु, स्वयमेव अस्य भूतशङ्कया मार्गं दत्वा भयात् पलायितानां तासां, कुतस्तद्ग्रहणधार्ष्ट्यमित्यर्थः । क्रियातिपत्तौ लिङ् ॥ २७ ॥

सङ्घट्टयन्त्या इति ॥ तरसा सङ्घट्टयन्त्या अभिघ्नन्त्यास्तन्व्याः, आत्मनो भूषाहीराणां भूषणवज्राणां, अङ्कुरेषु कोटिषु प्रोतं सक्तं दुकूलं हरतीति तद्धारी भूपः, नितम्बं तस्याः कटिं दिशा परिधाप्य संवस्त्य दिगम्बरं कृत्वा । तत्पापेन वस्त्रापहरणपापेन सन्तापमवाप ॥ २८ ॥

हत इति ॥ स नलः, पथि कयाचित्कन्दुकेन हतः । कयापि सङ्घट्य अभिहत्य करजैर्नखैर्भिन्नः । कयाचन, कुचकुङ्कुमेन, अक्तो लिप्तः । एवं ताभिस्संभुक्तकल्पः संभुक्तप्रायो बभूव ॥ २९ ॥

छायामय इति ॥ कयापि स्त्रिया निजे हारे छायामयः प्रतिबिम्बरूपः, स नलः, प्रैक्षि प्रेक्षितः । ईक्षतेः कर्मणि लुङ् । अथ गच्छन् अपसरन्, अत एव नेक्ष्यमाणः अनिरीक्ष्यमाणस्सन् । स चित्ते यस्यास्तया तद्गर्भितचित्तया तन्व्या, स्वस्यैव हृदयं प्रविष्ट इति अन्तरन्तःकरणे चारु साधु निरचायि

तच्छायसौन्दर्यनिपीतधैर्याः प्रत्येकमालिङ्गदमू रतीशः ।
रतिप्रतिद्वन्द्वतमासु नूनं नामूषु निर्णीतरतिः कथञ्चित् ॥ ३१ ॥

तस्माददृश्यादपि नातिबिभ्युस्तच्छायरूपाहितमोहलोलाः ।
मन्यन्त एवादृतमन्मथाज्ञाः प्राणानपि स्वान् सुदृशस्तृणानि ॥ ३२ ॥

जागर्ति तच्छायदृशां पुरा यः स्पृष्टे च तस्मिन्विससर्प कम्पः ।
द्रुतं गते तत्पदशब्दभीत्या स्वहस्तितश्चारुदृशां परं सः ॥ ३३ ॥

निश्चितः । स च्छायानलः, तद्दृशातिक्रमात्तस्या हारादेर्वापेतो न वित्तादिति सौन्दर्यातिशयोक्तिः ॥ ३० ॥

तच्छायेति ॥ रतीशः कामः, तस्य नलस्य छाया तच्छायं, मणिकुट्टिमादिगततत्प्रतिबिम्बम् । "विभाषा सेनासुराच्छायाशालानिशानाम्" इति नपुंसकत्वम् । तस्य सौन्दर्येण निपीतधैर्या हृतधैर्या अमूः स्त्रीः प्रत्येकमेकैकामेवालिङ्गत् । अत्रोत्प्रेक्ष्यते । रतेः देव्याः प्रतिद्वन्द्वतमासु रतिसदृशीष्वमूषु मध्ये स रतीशः, कथञ्चिदपि निर्णीतरतिर्निश्चितनिजपत्नीको नाभूत् । नूनं अन्यथा कथं प्रत्येकमालिङ्गयेदित्यर्थः । सर्वास्वपि मन्मथविकारः प्रादुर्भूत इत्यर्थः ॥ ३१ ॥

तस्मादिति ॥ सुदृशः स्त्रियः, तच्छायारूपेण तत्प्रतिबिम्बसौन्दर्येणाहितः उत्पादितः मोहः चित्तभ्रमो यासां ता अत एव लोला आसक्ताः सत्यः । अदृश्यादपीति भयहेतूक्तिः । तस्मान्नलान्नातिबिभ्युः । शृङ्गारेण भयानकस्तिरस्कृत इत्यर्थः । तथाहि, आदृतमन्मथाज्ञा मन्मथपरतन्त्राः सत्यः, स्वान् स्वकीयान्, प्राणानपि तृणानि मन्यन्त एव । मन्यतेः कर्मणि चतुर्थ्या वैभाषिकत्वात् द्वितीया । प्राणानपि तृणीकृत्य तदा तत्सङ्गमलालसानां तासां तस्माद्भयं कुत इति भावः ॥ ३२ ॥

जागर्तीति ॥ पुरा पूर्वं, तच्छायदृशां तत्प्रतिबिम्बदर्शिनीनां चारुदृशां, क्विप् । यः कम्पो जागर्ति स्फुरति । ततस्तस्मिन् स्पृष्टे च सति विससर्प

उल्लास्यतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छायपिबाऽपि दृष्टिः ।
अश्मैव रत्यास्तदनर्ति पत्या छेदेऽप्यबोधं यदहर्षि लोम ॥ ३४ ॥

यस्मिन्नलस्पृष्टकमेत्य दृष्टा भूयोऽपि तं देशमगान्मृगाक्षी ।
निपत्य तत्रास्य धरारजस्स्थे पादे प्रसीदेति शनैरवादीत् ॥ ३५ ॥

प्रससार । स कम्पः द्रुतं शीघ्रं गते अपगते सति तस्य पदशब्दाद्रीला कर्त्री परं स्वहस्तवान् कृतः दत्तस्वहस्तः प्रबलीकृत इत्यर्थः । स्वहस्तशब्दान्मत्वन्तात् "तत्करोति" इति णिचि णाविष्टवद्भावे विण्मतोर्लुक् । ततः कर्मणि क्तः ॥३३॥

उल्लास्येति ॥ रत्याः पत्या कामेन स्पृष्टं नलाङ्गं, येन तत्तासामङ्गमुल्लास्यतामुल्लासं प्राप्यताम् । उल्लासयतेः कर्मणि लोट् । नलच्छायस्य नलप्रतिबिम्बस्य पिबा, तद्दर्शिनीत्यर्थः । पाघ्रादिना शप्रत्ययः । पिबादेशश्च । तासां दृष्टिरपि उल्लास्यताम् । तयोश्चेतनत्वादिति भावः । छेदे कर्तनेऽप्यबोधं बोधरहितं, अचेतनं लोम, अहर्षि हर्षितमिति यत् । हृषेर्ण्यन्तात्कर्मणि लुङ् तदश्मैव पाषाण एव, अनर्ति अश्म नर्तनप्रायं रोमहर्षणं कुर्वाणस्य कामस्य किमसाध्यमिति भावः । अत्र रोमहर्षणाश्मनर्तनवाक्यार्थयोर्यत्तच्छब्दावगतसामानाधिकरण्यानुपपत्त्या सादृश्याक्षेपाद्वाक्यार्थवृत्तिनिदर्शनालङ्कारः । लक्षणं तूक्तम् ॥ ३४ ॥

यस्मिन्निति ॥ मृगाक्षी यस्मिन् देशे नलस्य स्पृष्टकं आलिङ्गनविशेषम् । "यद्योषितस्सम्मुखमागताया अन्यापदेशाद्व्रजतो नरस्य । गात्रेण गात्रं घटते तदेतदालिङ्गनं स्पृष्टकमाहुरार्याः ॥" इति रतिरहस्येऽभिधानात् । एत्य प्राप्य, दृष्टा तं देशं भूयोऽप्यगात् । पुनः स्पर्शलोभादिति भावः । किंतु, तत्र देशे धरारजःस्थे भूपरागनिष्ठे अस्य नलस्य पादे पादप्रतिकृतौ निपत्य प्रणिपत्य, प्रसीद मां पुनः स्पर्शेनानुगृहाणेति शनैरवादीत् । न तु स्पर्शं लेभे । तस्यापगमादिति भावः ॥ ३५ ॥

भ्रमन्नमुष्यामुपकारिकायामायास्य भैमीविरहात्कृशीयान् ।
असौ मुहुस्सौधपरम्पराणां व्यधत्त विश्रान्तिमुपत्यकासु ॥ ३६ ॥
उल्लिख्य हंसेन दले नलिन्यास्तस्मै यथादर्शि तथैव भैमी ।
तेनाभिलिख्योपहृतस्वहारा कस्या न दृष्टाजनि विस्मयाय ॥ ३७ ॥
कौमारगन्धीनि निवारयन्ती वृत्तानि रोमावलिवेत्रचिह्ना ।
सालिख्य तेनैक्ष्यत यौवनीयद्वास्थामवस्थां परिचेतुकामा ॥ ३८ ॥

भ्रमन्निति ॥ भैमीविरहात् कृशीयान् अतिकृशोऽसौ नलः । अमुष्याः मुपकारिकायां राजसद्मनीत्यर्थः । भ्रमन् सञ्चरन्, आयास्य परिश्रम्य, मुहुः सौधपरम्पराणां, उपत्यकास्वासन्नभूमिषु । अत्र सौधानां पर्वतसाधर्म्यात् गौणोऽयं प्रयोगः । उपाधिभ्यां त्यकन्नासन्नारूढयोः इति त्यकन्प्रत्ययस्य पर्वतासन्नभूमिसंज्ञात्वेन विधानात् । उपत्यकाद्रेरासन्ना भूमिरित्यभिधानात्तथैव प्रयोगाच्च । संज्ञात्वादेव कात्पूर्वस्येकाराभावः । विश्रान्तिं व्यधत्त विश्रान्तोऽभूदित्यर्थः ॥ ३६

किं चात्र विश्रान्तो विनोदाय भैमीप्रतिकृतिमालिख्याद्राक्षीदित्याह श्लोकद्वयेन—**उल्लिख्येत्यादिना** ॥ नन्वदृष्टपूर्वां तां कथमलिखदिति शङ्कां निरस्यन्नाह । पूर्वं हंसेन नलिन्या दले भैमी यथा येन प्रकारेण उल्लिख्य तस्मै नलायादर्शि दर्शिता । तथैव तेन नलेन अभिलिख्य उपहृतस्वहारा कण्ठार्पितनिजमुक्ताहारा, तदा विलिखितेत्यर्थः । दृष्टा सती कस्या विस्मयाय नाजनि न जाता, सर्वस्या अपि जातेत्यर्थः ॥ ३७ ॥

कौमारेति ॥ तेन नलेन, यौवनस्येयं यौवनीया । वृद्धाच्छः । तस्यां द्वारि द्वारे, प्रमुखे च तिष्ठतीति यौवनीयद्वास्थां । "खरवसानयोर्विसर्जनीयः" इति रेफस्य विसर्जनीयान्तस्य सत्वम् । तामवस्थां दौवारिकदशां यौवनप्रवेशदशां च, परिचेतुकामा अभ्यसितुकामा । अत एव रोमावलिरेव वेत्रं वप्रः, तच्चिह्नं यस्याः सा । कौमारगन्ध एषामस्तीति कौमारगन्धीनि शैशवसंस्कारीणि,

पश्याः पुरन्ध्रीः प्रति सान्द्रचन्द्ररजःकृतक्रीडकुमारचक्रे ।
चित्राणि चक्रेऽध्वनि चक्रवर्तिचिह्नं तदङ्घ्रिप्रतिमासु चक्रम् ॥ ३९

तारुण्यपुण्यामवलोकयन्त्योरन्योन्यमेणेक्षणयोरभिख्याम् ।
मध्ये मुहूर्तं स बभूव गच्छन्नाकस्मिकाच्छादनविस्मयाय ॥ ४०॥

पुरःस्थितस्य क्वचिदस्य भूषारत्नेषु नार्यः प्रतिबिम्बितानि ।
व्योमन्यदृश्येषु निजान्यपश्यन् विस्मित्य विस्मित्य सहस्रकृत्वः ॥

कृतानि चापलानि, निवारयन्ती सा दमयन्ती आलिख्य ऐक्ष्यत । ईक्षतेः कर्मणि लङ् । बनःसन्धौ वर्तमानान्तामालिख्य अद्राक्षीदित्यर्थः। रूपकालङ्कारः॥

पश्या इति ॥ सान्द्राणि चन्द्ररजांसि कर्पूरपांसव. । 'अथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्रसंज्ञः' इत्यमरः । तैः कृतक्रीड कुमारचक्र, बालसङ्घो यस्मिन् तस्मिन् अध्वनि चक्रवर्तिचिह्नं सार्वभौमलक्षण, तस्य नलस्य, अङ्घ्रिप्रतिमासु पादन्यासेषु । चक्र चक्ररेखाः पश्यन्तीति पश्याः पश्यन्तीः। पाघ्रादिना शप्रत्ययः पश्यादेशश्च । पुरन्ध्रीः प्रति स्त्रिय उद्दिश्य चित्राणि चक्रे । तासामाश्चर्याणि जनयामासेत्यर्थः ॥ ३९ ॥

तारुण्येति ॥ तारुण्यपुण्यां यौवनमनोज्ञाम् । 'पुण्यं मनोज्ञ' इति विश्व । अन्योन्यमभिख्यां शोभामवलोकयन्त्योरेणेक्षणयोः मृगाक्ष्योर्मध्ये गच्छन् मुहूर्तं ईषत्कालं, आकस्मिकाच्छादनेन निर्हेतुकव्यवधानेन, विस्मयाय बभूव । अत्र व्यवधानकारणं विना व्यवधानोत्केरकारणे कार्योत्पत्तिलक्षणो विभावनालङ्कारः ॥ ४० ॥

पुर इति ॥ क्वचिद्देशे नार्यः पुरः स्थितस्यास्य नलस्य अदृश्येषु भूषारत्नेषु निजानि प्रतिबिम्बितानि प्रतिबिम्बानि, व्योमनि शून्ये विस्मित्य विस्मित्य पुनःपुनः विस्मिता भूत्वा । सहस्रकृत्वः सहस्रवारमपश्यन् । अत्रापि निरालम्बनप्रतिबिम्बदर्शनोत्केरकारणे कार्योत्पत्तिलक्षणो विभावनालङ्कारः ॥ ४१ ॥

तस्मिन् विषज्यार्धपथाभियान्तं तदङ्गरागच्छुरितं निरीक्ष्य ।
विस्मेरतामापुरनुस्मरन्त्यः क्षिप्तं मिथः कन्दुकमिन्दुमुख्यः ॥ ४२

पुंसि स्वभर्तृव्यतिरिक्तभूते भूत्वाप्यवीक्षानियमव्रतिन्यः ।
छायासु रूपं भुवि तस्य वीक्ष्य फलं दृशोरानशिरे महिष्यः ॥ ४३

विलोक्य तच्छायमतर्कि ताभिः पतिं प्रति स्वं वसुधापि धत्ते ।
यथा वयं किं मदनं तथैनं त्रिनेत्रनेत्रानलकीलनीलम् ॥ ४४ ॥

तस्मिन्निति ॥ इन्दुमुख्यः स्त्रियः, मिथः क्षिप्तं अन्योन्यं प्रति प्रेरितं कन्दुकम् । तस्मिन्स्थले विषज्य लग्नीभूत्वा अर्धः पन्थाः अर्धपथः, विशेषणसमासे समासान्तः । "अर्धं नपुंसकम्" इत्येकदेशसमास इति केचित् । तत्र समास-निबन्धः । तस्मादभियान्तं प्रत्यागच्छन्तं, तस्य नलस्याङ्गरागेण च्छुरितं रूषितं, कन्दुकं निरीक्ष्य अनुस्मरन्त्यः कुत एतदिति पुनःपुनरनुसन्दधाना विस्मेरतां विस्मितत्वमापुः । "नमिकम्पिस्मि" इत्यादिना रप्रत्ययः ॥ ४२ ॥

पुंसीति ॥ महिष्यो राजदाराः, स्वभर्तृव्यतिरिक्तभूते पुंसि परपुरुषे विषये अवीक्षानियमेन अनिरीक्षासङ्कल्पेन, व्रतिन्यः व्रतवत्यो भूत्वा तस्य नलस्य भुवि कुट्टिमभूमौ छायासु प्रतिबिम्बेषु रूपसौन्दर्यं वीक्ष्य दृशोः फलमान-शिरे प्रापुः । "अत आदेः" इत्यभ्यासदीर्घः । "अश्नोतेश्च" इति नुडागमः ॥

विलोक्येति ॥ ताभिः राजमहिषीभिः, तस्य नलस्य, छाया अनातप-रेखा तच्छायम् । नीलमिति शेषः । विलोक्य यथा वयं, स्वं स्वकीयं, पतिं भीमं, प्रत्युद्बुद्धम्, मदनं दध्महे । तथा वसुधापि स्वं पतिं भीममेव प्रत्यु-द्बुद्धम् । किंतु, त्रिनेत्रस्य ईश्वरस्य, नेत्रानलकीलैर्नेत्राग्निज्वालैः, नीलं कृष्णवर्णं, एनं मदनं धत्ते किमित्यतर्कि उत्प्रेक्षितम् । नलच्छाये वसुधागते तस्मिन्मदन-त्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः । नलच्छायेऽपि स्त्रीणां मदनविभ्रमः, नले तु किमु वक्तव्यमिति शेषः ॥ ४४ ॥

रूपं प्रतिच्छायिकयोपनीतमालोकि ताभिर्यदि नाम कामम् ।
तथापि नालोकि तदस्य रूपं हारिद्रभङ्गाय वितीर्णभङ्गम् ॥ ४५ ॥

भवन्नदृश्यः प्रतिबिम्बदेहव्यूहं वितन्वन्मणिकुट्टिमेषु ।
पुरं परस्य प्रविशन् वियोगी योगीव चित्रं स रराज राजा ॥ ४६

पुमानिवास्पर्शि मया भ्रमन्त्या छाया मया पुंस इव व्यलोकि ।
ब्रुवन्निवातर्कि मयापि कश्चिदिति स्म स स्त्रैणगिरश्शृणोति ॥ ४७

नन्वेवं नलविलोकिनीनामासां कथं न परपुरुषनिरीक्षणे व्रतलोपस्तत्राह—**रूपमिति** ॥ प्रतिच्छायैव प्रतिच्छायिका । स्वार्थे कः । "कात्पूर्वस्य" इतीकारः । तयोपनीतं रूपं छायात्मकं स्वरूपं ताभिः स्त्रीभिरालोकि यदि आलोकितं चेत् । कामं यथेच्छमालोक्यतां नाम । तथापि हारिद्रभङ्गाय हरिद्राखण्डाय वितीर्णभङ्गं दत्तपराभवम्, तत्स्वरूपमित्यर्थः । अस्य तत्प्रसिद्धं रूपं स्वरूपं नालोकि नालोकितम् । साक्षाद्रूपदर्शने दोषः न प्रतिच्छायादर्शन इत्यर्थः ॥

भवन्निति ॥ वियोगी विरही अयोगी च । स राजा नलः, अदृश्यो भवन् स्वयमदृश्यस्सन् । मणिकुट्टिमेषु मणिनिबद्धभूमिषु, प्रतिबिम्बदेहानां व्यूहं समूहं, वितन्वन् सम्पादयन् । योगिपक्षे बहूनि योगशरीराणि युगपत् कल्पयन् । तथा परस्य राजान्तरस्य, पुरं नगरम् । अन्यत्र जीवान्तरस्य शरीरं परकायं प्रविशन् । 'पुरं पुरि शरीरे च' इति विश्वः । योगी अणिमादिसिद्धिमानिव, रराज चित्रम् ॥ ४६ ॥

पुमानिति ॥ भ्रमन्त्या मया पुमानिवास्पर्शि स्पृष्टः । मया पुंसः छायेव व्यवलोकि विलोकिता । मयापि कश्चित् ब्रुवन् लपन्निव, अतर्कि तर्कितः । सर्वत्र कर्मणि लुङ् । इत्येवंरूपाः स्त्रैणस्य स्त्रीसमूहस्य गिरः । यद्वा, स्त्रीषु भवाः स्त्रैणाः गिरः । "स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्" इति भावार्थे नञ्प्रत्ययः । स नलः, शृणोति स्म । "लट् स्मे" इति भूते लट् ॥ ४७ ॥

अम्बां प्रणम्योपनता नताङ्गी नलेन भैमी पथि योगमाप ।
स भ्रान्तभैमीषु न तां विवेद सा तं च नादृश्यतया ददर्श ॥ ४८

प्रसूप्रसादाधिगता प्रसूनमाला नलस्य भ्रमवीक्षितस्य ।
क्षिप्तापि कण्ठाय तयोपकण्ठे स्थितं तमालम्बत सत्यमेव ॥ ४९ ॥

स्रग्वासनादृष्टजनप्रसादस्सत्येयमित्यद्भुतमाप भूपः ।
क्षिप्तामदृश्यत्वमितां च मालामालोक्य तां विस्मयते स्म बाला ॥

अन्योन्यमन्यत्रवदीक्षमाणौ परस्परेणाध्युषितेऽपि देशे ।
आलिङ्गिताळीकपरस्परान्तस्तथ्यं मिथस्तौ परिषस्वजाते ॥ ५१ ॥

अम्बामिति ॥ नताङ्गी व्यानतगात्री भैमी । अम्बां मातरम् । 'अम्बा सवित्री जननी माता च' इति हलायुधः । प्रणम्योपनता सती, नलेन पथि योगमाप । स नलो भ्रान्तभैमीषु अळीकभैमीषु मध्ये तां न विवेद विविच्य नाजानात् । सा च तं नलं, अदृश्यतया न ददर्श । अत्र रूपसाम्याद्भ्रान्तभैम्याः भ्रान्तभैमीभिः सहाभेदाभिधानात् सामान्यालङ्कारः । "सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता" इति लक्षणात् ॥ ४८ ॥

प्रस्विति ॥ प्रसूप्रसादाधिगता मातृप्रसादलब्धा । 'जनयित्री प्रसूर्माता जननी' इत्यमरः । प्रसूनमाला पुष्पमालिका । तया भैम्या भ्रमवीक्षितस्य भ्रान्तिदृष्टस्य नलस्य कण्ठाय क्षिप्ताप्युपकण्ठे समीपे स्थितं सत्यमेव तथ्यमेव तं नलमालम्बत प्राप । मणिप्रभायां मणिबुद्धिन्यायादिति भावः ॥ ४९ ॥

स्रगिति ॥ भूपो नलः, वासनया निरन्तरभावनया, दृष्टस्य जनस्य, अळीकभैम्याः प्रसादोऽनुग्रहभूता इयं स्रक् सत्या भूतेति हेतोरद्भुतमाप । बाला भैमी च, क्षिप्तामात्मनान्यस्ताम् । अथ अदृश्यत्वमितां प्राप्तां तां मालामालोक्य आलोच्य विस्मयते स्म विस्मिताभूत् ॥ ५० ॥

अन्योन्यमिति ॥ तौ भैमीनलौ, परस्परेणाध्युषिते देशेऽपि । अन्योन्यमिति कर्मनिर्देशः । नलो भैमी सा च नलमित्यर्थः । अन्यत्रवद्देशान्तर

स्पर्शं तमस्याधिगतापि भैमी मेने पुनर्भ्रान्तिमदर्शनेन ।
नृपस्तु पश्यन्नपि तामुदीतस्तम्भो न धर्तुं सहसा शशाक ॥ ५२॥
स्पर्शातिहर्षादृतसत्यमत्या प्रवृत्य मिथ्या प्रतिलब्धबोधौ ।
पुनर्मिथस्तथ्यमपि स्पृशन्तौ न श्रद्दधाते पथि तौ विमुग्धौ ॥ ५३

इवेक्षमाणौ, अन्यत्र स्थायिनाविव पश्यन्तावित्यर्थः । आलिङ्गितमालिङ्गनं, अलीकं यस्य तदालिङ्गितालीकं, एतदालिङ्गनं मिथ्येत्यभिमानं, परस्परस्यान्तरन्तःकरणं यस्मिन् कर्मणि तद्यथा भवति तथा । अव्ययोत्तरपदो बहुव्रीहिः । अव्ययं रेफान्तं क्रियाविशेषणम् । मिथोऽन्योन्यं तथ्यं यथार्थमेव । परिषस्वजाते श्लिष्यतः । "उपसर्गात्सुनोति" इत्यादिना षत्वम् । पूर्ववासनया परस्परचेष्टा मिथ्येति मन्यमानावेव तथ्यमचेष्टेतामित्यर्थः ॥ ५१ ॥

स्पर्शमिति ॥ भैमी तं तथ्यं स्पर्शं अधिगता प्राप्तापि । पुनरस्य नलस्य, अदर्शनेनादृश्यत्वेन, भ्रान्तिं मेने । अतो नलं धर्तुं न शशाकेति शेषः । नृपस्तु पश्यन्नप्युदीतस्तम्भो निष्क्रियाङ्गत्वलक्षणस्सात्विको यस्य सन् । तां भैमीं, सहसा धर्तुं ग्रहीतुं न शशाक । अन्यथा धरेदिति भावः । अत्र स्तम्भपदार्थस्य विशेषणगत्या धारणाशक्तिहेतुकत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ५२ ॥

स्पर्शेति ॥ विमुग्धौ रागान्धौ, तौ दमयन्तीनलौ, पतिस्पर्शेनातिहर्षोऽतिमात्रानन्दः, तस्माद्धेतोस्तदन्यथानुपपत्त्या, आदृतया दृढीकृतया, सत्यमत्या सत्योऽयं स्पर्श इति बुद्ध्या प्रवृत्य पुनर्व्यापृत्य मिथ्याप्रतिलब्धबोधौ प्रवृत्तेऽपि स्पर्शालाभान्मिथ्येति निश्चितबोधौ मिथ्येति बुद्धवन्तावित्यर्थः । पुनरित्थमुभयदर्शनानन्तरं, मिथोऽन्योन्यं, तथ्यं यथार्थमपि स्पृशन्तावपि, न श्रद्दधाते न विशश्वसतुः । दधातेर्लटि तङ् । श्रच्छब्दस्य श्रदन्तरोरुपसङ्ख्यानमित्युपसर्गत्वाद्धातोः प्राक् प्रयोगः ॥ ५३ ॥

सर्वत्र संपाद्यमबोधमानौ रूपश्रियातिथ्यकरं परं तौ ।
न शेकतुः केळिरसाद्विरन्तुमळीकमालोक्य परस्परं तु ॥ ५४ ॥

परस्परस्पर्शरसोर्मिसेकात्तयोः क्षणं चेतसि विप्रलम्भः ।
स्नेहातिदानादिव दीपिकार्चिर्निमिष्य किंचिद्द्विगुणं दिदीपे ॥ ५५ ॥

वेश्माप सा धैर्यवियोगयोगाद्बोधश्च मोहश्च मुहुर्दधाना ।
पुनःपुनस्तत्र पुरस्स पश्यन् बभ्राम तां सुभ्रुवमुत्क्रमेण ॥ ५६ ॥

पद्भ्यां नृपस्सञ्चरमाण एष चिरं परिभ्रम्य कथं कथंचित् ।
विदर्भराजप्रभवा निवासं प्रासादमभ्रङ्कषमाससाद ॥ ५७ ॥

सर्वत्रेति ॥ तौ भैमीनलौ, रूपश्रिया सौन्दर्यसम्पदा, सर्वत्र सर्वावयवेषु संपाद्यं मिथस्संपादार्हं, परस्परानुरूपमित्यर्थः । अत एव परमत्यन्तमातिथ्यकरं मिथः सत्कारकारि । अलीकमसत्यं परस्परन्तु कर्म आलोक्य । अबोधमानौ मिथ्येत्यमन्यमानौ, केळिरसात् क्रीडारागाद्विरन्तुं निवर्तितुं न शेकतुः किंत्वलीकेनापि परस्परेण क्रीडितुमाचकाङ्क्षतुरित्यर्थः ॥ ५४ ॥

परस्परेति ॥ तयोर्भैमीनलयोः, चेतसि विप्रलम्भो विरहः, परस्परस्पर्शरसस्य अन्योन्यस्पर्शसुखस्य, ऊर्मिभिः सेकात् क्षणं स्नेहस्य तैलादेरतिदानाद्दीपिकार्चिर्दीपज्वालेव किंचिद्दीपनिर्निमिष्य निवार्य, द्वौ गुणावावृत्ती यस्मिन् कर्मणि तद्यथा भवति तथा द्विगुणं, अधिकं दिदीपे प्रजज्वाल । सोऽप्युद्दीपक एवाभूदित्यर्थः ॥ ५५ ॥

वेश्मेति ॥ सा भैमी, धैर्यवियोगयोर्योगाद्यथासङ्ख्यं मुहुर्बोधञ्च मोहञ्च दधानेति यथासङ्ख्यालङ्कारः । वेश्म निजावासमाप । स नलस्तत्र तां सुभ्रुवं भैमीं उत्क्रमेण भ्रान्त्या पुनःपुनः पुरोऽग्रे पश्यन् बभ्राम । प्राप्त्याशयेति भावः । एतेन चापलाख्यः सञ्चारीभाव उक्तः । 'चापलं त्वनवस्थानम्' इति लक्षणात् ॥

पद्भ्यामिति ॥ एष नृपः पद्भ्यां सञ्चरमाणो गच्छन् । "समस्तृतीया

सखीशतानां सरसैर्विलासैः स्मरावरोधभ्रममावहन्तीम् ।
विलोकयामास सभां स भैम्यास्तस्य प्रतोळीमणिवेदिकायाम् ॥

कण्ठः किमस्याः पिकवेणुवीणास्तिस्रो जितास्सूचयति त्रिरेखः ।
इत्यन्तरस्तूयत कापि यत्र नळेन बाला कलमालपन्ती ॥ ५९ ॥

एतं नलं तं दमयन्ति पश्य त्यजार्तिमित्यालिकुलप्रबोधान् ।
श्रुत्वा स नारीकरवर्तिशारीमुखात् स्वमाशङ्कत यत्र दृष्टम् ॥ ६०

मुखात्" इति तृतीया । चिरं परिभ्रम्य कथं कथञ्चित् पादचारक्लेशादतिकृच्छ्रेण विदर्भराजः प्रभवः कारणं यस्यास्तस्याः वैदर्भ्याः निवासम् । अभ्रं कषतीत्यभ्रंकषमत्युन्नतम् । "सर्वकूलाभ्रकरीषेषु कष" इति खच्प्रत्यये मुमागमः । प्रासादं सौधमाससाद ॥ ५७ ॥

सखीति ॥ नलस्तस्य प्रासादस्य प्रतोल्यां प्राङ्गणे या मणिवेदिका तस्यां सखीशतानां सरसैः सानुरागैर्विलासैर्लीलाभिः स्मरावरोधभ्रममावहन्तीं कामान्तःपुरभ्रान्तिकरीं भैम्याः सभामास्थानीं विलोकयामास ॥ ५८ ॥

अथ चतुर्दशभिस्तां सभां वर्णयति—**कण्ठ इत्यादिभिः** ॥ यत्र सभायां कलं मधुरमालपन्ती कापि बाला । नलेन तिस्रो रेखा अस्य सन्तीति त्रिरेखः अस्याः कण्ठः पिकवेणुवीणास्तिस्रो जिताः सन्तीति सूचयति किमिति । अन्तरन्तःकरणे अस्तूयत स्तुता । अत्र कण्ठरेखात्रयस्य विशेषणगत्या निजपिकादित्रयविजयसूचकत्वोत्प्रेक्षाहेतुकत्वात्काव्यलिङ्गसङ्कीर्णेयमुत्प्रेक्षा ॥ ५९ ॥

एतमिति ॥ स नलो यत्र सभायां, नारीकरवर्तिशारीमुखात् कान्ताकरगतशारिकामुखात्, हे दमयन्ति, तमेतं नलं पश्य । आर्तिं पीडां त्यज । इत्येवंरूपान् आलिकुलप्रबोधान् आलिकुलस्य सखीजनस्य, प्रबोध्यते एभिरिति प्रबोधान् आश्वासनोक्तीः करणेषु घञ्प्रत्ययः । श्रुत्वा स्वमात्मानं दृष्टमाशङ्कत । एतं नलं पश्येति निर्देशादेताभिर्दृष्टोऽस्मीति शङ्कितवानित्यर्थः । शारीवाक्ये

यत्रैकयालीकनलीकृताली कण्ठे मृषाभीमभवीभवन्त्या ।
तद्दृक्पथे दौहलिकोपनीता शालीनमाधायि मधूकमाला ॥ ६१ ॥

चन्द्राभमाभ्रं तिलकं दधाना चन्द्रानवस्थामिव यत्र कान्ता ।
ससर्ज का चन्द्रसमे सखीमुखे तद्वन्निजास्येन्दुकृतानुबिम्बम् ॥ ६२

दलोदरे काञ्चनकैतकस्य क्षणान्मषीभावुकवर्णरेखम् ।
तस्यैव यत्र स्वमनङ्गलेखं लिलेख भैमी नखलेखिनीभिः ॥ ६३ ॥

नारीवाक्यभ्रमादिति भावः । अत एव भ्रान्तिमदलङ्कारो व्यज्यत इति वस्तुनालङ्कारध्वनिः ॥ ६० ॥

यत्रेति ॥ यत्र सभायां, तद्दृक्पथे नलदृष्टिपथे, मृषाभीमभवा आरोपितभैमी, अतया तया भवन्त्या एकया सख्या अलीकनलः आरोपितनलः, असः स कृता अलीकनलीकृता तस्या आल्याः सख्याः कण्ठे दोहलिकया धात्र्या उपनीता या मधूकमाला, शालीनं लज्जामन्थरं यथा तथा आधायि आहिता । दधातेः कर्मणि लुङ् । "आतो युक् चिण्कृतोः" इति युगागमः । एतेन भैम्याः स्वयंवरत्वरा नलैकतानत्वञ्च व्यक्तं सदस्य जीवातुरासीदित्यर्थः ॥ ६१ ॥

चन्द्राभमिति ॥ यत्र सभायां, कापि कान्ता, चन्द्राभं चन्द्रनिभं, आभ्रमभ्रविकारं, तिलकं चन्द्रसमे सखीमुखे तद्वता आभ्रतिलकवता, निजास्येन्दुना कृतमनुबिम्बं प्रतिबिम्बं यस्मिन् कर्मणि तद्यथा भवति तथा दधाना रचयन्ती चन्द्रानवस्थां ससर्जेवेत्युत्प्रेक्षा । अत्र तिलकक्रियोत्पत्तौ स्वच्छद्रव्यतया परस्पराभिमुखावस्थितदर्पणवदितरेतराभ्रतिलकसङ्क्रान्तेरितरेतरतिलकचन्द्रपरम्परानन्तत्वादनवस्था क्रियानिष्पत्तिश्चेति चित्रमिति भावः ॥ ६२ ॥

दलेति ॥ यत्र सभायां, भैमी, काञ्चनकैतकस्य स्वर्णकैतकीकुसुमस्य, दलोदरे पत्रमध्ये, क्षणात् झडिति मषीभावुकाः श्यामीभवन्त्यः, वर्णरेखा अक्षरविन्यासा यस्मिन् तम् । तस्य नलस्यैव कृते स्व स्वकीयं, अनङ्गलेखं कामसन्देशं, नखैरेव लेखिनीभिः कणिकाभिः लिलेख ॥ ६३ ॥

विलेखितुं भीमभुवो लिपीषु सख्याऽतिविख्यातिभृतापि यत्र ।
अशाकि लीलाकमलं न पाणिमपारि कर्णोत्पलमक्षि नैव ॥ ६४ ॥
भैमीमुपावीणयदेत्य यत्र कलिप्रियस्य प्रियशिष्यवर्गः ।
गन्धर्ववध्वस्स्वरमध्वरीणतत्कण्ठनाळैकधुरीणवीणः ॥ ६५ ॥
नावा स्मरः किं हरभीतिगुप्तेः पयोधरे खेलति कुम्भ एव ।
इत्यर्धचन्द्राभनखाङ्कचुम्बिकुचा सखी यत्र सखीभिरूचे ॥ ६६ ॥

विलेखितुमिति ॥ यत्र सभायां लिपीषु चित्रकर्मसु । कृदिकारादक्तिनो वा ङीष्वक्तव्यः । अतिविख्यातिभृता अतिचतुरयापीत्यर्थः । सख्या भीमभुवो भैम्याः लीलाकमलं विलेखितुं अशाकि । भावे लुङ् । शकेत्यादिना तुमुन्प्रत्ययः । पाणिं तु नाशाकि । तथा कर्णोत्पलं विलेखितुमपारि पर्याप्तं, पूर्ववल्लुङ् । पर्याप्तिवचनेष्वलमर्थेष्विति तुमुनप्रत्ययः । अक्षि तु नापार्येव सर्वोपमानातीततत्तात्तल्लावण्यस्येति भावः ॥ ६४ ॥

भैमीति ॥ यत्र सभायां, गन्धर्ववध्वो गन्धर्वाङ्गना एव । कलिप्रियस्य प्रियकलहस्य नारदस्य । "वा प्रियस्य" इति बहुव्रीहौ प्रियशब्दस्य परनिपातः । प्रियशिष्यवर्गः । स्वर एव मधु क्षौद्रं तेनारीणमरिक्तं पूर्णमिति यावत् । "ल्वादिभ्यः" इति निष्ठानत्वम् । तेन तस्या भैम्याः कण्ठनाळेन सह एकधुरं वहन्तीत्येकधुरीणाः समा इत्यर्थः । "एकधुराल्लुक् च" इति खच्प्रत्ययः । ता वीणा यस्य सः सत्रेत्यागत्य भैमीमुपावीणयत् वीणया उपगायति स्म । सत्याप पाशेत्यादिना णिचि लङ् । गानविद्यायां गन्धर्वीणामप्युपास्या भैमीत्यर्थः ॥ ६५॥

नावेति ॥ यत्र सभायां, अर्धचन्द्राभनखाङ्कचुम्बी अर्धचन्द्राकारनखक्षतभाक्कुचो यस्याः सा सखी । स्मरः हरभीत्या गुप्तेः, गुप्त्यर्थमित्यर्थः । सम्बन्धसामान्ये षष्ठी । पयसां क्षीराणां नीराणाञ्च धरः पयोधरः कुचः । 'पयस्स्यात् क्षीरनीरयोः' इति विश्वः । तस्मिन्नेव कुम्भ इति व्यस्तरूपकम् । नावा नखाङ्कैनैवेति शेषः । खेलति । दाहपरिहाराय विहरति किमिति रूपकसङ्कीर्णेयमुत्प्रेक्षा । इति सखीभिरूचे उक्ता ॥ ६६ ॥

स्मराशुगीभूय विदर्भसुभ्रूवक्षो यदक्षोभि खलु प्रसूनैः ।
स्रजं सृजन्त्या तदशोधि तेषु यत्रैकया सूचिशिखां निखाय ॥६७

यत्रावदत्तामतिभीय भैमीं त्यज त्यजेदं सखि साहसिक्यम् ।
त्वमेव कृत्वा मदनाय दत्से बाणान् प्रसूनानि गुणेन सज्जान् ॥

आलिख्य सख्याः कुचपत्रभङ्गीमध्ये सुमध्या मकरीं करेण ।
यत्रावदत्तामियमालि यानं मन्ये त्वदेकावलिनाकनद्याः ॥ ६९ ॥

स्मरेति ॥ प्रसूनैः कुसुमैः, स्मराशुगीभूय कामबाणा भूत्वा विदर्भसुभ्रुवो वैदर्भ्याः वक्षो हृदयमक्षोभि क्षोभितं खल्विति यत् । तत् क्षोभणवैर, यत्र सभायां, तेषु प्रसूनेषु सूचिशिखां सूच्यग्रं, निखाय निकृत्य, स्रजं मालां, सृजन्त्या रचयन्त्या, एकया कयाचित्कान्तया, अशोधि निर्यातितम् । हृदयच्छेदिनां हृदयच्छेद एव प्रतीकार इति भावः ॥ ६७ ॥

यत्रेति ॥ यत्र सभायां, तां सकुलश्रीं, सखीं, भैमीं अतिभीय अत्यन्तं भीत्वा । भि-धातोः क्त्वोर्ल्यबादेशः । अवदत् । किमिति, हे सखि इदम् । सहसा वर्तत इति साहसिकः अविमृश्यकारी, "ओजस्सहोऽम्भसा वर्तते" इति ठक् । तस्य कर्म साहसिक्यं, ब्राह्मणादित्वात्ष्यञ्प्रत्ययः । त्यज त्यज । कुतः त्वमेव प्रसूनान्येव बाणान् गुणेन तन्तुना ज्यया च । 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति वैजयन्ती । सज्जान् सक्तान् कृत्वा, मदनाय दत्से ददासि । तदेतत्क्षत एव दहतो वह्नेर्वायुना सन्धुक्षणमिति भावः ॥ ६८ ॥

आलिख्येति ॥ यत्र सभायां, सुमध्या कापि कान्ता सख्याः कुचयोः पत्रभङ्गीनां पत्ररचनानां मध्ये मकरीं करेणालिख्य तां सखीमवदत् । किमिति हे आलि सखि, इयं मकरी त्वदेकावलेरेव नाकनद्या मन्दाकिन्या इति रूपकम् । यानं वाहनं, 'मकरीवाहना गङ्गा' इति प्रसिद्धिः । मन्ये अत्रोत्प्रेक्षा । तस्याश्चोक्तरूपकेण सङ्करः ॥ ६९ ॥

तामेव सा यत्र जगाद भूयः पयोधियादः कुचकुम्भयोस्ते ।
सेयं स्थिता तावकहृच्छयाङ्कप्रियास्तु विस्तारयशःप्रशस्तिः ॥ ७०

शारीं चरन्तीं सखि मारयैनामित्यक्षदाये कथिते कयापि ।
यत्र स्वघातभ्रमभीरुशारीकाकूत्थसाकूतहसस्स जज्ञे ॥ ७१ ॥

भैमीसमीपे स निरीक्ष्य यत्र ताम्बूलजाम्बूनदहंसलक्ष्मीम् ।
कृतप्रियादूत्यमहोपकारमरालमोहद्रढिमानमूहे ॥ ७२ ॥

तामिति ॥ यत्र सा पूर्वोक्ता प्रसाधिका तामेव सखीं भूयो जगाद । किमिति । पयोधेर्यादो जलग्राहः समुद्रसम्भव इत्यर्थः । किञ्च, तावकस्य हृच्छयस्य मकरध्वजस्याङ्को मकरस्तस्य प्रिया दयिता । ते तव, कुचकुम्भयोः स्थिता सेयं मकरी विस्तारयशसस्तयोरेव परीणाहकीर्तेः प्रशस्तिः स्तुतिवर्णावळिरस्तु ॥

शारीमिति ॥ यत्र स नलः, कयापि । कितवया इति शेषः । हे सखि, एनां चरन्तीं भ्रमन्तीं, शारीमक्षोपकरणं दारुविकारं, शारिकाख्यां शकुन्तिकामित्यर्थान्तरेण शकुन्तिकाया भयोत्पत्तिः । 'शारी त्वक्षोपकरणे तथा शकुनिकान्तर' इति विश्वः । मारय प्रहर । इति अक्षदाये अक्षाः पाशकाः । 'अक्षास्तु देवकाः पाशकाश्च त' इत्यमरः । तेषां सम्बन्धी दायो दानम् । 'दायो दाने यौतकादिधने वित्ते च पैतृक' इति वैजयन्ती । तस्मिन् कथिते स्वघाते आत्ममारणे, भ्रमेण भ्रान्त्या, भीरोर्भीतायाः शार्याः शारिकायाः, काक्का विकृतस्वरेण उत्थः उत्थितः, साकूतः भावगर्भो हसो हासो यस्य सः, "स्वनहसोर्वा" इति विकल्पादप्प्रत्ययः । जज्ञे जातः ॥ ७१ ॥

भैमीति ॥ यत्र सभायां, नलो भैमीसमीपे ताम्बूलस्य जाम्बूनदहंसो हिरण्मयहंसाकारः करकः तस्य लक्ष्मीं निरीक्ष्य, कृतः प्रियायाः भैम्या दूत्यमेव महोपकारो येन तस्मिन् मराले हंसे, मोहस्य भ्रमस्य द्रढिमानं दार्ढ्यं, ऊहे ऊढवान् । वहेः कर्तरि लिट् । "वचिस्वपि" इत्यादिना सम्प्रसारणम् ॥ ७२ ॥

तस्मिन्नियं सेति सखीसमाजे नलस्य सन्देहमथ व्युदस्यन्।
अपृष्ट एव स्फुटमाचचक्षे स कोऽपि रूपातिशयस्स्वयं ताम्॥ ७३

भैमीविनोदाय मुदा सखीभिस्तदाकृतीनां भुवि कल्पितानाम्।
नातर्कि मध्ये स्फुटमप्युदीतं तस्यानुबिम्बं मणिवेदिकायाम्॥

हुताशकीनाशजलेशदूतीर्निराकरिष्णोः कृतकाकुयाच्ञाः।
भैम्या वचोभिस्स निजां तदाशां न्यवर्तयद्दूरमपि प्रयाताम्॥ ७५

तस्मिन्निति॥ अथ सभायलोकनानन्तरं तस्मिन् सखीसमाजे नलस्य सन्देहं का वात्र भैमीति संशयं व्युदस्यन्, स प्रसिद्धः कोऽपि रूपातिशयः सौन्दर्यविशेषः। स्वयमपृष्ट एव तां भैमीं, सा भैमी इयमिति स्फुटमाचचक्षे। आचख्यौ। विश्वातिशायिसौन्दर्यसाक्षात्कारादियं दमयन्तीति निश्चिकायेत्यर्थः॥

भैमीति॥ भैम्या विनोदार्थमौत्सुक्यापनोदाय मुदा कौतुकेन, सखीभिर्भुवि भूतले, कल्पितानां तस्य नलस्याकृतीनां प्रतिकृतीनां मध्ये मणिवेदिकायां स्फुटमुदीतमपि तस्य नलस्य अनुबिम्बं नातर्कि न तर्कितम्। तत्रापि स्वकल्पिताकृतिसाम्यादिति भावः। अत एव सामान्यालङ्कारः। तेन च भ्रान्तिमान् व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः॥ ७४॥

हुताशेति॥ कृताः काका याच्ञाः प्रार्थना याभिस्ताः चित्तचालनचतुरोक्तीरित्यर्थः। हुताशकीनाशजलेशाः वह्नियमवरुणाः। 'प्रेतपतिः पितृपतिश्च कीनाश' इति हलायुधः। तेषां दूतीः निराकरिष्णोः परिहरन्त्याः। "अलं कृञ्" इत्यादिना इष्णुच्प्रत्ययः। "न लोक" इत्यादिना षष्ठीप्रतिषेधाद्द्वितीया। भैम्याः वचोभिः स नलो दूरं प्रयातां इन्द्रादिकपटेन लुप्तप्रायामपि निजां स्वकीयां तदाशां भैमीतृष्णां न्यवर्तयत् निवर्तितवान्। पुनस्तत्प्रत्याशामकार्षीदित्यर्थः॥

विज्ञप्तिमन्तस्सभयस्स भैम्यां मध्येसभं वासवशम्भ (म्ब) लीयाम् ।
सम्भावयामास भृशं कृशाशस्तदालिवृन्दैरभिनन्द्यमानाम् ॥ ७६॥
लिपिर्न दैवी सुपठा भुवीति तुभ्यं मयि प्रेषितवाचिकस्य ।
इन्द्रस्य दूत्यां रचय प्रसादं विज्ञापयन्त्यामवधानदानम् ॥ ७७ ॥
सलीलमालिङ्गनयोपपीडमनामयं पृच्छति वासवस्त्वाम् ।
शेषस्त्वदाश्लेषकथाविनिद्रैस्तद्रोमभिस्सन्दिदिशे भवत्यै ॥ ७८ ॥

विज्ञप्तिमिति ॥ स नलो मध्येसभं सभाया मध्ये "पारे मध्ये षष्ठ्या वा" इत्यव्ययीभावे नपुंसकह्रस्वत्वम् । तदालिवृन्दैः भैमीसखीसङ्घैरभिनन्द्यमानां, वासवशम्भलीयां इन्द्रदूतीसम्बन्धिनीं, कामिनोः संधात्री शम्बली। 'कुट्टनी शम्बली समे' इत्यमरः । भैम्यां विषये विज्ञप्तिं वक्ष्यमाणां विज्ञापनां अन्तः सभयः इन्द्रगौरवादङ्गीकरिष्यतीति भिभ्यदेवेत्यर्थः । अत एव कृशाशः शिथिलभैमी प्राप्त्याशश्च सन् । भृशं सम्भावयामास ॥ ७६ ॥

लिपिरिति ॥ दैवी लिपिर्दैवलिपिः । भुवि भूलोके, सुपठा पठितु शक्या "ईषद्दुः" इत्यादिना खलप्रत्ययः। नेति हेतोस्तुभ्यं, व्याहृतार्थो वाग्वाचिकं, सन्देशवाक्यम् । 'सन्देशवाग्वाचिकं स्यात्' इत्यमरः । "वाचो व्याहृतार्थायाम्" इति ठक् । तत्प्रेषितं येन तस्य इन्द्रस्य दूत्यां मयि विज्ञापयन्त्याम् । अवधानस्यैकाग्र्यस्य दानमेव प्रसादं रचय अनुग्रहं कुरु ॥ ७७ ॥

सलीलमिति ॥ हे भैमि, वासवस्त्वां सलीलं सविलास, आलिङ्गनया आलिङ्गनेन । आङ्पूर्वाल्लिङ्गयतेश्चौरादिकाद्युच् । उपपीडमुपपीड्य गाढमालिङ्ग्य । "सप्तम्यां चोपपीड" इत्यत्र चकारात्तृतीयोपपदे णमुल्प्रत्ययः । "तृतीयाप्रभृतीन्यन्यतरस्याम्" इति विकल्पादसमासः । अनामयं पृच्छति । "क्षत्रबन्धुमनामयम्" इति स्मरणादिति भावः । शेषः कार्यशेषस्तु त्वदाश्लेषकथया पूर्वोक्तत्वदालिङ्गनप्रसङ्गेन विनिद्रैर्हर्षितैस्तस्येन्द्रस्य रोमभिर्भवत्यै संदिदिशे सन्दिष्टः । कर्मणि लिट् । त्वदालिङ्गनप्रार्थनैवानन्तरं वक्तव्यः कार्यशेषोऽपीति भावः ॥ ७८ ॥

य: प्रेर्यमाणोऽपि हृदा मघोनस्त्वदर्थनायां ह्रियमापदागः ।
स्वयंवरस्थानजुषस्तमस्य बधान कण्ठं वरणस्रजैव ॥ ७९ ॥

नैनं त्यज क्षीरधिमन्थनाद्यैरस्यानुजायोद्गमितामरैः श्रीः ।
अस्मै विमथ्येक्षुरसोदमन्यां श्राम्यन्तु नोत्थापयितुं श्रियं ते ॥ ८० ॥

लोकस्रजि द्यौर्दिवि चादितेया अप्यादितेयेषु महान्महेन्द्रः ।
किंकर्तुमर्थी यदि सोऽपि रागाज्जागर्ति कक्ष्या किमतः परापि ॥

य इति ॥ हे भैमि, मघोनः इन्द्रस्य यः कण्ठस्त्वदर्थनायां विषये हृदा प्रेर्यमाणोऽपि ह्रियमेवागोऽपराधमापत् । हीनस्याधिकं प्रति याच्ञासङ्कोचेऽप्यपराध एवेति भावः । स्वयंवरस्थानजुषः स्वयंवरमागतस्य अस्येन्द्रस्य तमपराधिनं कण्ठं वरणस्रजा भर्तृवरणमालिकया त्वं बधान । ईदृशापराधिनामीदृग्बन्ध एव दण्ड इति भावः । सर्वथा लज्जां विहाय प्रार्थनां कुर्वतो महेन्द्रस्य मनोरथपूरणं कार्यमिति तात्पर्यार्थः ॥ ७९ ॥

नेति ॥ हे भैमि, एनमिन्द्रं, न त्यज । तथा हि, यैरमरैः अस्येन्द्रस्य अनुजाय उपेन्द्राय । तादर्थ्ये चतुर्थी । क्षीराणि धीयन्तेऽस्मिन्निति क्षीरधिः क्षीरोदधिः । "कर्मण्यधिकरणे च" इति किप्रत्ययः । तस्य मन्थनात् मथनादुपायात्, मन्थतेर्भावादिकस्योदित्वान्नुमागमः । श्रीः रमा उद्गमिता उत्थापिता । ते अमराः अस्मै इन्द्राय । पूर्ववच्चतुर्थी । इक्षुरस एवोदकं यस्य तं इक्षुरसोदनामाब्धिं "उदकस्योदः संज्ञायाम्" इत्युदादेशः । विमथ्य मथित्वा [illegible] उत्थापयितुं न श्राम्यन्तु न प्रयस्यन्तु । द्वितीयया श्रिया त्वयैव उपेन्द्रवदिन्द्रस्यापि लक्ष्मीपतित्वे तयोरवैषम्याय देवतानां लक्ष्म्यन्तरसम्पादनप्रयासो स्यादिति भावः । अत्रामराणां लक्ष्म्यन्तरोत्पादनप्रयत्नासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ८० ॥

लोकेति ॥ लोकस्रजि स्वर्गादिलोकपङ्क्तौ द्यौः स्वर्गो महती । दिवि अदित्या अपत्यानि पुमांसः आदितेयाः देवाः, महान्तः । कृदिकाराद्ङीषन्तात्

पदं शतेनाप मखैर्यदिन्द्रस्तस्मै स ते याचनचाटुकारः ।
कुरु प्रसादं तदलं कुरुष्व स्वीकारकृद्भ्रूनटनक्रमेण ॥ ८२ ॥

मन्दाकिनीनन्दनयोर्विहारे देवे भवेद्देवरि माधवे च ।
श्रेयश्श्रियां यातरि यच्च सख्यां तच्चेतसा भाविनि भावय त्वम् ॥

स्त्रीभ्यो ढक् । आदितेयेष्वपि महेन्द्रो महान् । स महेन्द्रोऽपि रागात् किंकर्तुं सेवितुमर्थी इच्छुर्यदि । किंशब्दस्यास्य सर्वादिपठितस्य निपातितत्वाद्धातोः प्राक् प्रयोगः । अर्थयतेरिच्छार्थत्वात् समानकर्तृकेषु तुमुन् । अतोऽस्मादिन्द्रसेव्यत्वात् परा कक्ष्यापि उत्कृष्टावस्था च । जागर्ति स्फुरति किं । न जागर्तीत्यर्थः । अत्र लोकादिषु पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्कर्षोक्तेः सारालङ्कारः । 'उत्तरोत्तरमुत्कर्षः सार' इति लक्षणात् ॥ ८१ ॥

पदमिति ॥ इन्द्रः शतेन मखैः मखशतेन यत्पदमिन्द्रत्वलक्षणं स्थानमाप प्राप । स इन्द्रस्तस्मै पदाय तत्पदस्वीकारायेत्यर्थः । ते तव याचनेन प्रार्थनया चाटुकारः प्रियंवदः । जात इति शेषः । न शब्दश्लोकेत्यादिना टप्रत्ययनिषेधात् कर्मण्यण् । प्रसादमनुग्रहं कुरु । तदैन्द्रं पदं स्वीकारकृता अङ्गीकारव्यञ्जकेन भ्रूनटनक्रमेण भ्रूविक्षेपव्यापारेण, अलं कुरुष्व ॥ ८२ ॥

मन्दाकिनीति ॥ भावयतीति भाविनि विचारचतुरे भैमि । मन्दाकिनीनन्दयोर्विहारे क्रीडायां माधवे देवे उपेन्द्रे देवरि देवरे भर्तृभ्रातरि सति । 'स्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ' इत्यमरः । "दिवो ऋन्" इति ऋन्प्रत्ययः । श्रियां श्रीदेव्याम् । यतत इति यातरि । देवृभार्यायाम् । 'भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्' इत्यमरः । "यतेर्वृद्धिश्च" इति तृन्प्रत्ययः । सख्यां सख्याश्च यच्छ्रेयो महोत्कर्षः भवेत् । तत्त्वं चेतसा बिभावय विचारय । अयाचितोपनतं महच्छ्रेयो न परिहर्तव्यमित्यर्थः । अत्र नन्दनविहारक्रियायाः माधवदेवकत्वश्रीयातृकत्वगुणयोश्च सामस्त्येन यौगपद्यात् समुच्चयालङ्कारभेदः । "गुणक्रियायौगपद्यं समुच्चय उदाहृतः" इति लक्षणात् ॥ ८३ ॥

रज्यस्व राज्ये जगतामितीन्द्राद्याच्ञाप्रतिष्ठां लभसे त्वमेव ।
लघूकृतस्त्वं बलियाचनेन तत्प्राप्तये वामनमामनन्ति ॥ ८४ ॥

यानेव देवान्नमसि त्रिकालं न तत्कृतघ्नीकृतिरौचिती ते ।
प्रसीद तानप्यनृणान्विधातुं पतिष्यतस्त्वत्पदयोस्त्रिसन्ध्यम् ॥ ८५ ॥

इत्युक्तवत्या निहितादरेण भैमीगृहीता मघवत्प्रसादः ।
स्रक्पारिजातस्य ऋते नलाशां वासैरशेषामपुपूरदाशाम् ॥ ८६ ॥

रज्यस्वेति ॥ हे भैमि, जगतां राज्ये, त्रैलोक्याधिपत्ये, रज्यस्व अनुरक्ता भव । प्रार्थनायां लोट् । रञ्जेः स्वरितेत्त्वादात्मनेपदम् । इत्येवंरूपां याच्ञां प्रार्थनामेव प्रतिष्ठां गौरवमिन्द्रात्त्वमेव लभसे । तथा हि, तस्य त्रैलोक्य-राज्यस्य प्राप्तये लाभाय बलेर्वैरोचनस्य याचनेन लघूकृतमल्पीकृतं, स्वमात्मा गेन तं विष्णुमपीति शेषः । तं वामन ह्रस्वं लघु चामनन्ति । यदर्थं विष्णोरपि याच्ञालाघवं प्राप्तम् । तदादाय तुभ्यं दीयते देवेन्द्रेणेत्यहो ते भागधेयमित्यर्थः । व्यतिरेकेण दृष्टान्तालङ्कारः ॥ ८४ ॥

यानिति ॥ हे भैमि, यानेव देवानिन्द्रादीन् । त्रयः काला यस्मिन् कर्मणि तत् त्रिकालं, यथा तथा । नमसि त्रिसन्ध्यं नमस्करोषीत्यर्थः । तेषां देवानां कृतघ्नीकृतिस्तदीयप्रत्युपकारपरिहारेण कृतघ्नकरणं, ते तव, औचिती, औचित्यं न । तिसृणां सन्ध्यानां समाहारस्त्रिसन्ध्यं, सन्ध्यात्रयेऽपीत्यर्थः । अत्यन्तसंयोगे द्वितीया । "वा टाबन्त" इति नपुंसकत्वम् । त्वत्पदयोः पतिष्यतः नमस्करिष्यतः तान् देवानप्यनृणान् विधातुं, प्रतिप्रणामस्वीकारेण अनृणान् कर्तुं प्रसीद । तान् वृणीष्वेत्यर्थः ॥ ८५ ॥

इतीति ॥ इतीत्थमुक्तवत्या शक्रदूत्या । आदरेण निहिता समर्पिता । भैम्या गृहीता स्वीकृता मघवतः प्रसादोऽनुग्रहभूता । न त्ववतंसत्वेन अभिसंहिते[illegible] भावः । पारिजातस्य स्रङ्मालिका नलस्याशां तृष्णां दिशं च ऋते विना

आर्ये विचार्यालमिहेति कापि योग्यं सखि स्यादिति काचनापि ।
ओंकार एवोत्तरमस्तु वस्तु मङ्गल्यमत्रेति च काप्यवोचत् ॥८७॥
अनाश्रवा वः किमहं कदापि वक्तुं विशेषः परमस्ति शेषः ।
इतीरिते भीमजया न दूतीमालिङ्गदालीश्च मुदामियत्ता ॥ ८८ ॥
भैमीं च दूत्यं च न किंचिदापमिति स्वयं भावयतो नलस्य ।
आलोकमात्राद्यदि तन्मुखेन्दोरभून्न भिन्नं हृदयारविन्दम् ॥ ८९ ॥

तस्यास्तस्य (नलस्य) विपरीतशङ्काकरत्वादिति भावः । 'आशा तृष्णादिशोः' इति विश्वः । यद्यपि, "अन्यारादितरर्ते" इति ऋतेशब्दयोगात् पञ्चम्येव विहिता । तथापि मतान्तरे द्वितीयाप्यस्तीत्याहुः । तथा, "फलति पुरुषाराधनमृते" इति प्रयोगश्च । अशेषामाशां दिशम् । सर्वा अपीत्यर्थः । जातावेकवचनम् । वासैर्निजवासनाभिरपुपूरत् पूरितवती । पु पूरणे इति चौरादिकस्य धातोरल्लोपित्वात् "नाग्लोपिशास्वृदिताम्" इत्युपधाह्रस्वनिषेधः । अभ्यासह्रस्वः । द्वयोरप्याशयोरभेदाध्यवसायाद्विनोक्तिनिर्वाहः ॥ ८६ ॥

आर्ये इति ॥ आर्ये भैमि, इहेन्द्रवरणे विचार्य अलम् । विचारो न कर्तव्य इति कापि सखी अवोचत् । सखि भैमि, योग्यमिदं युक्तं स्यादिति काचनाप्यवोचत् । अत्र ओंकारोऽङ्गीकार एव मङ्गल्यमुत्तरमुत्तररूपं वस्त्वस्त्विति काप्यवोचत् ॥ ८७ ॥

अनाश्रवेति ॥ हे सख्यः, अहं कदापि वो युष्माकं, अनाश्रवा अवचनकारिणी किं, परं किंतु वक्तुं विशेषः शेषोऽस्ति । किंतु, वक्तव्यशेषः कश्चिदस्तीत्यर्थः । इति भीमजया भैम्या, ईरिते उक्ते सति दूतीमिन्द्रशम्बलीमालीर्भैमीसखीश्च मुदामियत्ता मितिर्नालिङ्गन्न प्रापत् । स्वोक्तमङ्गीकृत्य तत्र किंचिद्वरदानमपेक्षत इति भ्रान्त्या महान्तमानन्दमविन्दन्तेत्यर्थः ॥ ८८ ॥

भैमीति ॥ भैमीश्च दूत्यश्च किंचित्किंचन तयोरेकम् । नापं न प्रापम् । आप्नोतेरङि मिप् । स्त्रीरत्नलाभो मा भूत्, परोपकारोऽपि न सिद्ध इत्यर्थः । इति

ईषत्स्मितक्षालितसृक्किभागा दृक्संज्ञया वारिततत्तदालिः ।
स्रजा नमस्कृत्य तयैव शक्रं तां भीमभूरुत्तरयाञ्चकार ॥ ९० ॥
स्तुतौ मघोनस्त्यज साहसिक्यं वक्तुं कियत्तं यदि वेद वेदः ।
वृथोत्तरं साक्षिणि हृत्सु नृणामज्ञातृविज्ञापि ममापि तस्मिन् ॥९१

स्वयमात्मनि भावयतो भैमीचित्तचलनभ्रान्त्या चिन्तयतो नलस्य, हृदयमेवारविन्दं, तन्मुखेन्दोः भैमीमुखचन्द्रस्यालोकमात्रात् दर्शनमात्रात् प्रकाशमात्राच्च । 'आलोको दर्शनोद्योतौ' इत्यमरः । भिन्नं विदीर्णं विकसितञ्च नाभूद्यदि नाभूत् किम् । तदा तन्मुखदर्शनादनया विश्वास्य हतोऽस्मीति विदीर्णहृदयोऽभूदेवेत्यर्थः । इन्दुप्रकाशात् कथमरविन्दविकास इति विरोधश्च ध्वन्यते ॥ ८९ ॥

ईषदिति ॥ भीमभूः भैमी, ईषत्स्मितेन मन्दहासेन क्षालितौ धौतौ सृक्किणी ओष्ठप्रान्तावेव भागौ यया सा सती । 'प्रान्तावोष्ठस्य सृक्किणी' इत्यमरः । दृक्संज्ञयैव वारिता निषिद्धास्तास्ताः पूर्वोक्तविरुद्धप्रलापिन्यः आलयः सख्यः, यया सा च सती । तयेन्द्रदूतीदत्तया स्रजा सहैव । "वृद्धो यूना" इति सूत्रकारप्रयोगादेव ज्ञापकात् सहशब्दाप्रयोगेऽपि सहार्थे तृतीया । शक्रं नमस्कृत्य, स्रजं शक्रञ्च नमस्कृत्येत्यर्थः । न तु तामवतंसीकृत्य । तत्र नलस्य जीवातुरिति भावः । तामिन्द्रदूतीमुत्तरयाञ्चकार उत्तरमाचष्ट । "तत्करोति तदाचष्टे" इति णिच् ॥ ९० ॥

स्तुताविति ॥ हे दूति, मघोन इन्द्रस्य स्तुतौ विषये साहसिक्यं साहसमविमृश्यकारित्वं त्यज, न स्तुहीत्यर्थः । कुतः अशक्यत्वादित्याह । तं शक्रं कियदल्पं वक्तुं वेदयतीति वेदः, श्रुतिरेव वेद वेत्ति, नान्यः । अतः स्तुतेर्विरमेति भावः । तर्हि किमस्योत्तरं तत्राह । नृणां हृत्सु विषये साक्षिणि साक्षिभूते "साक्षात् द्रष्टरि संज्ञायाम्" इति इनिप्रत्ययः । तस्मिन्मघोनि अज्ञातृनज्ञान् विज्ञापयति विबोधयतीति तथोक्तम् । असम्बन्[illegible] वृथा । अज्ञस्योत्तराकाङ्क्षा न सर्वज्ञस्येति भावः ॥ ९१ ॥

आज्ञां तदीयामनु कस्य नाम नकारपारुष्यमुपैतु जिह्वा ।
प्रह्वा तु तां मूर्ध्नि निधाय मालां बालापराध्यामि विशेषवाग्भिः ॥

तपःफलत्वेन हरेः कृपेयमिमं तपस्येव जनं नियुङ्क्ते ।
भवत्युपायं प्रति हि प्रवृत्तावुपेयमाधुर्यमधैर्यसज्जि ॥ ९३ ॥

शुश्रूषिताहे तदहं तमेव पतिं मुदेऽपि व्रतसम्पदेऽपि ।
विशेषलेशोऽयमदेवदेहमंशागतं तु क्षितिभृन्नयेह ॥ ९४ ॥

तथाप्यविनयपरिहाराय किञ्चिद्विज्ञापयामीत्याह—**आज्ञामिति** ॥ तदीया-मैन्द्रीमाज्ञामनु तामुद्दिश्य कस्य नाम जिह्वा नकारोनुच्चारणमेव पारुष्यमुपैतु प्रतिषेधरौक्ष्यं भजेत् । न कोऽपि तदाज्ञोल्लङ्घनसाहसिकोऽस्तीत्यर्थः । किंतु, बाला शिशुरहं प्रह्वा नम्रा सती तामाज्ञामेव मालां मूर्ध्नि निधाय, विशेषवाग्भि-रतिवाग्भिरपराध्यामि अपराधं करोमि । स च बालचापलात् सोढव्य इत्यर्थः ॥

तप इति ॥ तपःफलत्वेन इन्द्रोपासनारूपस्य तपसः फलत्वेनोपलक्षिता फलभूतेत्यर्थः । इयं मत्परिजिघृक्षारूपा कृपा हरेरिन्द्रस्य । इमं जनं मां तपस्येव पुनरपीन्द्रोपासनायामेव नियुङ्क्ते प्रेरयति । "स्वराद्यन्तोपसृष्टादिति वक्तव्यम्" इत्यात्मनेपदम् । ननु महदेतत्फलं प्राप्तं किं तपसेत्याशङ्क्य, सत्यम् तदेव स्वादु कर्तुमित्याह । **भवतीति** ॥ हि यस्मादुपायं प्रति प्रवृत्तौ साधनगोचरप्रवृत्तौ विषये उपेयस्य साध्यस्य माधुर्यं स्वादुत्वमेव, अधैर्यमस्थैर्यं सञ्जयति कारयतीत्यधैर्य-सज्जि भवति । पुनः साधनप्रवृत्तिचापलं कारयतीत्यर्थः । सिद्धान्तस्योपस्कार-=(उपदश) प्रवृत्तिकल्पेयं प्रवृत्तिरिति भावः ॥ ९३ ॥

फलितमाह—**शुश्रूषिताह इति** ॥ तत्तस्मादर्थित्वादहं तमिन्द्रमेव पतिं शुश्रूषिताहे सेविष्ये । 'शुश्रूषा श्रोतुमिच्छायां परिचर्यावधानयोः' इति विश्वः । "ज्ञाश्रुस्मृदृशां सनः" इति शृणोतेः सन्नन्तात्तङि लुट् । तासः सकारस्य हकारः । किंतु, मुदेऽपि सन्तोषाय च व्रतसम्पदेऽपि पातिव्रत्यसम्पत्त्यर्थं च क्षिति-

अश्रौषमिन्द्रादरिणी गिरस्ते सतीव्रतातिप्रतिलोमतीव्राः ।
स्वं प्रागहं प्रादिषि नामराय किं नाम तस्मै मनसा नराय ॥ ९५

तस्मिन्विमृश्यैव धृते हृदैषा नैन्द्री दया मामनुतापिकाभूत् ।
निर्वातुकामं भवसम्भवानां धीरं सुखानामवधीरणेव ॥ ९६ ॥

भृत्तया राजत्वेन इह कस्मिंश्चिन्नरे अंशेन मात्रया आगतमवतीर्णम् । "अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः" इति स्मरणात् । अत एव, अदेवदेहं देवदेहरहितं मानुषविग्रहं सन्तम् । न तु साक्षादिति शेषः (तं शुश्रूषिताहं इति पूर्वेणान्वयः) । अयं विशेषलेशोऽल्पीयान् भेदः । स च सोढव्यः, अन्यथा मे व्रतलोपस्स्यादिति भावः ॥ ९४ ॥

कथं व्रतलोपस्तदाह—**अश्रौषमिति** ॥ हे इन्द्रदूति सतीव्रतस्य पतिव्रताधर्मस्य अतिप्रतिलोमाः अत्यन्तप्रतिकूलाः । अत एव, तीव्रा दुःश्रवाश्च । ते गिरः इन्द्रे आदरिणी आदरवती अश्रौषं, इन्द्रो महती देवतेति भयभक्तिभ्यामश्रौषम् । न तु, रागादिति भावः । कथं तर्हि तमेव पतिं भजिष्यामीत्युक्तं तत्राह । प्राक् पूर्वमहं स्वमात्मानं, अमराय देवतात्मने तस्मै इन्द्राय न प्रादिषि न प्रादां नाम । किंतु, नराय नररूपिणे रलयोरभेदान्नलरूपाय च तस्मै मनसा प्रादिषि । ददातेर्लुङि तङ् । "स्थाघ्वोरिच" इतीकारः । अतः साक्षादिन्द्रभजने मम व्रतलोपः स्यादेवेत्यर्थः ॥ ९५ ॥

तस्मिन्निति ॥ तस्मिन् नरे हृदा हृदयेन, विमृश्यैव धृते सति इदमेव साध्विति सम्यङ्निश्चित्यैव प्रवृत्ते सतीत्यर्थः । एषा ऐन्द्री, दया परिजिघृक्षालक्षणा कृपा । निर्वातुकामं मोक्तुकामं, इदमेव साध्विति निश्चित्य मोक्षे प्रवृत्तमित्यर्थः । 'मुक्तिः कैवल्यनिर्वाण' इत्यमरः । धीरं निर्विकारचित्तं, विद्वांसम् । भवसम्भवानां सुखानां, अवधीरणा सांसारिकसुखसन्यास इव ममानुतापिका हा कष्टमसाधुकृतमिति मम पश्चात्तापकारिणी नाभूत् । "अकेनोर्भविष्यदाधमर्ण्ययोः" इति षष्ठीप्रतिषेधात् कर्मणि द्वितीया ॥ ९६ ॥

वर्षेषु यद्भारतमार्यधुर्याः स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु ।
तत्रास्मि पत्युर्वरिवस्ययाहं शर्मोर्मिकिर्म्मीरितधर्मलिप्सुः ॥ ९७ ॥

स्वर्गे सतां शर्म परं न धर्मा भवन्ति भूमाविह तच्च ते च ।
इष्टयापि तुष्टिस्सुकरा सुराणां कथं विहाय त्रयमेकमीहे ॥ ९८ ॥

साधोरधि स्वः खलु गामिताधोगामी स तु स्वर्गमितः प्रयाणे ।
इत्यायतिं चिन्तयतो हृदि द्वे द्वयोरुदर्कः किमु शर्करे न ॥ ९९ ॥

विमृश्य कृतमित्युक्तमथैनं विमर्शप्रकारमेव श्लोकचतुष्टयेनाह—**वर्षेष्वित्यादि** ॥ आर्यधुर्या श्रेष्ठाः, आश्रमेषु ब्रह्मचर्यादिषु चतुर्षु गार्हस्थ्यं गृहस्थाश्रममिव । वर्षेष्विलावृतादिषु नवसु यद्भारतं वर्षं स्तुवन्ति प्रशंसन्ति । तत्र भारतवर्षे अहं पत्युर्वरिवस्यया शुश्रूषया । 'वरिवस्या तु शुश्रूषा' इत्यमरः । वरिवस्यतेः क्यजन्तात् "अ प्रत्ययात्" इति अकारप्रत्यये टाप् । शर्मोर्मिभिः सुखपरम्पराभिः, किर्मीरितं चित्रितं तत्सहचरधर्मं लिप्सुर्लब्धुमिच्छुरस्मि । 'शर्मशातसुखानि च । चित्रकिर्म्मीरकल्माषशबलैताश्च कर्बुरे' इति चामरः ॥

ननु स्वर्गेऽपि सुखधर्मौ स्त इत्यत आह—**स्वर्गे इति** ॥ स्वर्गे सतां स्वर्गवासिनामित्यर्थः । शर्म परं सुखमेव (अस्ति) । धर्माः सुकृतानि न भवन्ति । इहास्यां भूमौ तच्छर्म च ते च धर्माश्च भवन्ति सम्भवन्ति । किञ्चेह इष्ट्या यागेन सुराणां तुष्टिरपि सुकरा सुसम्पाद्या । एवं सति कथं त्रयं शर्मधर्मतुष्टिरूपं विहायैकं सुखमीहे । न चैतत् प्रेक्षावत्कृत्यमिति भावः । तस्मात् स्वर्गादपि भूलोक एव श्लाघ्य इत्यर्थः ॥ ९८ ॥

इतोऽपि कारणात् भूलोक एव श्रेयानित्याह—**साधोरिति** ॥ किंच, साधोः सुकृतिनोऽपि स्वः स्वर्गादधोगामिता गमिष्यत्ता खलु । (साधुरपि कदाचिदधःपतत्येवेत्यर्थः ।) स साधुरितोऽस्मात् भूलोकात्, प्रयाणे तु स्वर्गगामी गमिष्यति । "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं

प्रक्षीण एवायुषि कर्मकृष्टे नरान्न तिष्ठत्युपतिष्ठते यः ।
बुभुक्षते नाकमपथ्यकल्पं धीरस्तमापातसुखोन्मुखं कः ॥ १०० ॥
इतीन्द्रदूत्यां प्रतिवाचमर्धे प्रत्युह्य सैषाभिदधे वयस्याः ।
किञ्चिद्विवक्षोल्लसदोष्ठलक्ष्मीजितापनिद्रद्दलपङ्कजास्याः ॥ १०१ ॥

विशन्ति" इति गीतावाक्यात् । "भविष्यति गम्यादयः" इति गामिशब्दस्य भविष्यदर्थता । "अकेनोः" इति षष्ठीप्रतिषेधात् कर्मणि द्वितीया । इतीत्थ-मायतिमुत्तरकालम् । 'उत्तरः काल आयतिः' इत्यमरः । हृदि चिन्तयतो विवेकिनः द्वयोः स्वर्भूलोकयोः उदर्के उत्तरफलम् । 'उदर्कः फलमुत्तरम्' इत्यमरः । द्वे शर्करे न किमु, शर्करे एवेत्यर्थः । एका शर्करा (इक्षुसम्भवा) शिला शकलप्राया, मृत्प्राया अपरापीक्षुविकारा । तत्र क्रमाद्द्वावप्युदर्कौ द्वे शर्करे, तत्कल्पावित्यर्थः । अत एव निदर्शनालङ्कारभेदः । 'शर्करा खण्डविकृतावुपला शर्करांशयोः' इति विश्वः ॥ ९९ ॥

प्रक्षीण इति ॥ किञ्च यो नाकः कर्मकृष्टे कर्मार्जिते आयुषि प्रक्षीणे सत्येव नरान् मनुष्यानुपतिष्ठते सङ्गच्छते । तिष्ठति सति नोपतिष्ठते । "उपा-द्देवपूजा" इत्यादिना सङ्गतिकरणे तङ् । आपाते प्रारम्भे, सुखोन्मुख सुखप्रवणं, न तु परिणाम इत्यर्थः । अत एव अपथ्यकल्प अपथ्यान्नसदृशं, तं नाकं, स्वर्गं धीरो धीमान्, को बुभुक्षते भोक्तुमिच्छति । अपथ्यान्नभोजनवदासन्न-मरणाधिकारः नाकभोगः कस्मै नाम रोचत इत्यर्थः ॥ १०० ॥

इतीति ॥ सैषा भैमी, इतीत्थमिन्द्रदूत्या विषये प्रतिवाचं प्रत्युत्तरं, अर्धे प्रत्युह्य मध्ये मध्ये निरुध्य, असमाप्यैवेत्यर्थः । "उपसर्गाद्ध्रस्व ऊहतेः", इति ह्रस्वः । किञ्चिद्विवक्षया यत्किञ्चिद्वक्तुमिच्छया, उल्लसतः स्फुरतः, ओष्ठस्य लक्ष्म्या शोभया जितमपनिद्रद्दलं विकसत्पत्रं यस्य तत् । अपनिपूर्वाद्द्रातेः शतृ-प्रत्ययः । तच्च तत्पङ्कजञ्च तदिव आस्यं यासां ता वयस्याः सखीः, अभिदधे उवाच । दधातेः कर्तरि लिटि तङ् ॥ १०१ ॥

अनादिधाविस्वपरम्पराया हेतुस्रजस्स्रोतसि वेश्वरे वा ।
आयत्तधीरेष जनस्तदार्याः! किमीदृशः पर्यनुयुज्य कार्यः ॥ १०२

नित्यं नियत्या परवत्यशेषे कस्संविदानोऽप्यनुयोगयोग्यः ।
अचेतना सा च न वाचमर्हेद्वक्ता तु वक्त्रश्रमकर्म भुङ्क्ते ॥१०३॥

क्रमेलकं निन्दति कोमलेच्छुः क्रमेलकः कण्टकलम्पटस्तम् ।
प्रीतौ तयोरिष्टभुजोस्समायां मध्यस्थता नैकतरोपहासः ॥ १०४ ॥

अनादीति ॥ हे आर्याः, एष जनः अनादि यथा तथा, धाविन्याः प्रवहन्त्याः, स्वपरम्परायाः स्वदेहपरम्परायाः इत्यर्थः । तत्सम्बन्धिन्याः हेतुस्रजः हेतुभूतकर्मपरम्परायाः स्रोतसि प्रवाहे वा । बुद्धिः कर्मानुसारिणीति वचनात्, ईश्वरे वा । एष एव कारयितेति श्रुतेः । आयत्तधीः । न तु स्वाधीनबुद्धिरित्यर्थः। निरीश्वरसेश्वरमतभेदात् पक्षद्वयोक्तिः, तत्तस्मात्, ईदृशः परतन्त्रः एष जनः, पर्यनुयुज्योपालभ्य । किं कार्यः कारयितुं शक्यः । कारयतेरचो यत् । अतः स्वयमपि दैवपरतन्त्रा न पर्यनुयोज्येति भावः ॥ १०२ ॥

ननु दैवपारतन्त्र्येऽपि मा मूढः पर्यनुयोज्यः। विद्वांस्तु पर्यनुयोज्य एवेत्याशङ्क्य आह—**नित्यमिति** ॥ अशेषे जने नित्यं सर्वदा नियत्या दैवेन परवति परतन्त्रे सति संविदानो विद्वानपि । "समोगम्यृच्छि" इत्यादिना विदेरात्मनेपदम् । कः अनुयोगयोग्यः उपालम्भार्हः । विदुषापि नियतेरलङ्घ्यत्वादिति भावः। तर्हि नियतिरेव पर्यनुयुज्यताम् । तत्राह—अचेतना सा नियतिश्च वाचं पर्यनुयोगमत्राऽर्हेत् । अचेतनोपालम्भस्यारण्यरुदितकल्पत्वादिति भावः । तथाप्युपालम्भे दोषमाह । वक्ता अचेतनोपालब्धा तु वक्त्रस्य श्रमः श्रान्तिरेव, क्रियत इति कर्म वाग्व्यापारफलं तद्भुङ्क्ते । वाग्विग्लापनादन्यत्फलं न किञ्चिदस्तीत्यर्थः ॥ १०३ ॥

ननु सुरेन्द्रं विहाय नलस्वीकारे जगत्युपहास्यता स्यात्तत्राह—**क्रमेलकमिति** ॥ कोमलमिच्छुः कोमलेच्छुः मृद्वाहारी गजाश्वादिः । "न लोक"

गुणा हरन्तोऽपि हरेर्नरं मे न रोचमानं परिहारयन्ति ।
न लोकमालोकयथापवर्गात्त्रिवर्गमर्वाञ्चमसुञ्चमानम् ॥ १०५ ॥

आकीटमाकैटभवैरि तुल्यस्स्वाभीष्टलाभात् कृतकृत्यभावः ।
भिन्नस्पृहाणां प्रति चार्थमर्थं द्विष्टत्वमिष्टत्वमपव्यवस्थम् ॥ १०६ ॥

इत्यादिना षष्ठीप्रतिषेधान्मयूरव्यंसकादित्वाद्वितीयासमासः । क्रमेळकमुष्ट्रं निन्दति । 'उष्ट्रे क्रमेळकमयमहाङ्गा' इत्यमरः । कण्टकेषु लम्पटो लोलुपः क्रमेळकः । 'लोलुपं लोलुभं लोलं लम्पटं लालसं विदुः' इति हलायुधः । तं कोमलेक्षुं निन्दति । इष्टभुजोस्तयोर्द्वयोः प्रीतौ तुष्टौ समायां तत्र एकतरस्योपहासो मध्यस्थता माध्यस्थ्यं न । यस्य यदिष्टं तुष्टिकरं च तस्य तत्र प्रवृत्तौ सर्वस्याप्यात्मदृष्टान्तेन सन्तोष्टव्येऽप्युपहसन्तः स्वयमेवोपहास्या भवन्तीति भावः ॥ १०४ ॥

ननु नलादपि गुणाधिके हरौ कथमरुचिरत आह—**गुणा इति** ॥ सत्यं हरन्तोऽपि मनोहरन्तोऽपि हरेर्गुणाः मे मह्यं, "रुच्यर्थानां प्रीयमाणः" इति चतुर्थी । रोचमानं मनोहरं तं नरं न परिहारयन्ति न मार्जयन्ति । कुतः, अपवर्गान्मोक्षादर्वाञ्चमपकृष्टं, त्रिवर्गं धर्मार्थकामानमुञ्चमानमत्यजन्तं, लोकं नालोकयथ ? न पश्यथेति काकुः । न गुणमपेक्षते रागवृत्तिरिति भावः । दृष्टान्तालङ्कारः ॥ १०५ ॥

ननु महेन्द्रं प्राप्य कृतकृत्या भव, किं नलप्रार्थनया दुःखायसेऽत आह—**आकीटमिति** ॥ आकीटं कीटादारभ्य, आकैटभवैरि तत्पर्यन्तम् । उभयत्राप्यभिविधावव्ययीभावः । स्वाभीष्टलाभात् कृतकृत्यभावः, कृतार्थत्वाभिमानस्तुल्यः साधारणः । ममाप्यभीष्टलाभात् कृतकृत्यता नेन्द्रलाभादित्यर्थः । तर्हीन्द्र एवेष्यतां, नेत्यत आह । भिन्नस्पृहाणां भिन्नरुचीनां जनानामर्थमर्थं प्रत्यर्थम् । द्विष्टत्वमिष्टत्वञ्च द्वयमपगता व्यवस्था घटत्वपटत्वादिवत् प्रतिनियमो यस्य तदपव्यवस्थमव्यवस्थितम् । अपित्वापेक्षिकम् । तस्मादिन्द्रोऽपि मया नेष्यते कोदोष इत्यर्थः ॥ १०६ ॥

अग्राध्वजाग्रन्निभृतापदन्धुं बन्धुर्यदि स्यात् प्रतिबन्धुमर्हः ।
जोषं जनः कार्यविदस्तु वस्तु पृच्छया निजेच्छा पदवीं मुदस्तु ॥

इत्थं प्रतीपोक्तिमतिं सखीनां विलुप्य पाण्डित्यबलेन बाला ।
अपि स्वर्पतिमन्त्रिसूक्तिं दूतीं बभाषेऽद्भुतलोलमौलिम् ॥१०८॥

परेतभर्तुर्मनसैव दूतीं नभस्वतैवानिलसख्यभाजः ।
त्रिस्रोतसैवाम्बुपतेस्तदाशु स्थिरास्थमायां निरास्थम् ॥ १०९

अग्राध्वेति ॥ अग्रश्चासावध्वा चेति समानाधिकरणसमासः । अत एव अग्रहस्ताग्रग्रहादयोगुणगुणिनोर्भेदाभावादिति वामनः । तस्मिन्नग्राध्वनि पुरोमार्गे, जाग्रत् स्फुरन् आसन्न इति यावत् । स चासौ निभृता नियता आपदेवान्धुः कूपः । 'पुंस्येवान्धुः प्रहिः कूप' इत्यमरः । तं प्रतिबन्धुमर्हो निवारितुं शक्तो बन्धुः स्याद्यदि, स जनो बन्धुजनः, कार्यवित् कार्यज्ञोऽपि । प्रश्नपर्यन्तं जोषमस्तु तूष्णीमास्ताम् । न तु मां निवारयेदित्यर्थः । कुतस्तर्हि, ते कार्यविज्ञानं तदाह । मुदः श्रेयसः । पदवीं तु, निजेच्छैव पृच्छया प्रष्टव्या । सैव मे प्रवर्तिका नान्यः कश्चिदस्तीत्यर्थः । वस्तु, सत्यमथमेव परमार्थ इत्यर्थः । पृच्छेर्द्विकर्मकत्वादप्रधाने कर्मणि कृहलोर्ण्यत् ॥ १०७ ॥

इत्थमिति ॥ बाला भैमी, इत्थं सखीनां प्रतीपोक्तिमतिं प्रतिकूलोक्तिबुद्धिमित्थं पाण्डित्यबलेन प्रागल्भ्यावलम्बेन विलुप्य निषिध्य श्रुताः स्वर्पतिमन्त्रिणः शक्रसचिवस्य बृहस्पतेः सूक्तयो वाचो यया तामपि "अहरादीनां पत्यादिषु" इति रेफादेशः । अद्भुतेन, अहो बृहस्पतेरपि प्रगल्भेत्याश्चर्येण लोलमौलिं कम्प्रशिरसं शिरःकम्पयन्तीमित्यर्थः । दूतीं बभाषे ॥ १०८ ॥

परेतेति ॥ मनसैव आकर्षकेणेति शेषः । आगमनसाधनेनेत्यर्थः । एवं वायुगङ्गयोरपि द्रष्टव्यम् । परेतभर्तुः यमस्य दूतीं, नभस्वता वायुनैव अनिलसख्यभाजोऽग्नेर्दूतीं त्रिस्रोतसा गङ्गयैव अम्बुपतेर्वरुणस्य दूतीं स्थिरास्थं

भूयोऽर्थमेनं यदि मां त्वमात्थ तदा पदावालभसे मघोनः ।
सतीव्रतैस्तीव्रमिमं तु मन्तुमन्तः परं वज्रिणि मार्जितास्मि ॥११०

इत्थं पुनर्वागवकाशनाशान्महेन्द्रदूत्यामवयातवत्याम् ।
विवेश लोलं हृदयं नलस्य जीवः पुनः क्षीबमिव प्रबोधः ॥ १११

दृढाभिनवेशं यथा तथा [illegible] शीघ्रं आयातवतीं सतीं, तदा आगमनक्षण एव निरास्थं पर्यहार्ष, "[illegible]ख्यातिभ्योऽङ्" इत्यस्यतेर्लुङि च्लेरङादेशः । यमादिदूत्यो दूरादेव निरस्ताः इन्द्रगौरवात्त्वया एतावन्तं कालं समभाषीत्यर्थः । अत्र मनोवायुगङ्गानां क्रमाद्यमादिविधेयत्वेन तत्प्रियार्थं ताभिरेवातिवेगवतीभिरत्र आनीता (यमादीना दूत्यः) इत्युत्प्रेक्षार्थ. ॥ १०९ ॥

भूय इति ॥ हे शक्रदूति त्वं भूयः पुनरेनमर्थमिन्द्रं वृणीष्वेत्यमुमर्थं मामात्थ ब्रूषे यदि । "ब्रुवःपञ्चानाम्" इत्यादिना सिपस्थादेशे ब्रुव आहश्च । "आहस्थ" इति हकारस्य थकारादेशः । तदा मघोनः पदावङ्घ्री । 'पदङ्घ्रिश्चरणोऽस्त्रियाम्' इत्यमरः । आलभसे हिनस्सि स्पृशसि वा । वज्रिणि इन्द्रे विषये अन्तरन्तरङ्गे परं श्रेष्ठं, गुणत्वेन गृह्यमाणमित्यर्थः । इमं तीव्रं दुस्सहं मन्तुं निजाज्ञोल्लङ्घनापराधम् । 'आगोऽपराधो मन्तुश्च' इत्यमरः । सतीव्रतैः पतिव्रतानियमैः मार्जितास्मि मार्जिष्यामि । मृजेर्लुटि मिप् । पतिव्रताधर्मज्ञः सर्वज्ञो भगवान् मघवा मामस्मादपराधात्क्षमयतीत्यर्थः ॥ ११० ॥

इत्थमिति ॥ इत्थमुक्तप्रकारेण पुनर्वागवकाशनाशात् भूयोवचनावकाशनिवृत्तेः । इन्द्रदूत्यामवयातवत्यां गतायां नलस्य जीवोऽन्तरात्मा लोलं चलाचलं हृदयं क्षीबं मत्तम् । 'मत्ते शौण्डोत्कटक्षीबा' इत्यमरः । 'क्षीबृ मद' इति धातोः कर्तरि क्तः । अनुपसर्गात् फुल्लक्षीबकृशोल्लाघा इति निपातनात्साधुः। प्रबोधो विवेक इव पुनर्विवेश पुनर्जात इवाभूत् । तदा विशश्वास उच्छश्वास चेत्यर्थः ॥ १११ ॥

श्रवणपुटयुगेन स्वेन साधूपनीतं
दिगधिपकृपयात्तादीदृशासन्निधानात् ।
अलभत मधु बालारागवागुत्थमित्थं
निषधजनपदेन्द्रः पातुमानन्दसान्द्रः ॥ ११२ ॥

ीहर्ष कविराजराजिमकुटालङ्कारहीरस्सुतं
श्रीहीरस्सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
षष्ठः खण्डनखण्डतोऽपि सहजात् क्षोदक्षमे तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमद्भास्वरः ॥

श्रवणेति ॥ निषधानां जनपदानां, इन्द्रो नलो दिगधिपानां इन्द्रादीनां कृपया तिरोधानशक्त्यनुग्रहरूपया आत्तात् प्राप्तादीदृशासन्निधानादप्रकाशसान्निध्यात् स्वेन स्वकीयेन श्रवणपुटयुगेन साधूपनीतमर्पितमित्थमुक्तरीत्या बालाया भैम्याः रागवाग्भ्यः अनुरागवचनेभ्यः उत्था यस्य तत्तदुत्थ मधु क्षौद्रं, रसामृतमित्यर्थः । आनन्दसान्द्रः सुखमयः सन् पातुमलभत तत्पानं लब्धवानित्यर्थः । "शकधृष" इत्यादिना तुमुन्प्रत्ययः ॥ ११२ ॥

श्रीहर्षमिति ॥ श्रीहर्षमित्यादि सुगमम् । सहजात् सोदरात्, समानकर्तृकादित्यर्थः । खण्डनखण्डतः खण्डनखण्डनाख्यात् ग्रन्थात् । यद्वा खण्डनं नाम ग्रन्थः तदेव खण्डः इक्षुविकारः । 'स्यात् खण्डश्शकले चेक्षुविकारमणिदोषयोः' इति विश्वः । ततस्तस्मादपि क्षोदक्षमे सङ्घर्षणसहे षष्ठस्सर्गः, अगमत् समाप्त इत्यर्थः ॥ ११३ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहामहोपाध्यायकोलचल-
मल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने
षष्ठः सर्गः समाप्तः ।

				Rs.	As.	Ps.
[illegible]म्	...	...	...	[illegible]	4	0
[illegible]शतकम्	...	...	...	0	4	0
„ तिलकम्	...	...	...	0	1	0
श्री[illegible]चरितम्	...	...	...	2	8	0
सुभाषितनीवी	...	...	...	0	8	0
सूर्यशतकम् ...	...	...	...	0	6	0
स्तुतिकुसुमाञ्जली	...	...	...	3	0	0
सुरथोत्सवम्	...	...	...	0	14	0
वैराग्यशतकम्	...	...	...	0	5	0
विष्णुभक्तिकल्पलता	...	...	...	0	10	0
युधिष्ठिरविजयम्	...	...	...	1	8	0
हरविजयमहाकाव्य	...	...	...	5	4	0

गद्यकाव्यग्रन्था: । Prose Works.

ईसब्नीतिकथा—प्रथमभाग:		...	...	0	6	
„ द्वितीयभाग:		...	...	0	6	[illegible]
कथाशतकम्—(भारतीश्लोकत्रिशतीसहितम्)			...	0	7	[illegible]
कथाकुसुममञ्जरी—प्रथमभाग:		...	...	0	7	[illegible]
„ द्वितीयभाग:		...	...	0	6	[illegible]
„ तृतीयभाग:		...	...	0	6	[illegible]
कादम्बरी—मूलमात्र	...	...	...	2	0	[illegible]
„ सटीक	...	...	...	5	0	[illegible]
कथासरित्सागरम्	...	...	...	5	0	0

2.	रघुवंश—Vol. I. Text 1 to 10 ...	1	0	0
3.	,, सटीक—मल्लिनाथ	0	10	0
4.	,, ,, Large types ...	1	8	0
*5.	,, अरुणगिरिनाथव्याख्या—1-6 cantos Mangalodayam Edition...	2	0	0
6.	,, Sri Vani Vilas Edition ...	1	12	0
7.	,, English Translation ...	3	4	0
8.	,, विमर्श with map ...	1	2	0
9.	,, in Grandha—1-6 ...	0	6	0
10.	,, ,, 6-10 ...	0	4	0
11.	,, ,, 10-19 ...	0	12	0
12.	,, in Malayalam	1	8	0
13.	,, in Telugu—1-10 cantos ...	0	12	0
14.	,, Sanskrit with Ramakrishna-viloma Kavya	0	11	0
	रामोदन्तकाव्य in Grandha	0	1	0
	,, in Malayalam ...	0	2	0
	राक्षसकाव्य	0	1	0
	लघुकाव्यानि—(नीलकण्ठदीक्षितः) ...	0	12	0
	क्षेमभूपालचरितकाव्य	2	0	0
1.	शिशुपालवध (माघकाव्य)	2	0	0
2.	,, in Grandha	0	6	0
3.	,, ,, Glazed ...	0	8	0
4.	,, in Telugu	0	12	0
	शिवलीलार्णवम्	3	4	0

	Title			Rs.	As.	Ps.
	भट्टिकाव्यम्	...	...	2	8	0
1.	**भर्तृहरीशतकत्रयम्**–मूलमात्रम्	...	...	0	6	0
2.	,, सव्याख्या	..	...	0	12	0
3.	,, सुभाषितसार ...		...	0	1	6
4.	,, Eng. Translation—Nity and Vairagya Satakas		...	1	8	0
5.	,, in Grandha	..	..	0	6	0
6.	,, in Telugu	...	..	0	12	0
7.	,, in Malayalam	...	...	0	12	0
8.	,, ,, in Poetry ...			0	6	0
1.	**मेघदूतम्**—मूलमात्रम्	..	..	0	3	0
2.	,, सव्याख्या—काशी		..	0	3	6
3.	,, ,, मल्लिनाथ	.	.	0	6	0
4.	,, ,, ,, Eng. Notes		.	0	12	0
5.	,, ,, ,, Eng. Trans.		.	1	8	0
6.	,, ,, विशुद्ध	...	..	1	0	0
7.	,, in Grandha		...	0	3	0
8.	,, ,, Glazed		...	0	4	0
9.	,, in Telugu	...	...	0	12	0
10.	,, Tamil Translation		..	0	10	0
	मेघदूतविमर्श –with map	...	...	1	2	0
	यादवाभ्युदय –2 parts	...	...	3	4	0
	युधिष्ठिरविजयकाव्य	...	...	1	8	0
1.	**रघुवंश**—मूल (Precious Gem Booklet Series) any two cantos as 1 and 2 etc., till canto 19 each		...	0	3	0

1. कृष्णविलासकाव्यम्—[illegible]	...	[illegible]	[illegible]	[illegible]
2. „ in Grandha	...	[illegible]	[illegible]	[illegible]
3. „ in Malayalam	...	[illegible]	[illegible]	[illegible]
कृष्णविजयम्	...	0	12	[illegible]
कोकिलसन्देशम्	...	0	4	0
1. गीतगोविन्दम् (अष्टपदी) व्याख्यासहितम्	...	0	12	0
2. „ मूलमात्रम्	...	0	2	0
3. „ in Grandha	...	0	2	0
तटातकापरिणय in Malayalam	...	1	0	0
[illegible]कथासार	...	0	6	0
नलोदय—सटीक	...	0	12	0
„ in Telugu	...	0	12	0
1. नैषधीयमहाकाव्य—(1 to 6 cantos)—[illegible] Mallinatha's commentary	...	1	4	0
2. „ Calico Bound	...	1	8	0
3. „ Complete with Narayaniya		5	0	0
4. „ in Grandha—1 to 6 cantos.		0	6	0
[illegible]विजयम्	...	0	10	0
पातञ्जलचरितम्	...	0	4	0
„ in Grandha	...	0	8	0
1. पुष्पबाणविलासम्	...	0	3	0
2. „ in Grandha	...	0	3	0
3. „ in Malayalam	...	0	2	0
बालभारतम्	...	[illegible]	[illegible]	[illegible]

[illegible]

	गद्यत्रयम्	1	0	0
	चन्द्रापीडचरितम्	0	6	0
	पञ्चतन्त्रम्	1	0	0
	„ English Notes	2	8	0
	प्राचीनलेखमालः—प्रथमभागः	1	8	0
	„ द्वितीयभागः	1	8	0
	„ तृतीयभागः	1	8	0
	भोजप्रबन्ध	0	5	0
	„ in Grandha	0	3	0
1.	विक्रमार्कचरित्रम्	0	6	0
2.	„ परिष्कृत्य मुद्रितम्	0	6	6
3.	„ in Grandha	0	3	0
4.	„ „ Glazed ...	0	4	0
	विदुरनीति	0	6	0
	विजयिनि—A story adapted from Shakespeare ...	0	6	6
	वासवदत्ता	2	0	0
	„ in Grandha	0	8	0
	हर्षचरित	2	0	0
1.	हितोपदेश	0	8	0
2.	„ English Notes	0	10	0
3.	„ „ Translation ...	2	0	0
4.	„ in Grandha	0	4	0
	दशकुमारचरितम्	1	8	0
	संस्कृतप्रवेशिनी	0	6	0